GL SANS 294.59214
SHA V.1

125119
LBSNAA

श्री राष्ट्रीय प्रशासन अकादमी
Academy of Administration
मसूरी
MUSSOORIE

पुस्तकालय
LIBRARY

अवाप्ति संख्या 125119
Accession No. ~~128896~~
वर्ग संख्या GL Sans 294.59214
Class No.
पुस्तक संख्या SHA शतप
Book No.
V1 भाग 1

THE
KASHI SANSKRIT SERIES.
(HARIDĀS SANSKRIT GRANTHAMĀLĀ)
127

(Veda Section, No. 7)

THE

Catapatha Brāhmaṇa

OF THE WHITE YAJURVEDA

IN THE MĀDHYANDINA RECENSION

Edited by

VEDAVIS'ĀRADA MĪMĀMSĀKESARI

Pandit A. CHINNASWAMI S'ĀSTRI

VICE-PRINCIPAL OF THE COLLEGE OF THEOLOGY

Prof. of Mīmāmsā & Dharmāsas'trā B. H. U.

AND

MIMĀMSĀCHĀRYA

Pandit Pattābhirāma S'āstry

Asst. Professor of Mīmāmsā B. H. U.

PUBLISHED BY

JAYA KRISHNA DÂS HARIDÂS GUPTA

The Chowkhamba Sanskrit Series Office.

BENARES.

1937

Registered According to Act XXV of 1867,
[*All Rights Reserved by the Publisher*]

PRINTED BY

JAYA KRISHNA DAS GUPTA,

VIDYA VILAS PRESS, BENARES CITY.

1937.

हरिदास संस्कृत ग्रन्थमालासमाख्य-

काशी-संस्कृत-सीरिज़पुस्तकमालायाः

१२७

वेदविभागे (७) सप्तमं पुष्पम् ।

शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखीयं

शतपथब्राह्मणम्

(काण्डचतुष्टात्मकः प्रथमो भागः)

श्रीहिन्दूविश्वविद्यालये प्राच्यविद्याविभागे मीमांसाधर्मशास्त्रयोः
प्रधानाध्यापकेन, धर्मविज्ञानविभागीयोपाध्यक्षेण
वेदविशारदेन मीमांसाकेसरिणा च
पण्डित चिन्नस्वामिशास्त्रिणा—
हिन्दूविश्वविद्यालये पूर्वमीमांसाध्यापकेन
पण्डित पट्टाभिरामशास्त्रिणा च
टिप्पण्यादिभिर्विभूष्य विशोधितम् ।

प्रकाशकः—

जयकृष्णदास-हरिदास गुप्तः—
चौखम्बा संस्कृत सीरिज़ आफिस,
बनारस सिटी ।

१९९४

प्राप्तिस्थानम्

चौखम्बा संस्कृत पुस्तकालय,

बनारस सिटी।

॥ श्रीः ॥

नमश्शिवाभ्याम् ।

॥ विनिवेदनम् ॥

अयमद्य शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनीयशाखीयस्य ब्राह्मणस्य शतपथब्राह्मणाभिधस्य आदितः काण्डचतुष्टयात्मकः अग्निष्टोमान्तो भागः प्रकाश्यते सम्मुद्य । यद्यप्ययं ग्रन्थस्समग्र एव मुद्राप्य प्रकाशनीय इत्यासीन्मनीषा मम प्रकाशयितुश्च । तथाऽपि पुस्तकस्याऽस्याऽऽपणेषु दुष्प्राप्यतां तन्मूलकञ्चाऽधीतिनामवर्णनीयं क्लेशं चाऽपरोक्षीकुर्वद्भ्यामावाभ्यां प्रथमभस्य प्रथमभागस्य झटिति प्रकाशनं तेषां क्लेशं कियता चनांऽशेन न्यूनीकुर्यादिति मन्वानाभ्यामेवं करणे व्यवसितम् । ग्रन्थास्याऽस्य संशोधने अधोनिर्दिष्टा आदर्शा अवलम्बिताः—

(१) हस्तलिखितं पुस्तकं काशिकराजकीयसंस्कृतपुस्तकालयीयं 'क' संज्ञितम् ।

(२) बम्बई मुद्रितं पुस्तकं सभाष्यं प्रथमकाण्डात्मकं 'ख' संज्ञितम् ।

(३) मूलमात्रं समग्रं अजमेर मुद्रितं 'ग' संज्ञितम् ।

(४) कलिकातागत एशियाटिक् सोसाइटी मुद्रितं सभाष्यं 'घ' संज्ञितम् ।

(५) लीपजिक् नगरमुद्रितं संगृहीतसायणभाष्योपेतं 'ङ' संज्ञितम् ।

(६) हस्तलिखितं पण्डितवर विद्याधरगौड वेदाचार्याणां पुस्तकं चतुर्थकाण्डात्मकं 'च' संज्ञितम् ।

एवं प्रथमकाण्डे पुस्तकपञ्चकं द्वितीयादिषु त्रिषु काण्डेषु पुस्तकचतुष्कं चाऽवलम्ब्य शोधितोऽयं भागः ।

ग्रन्थोऽयं वैदिकसाहित्ये विशेषतो ब्राह्मणग्रन्थेषु न केवलं रूपतः, विषयतोऽपि प्राधान्यमावहतीत्यत्र न केऽपि विमन्यन्ते । परमस्य मूलमात्रस्यापि सर्वाङ्गसुन्दरं धनिदीनोपयोगसुलभं नाद्ययावदेकमपि संस्करणमुपलब्धिगोचर आसीत् । तद्दोषापनिनीषाऽप्यत्र कार्ये प्रवर्तमानानामस्माकमेकं निदानम् । यद्यप्यस्य ग्रन्थाक्षराणि परमाबिभ्रता सूचीविवरणादिविधुरेणाऽनेन प्राथमिकेन भागेन न तावानुपकार आयातुं शक्यते यावानस्माभिः प्रतीक्ष्यते,

तथाऽपि ग्रन्थानुपलब्धिक्लेशखिन्नानां नूनमयं तं क्लेशमपनुदेत्साधयेच्च ततोऽप्यधिकमपि कंचिदुपकारविशेषमेतावन्मात्रेणाऽपि य इतः पूर्वसंस्करणै-रनधिगतः। यदि ग्रहीतारोऽनुगृह्णीयुः समयप्रतीक्षणेन, तर्हि भगवतः परमे-ष्ठिनः परमयाऽनुकम्पया नातिचिरादेव ग्रन्थमिमं सर्वाङ्गपूर्णमात्मानं प्रकाश-यन्तं परिपश्येयुरिति सुदृढं विश्वसिमो वयम्।

अत्र काण्डचतुष्टयात्मके प्रथमे भागे हविर्यज्ञाभिधं प्रथमम्, द्वितीयं एकपान्नामकं, तृतीयं अध्वराख्यं, चतुर्थं च काण्डं ग्रहाभिधम्। तत्र प्रथमका-ण्डे–दर्शपूर्णमासौ, द्वितीये–अग्न्याधेयम्, अग्निहोत्रम्, अग्न्युपस्थानम्, पिण्डपितृयज्ञः, आग्रयणेष्टिः, दाक्षायणयज्ञः, चातुर्मास्यानि, तृतीयचतुर्थयोः-अग्निष्टोमस्साङ्गश्च प्रतिपादिताः। तत्र च बहुषु स्थलेषु पक्षान्तरनिरासपूर्वकं स्वपक्षः स्थापितः। ते च खण्डनगोचराः पक्षाः प्रायेण तैत्तिरीयशाखायामु-पलभ्यन्ते। तथा हि—

(१) 'तद्धैके स्रुक्सम्मार्जनान्यग्नावभ्यादधति·····तदु तथा न कुर्यात्' मा. श. ब्रा. १. २. ४. ११. पृ. २८ पं. ७.
'स्रुक्सम्मार्जनान्यग्नौ प्रहरति' तै. ब्रा. ३. ३. २. १.

(२) 'उत्तरार्धपूर्वार्धे चैके, आग्नेयमाज्यभागं जुह्वति दक्षिणार्धपूर्वार्धे सौम्यमाज्यभागमेतत्पुरस्ताच्चक्षुषी दधम इति वदन्तः। तदु तदाऽ-विज्ञान्यमिव' मा. श. १. ५. २. ३९. पृ. ७६. पं. १३.
'चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य प्रतिदधाति। पूर्वार्धे जुहोति तस्मात् पूर्वार्धे चक्षुषी' तै. सं. २. ६. २.

(३) 'तदाहुः नासोमयाजी सन्नयेत्' मा. श. १. ५. ३. १०. पृ. ७८.
'नाऽसोमयाजी सन्नयेत्' तै. सं. २. ५. ५. १.

(४) 'तद्धैकेऽनुदिते मथित्वा तमुदिते प्राञ्चमुद्धरन्ति·····तदु तथा न कुर्यात्' मा. श. २. १. ४. ८. पृ. १२५. पं. ४.

'तस्मिन्नुपव्युपमरणी निष्टपेत् तं माथित्वा प्राञ्चमुद्धरति' तै. ब्रा. १. १. ९. ९.

(५) 'हुत्वा वपामेवाऽग्रेऽभिघारयति अथ पृषदाज्यम्। तदुह चरकाध्वर्यवः पृषदाज्यमेवाऽग्रेऽभिघारयन्ति प्राणः पृषदाज्यमिति वदन्तः' मा. श. ३. ६. ३. २४. पृ. २९२. पं. ८, ९.

'प्राणापानौ वा एतौ पशूनां यत्पृषदाज्यं, आत्मा वपा पृषदाज्यमभिघार्य वपामभिघारयति' तै. सं. ६. ३. ९. ६.

इत्यादयः। दिङ्मात्रमिह दर्शितम्। एवमेतादृशा बहव उपलभ्यन्ते विषयाः। तेषां सर्वेषामपि सङ्ग्रहो मया कृतः। ते च ग्रन्थसमाप्तिसमनन्तरपातिन्यां बृहत्यां भूमिकायां स्थानं लभेरन्। विचारयिष्यते च तत्र किं वा परमं निदानमेतादृशविषयसन्निपातस्येति नेह ते प्रपञ्च्यन्ते। एवं काण्वमाध्यन्दिनीययोः शतपथब्राह्मणयोरत्यल्पीयानेव भेदो दरीदृश्यते, सोऽपि किञ्चन दूरं गत्वाऽस्तं याति। तत्राऽपि निदानं तस्यामेव स्फुटीकर्तुमिष्यते। अन्ये च ग्रन्थसम्बन्धिनः-कर्तृकालदेशशैल्यादिविषये पाश्चात्यपण्डितवरोक्तिप्रत्युक्तीनां समालोचनादिकं, आस्माकीनाभिप्रायः, तत्र सर्वत्राऽऽन्तराणि बाह्यानि च कारणानि, ग्रन्थान्तरैस्सहाऽस्य तोलनमित्यादयस्सर्वेऽपि बृहत्या एव भूमिकायै सुरक्षिताः। अतस्सविनयमभ्यर्थये विद्वद्वरानध्येतॄंश्च तावत् मां क्षन्तुम्।

अत्र तत्तत्काण्डे तत्तद्ब्राह्मणेषु प्रतिपाद्यानां विषयाणां अन्यत्र शाखान्तरेषु वेदान्तरेषु वा यत्र यत्रोपादानं, तानि तानि स्थलानि तत्तद्ब्राह्मणसमाप्तिस्थल एव यथोपलम्भमुल्लिखितानि। मन्ये तद्विमर्शकानां किञ्चिदिव उपकाराय कल्पेतेति। रीतिरियं मैत्रायणीयकाठकसंहितयोः तत्संपादकेन Dr. Schroeder महोदयेन समादृता, सैवाऽनुसृताऽस्माभिः। माध्यन्दिनसंहितागतानां मन्त्राणामपि तत्र तत्र विनियुक्तानां स्थलनिर्देशनमपि कृतम्।

अत्र शोधनार्थमपेक्षितान् ग्रन्थान् यथासमयमविलम्बेन मह्यं दत्तवतां यावत्कार्यसमाप्ति मन्निकट एव तानवस्थापितवतां च महोदयानां कृते सर्वथाऽधमर्णोऽहमात्मीयां कृतज्ञतामाविष्कुर्वन् धन्यवादशतेन साकं तेषां नामान्यत्र स्मरामि—

(१) महामहोपाध्यायपण्डितकुलभूषण पूज्य **प्रमथनाथतर्क भूषण** महोदयाः, हिन्दूविश्वविद्यालयप्राच्यविद्याविभागाध्यक्षाः (इदानीं Director पदभाजः)

(२) पण्डितप्रवराः विद्याधरशर्म वेदाचार्यमहोदयाः, हिन्दूविश्वविद्यालयीयधर्मविज्ञानविभागाध्यक्षाः।

(३) पण्डित **गङ्गाशङ्करमिश्रमहोदयाः**, हिन्दूविश्वविद्यालयीयपुस्तकालयाध्यक्षाः।

(४) Dr. **मङ्गलदेवशास्त्रि** महोदयाः, काशिकराजकीयसंस्कृतमहाविद्यालयाध्यक्षाः।

(५) पण्डितवराः **नारायणशास्त्रिखिस्ते** साहित्याचार्याः, राजकीयहस्तलिखितपुस्तकागाराध्यक्षाः।

(६) पण्डितश्रीकृष्णपन्तमहोदयाः, विश्वनाथपुस्तकालयाध्यक्षाः।

रात्रिं दिवमत्र कार्येऽतिवेलं परिश्राम्यते मत्प्रियशिष्याय श्रीपट्टाभिरामशर्मणे मीमांसाचार्याय, श्रीमते चिरजीविने **जयरामचन्द्राय**(B.A.) च हार्दिकीः परमा आशिषः प्रयुञ्जानः प्रार्थये परमेश्वरं तयोरितोऽप्यत्र कार्ये साह्यमाधातुं चिरजीवितां मनसीव वपुषि च स्वास्थ्याधानेन तावनुग्रहीतुम्।

एवमेतादृशे प्राचीनभारतीयसंस्कृतिजीवातौ निरुपमे कार्यजाते दत्तचित्तं सानुजं **बाबू जयकृष्णदासगुप्तमहोदयमाशीर्भिरभिवर्धयितुं** सर्वानपि गीर्वाणवाणीप्रणयिनः पण्डितवरानभ्यर्थये।

महोत्सवे
मार्ग शुक्ल सप्तमी
वै० सं० १९९३.
वाराणसी

इति विद्वज्जनविधेयः
अ० चिन्नस्वामिशास्त्री

* श्रीः *

शुक्लयजुर्वेदीयमाध्यन्दिनशाखीयं

शतपथब्राह्मणम्

*हविर्यज्ञाख्यं प्रथमं काण्डम् ॥

॥ ॐ ॥ व्रतमुपैष्यन्। अन्तरेणाहवनीयं च गार्हपत्यं च प्राङ्तिष्ठन्नपऽउपस्पृशति तद्यदपऽ उपस्पृशत्यमेध्यो वै पुरुषो यदनृतं व्वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा व्वतमुपायानीति पवित्रं वाऽआपः पवित्रपूतो व्वतमुपायानीति तस्माद्वाऽअपऽ उपस्पृशति ॥ १ ॥ सोऽग्निमेवाभीक्षमाणो व्वतमुपैति। (१)"अग्ने व्वतपते व्वतं चरिष्यामि तच्छकेयं तन्मे राध्यता"मित्यग्निर्वै देवानां व्वतपतिस्तस्माऽएवैतत्प्राह व्वतं चरिष्यामि तच्छकेयं तन्मे राध्यतामिति नात्र तिरोहितमिवास्ति ॥ २ ॥ अथ सꣳस्थिते विसृजते। (२)"अग्ने व्वतपते व्वतमचारिषं तदशकं तन्मेऽराधी"त्यशकद्ध्येतद्यो यज्ञस्य सꣳस्थामगन्नराधि ह्यस्मै यो यज्ञस्य सꣳस्थामगन्नेतेन न्वेव भूयिष्ठाऽ इव व्रतमुपयन्त्यनेन त्वेवोपेयात् ॥ ३ ॥ द्वयं वाऽइदं न तृतीयमस्ति। सत्यं चैवानृतं च सत्यमेव देवाऽ अनृतं मनुष्याऽ (३)"इदमहमनृतात्सत्यमुपैमी"ति तन्मनुष्येभ्यो देवानुपैति ॥ ४ ॥ स वै सत्यमेव व्वदेत्। एतद्ध वै देवा व्वतं चरन्ति यत्सत्यं तस्मात्ते यशो यशो ह भवति यऽ एवं व्विद्वान्त्सत्यं व्वदति ॥५॥ अथ सꣳस्थिते विसृजते। (४)"इदमहं यऽ एवास्मि सोऽस्मी"त्यमानुषऽइव वाऽएतद्भवति

* काण्डमिदं काण्वशतपथे द्वितीयकाण्डत्वेन परिगणितम्।

१. मा. सं. १. ५. २. मा. सं. २. २८.

३. मा. सं. १. ५. ४. मा. सं. २. २८.

यद्व्रतमुपैति न हि तदवकल्पते यद्ब्रूयादिदमहꣳसत्यादनृतमुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदमहं य एवास्मि सोऽस्मी(१)त्येव व्रतं विसृजेत ॥६॥ अथातोऽशनानशनस्यैव । तदुहापाढः सावयसोऽनशनमेव व्रतं मेने मनो ह वै देवा मनुष्यस्याजानन्ति त ऽएनमेतद्व्रतमुपयन्तं विदुः प्रातर्नो यक्ष्यत ऽइति तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स ऽ उपवसथः ॥ ७ ॥ तन्वेवानवक्लृप्तम् । यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वोऽश्नीयात्तस्माद् नैवाऽश्नीयात् ॥ ८ ॥ तदु होवाच याज्ञवल्क्यः । यदि नाश्नाति पितृदेवत्यो भवति यद्यु ऽअश्नाति देवानत्यश्नातीति स यदेवाशितमनशितं तदश्नीयादिति यस्य वै हविर्न गृह्णन्ति तदशितमनशितꣳ स यदश्नाति तेनापितृदेवत्यो भवति यद्यु तदश्नाति यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति ॥ ९ ॥ स वाऽआरण्यमेवाश्नीयात् । (२)या वा ऽआरण्याऽ ओषधयो यद्वा व्वृक्ष्यं तदु ह स्माहापि वर्कुर्वार्ष्णो मापान्मे पचत न वाऽएतेषाꣳ हविर्गृह्णन्तीति तदु तथा न कुर्याद्व्रीहियवयोर्वाऽ (३)एतदुपचं यच्छमीधान्यं तद्व्रीहियवावेवैतेन भूयाꣳसौ करोति तस्मादारण्यमेवाश्नीयात् ॥१०॥ सऽआहवनीयागारे वैताꣳ रात्रिꣳ शयीत । गार्हपत्यागारे वा देवान्वाऽएषऽ उपावर्त्तते यो व्रतमुपैति स यानेवोपावर्त्तते तेषामेवैतन्मध्ये शेतेऽधः शयीताधस्तादिव हि श्रेयसऽ उपचारः ॥ ११ ॥ स वै प्रातरपऽ एव । प्रथमेन कर्मणाभिपद्यतेऽपः प्रणयति यज्ञो वाऽआपो यज्ञमेवैतत्प्रथमेन कर्मणाभिपद्यते ताः प्रणयति यज्ञमेवैतद्वितनोति ॥ १२ ॥ स प्रणयति । (४)"कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ती"त्येताभिरनिरुक्ताभिर्व्याहृतिभिरनिरुक्तो वै प्रजापतिः प्रजापतिर्यज्ञस्तत् प्रजापतिमेवैतद्यज्ञं युनक्ति॥१३॥ यद्वेवापः प्रणयति । अद्भिर्वाऽइदꣳ सर्व्वमाप्तं तत्प्रथमेनैवैतत्कर्मणा

१. त्येवं. क. २. या वारण्या. क. ३. उपजं. क. ४. मा. सं. १. ६.

सर्व्वमाप्नोति ॥ १४ ॥ यद्देवास्यात्र । होता वाध्वर्युर्वा ब्रह्मा वाग्नीध्रो वा स्वयं वा यजमानो नाभ्यापयति तदेवास्यैतेन सर्वमाप्तं भवति ॥ १५ ॥ यद्देवापः प्रणयति । देवान्ह वै यज्ञेन यजमानांस्तानसुररक्षसानि ररक्षुर्न यक्ष्यध्वऽ इति तद्यदरक्षंस्तस्माद्रक्षाᳬसि ॥ १६ ॥ ततो देवाऽ एतं व्वज्रं ददृशुः । यदपो व्वज्रो वाऽआपो व्वज्रो हि वाऽआपस्तस्माद्येनेता यन्ति निम्नं कुर्व्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति ततऽ एतं वज्रमुदयच्छंस्तस्याभयेऽनाष्ट्रे निवाते यज्ञमतन्वत तथोऽ एवैष एतं व्वज्रमुद्यच्छति तस्याभयेऽनाष्ट्रे निवाते यज्ञं तनुते तस्मादपः प्रणयति ॥ १७ ॥ ताऽ उत्सिच्योत्तरेण गार्हपत्यᳬ सादयति । योपा वाऽआपो व्वृषाग्निर्गृहा वै गार्हपत्यस्तद्गृहेष्वेवैतन्मिथुनं प्रजननं क्रियते व्वज्रं वाऽएषऽ उद्यच्छति योऽपः प्रणयति यो वाऽअप्रतिष्ठितो व्वज्रमुद्यच्छति नैनᳬ शक्नोत्युद्यन्तुᳬ सᳬ हैनᳬ शृणोति ॥ १८ ॥ स यद्गार्हपत्ये सादयति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति तथो हैनमेष व्वज्रो न हिनस्ति तस्माद्गार्हपत्ये सादयति ॥ १९ ॥ ताऽ उत्तरेणाहवनीयं प्रणयति । योपा वाऽआपो व्वृषाग्निर्मिथुनमेवैतत्प्रजननं क्रियतऽएवमिव हि मिथुनं क्लृप्तमुत्तरतो हि स्त्री पुमाᳬसमुपशेते ॥ २० ॥ ता नान्तरेण सञ्चरेयुः । नेन्मिथुनं चर्यमाणमन्तरेण सञ्चरानिति ता नातिहृत्य सादयेन्नोऽअनाप्ताः सादयेत्स यदतिहृत्य सादयेदस्ति वाऽअग्नेश्चापां च व्विभ्रातृव्यमिव स यथेव ह तदग्नेर्भवति यत्रास्याप उपस्पृशन्त्यग्नौ हाधि भ्रातृव्यं वर्धयेद्यदतिहृत्य सादयेद्यद्युऽअनाप्ताः सादयेन्नो हाभिस्तं काममभ्यापयेद्यस्मै कामाय प्रणीयन्ते तस्मादु सम्प्रत्येवोत्तरेणाहवनीयं प्रणयति ॥ २१ ॥ अथ तृणैः परिस्तृणाति । द्वन्द्वं पात्राण्युदाहरति शूर्पं चाग्निहोत्रहवणीं च स्फ्यं च कपालानि च शम्यां च कृष्णाजिनं चोलूखलमुसले दृषदुपले तद्दश दशाक्षरा वै व्विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयत्यथ यद्द्वन्द्वं

द्वन्द्वं वै वीर्यं यदा वै द्वौ सꣳरभेतेऽअथ तद्वीर्यं भवति द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥ २२ ॥ Cf. का. श. २.१.१.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥

१. १. २.

अथ शूर्पं चाग्निहोत्रहवणीं चादत्ते। (१)"कर्मणे वां वेषाय वा"-मिति यज्ञो वै कर्म यज्ञाय हि तस्मादाह कर्मणे वामिति वेषाय वामिति वेषेषीव हि यज्ञम् ॥१॥ अथ वाचं यच्छति। वाग्वै यज्ञोऽविक्षुब्धो यज्ञं तनवाऽइत्यथ प्रतपति (२)"प्रत्युष्टꣳरक्षः प्रत्युष्टाऽ अरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽ अरातय" इति वा ॥२॥ देवा ह वै यज्ञं तन्वानाः। तेऽसुररक्षसेभ्य आसङ्गाद्भिभयांचक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति ॥ ३ ॥ अथ प्रैति। (३)"उर्व्वन्तरिक्षमन्वेमी"त्यन्तरिक्षं वाऽअनु रक्षश्चरत्यमूलमुभयतः परिच्छिन्नं यथायं पुरुषोऽमूल उभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तदब्रह्मणैवैतदन्तरिक्षमभयमनाष्ट्रं कुरुते ॥ ४ ॥ स वाऽअनसऽ एव गृह्णीयात्। अनो ह वाऽअग्रे पश्चेव वाऽइदं यच्छालꣳ स यदेवाग्रे तत्करवाणीति तस्मादनसऽ एव गृह्णीयात् ॥ ५ ॥ भूमा वाऽअनः। भूमा हि वाऽअनस्तस्माद्यदा बहु भवत्यनोवाह्यमभूदित्याहुस्तद्भूमानमेवैतदुपैति तस्मादनसऽ एव गृह्णीयात् ॥६॥ यज्ञो वाऽअनः। यज्ञो हि वाऽअनस्तस्मादनसऽ एव यजूꣳषि सन्ति न कांष्टस्य न कुम्भ्यै भस्त्रायै ह स्मर्पयो गृह्णन्ति तद्रूपीन्प्रति भस्त्रायै यजूꣳष्यासुस्तान्येतर्हि प्राकृतानि यज्ञाद्यज्ञं निर्मिमाऽइति तस्मादनस एव गृह्णीयात् ॥ ७ ॥ उतो पात्र्यै गृह्णन्ति। अनन्तरायमु तर्हि यजूꣳषि जपेत्स्फ्यमु (४)तर्ह्यधस्तादुपोह्य गृह्णीयाद्यतो

१. मा. सं. १. ६. २. मा. सं. १. ७. ३. मा. सं. १. ७. ४. तर्ह्यवस्तदु. क.

युनजाम ततो व्विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो व्विमुञ्चन्ति ॥८॥ तस्य वाऽएतस्यानसः । अग्निरेव धूराग्निर्हि वै धूरथ य एनद्वहन्त्य ग्निदग्धमिवैषां व्वहं भवत्यथ यज्जघनेन कस्तम्भीं प्रऽउगं व्वेदिरेवास्य सा नीडऽएव हविर्धानम् ॥ ९ ॥ स धुरमभिमृशति । (१)"धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान्धूर्वति तं धूर्व यं वयं धूर्वाम" इत्यग्निर्वाऽएष धुर्यस्तमेतदत्येष्यन्भवति हविर्ग्रहीष्यंस्तस्माऽएवैता-न्निह्नुते तथो हैतमेषोऽतियन्तमग्निर्धुर्यो न हिनस्ति ॥ १० ॥ तद्ध स्मैतदारुणिराह । अर्धमासशो वाऽअहꣳसप्तान्धूर्वामीत्येतद्ध स्म स तदभ्याह ॥ ११ ॥ अथ जघनेन कस्तम्भीमीषामभिमृश्य जपति । (२)"देवानामसि व्वह्नितमꣳ सस्नितमं पप्रितमं जुष्टतमं देव-हूतमम् । अहुतमसि हविर्धानं दृꣳहस्व मा ह्वा"रित्यनऽएवैतदुपस्तौ-त्युपस्तुताद्रातमनसो हविर्गृह्णानीति मा ते यज्ञपतिर्ह्वार्षीदिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदह्वलामाशास्ते ॥ १२ ॥ अथाक्रमते । (३)"व्विष्णुस्त्वा क्रमतामि"ति यज्ञो वै व्विष्णुः स देवेभ्य इमां व्विक्रा-न्तिं व्विचक्रमे यैषामियं व्विक्रान्तिरिदमेव प्रथमेन पदेन पस्पाराथेदम-न्तरिक्षं द्वितीयेन दिवमुत्तमेनैतान्व्वेवैषऽएतस्मै व्विष्णुर्यज्ञो व्विक्रान्तिं व्विक्रमते ॥१३॥ अथ प्रेक्षते । "उरु व्वातायेति प्राणो वै व्वातस्त-द्ब्रह्मणैवैतत्प्राणाय व्वातायोरुगायं कुरुते ॥ १४ ॥ अथापास्यति । "अपहतꣳ रक्ष"ऽइति यद्यत्र किञ्चिदापन्नं भवति यद्यु नाभ्येव मृशे-त्तन्नाष्टाऽएवैतद्रक्षाꣳस्यतोऽपहन्ति ॥१५॥ अथाभिपद्यते । "यच्छ-न्तां पञ्चे"ति पञ्च वाऽइमाऽअङ्गुलयः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतदत्र दधाति ॥ १६ ॥ अथ गृह्णाति । (४)"देवस्य त्वा सवितुः प्रसवेऽश्वि-नोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं गृह्णामी"ति सविता वै देवानां प्रसविता तत्सवितृप्रसूतऽएवैतद्गृह्णात्यश्विनोर्बाहुभ्यामित्यश्विना-वध्वर्यू पूष्णो हस्ताभ्यामिति पूषा भागदुघोऽशनं पाणिभ्यामुपनि-

१. मा. सं. १. ८. २. मा. सं. १. ९. ३. मा. सं. १. ९. ४. मा. सं. १. १०.

धाता सत्यं देवाऽ अनृतं मनुष्यास्तत्सत्येनैवैतदगृह्णाति ॥ १७ ॥ अथ देवतायाऽआदिशति । सर्वा ह वै देवताऽ अध्वर्युꣳ हाविर्ग्रहीष्यन्तमुपतिष्ठन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति ताभ्य एवैतत्सह सतीभ्योऽसमदं करोति ॥ १८ ॥ यद्वेव देवतायाऽआदिशति । यावतीभ्यो ह वै देवताभ्यो हवीꣳषि गृह्यन्तऽऋणमु हैव तास्तेन मन्यन्ते यदस्मै तं कामꣳसमर्धयेयुर्यत्काम्या गृह्णाति तस्माद्वै देवतायाऽआदिशन्येवमेव यथापूर्वꣳ हवीꣳषि गृहीत्वा ॥ १९ ॥ अथाभिमृशति । "भूताय त्वा नारातये"ऽइति तद्यतऽ एव गृह्णाति तदेवैतत्पुनराप्याययति ॥ २० ॥ अथ प्राङ्प्रेक्षते । "स्वरभिविख्येषमि"ति परिवृतमिव वाऽएतदनो भवति तदस्यैतच्चक्षुः पाप्म गृहीतमिव भवति यज्ञो वै स्वरुहदेवाः सूर्य्यस्तत्स्वरेवैतदतोऽभिविपश्यति ॥ २१ ॥ अथावरोहति । "दृꣳहन्तां दुर्याः पृथिव्या"मिति गृहा वै दुर्यास्ते हेतऽ ईश्वरो गृहा यजमानस्य योऽस्यैषोऽध्वर्युर्यज्ञेन चरति तं प्रयन्तमनु प्रच्योतोस्तस्येश्वरः कुलं विवृक्षोर्ध्वोस्तानेवैतदस्यां पृथिव्यां दृꣳहति तथा नानुप्रच्यवन्ते तथा न विवृक्षोभन्ते तस्मादाह दृꣳहन्तां दुर्याः पृथिव्यामित्यथ प्रेत्युर्वन्तरिक्षमन्वेमीति सोऽसावेव बन्धुः ॥ २२ ॥ स यस्य गार्हपत्ये हवीꣳषि श्रपयन्ति । गार्हपत्ये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्हि गार्हपत्यꣳ सादयेद्यस्याहवनीये हवीꣳषि श्रपयन्त्याहवनीये तस्य पात्राणि सꣳसादयन्ति जघनेनो तर्ह्याहवनीयꣳ सादयेत्पृथिव्यास्त्वा नाभौ सादयामीति मध्यं वै नाभिर्मध्यमभयं तस्मादाह पृथिव्यास्त्वा नाभौ सादयामीत्यदित्याऽउपस्थऽइत्युपस्थऽइवैनदभार्षुरिति वाऽआहुर्यत् सुगुप्तं गोपायन्ति तस्मादाहादित्याऽउपस्थऽइत्यग्ने हव्यꣳ रक्षेति तदग्नये चैवैतद्धविः परिददाति गुप्त्याऽअस्यै च पृथिव्यै तस्मादाहाग्ने हव्यꣳरक्षेति ॥ २३ ॥ Cf. का. श. २.१.२

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे प्रथमप्रपाठके द्वितीयं ब्राह्मणम् ॥

१. १. ३.

पवित्रे करोति ।(१) "पवित्रे स्थो व्वैष्णव्या"विति यज्ञो वै व्विष्णुर्यज्ञिये स्थऽ इत्येवैतदाह ॥ १ ॥ ते वै द्वे भवतः । अयं वै पवित्रं योऽयं पवते सोऽयमेक इवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङ् च प्रत्यङ् च ताविमौ प्राणोदानौ तदेतस्यैवानुमात्रां तस्माद् द्वे भवतः ॥ २ ॥ अथोऽअपि त्रीणि स्युः । व्यानो हि तृतीयो द्वे(२) न्वेव भवतस्ताभ्यामेताः प्रोक्षणीरुत्पूय ताभिः प्रोक्षति तद्यदेताभ्यामुत्पुनाति ॥ ३ ॥ न्वृत्रो ह वाऽइदꣳ सर्वं व्वृत्वा शिश्ये । यदिदमन्तरेण द्यावापृथिवी स यदिदꣳ सर्वं व्वृत्वा शिश्ये तस्माद्वृत्रो नाम ॥ ४ ॥ तमिन्द्रो जघान । स हतः पूतिः सर्वतऽ एवापोऽभिप्रसुस्राव सर्वत इव ह्ययꣳ समुद्रस्तस्मादु हैकाऽ आपो बीभत्साञ्चक्रिरे ताऽ उपर्युपर्यति (३)पुप्रुविरेऽत इमे दर्भास्ता हैताऽ अनापूयिताऽ आपोऽस्ति वाऽइतरासु सꣳसृष्टमिव यदेना व्वृत्रः पूतिरभिप्रास्रवत्तदेवासामेताभ्यां पवित्राभ्यामपहन्त्यथ मेध्याभिरेवाद्भिः प्रोक्षति तस्माद्वाऽएताभ्यामुत्पुनाति ॥(५)॥ सऽ उत्पुनाति । (४)"सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभि"रिति सविता वै देवानां प्रसविता तत्सवितृप्रसूतऽ एवैतदुत्पुनात्यच्छिद्रेण पवित्रेणेति यो वाऽअयं पवतऽएषोऽच्छिद्रं पवित्रमेतेनैतदाह सूर्य्यस्य रश्मिभिरित्येते वाऽउत्पवितारो यत् सूर्य्यस्य रश्मयस्तस्मादाह सूर्यस्य रश्मिभिरिति ॥ ६ ॥ ताः सव्ये पाणौ कृत्वा। दक्षिणेनोदिङ्गयत्युपस्तौत्येवैनाऽ एतन्महयत्येव (५)"देवीरापोऽग्रेगुवोऽअग्रेपुव"ऽ इति देव्यो ह्यापस्तस्मादाह देवीराप इत्यग्रेगुव इति ता यत् समुद्रं गच्छन्ति तेनाग्रेगुवोऽग्रेपुवऽ इति ता यत्प्रथमाः सोमस्य राज्ञो भक्षयन्ति तेनाग्रेपुवोऽ(६)"ग्रऽइममद्य यज्ञं नयताग्रे यज्ञपतिꣳ सुधातुं यज्ञपतिं देवयुवमि"ति साधु यज्ञꣳ साधु यजमानमित्येवैतदा-

१. मा. सं. १. १२. २. त्वेव. ख. ग. ३. पुप्लुविरे. क.
४. मा. सं. १. १२ ५. मा. सं. १. १२. ६. मा. सं. १. १२

ह ॥७॥ (१) "युष्मा इन्द्रोऽवृणीत व्वृत्रतूर्य"ऽइति। एताऽउ हीन्द्रोऽव्वृणीत व्वृत्रेण स्पर्धमान एताभिर्ह्येनमहँस्तस्मादाह युस्माऽ इन्द्रोऽवृणीत वृत्रतूर्यऽइति ॥८॥ (२) "यूयमिन्द्रमवृणीध्वं वृत्रतूर्य"ऽइति। एता उ हीन्द्रमवृणत व्वृत्रेण स्पर्धमानमेताभिर्ह्येनमहँस्तस्मादाह यूयमिन्द्रमवृणीध्वं वृत्रतूर्यऽ इति॥९॥ (३) "प्रोक्षिताः स्थे"ति। तदेताभ्यो निह्नुतेऽथ हविः प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥१०॥ स प्रोक्षति। (४) अग्नये त्वा जुष्टं प्रोक्षामी"ति तद्यस्यै देवतायै हविर्भवति तस्यै मेध्यं करोत्येवमेव यथापूर्वꣳ हवीꣳषि प्रोक्ष्य ॥ ११ ॥ अथ यज्ञपात्राणि प्रोक्षति। (५) "दैव्याय कर्म्मणे शुन्धध्वं देवयज्याया"ऽइति दैव्याय हि कर्म्मणे शुन्धति देवयज्यायै (६) "यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामी"ति तद्यदेवैषामत्राशुद्धस्तक्षा वान्यो वामेध्यः कश्चित्पराहन्ति तदेवैषामेतदद्भिर्मेध्यं करोति तस्मादाह यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामीति ॥ १२ ॥ Cf. का. श. २. १. ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे प्रथमप्रपाठके तृतीयं ब्राह्मणम् ॥

१. १. ४.

अथ कृष्णाजिनमादत्ते। यज्ञस्यैव सर्व्वत्वाय(७) यज्ञो ह देवेभ्योऽपचक्राम स कृष्णो भूत्वा चचार तस्य देवाऽ अनुविद्य त्वचमेवावच्छायाजहुः ॥ १ ॥ तस्य यानि शुक्लानि च कृष्णानि च लोमानि तान्यृचां च साम्नां च रूपं यानि शुक्लानि तानि साम्नाꣳ रूपं यानि कृष्णानि तान्यृचां यदि वेतरथा यान्येव कृष्णानि तानि साम्नाꣳ रूपं यानि शुक्लानि तान्यृचां यान्येव बभ्रूणीव हरीणि तानि यजुषाꣳ

१. मा. सं. १. १३. २. मा. सं. १. १३. ३. मा. सं. १. १३.
४. मा. सं. १. १३. ५. मा. सं. १. १३. ६. मा. सं. १. १३.
७. See. तै. सं. ६.१.३.

रूपम् ॥ २ ॥ सैषा त्रयी विद्या यज्ञः । तस्याऽएतच्छिल्पमेष व्वर्णस्तद्यत्कृष्णाजिनं भवति यज्ञस्यैव सर्व्वत्वाय तस्मात्कृष्णाजिनमधि दीक्षन्ते यज्ञस्यैव सर्व्वत्वाय तस्मादध्यवहननमधिषेषणं भवत्यस्कन्नꣳ हविरसदिति तद्यदेवात्र तण्डुलो वा पिष्टं वा स्कन्दात्तद्यज्ञे यज्ञः प्रतितिष्ठादिति तस्मादध्यवहननमधिषेषणं भवति ॥ ३ ॥ अथ कृष्णाजिनमादत्ते । "शर्मासी"ति चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासीति तदवधूनो"त्यवधूतꣳ रक्षोऽवधूताऽअरातयऽ"इति तन्नाष्ट्राऽएवैतद्रक्षाꣳस्यतोऽपहन्त्यतिनत्येव पात्राण्यवधूनोति यद्ध्यस्यामेध्यमभूत्तद्ध्यस्यै तदवधूनोति ॥ ४ ॥

(अर्धप्रपाठकः)

तत्प्रतीचीनग्रीवमुपस्तृणाति । "अदित्यास्त्वगसि प्रति त्वादितिर्व्वेत्त्वि"तीयं वै पृथिव्यदितिस्तस्याऽअस्यै त्वग्यदिदामस्यामधि किञ्च तस्मादाहादित्यास्त्वगसीति प्रति त्वादितिर्व्वेत्त्विति प्रति हि स्वः संजानीते तत्संज्ञामेवैतत्कृष्णाजिनाय च व्वदति नेदन्योऽन्यꣳ हिनसात इत्यभिनिहितमेव सव्येन पाणिना भवति ॥ ५ ॥ अथ दक्षिणेनोलूखलमाहरति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्येन पाणिना भवति ॥ ६ ॥ अथोलूखलं निदधाति । "अद्रिरसि व्वानस्पत्यो ग्रावासि पृथुबुध्न"ऽइति वा तद्यथैवादः सोमꣳ राजानं ग्रावभिराभिषुण्वन्त्येवमेवैतदुलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञमभिषुणोत्यद्रयऽइति वै तेषामेकं नाम तस्मादाहाद्रिरसीति व्वानस्पत्यऽइति व्वानस्पत्यो ह्येष ग्रावासि पृथुबुध्न इति ग्रावा ह्येष पृथुबुध्नो ह्येष "प्रति त्वादित्यास्त्वग्वेत्त्वि"ति तत्संज्ञामेवैतत्कृष्णाजिनाय च व्वदति नेदन्योऽन्यꣳ हिनसातऽइति ॥ ७ ॥ अथ हवि-

१. मा. सं. १. १४. २. मा. सं. १. १४. ३. एवं लिखितपुस्तकेष्वस्ति ।
४. मा. सं. १. १४. ५. मा. सं. १. १४. ६. मा. सं. १. १४.

रावपति । "अग्नेस्तनूरसि वाचो विसर्जन"मिति यज्ञो हि तेना-
ग्नेस्तनूर्वाचो विसर्जनमिति यां वा अमुँ हविर्ग्रहीष्यन्वाचं यच्छत्यत्र
वै तां विसृजते तद्यदेतामत्र वाचं विसृजतऽएष हि यज्ञऽउलूखले
प्रत्यष्ठादेष हि प्रासारि तस्मादाह वाचो विसर्जनमिति ॥ ८ ॥ स
यदिदं पुरा मानुषीं वाचं व्याहरेत् । तत्रो वैष्णवीमृचं वा यजुर्वा
जपेद्यज्ञो वै विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्ति"र्देव-
वीतये त्वा गृह्णामी"ति देवानवदित्यु हि हविर्गृह्यते ॥९॥ अथ मुसल-
मादत्ते । "बृहद्भावासि वानस्पत्य"ऽइति बृहद्भावा ह्येष वानस्पत्यो
ह्येष तदवदधाति "सँऽइदं देवेभ्यो हविः शमीष्व सुशमि शमी-
ष्वे"ति सऽइदं देवेभ्यो हविः सँस्कुरु साधु सꣳस्कृतँ सꣳस्कु-
र्व्वित्येवैतदाह ॥ १० ॥ अथ हविष्कृतमुद्वादयति । "हविष्कृदेहि
हविष्कृदेही"ति वाग्वै हविष्कृद्वाचमेवैतद्विसृजते व्वागु वै यज्ञस्तद्य-
ज्ञमेवैतत्पुनरुपह्वयते ॥ ११ ॥ तानि वाऽएतानि । चत्वारि वाचऽ
एहीति ब्राह्मणस्यागत्याद्रवेति वैश्यस्य च राजन्यबन्धोश्चाधावेति
शूद्रस्य स यदेव ब्राह्मणस्य तदाहैतद्धि यज्ञियतममेतदु ह वै वाचः
शान्ततमं यदेहीति तस्मादेहीत्येव ब्रूयात् ॥ १२ ॥ तद्ध स्मैतत्पुरा।
जायैव हविष्कृदुपोत्तिष्ठति तदिदमप्येतर्हि यऽएव कश्चोपोत्तिष्ठति
स यत्रैष हविष्कृतमुद्वादयति तदेको हपदुपले समाहन्ति तद्यदेतामत्र
वाचं प्रत्युद्वादयन्ति ॥ १३ ॥ मनोर्ह वाऽऋषभ आस । तस्मिन्न-
सुरघ्नी सपत्नघ्नी वाक्प्रविष्टास तस्य ह स्म श्वसथाद्रवथादसुर-
रक्षसानि मृद्यमानानि यन्ति ते हासुराः समूदिरे पापं वत नोऽय-
मृषभः सचते कथं न्विमं दभ्नुयामेति किलाताकुलीऽइति हासुर-
ब्रह्मावासतुः ॥ १४ ॥ तौ होचतुः । श्रद्धादेवो वै मनुरावं नु वेदा-
वेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनेनर्षभेणेति तथेति
तस्यालब्धस्य सा वागपचक्राम ॥ १५ ॥ सा मनोरेव जायां मना-

१. मा. सं. १. १५. २. मा. सं. १. १५. ३. मा. सं. १. १५.
४. मा. सं. १. १५. ५. मा. सं. १. १५. ६. See आप.श्रौ. १.२२.१२.

वीं प्रविवेश । तस्यै ह स्म यत्र व्वदन्त्यै शृण्वन्ति ततो ह स्मैवासुररक्षसानि मृद्यमानानि यन्ति ते हासुराः समूदिरेऽइतो वै नः पापीयः सचते भूयो हि मानुषी व्वाग्वदतीति किलानाकुली हैवोचतुः श्रद्धादेवो वै मनुरावं न्वेव व्वेदावेति तौ हागत्योचतुर्मनो याजयाव त्वेति केनेत्यनयैव जाययेति तथेति तस्याऽआलब्धायै सा व्वागपचक्राम ॥१६॥ सा यज्ञमेव यज्ञपात्राणि प्रविवेश । ततो हैनां न शेकतुर्निर्हन्तुँ सैषासुरघ्नी सपत्नघ्नी व्वागुद्वदति स यस्य हैवं विदुषऽएतामत्र व्वाचं प्रत्युद्वादयन्ति पापीयाछ्रेयो हैवास्य सपत्ना भवन्ति ॥१७॥ स समाहन्ति । "कुक्कुटोऽसि मधुजिह्वऽ" इति मधुजिह्वो वै स देवेभ्य आसीद्विषजिह्वोऽसुरेभ्यः स यो देवेभ्यऽआसीः स नऽएधीत्येवैतदाहे"षमूर्जमा वद न्वया व्वयछ्रं सङ्घातँसङ्घातं जेष्मे"ति नात्र तिरोहितमिवास्ति ॥ १८ ॥ अथ शूर्पमादत्ते । "व्वर्षवृद्धमसी"ति व्वर्षवृद्धँ ह्येतद्यदि नडानां यदि व्वेणूनां यदीषीकाणां व्वर्षमु ह्येवैता व्वर्धयति ॥ १९ ॥ अथ हविर्निर्व्वपति । "प्रति त्वा व्वर्षवृद्धं व्वेत्त्वि"ति व्वर्षवृद्धाऽउ ह्येवैते यदि व्रीहयो यदि यवा व्वर्षमु ह्येवैतान् वर्धयति तत्संज्ञामेवैतच्छूर्पाय च व्वदति नेदन्योऽन्यँ हिनसातऽइति ॥ २० ॥ अथ निष्पुनाति । "परापूतछ्रं रक्षः परापूताऽअरातय"ऽइत्यथ तुषान्प्रहन्त्य"पहतछ्रं रक्ष"ऽइति तन्नाष्ट्राऽएवैतद्रक्षाछ्रंस्यतोऽपहन्ति ॥२१॥ अथापविनक्ति । "व्वायुर्वो व्विविनक्त्वि"त्ययं वै व्वायुर्योऽयं पवतऽएष वाऽइदँसर्व्वं विविनक्ति यदिदं किञ्च व्विविच्यते तदेनानेष एवैतद्विविनक्ति स यदैतऽएतत्प्राप्नुवन्ति यत्रैनानध्यपविनक्ति ॥ २२ ॥ अथानुमन्त्रयते । "देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना" सुप्रतिगृहीताऽअसन्नित्यथ त्रिः फलीकरोति त्रिवृद्धि यज्ञः ॥ २३ ॥

१. मा. सं. १. १६. २. मा. सं. १. १६. ३. मा. सं. १. १६.
४. मा. सं. १. १६. ५. मा. सं. १. १६. ६. मा. सं. १. १६.
७. स्यपहन्ति. क. पा. ८. मा. सं. १. १६. ९. मा. सं. १. १६.

तद्धैके "देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमि"ति फलीकुर्वन्ति तदु तथा न कुर्य्यादादिष्टं वाऽएतद्देवतायै हविर्भवत्यथैतद्वैश्वदेवं करोति यदाह देवेभ्यः शुन्धध्वमिति तत्समदं करोति तस्मादु तूष्णीमेव फलीकुर्य्यात् ॥ २४ ॥ Cf. का.श. २.१.३. तै. ब्रा. ३. २. ५. ६.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे प्रथमकाण्डे प्रथमप्रपाठके चतुर्थं ब्राह्मणम् ॥ (इति प्रथमोऽध्यायः)

१. १. ५.

स वै कपालान्येवान्यतरऽउपदधाति । दृषदुपलेऽअन्यतरस्तद्वाऽएतदुभयꣳ सह क्रियते तद्यदेतदुभयꣳ सह क्रियते ॥ १ ॥ शिरो ह वाऽएतद्यज्ञस्य यत्पुरोडाशः । स यान्येवेमानि शीर्ष्णः कपालान्येतान्यवास्य कपालानि मस्तिष्कऽएव पिष्टानि तद्वाऽएतदेकमङ्गमेकꣳ सह करवाव समानं करवावेति तस्माद्वाऽएतदुभयꣳ सह क्रियते ॥२॥ स यः कपालान्युपदधाति । स ऽउपवेषमादत्ते "धृष्टिरसी"ति स यदेनेनाग्निं धृष्णिवोपचरति तेन धृष्टिरथ यदेनेन यज्ञऽउपालभतऽउपेव वाऽएनेनैतद्वेवेष्टि तस्मादुपवेषो नाम ॥ ३ ॥ तेन प्राचोऽङ्गारानुदूहति । "अपाग्नेऽअग्निमामादं जहि निष्कव्यादꣳ सेधे"त्ययं वाऽआमाद्येनेदं मनुष्याः पक्त्वाश्नन्त्यथ येन पुरुषं दहन्ति स क्रव्यादेतावेवैतदुभावतोऽपहन्ति ॥ ४ ॥ अथाङ्गारमास्कौति । "आ देवयजं वहे"ति यो देवयाट् तस्मिन्हवीꣳषि श्रपयाम तस्मिन्यज्ञं तनवामहाऽइति तस्माद्वाऽआस्कौति ॥ ५ ॥ तं मध्यमेन कपालेनाभ्युपदधाति । देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयाञ्चक्रुर्नोऽधस्तान्नाष्ट्रा रक्षाꣳस्युपोत्तिष्ठानित्यग्निर्हि रक्षसामपहन्ता तस्मादेवमुपदधाति तद्यदेषऽएव भवति नान्य

१. मा. सं. १. १७. २. मा. सं. १. १७. ३. मा. सं. १. १७.

ऽएष हि यज्ञुष्कृतो मेध्यस्तस्मान्मध्यमेन कपालेनाभ्युपदधाति ॥ ६ ॥ स ऽ उपदधाति । "ध्रुवमसि पृथिवीं दृꣳहे"ति पृथिव्या ऽएव रूपेणैतदेव दृꣳहत्येतेनैव द्विषन्तं भ्रातृव्यमववाधते "ब्रह्मवनि त्वा क्षत्रवनि सजातवन्युपदधामि भ्रातृव्यस्य व्वधाये"ति वह्नी वै यज्ञुः-ष्वाशीस्तद्ब्रह्म च क्षत्रं चाशास्तऽउभे वीर्य्ये सजातवनीति भूमा वै सजातास्तद्भूमानमाशास्तऽउपदधामि भ्रातृव्यस्य व्वधायेति यदि नाभिचरेद्यद्यु ऽ अभिचरेदमुष्य वधायेति ब्रूयादभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥ ७ ॥ अथाङ्गारमास्कौति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहितमेव सव्यस्य पाणेरङ्गुल्या भवति ॥ ८ ॥ अथाङ्गारमध्यूहति । "अग्ने ब्रह्म गृभ्णीष्वे"ति नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानित्यग्निर्हि रक्ष-सामपहन्ता तस्मादेनमध्यूहति ॥ ९ ॥ अथ यत्पश्चात्तदुपदधाति । "धरुणमस्यन्तरिक्षं दृꣳहे"त्यन्तरिक्षस्यैव रूपेणैतदेव दृꣳहत्ये-तेनैव द्विषन्तं भ्रातृव्यमववाधते "ब्रह्मवनि त्वा क्षत्रवनि सजा-तवन्युपदधामि भ्रातृव्यस्य व्वधाये"ति ॥१०॥ अथ यत्पुरस्तात्तदुपद-धाति । "धर्त्रमसि दिवं दृꣳहे"ति दिवऽ एव रूपेणैतदेव दृꣳ-हत्येतेनैव द्विषन्तं भ्रातृव्यमववाधते "ब्रह्मवनि त्वा क्षत्रवनि सजातवन्यु-पदधामि भ्रातृव्यस्य व्वधाये"ति ॥११॥ अथ यद्दक्षिणतस्तदुपदधाति । "व्विश्वाभ्यस्त्वाशाभ्यऽउपदधामी"ति स यदिमांल्लोकानति चतु-र्थमस्ति वा न वा तेनैवैतद्द्विषन्तं भ्रातृव्यमववाधतेऽनद्धा वै तद्यदि-मांल्लोकानति चतुर्थमस्ति वा न वानद्धो तद्यद्विश्वा ऽआशास्तस्मा-दाह "व्विश्वाभ्यस्त्वाशाभ्यऽ उपदधामी"ति तूष्णीं वै वेतराणि कपालान्युपदधाति "चितस्थोर्ध्वचित"ऽ इति वा ॥१२॥ अथा-

१. मा. सं. १. १७. २. मा. सं. १. १७. ३. मा. सं. १. १८.
४. तस्मादेवमिति. क.ख. ५. मा. सं. १. १८. ६. मा. सं. १. १८.
७. मा. सं. १. १८. ८. मा. सं. १. १८. ९. मा. सं. १. १८.

ङ्गारैरभ्यूहति । "भृगूणामङ्गिरसां तपसा तप्यध्वमि"त्येतद्वै तेजिष्ठं तेजो यद्भृग्वङ्गिरसाꣳसुतप्तान्यसान्निति तस्मादेनमभ्यूहति ॥१३॥ अथ यो दृषदुपलेऽ उपदधाति । स कृष्णाजिनमादत्ते शर्मासी"ति तदवधूनोत्य"वधूतꣳ रक्षोऽवधूता ऽ अरातय"ऽ इति सोऽसावेव बन्धुस्तत्प्रतीचीनग्रीवमुपस्तृणात्य "दित्यास्त्वगसि प्रति त्वादितिर्व्वेत्त्वि"ति सोऽसावेव बन्धुः ॥१४॥ अथ दृषदमुपदधाति । "धिषणासि पर्व्वती प्रति त्वादित्यास्त्वग्वेत्त्वि"ति धिषणा हि पर्व्वती हि प्रति त्वादित्यास्त्वग्वेत्त्वीति तत्संज्ञामेवैतत्कृष्णाजिनाय च व्वदति नेदन्योऽन्यꣳ हिनसातऽ इतीयमेवैषा पृथिवी रूपेण ॥ १५ ॥ अथ शम्यामुदीचीनाग्रामुपदधाति । "दिवस्कम्भनीरसी"त्यन्तरिक्षमेव रूपेणान्तरिक्षेण हीमे द्यावापृथिवी विष्टब्धे तस्मादाह दिवस्कम्भनीरसीति ॥१६॥ अथोपलामुपदधाति । "धिषणासि पार्व्वतेयी प्रति त्वा पर्वती व्वेत्त्वि"ति कनीयसी ह्येषा दुहितेव भवति तस्मादाह पार्वतेयीति प्रति त्वा पर्व्वती वेत्त्वीति प्रति हि स्वः सञ्जानीते तत्संज्ञामेवैतद्दृषदुपलाभ्यां व्वदति नेदन्योऽन्यꣳ हिनसातऽइति द्यौरेवैषा रूपेण हनूऽएव दृषदुपले जिह्वैव शम्या तस्माच्छम्यया समाहन्ति जिह्वया हि व्वदति ॥१७॥ अथ हविरधिवपति । "धान्यमसि धिनुहि देवानि"ति धान्यꣳहि देवान्धिनवदित्यु हि हविर्गृह्यते ॥१८॥ अथ पिनष्टि । "प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषे धा"मिति प्रोहति "देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना । चक्षुषे त्वे"ति ॥१९॥ *(शतम् ॥१००॥) तद्यदेवं पिनष्टि । जीवं वै देवानाꣳ हविरमृतममृ-

१. मा. सं. १. १८. २. तस्मादेवं. क. ख. ३. मा. सं. १. १९.
४. मा. सं. १ १९. ५. मा. सं. १. १९. ६. मा. सं. १. १९.
७. मा. सं. १. १९. ८. मा. सं. १. १९. ९. मा. सं. १. १९.
१०. मा.सं. १.२०. See मै.सं.४.१.७. and तै.सं.१.१.६. ११. मा. सं. १. २०.

* अत्र आदितः कण्डिकानां संख्या शतं भवतीति तदवगमार्थेदं शतसंख्यानिवे-

तानामथैतदुलूखलमुसलाभ्यां दृषदुपलाभ्याᳬहविर्यज्ञं घ्नन्ति ॥२०॥ स यदाह । प्राणाय त्वोदानाय त्वेति तत्प्राणोदानौ दधाति व्यानाय त्वेति तद्व्यानं दधाति दीर्घामनु प्रसितिमायुषे धामिति तदायुर्दधाति देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना सुप्रतिगृहीतान्यसानीति चक्षुषे त्वेति तच्चक्षुर्दधात्येतानि वै जीवतो भवन्त्येवमु हैतज्जीवमेव देवानाᳬ हविर्भवत्यमृतममृतानां तस्मादेवं पिनष्टि पिᳬषन्ति पिष्टान्यभीन्धते कपालानि ॥ २१ ॥ अथैकऽ आज्यं निर्वपति । यद्वाऽआदिष्टं देवतायै हविर्गृह्यते यावद्देवत्यं तद्भवति तदितरेण यजुषा गृह्णाति न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्मादनिरुक्तेन यजुषा गृह्णाति महीनां पयोऽसीति मह्य ऽइति ह वाऽएतासामेकं नाम यद्गवां तासां वाऽएतत्पयो भवति तस्मादाह महीनां पयोऽसीत्येवमु हास्यैतत्खलु यजुषैव गृहीतं भवति तस्माद्देवाह महीनां पयोऽसीति ॥ २२ ॥

Cf. का. श. २. १. ४. तै. ब्रा. ३. २. ७. मै. सं. १. ४. ७, ८.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे प्रथमकाण्डे प्रथमपाठके पञ्चमं ब्राह्मणम् ॥

१. १. ६.

पवित्रवति संव्वपति । पात्र्यां पवित्रेऽअवधाय "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याᳬ संव्वपामी"ति सोऽसावेवैतस्य यजुषो बन्धुः ॥१॥ अथान्तर्व्वेद्युपविशति । अथैकऽउपसर्जनीभिरेति ताऽआनयति ताः पवित्राभ्यां प्रतिगृह्णाति "समाप ओषधीभिरि"ति सᳬह्येतदापऽओषधीभिरेताभिः पिष्टाभिः सङ्गच्छन्ते "समोषधयो रसेने"ति सᳬह्येतदोषधयो रसेनैताः पिष्टाऽअद्भिः

शनम् । मूलपुस्तकेष्वेवमेवोपलभ्यते प्राचीनसम्प्रदायश्चायम् । एवमुत्तरत्रऽपि द्रष्टव्यम् ।

१. मा. सं. १. २०. २. मा. सं. १. २१. ३. मा. सं. १. २१.

सङ्गच्छन्तऽआपो ह्येतासाꣳ रसः "सꣳरेवतीर्जगतीभिः पृच्यन्तामि"ति रेवत्यऽ आपो जगत्य ओषधयस्ता उ ह्येतदुभय्यः सम्पृच्यन्ते "सं मधुमतीर्म्मधुमतीभिः पृच्यन्ता"मिति सꣳरसवत्यो रसवतीभिः पृच्यन्तामित्येवैतदाह ॥ २ ॥ अथ संयौति। "जनयत्यै त्वा संयौमी"ति यथा श्रियेऽन्नाद्यायेमाः प्रजा यजमानाय यच्छेदेवं वै तत्संयौत्यधिवर्क्ष्यन्नु वै संयौति यथा वाऽअधिवृक्तोऽग्नेराधि जायेतैवं वै तत्संयौति ॥ ३ ॥ अथ द्वेधा करोति। यदि द्वे हविषी भवतः पौर्णमास्यां वै द्वे हविषी भवतः स यत्र पुनर्न सꣳहरिष्यन्त्स्यात्तदभिमृशती"दमग्नेरिदमग्नीषोमयो"रिति नाना वाऽएतदग्रे हविर्गृह्णन्ति तत्सहावघ्नन्ति तत्सह पिꣳषन्ति तत्पुनर्नाना करोति तस्मादेवमभिमृशत्यधिवृणक्त्येवैष पुरोडाशमधिश्रयत्यसावाज्यम् ॥ ४ ॥ तद्वाऽएतत्। उभयꣳ सह क्रियतेऽतद्यदेतदुभयꣳ सह क्रियतेऽर्धो ह वाऽएष आत्मनो यज्ञस्य यदाज्यमर्धो यदिह हविर्भवति स यश्चासावर्धो य उ चायमर्धस्ता ऽउभावग्निं गमयावेति तस्माद्वाऽएतदुभयꣳ सह क्रियतऽएवमु हैषऽआत्मा यज्ञस्य सन्धीयते ॥ ५ ॥ सोऽसावाज्यमधिश्रयति। "इषे त्वे"ति वृष्ट्यै तदाह यदाहेषे त्वेति तत्पुनरुद्वासयत्यूर्जे त्वेति यो व्वृष्टादूर्ग्रसो जायते तस्मै तदाह ॥ ६ ॥ अथ पुरोडाशमधिवृणक्ति। "घर्मोऽसी"ति यज्ञमेवैतत्करोति यथा घर्म्मं प्रवृज्यादेवं प्रवृणक्ति व्विश्वायुरिति तदायुर्दधाति ॥७॥ तं प्रथयति। "उरुप्रथा उरु प्रथस्वे"ति प्रथयत्येवैनमेतदुरु ते यज्ञपतिः प्रथतामिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदाशिषमशास्ते ॥ ८ ॥ तं न सत्रा पृथुं कुर्य्यात्। मानुषꣳ ह कुर्य्यात्पृथुं कुर्याद्व्यद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्मान्न सत्रा पृथुं कुर्यात् ॥ ९ ॥ अश्वशफमात्रं कुर्य्या-

१. मा. सं. १. २१. २. मा. सं. १. २१. ३. मा. सं. १. २२.
४. मा. सं. १. २२. ५. मा. सं. १. २२. ६. मा. सं. १. २२.
७. मा. सं. १. २२. ८, ९, See. आप. श्रौ. १. २५. ४. and ६.

द्रित्यु हैकऽआहुः । कस्तद्वेद यावानश्वशफो यावन्तमेव स्वयं मनसा न सत्रा पृथुं मन्येतैवं कुर्य्यात् ॥ १० ॥ तमद्भिरभिमृशति । सकृद्वा त्रिर्वा तद्यदेवास्यात्रावघ्नन्तो वा पिꣳषन्तो वा क्षण्वन्ति[1] वा व्वि वा व्वृहन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति तस्मादद्भिरभिमृशति ॥ ११ ॥ सोऽभिमृशति[2] । "अग्निष्टे त्वचं मा हिꣳसी"दित्यग्निना वाऽएनमेतदभिनप्स्यन्भवत्येष ते त्वचं मा हिꣳसीदित्येवैतदाह ॥ १२ ॥ तं पर्य्यग्निं करोति । अच्छिद्रमेवैनमेतदग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्यग्निर्हि रक्षसामपहन्ता तस्मात्पर्य्यग्निं करोति ॥ १३ ॥ तꣳ श्रपयति । "देवस्त्वा सविता श्रपयन्वि"ति न वाऽएतस्य मनुष्यः श्रपयिता देवो ह्येष तदेनं देव ऽएव सविता श्रपयति "व्वर्षिष्ठेऽधि नाक"ऽइति देवत्रो ऽएतदाह यदाह व्वर्षिष्ठेऽधि नाकऽइति तमभिमृशति श्रृतं व्वेदानीति तस्माद्वाऽअभिमृशति ॥ १४ ॥ सोऽभिमृशति । "मा भेर्मा संविक्था" ऽइति मा त्वं भैर्मा संविक्था यत्त्वाहमनुपꣳसन्तं मानुषोऽभिमृशामीत्येवैतदाह ॥ १५ ॥ यदा श्रृतोऽथाभिवासयति । नेदेनमुपरिष्टान्नाष्ट्रा रक्षाꣳस्यवपश्यानिति नेद्वेव नग्नऽइव मुषितऽइव शयाताऽइत्यु चैव तस्माद्वाऽअभिवासयति ॥ १६ ॥ सोऽभिवासयति । "अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयादि"ति नेदेतदनु यज्ञो वा यजमानो वा ताम्याद्यदिदमभिवासयामीति तस्मादेवमभिवासयति ॥ १७ ॥ अथ पात्रीनिर्णेजनम् । अङ्गुलि-

१. क्षिण्वन्तीति ग. २. मृशति इति ग. ३. मा. सं. १. २२.
४. एतमिति क. ५. मा. सं. १. २२. ६. मा. सं. १. २२.
७. See का. सं. ३१. ७. and मै. सं. ४. १. ९. ८. अभिमृशति इति ग.
९. मा. सं. १. २३. १०. यन्त्वाहमिति क. ११. मा. सं. १. २३.

प्रणेजनमाप्त्येभ्यो निनयति तद्यदाप्त्येभ्यो निनयति ॥ १८ ॥
(f. का. श. २. २. १. तै. ब्रा. ३. २. ८. (आदितः कण्डिकाः १२१)

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे प्रथमप्रपाठके षष्ठं ब्राह्मणम् ॥

प्रथमः प्रपाठकस्समाप्तः ॥

अथ द्वितीयः प्रपाठकः ॥

१ २. १.

चतुर्था विहितो ह वाऽअग्रेऽग्निरास । स यमग्रेऽग्निꣳ होत्राय प्रावृणत स प्राधन्वद्यं द्वितीयं प्रावृणत स प्रैवाधन्वद्यं तृतीयं प्रावृणत स प्रैवाधन्वदथ योऽयमेतर्ह्यग्निः स भीषा निलिल्ये सोऽपः प्रविवेश तं देवा ऽअनुविद्य सहसैवाद्भ्य ऽआनिन्युः सोऽपोऽभितिष्ठेवावप्रयूता स्थ याऽ अप्रपदनꣳ स्थ याभ्यो वो मामकामं नयन्तीति तत ऽआप्त्याः सम्बभूवुस्त्रितो द्वित ऽएकतः ॥ १ ॥ तऽइन्द्रेण सह चेरुः । यथेदं ब्राह्मणो राजानमनुचरति स यत्र त्रिशीर्षाणं त्वाष्ट्रं विश्वरूपं जघान तस्य हैतेऽपि वध्यस्य विदाञ्चक्रुः शश्वद्धैनं त्रित ऽएव जघानात्यह तदिन्द्रोऽमुच्यत देवो हि सः ॥ २ ॥ तऽ उ हैतऽऊचुः । उपैवेमऽएनो गच्छन्तु येऽस्य वध्यस्यावेदिषुरिति किमिति यज्ञऽ एवैषु मृष्टामिति तदेष्वेतद्यज्ञो मृष्टे यदेभ्यः पात्रीनिर्णेजनमङ्गुलिप्रणेजनं निनयन्ति ॥ ३ ॥ तऽउ हाप्त्याऽ ऊचुः । अत्येव व्वयमिदमस्मत्परो नयामेति कमभीति यऽ एवादक्षिणेन हविषा यजाताऽइति तस्मान्नादक्षिणेन हविषा यजेताप्त्येषु ह यज्ञो मृष्टऽ आप्त्याऽ उ ह तस्मिन्मृजते योऽदक्षिणेन हविषा यजते ॥ ४ ॥ ततो देवाः । एतां

दर्शपूर्णमासयोर्दक्षिणामकल्पयन्यदन्वाहार्यं नेददक्षिणꣳ हविरसदिति तन्नाना निनयति तथैभ्योऽसमदं करोति तदभितपति तथैषाꣳ शृतं भवति स निनयति "त्रिताय त्वा द्विताय त्वैकताय त्वे"ति पशुर्ह वाऽएषऽआलभ्यते यत्पुरोडाशः ॥ ५ ॥ पुरुषꣳ ह वै देवाः । अग्रे पशुमालेभिरे तस्यालब्धस्य मेधोऽपचक्राम सोऽश्वं प्रविवेश तेऽश्वमालभन्त तस्यालब्धस्य मेधोऽपचक्राम स गां प्रविवेश ते गामालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽविं प्रविवेश तेऽविमालभन्त तस्यालब्धस्य मेधोऽपचक्राम सोऽजं प्रविवेश तेऽजमालभन्त तस्यालब्धस्य मेधोऽपचक्राम ॥ ६ ॥ सऽइमां पृथिवीं प्रविवेश । तं खनन्तऽइवान्वीपुस्तमन्वविन्दंस्ताविमौ व्रीहियवौ तस्मादप्येतावेतर्हि खनन्तऽइवैवानुविन्दन्ति स यावद्वीर्यवद्ध वाऽअस्यैते सर्वे पशवऽआलब्धास्स्युस्तावद्वीर्यवद्धास्य हविर्हविरेव भवति यऽएवमेतद्वेदात्रो सा सम्पद्यदाहुः पाङ्क्तः पशुरिति ॥ ७ ॥ यदा पिष्टान्यथ लोमानि भवन्ति । यदापऽआनयत्यथ त्वग्भवति यदा संयौत्यथ माꣳसं भवति सन्ततऽइव हि स तर्हि भवति सन्ततमिव हि माꣳसं यदा शृतोऽथास्थि भवति दारुणऽइव हि स तर्हि भवति दारुणमिव ह्यस्थ्यथ यदुद्वासयिष्यन्नभिघारयति तं मज्जानन्दधात्येषो सा सम्पद्यदाहुः पाङ्क्तः पशुरिति ॥८॥ स यं पुरुषमालभन्त । स किंपुरुषोऽभवद्यावश्वं च गां च तौ गौरश्च गवयश्चाभवतां यमविमालभन्त सऽ उष्ट्रोऽभवद्यमजमालभन्त स शरभोऽभवत्तस्मादेतेषां पशूनां नाशितव्यमपक्रान्तमेधा हैते पशवः ॥ ९ ॥ Cf. का. श. २. २. १. काठ. सं. ३१. ७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे प्रथमकाण्डे द्वितीयप्रपाठके प्रथमं ब्राह्मणम् ॥

---

१. अत्र वाक्यसमाप्ति ग पुस्तके. अन्वहार्यमिति ओदनस्य नाम.

२. मा. सं. १. २३. See. तै. सं. १. १. ८. २. ३. See. ऐ. ब्रा. ६-२.

४. हविरेवेति ग. ५. किम्पुरुष इति ख. ग.

१. २. २.

इन्द्रो ह यत्र व्वृत्राय व्वज्रं प्रजहार । स प्रहृतश्चतुर्धाऽभवत्तस्य स्फ्यस्तृतीयं वा यावद्वा यूपस्तृतीयं वा यावद्वा रथस्तृतीयं वा यावद्वाथ यत्र प्राहरत्तच्छकलोऽशीर्यत स पतित्वा शरोऽभवत्तस्माच्छरो नाम यदशीर्यतैवमु स चतुर्धा व्वज्रोऽभवत् ॥ १ ॥ ततो द्वाभ्यां ब्राह्मणा यज्ञे चरन्ति । द्वाभ्याꣳ राजन्यबन्धवः संव्याधे यूपेन च स्फ्येन च ब्राह्मणा रथेन च शरेण च राजन्यबन्धवः ॥२॥ स यत्स्फ्यमादत्ते । यथैव तदिन्द्रो व्वृत्राय व्वज्रमुदयच्छदेवमेवैषऽएतं पाप्मने द्विषते भ्रातृव्याय व्वज्रमुद्यच्छति तस्माद्वै स्फ्यमादत्ते ॥ ३ ॥ तमादत्ते । "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददेऽध्वरकृतं देवेभ्य" इति सविता वै देवानां प्रसविता तत्सवितृप्रसूतऽ एवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्यामादत्ते न स्वाभ्यां पूष्णो हस्ताभ्यामिति पूषा भागदुघस्तत्तस्यैव हस्ताभ्यामादत्ते न स्वाभ्यां व्वज्रो वाऽएष तस्य न मनुष्यो भर्त्ता तमेताभिर्देवताभिरादत्ते ॥ ४ ॥ आददेऽध्वरकृतं देवेभ्यऽइति । अध्वरो वै यज्ञो यज्ञकृतं देवेभ्यऽइत्येवैतदाह तꣳ सव्ये पाणौ कृत्वा दक्षिणेनाभिमृश्य जपति सꣳश्यत्येवैनमेतद्यज्जपति ॥ ५ ॥ स जपति[2] । "इन्द्रस्य[3] बाहुरसि दक्षिण"ऽइत्येष वै व्वीर्यवत्तमो यऽइन्द्रस्य बाहुर्दक्षिणस्तस्मादाहेन्द्रस्य बाहुरसि दक्षिणऽइति "सहस्रभृष्टिः शततेजा"ऽइति सहस्रभृष्टिर्व्वै स व्वज्रऽआसीच्छततेजा यं तं व्वृत्राय प्राहरत्तमेवैतत्करोति ॥६॥ "व्वायुरसि[4] तिग्मतेजा"ऽइति । एतद्वै तेजिष्ठं तेजो यदयं योऽयं पवतऽएष हीमांल्लोकांस्तिर्य्यङ्ङनुपवते सꣳश्यत्येवैनमेत "द्विषतो व्वध" ऽइति यदि नाऽभिचरेद्यद्युऽअभिचरेदमुष्य व्वधऽइति ब्रूयात्तेन सꣳशि-

१. मा. सं. १. २४. २. जपति. इति. ग. ३ मा. सं. १. २४.
४. मा. सं. १. २४. ५. मा. सं. १. २४. ६. मा. सं. १. ४२.

तेन नात्मानमुपस्पृशति न पृथिवीं नेदनेन व्वज्रेण सꣳशितेनात्मानं वा पृथिवीं वा हिनसानीति तस्मान्नात्मानमुपस्पृशति न पृथिवीम् ॥ ७ ॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते ह स्म यद्देवाऽअसुरान् जयन्ति ततो ह स्मै वैनान् पुनरुपोत्तिष्ठन्ति ॥ ८ ॥ ते ह देवाऽऊचुः । जयामो वाऽअसुरांस्ततस्त्वेव नः पुनरुपोत्तिष्ठन्ति कथं न्वेनाननपजय्यं जयेमेति ॥ ९ ॥ स हाग्निरुवाच । उदञ्चो वै नः पलाय्य मुच्यन्त ऽइत्युदञ्चो ह स्मैवैषां पलाय्य मुच्यन्ते ॥ १० ॥ स हाग्निरुवाच । अहमुत्तरतः पर्य्येष्याम्यथ यूयमितऽउपसꣳरोत्स्यथ तान्त्सꣳरुध्यैभिश्च लोकैरभिनिधास्यामो यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न सꣳहास्यन्तऽइति ॥ ११ ॥ सोऽग्निरुत्तरतः पर्यैत् । अथेमऽइतऽउपसमरुन्धँस्तान्त्सꣳरुध्यैभिश्च लोकैरभिन्यदधुर्यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न समजिहत तदेतन्निदानेन यत् स्तम्बयजुः ॥१२॥ स योऽसावग्नीदुत्तरतः पर्येति । अग्निरेवैष निदानेन तानध्वर्युरेवेतऽउपसꣳरुणाद्धि तान्त्सꣳ रुध्यैभिश्च लोकैरभिनिदधाति यदु चेमांल्लोकानति चतुर्थं ततः पुनर्न सञ्जिहते तस्मादप्येतर्ह्यसुरा न सञ्जिहते येन ह्येवैनान्देवाऽअवाबाधन्त तेनैवैनानप्येतर्हि ब्राह्मणा यज्ञेऽववाधन्ते ॥ १३ ॥ यऽउऽएव यजमानायारातीयति । यश्चैनं द्वेष्टि तमेवैतदेभिश्च लोकैरभिनिदधाति यदु चेमांल्लोकानति चतुर्थꣳस वा ऽएभिश्च लोकैरभिनिदधद्यदु चेमांल्लोकानति चतुर्थमस्याऽएव सर्व्वꣳ हरत्यस्याꣳहीमे सर्व्वे लोकाः प्रतिष्ठिताः किꣳ हि हरेद्यदन्तरिक्षꣳ हरामि दिवꣳ हरामीति हरेत्तस्मादस्याऽएव सर्व्वꣳ हरति ॥ १४ ॥ अथ तृणमन्तर्धाय प्रहरति । नेदनेन व्वज्रेण सꣳशितेन पृथिवीꣳहिनसानीति तस्मात्तृणमन्तर्धाय प्रहरति ॥ १५ ॥ स प्रहरति । "पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳसिषमि"

१. लोकैरभिन्यदधुरिति ख.ग. २. मा. सं. १. २५.

त्युत्तरमूलामिव वाऽएनामेतत्करोत्यादद्दानस्तामेतदाहौषधीनां ते मूलानि मा हिꣳसिषमिति "व्वजं गच्छ गोष्ठानमित्याभिनिधास्यन्नेवैतदनपक्रामि कुरुते तद्व्यनपक्रामि यद्व्रजेऽन्तस्तस्मादाह व्वजं गच्छ गोष्ठानमिति "व्वर्षतु ते द्यौ"रिति यत्र वाऽअस्यै खनन्तः क्रूरीकुर्व्वन्त्यपघ्नन्ति शान्तिरापस्तदाद्भिः शान्त्या शमयति तदाद्भिः सन्दधाति तस्मादाह व्वर्षतु ते द्यौरिति "वधान देव सवितः परमस्यां पृथिव्या"मिति देवमेवैतत्सवितारमाहान्धे तमसि वधानेति यदाह परमस्यां पृथिव्यामिति "शतेन पाशै"रित्यमुचे तदाह "योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगि"ति यदि नाभिचरेद्यद्युऽअभि चरेदमुमतो मा मौगिति ब्रूयात् ॥ १६ ॥ अथ द्वितीयं प्रहरति । "अपाररुं पृथिव्यै देवयजनाद्वध्यास"मित्यररुर्ह वै नामासुरराक्षसमास तं देवाऽअस्याऽअपाघ्नत तथोऽएवैनमेतदेषोऽस्याऽअपहते "व्वजं गच्छ गोष्ठानं व्वर्षतु ते द्यौर्वधान देव सवितः परमस्यां पृथिव्याꣳशतेन पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगि"ति ॥ १७ ॥ तमग्नीदभिनिदधाति । अररो दिवं मा पप्तऽइति यत्र वै देवाऽअररुमसुरराक्षसमपाघ्नत स दिवमपिपतिपत्तमग्निरभिन्यदधादररो दिवं मा पप्तऽइति स न दिवमपतत्तथोऽएवैनमेतदध्वर्युरेवास्माल्लोकादन्तरेति दिवोऽध्यग्नीत्तस्मादेवं करोति ॥ १८ ॥ अथ तृतीयं प्रहरति । द्रप्सस्ते द्यां मा स्कन्नित्ययं वाऽअस्यै द्रप्सो यमस्याऽइमꣳ रसं प्रजाऽउपजीवन्त्येष ते दिवं मा पप्तदित्येवैतदाह व्वजं गच्छ गोष्ठानं व्वर्षतु ते द्यौर्वधान देव सवितः परमस्यां पृथिव्याꣳशतेन पाशैर्योस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगिति ॥ १९ ॥ स वै त्रिर्यजुषा हरति । त्रयो वाऽइमे लोकाऽएभिरेवैनमेतल्लोकैरभिनिदधात्यद्धा वै तद्यदिमे लोकाऽअद्धो तद्यद्यजुस्तस्मात्त्रिर्यजुषा हरति ॥२०॥ तूष्णीं चतुर्थम्।

१. मा. सं. १. २५. २. मा. सं. १. २५. ३. मा. सं. १. २५.
४. मा. सं. १. २५. ५. मा. सं. १. २५. ६. मा. सं. १. २६.

स यदिमांल्लोकानति चतुर्थमस्ति वा न वा तेनैवैतद्विषन्तं भ्रातृव्यमववाधतेऽनद्धा वै तद्यदिमांल्लोकानति चतुर्थमस्ति वा न वानद्धो तद्यत्तूष्णीं तस्मात्तूष्णीं चतुर्थम् ॥ २१ ॥ Cf. का. श. २. २. २. तै. ब्रा. ३. २. ९. काठ. सं. ३१. ८. मै. सं. ४.१. १०.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे प्रथमकाण्डे द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् ॥

१. २. ३.

देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवाऽअनुव्यमिवासुरथ हासुरा मेनिरेऽस्माकमेवेदं खलु भुवनमिति ॥१॥ ते होचुः । हन्तेमां पृथिवीं विभजामहै तां विभज्योपजीवामेति तामौक्षणैश्चर्मभिः पश्चात्प्राञ्चो विभजमानाऽअभीयुः ॥२॥ तद्वै देवाः शुश्रुवुः । विभजन्ते ह वाऽइमामसुराः पृथिवीं प्रेत तदेष्यामो यत्रेमामसुरा विभजन्ते के ततः स्याम यदस्यै न भजेमहीति ते यज्ञमेव विष्णुं पुरस्कृत्येयुः ॥३॥ ते होचुः । अनु नोऽस्यां पृथिव्यामा भजतास्त्वेव नोऽप्यस्यां भागऽइति ते हासुराऽअसूयन्तऽइवोचुर्यावदेवैष विष्णुरभिशेते तावद्वो दद्मऽइति ॥ ४ ॥ वामनो ह विष्णुरास । तद्देवा न जिहीडिरे महद्वै नोदुर्ये नो यज्ञसम्मितमदुरिति॥५॥ ते प्राञ्चं विष्णुं निपाद्य । छन्दोभिरभितः पर्यगृह्णन् "गायत्रेण त्वा छन्दसा परिगृह्णामी"ति दक्षिणत"स्त्रैष्टुभेन त्वा छन्दसा परिगृह्णामी"ति पश्चा"ज्जागतेन त्वा छन्दसा परिगृह्णामी"त्युत्तरतः ॥ ६ ॥ तं छन्दोभिरभितः परिगृह्य । अग्निं पुरस्तात् समाधाय तेनार्च्चन्तः श्राम्यन्तश्चेरुस्तेनेमाꣳ सर्व्वां पृथिवीꣳ समविन्दन्त तद्यदेनेनेमाꣳ सर्व्वाꣳ समविन्दन्त तस्माद्वेदिर्नाम तस्मादाहुर्यावती व्वेदिस्तावती

१. मबाधत इति. ख. पु. २. मा. सं. १. २७.
३. मा. सं. १. १७. ४. मा. सं. १. २७.

पृथिवीत्येतया हीमाꣳ सर्वाꣳ समविन्दन्तैवꣳ ह वाऽइमाꣳसर्वाꣳ सपत्नानाꣳ संवृङ्क्ते निर्भजत्यस्यै सपत्नान्यऽएवमेतद्वेद ॥ ७ ॥ सोऽयं विष्णुर्ग्लानः । छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमास स तत ऽएवौषधीनां मूलान्युपाम्लोच ॥ ८ ॥ ते ह देवा ऽऊचुः । क्व नु विष्णुरभूत् क्व नु यज्ञोऽभूदिति ते होचुश्छन्दोभिरभितः परिगृहीतोऽग्निः पुरस्तान्नापक्रमणमस्त्यत्रैवान्विच्छतेति तं खनन्तऽइवान्वीपुस्तं त्र्यङ्गुलेऽन्वविन्दंस्तस्मात्त्र्यङ्गुला व्वेदिः स्यात्तदु हापि पाञ्चिस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य व्वेदिं चक्रे ॥ ९ ॥ तदु तथा न कुर्य्यात् । ओषधीनां वै स मूलान्युपाम्लोचत्तस्मादोषधीनामेव मूलान्युच्छेत्तवै ब्रूयाद्यन्वेवात्र विष्णुमन्वविन्दंस्तस्माद्वेदिर्नाम ॥१०॥ तमनुविद्योत्तरेण परिग्रहेण पर्यगृह्णन् । "सुक्ष्मा चासि शिवा चासी"-ति दक्षिणतऽइमामेवैतत्पृथिवीꣳ संविद्य सुक्ष्माꣳ शिवामकुर्व्वत "स्योना चासि सुषदा चासी"ति पश्चादिमामेवैतत् पृथिवीꣳ संविद्य स्योनाꣳ सुषदामकुर्व्वतो "ऊर्जस्वती चासि पयस्वती चे"त्युत्तरतऽइमामेवैतत्पृथिवीꣳ संविद्य रसवतीमुपजीवनीयामकुर्व्वत॥११॥ स वै त्रिः पूर्व्वं परिग्रहं परिगृह्णाति । त्रिरुत्तरं तत्षट्कृत्वः षड्वाऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्परिगृह्णाति ॥ १२ ॥ षड्भिर्व्याहृतिभिः पूर्व्वं परिग्रहं परिगृह्णाति । षड्भिरुत्तरं तद्द्वादश कृत्वो द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्परिगृह्णाति ॥ १३ ॥ व्याममात्री पश्चात्स्यादित्याहुः । एतावान्वै पुरुषः पुरुषसम्मिता हि त्र्यरत्निः प्राची त्रिवृद्धि यज्ञो नात्र मात्रास्ति यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्य्यात् ॥ १४ ॥ अभितोऽग्निमꣳसाऽउन्नयति । योषा वै व्वेदिर्व्वृषाग्निः परिगृह्य वै योषा व्वृषाणꣳ शेते मिथुनमेवैतत्प्रज-

---

१ मा. सं. १. २७. २. मा. सं. १. २७. ३ मा. सं. १. २७.

नं क्रियते तस्मादभितोऽग्निमꣳसा उन्नयति ॥१५॥ सा वै पश्चाद्दरीयसी स्यात् । मध्ये सꣳद्वारिता पुनः पुरस्तादुर्व्येवमिव हि योषां प्रशꣳसन्ति पृथुश्रोणिर्विमृष्टान्तराꣳसा मध्ये सङ्ग्राह्येति जुष्टामेवैनामेतद्देवेभ्यः करोति ॥१६॥ सा वै प्राक्प्रवणा स्यात् । प्राची हि देवानां दिगथोऽउदक्प्रवणोदीची हि मनुष्याणां दिग्दक्षिणतः पुरीषं प्रत्युदूहत्येषा वै दिक् पितॄणाꣳ सा यद्दक्षिणाप्रवणा स्यात् क्षिप्रेह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः पुरीषं प्रत्युदूहति पुरीषवतीं कुर्वीत पशवो वै पुरीषं पशुमतीमेवैनामेतत्कुरुते ॥ १७ ॥ तां प्रतिमार्ष्टि । देवा ह वै सङ्ग्रामꣳ सन्निधास्यन्तस्ते होचुर्हन्त यदस्यै पृथिव्याऽअनामृतं देवयजनं तच्चन्द्रमसि निदधामहै स यदि नऽइतोऽसुरा जयेयुस्तत एवार्च्चन्तः श्रास्यन्तः पुनरभिभवेमेति स यदस्यै पृथिव्याऽअनामृतं देवयजनमासीत्तच्चन्द्रमसि न्यदधत तदेतच्चन्द्रमसि कृष्णं तस्मादाहुश्चन्द्रमस्यस्यै पृथिव्यै देवयजनमित्यपि ह वाऽअस्यै तस्मिन्देवयजनऽइष्टं भवति तस्माद्वै प्रतिमार्ष्टि ॥१८॥ स प्रतिमार्ष्टि । "पुरा क्रूरस्य विसृपो विरप्शिन्नि"ति सङ्ग्रामो वै क्रूरꣳ सङ्ग्रामे हि क्रूरं क्रियते हतः पुरुषो हतोऽश्वः शेते पुरा ह्येतत्सङ्ग्रामान्यदधत तस्मादाह पुरा क्रूरस्य विसृपो विरप्शिन्नि त्यु "दादाय पृथिवीं जीवदानु"मित्युदादाय हि यदस्यै पृथिव्यै जीवमासीत्तच्चन्द्रमसि न्यदधत तस्मादाहो "दादाय पृथिवीं जीवदानु"मिति "यामैरयंश्चन्द्रमसि स्वधाभि"रिति यां चन्द्रमसि *ब्रह्मणा दधुरित्येवैतदाह "तामु धीरासोऽअनुदिश्य यजन्त"ऽइत्येतेनो ह तामनुदिश्य यजन्तेऽपि ह वाऽअस्यैतस्मिन्देवयजनऽइष्टं भवति यऽएवमेतद्वेद ॥१९॥ अथाह "प्रोक्षणीरासादये"ति । व्वज्रो वै स्फ्यो ब्राह्मणश्चेमं पुरा यज्ञमभ्यजूगुपतां व्वज्रो वाऽआपस्तद्वज्रमेवैतदभिगुप्त्याऽआसादयति स वाऽ उपर्य्युपर्येव प्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छत्यथ यन्निहि-

१. मा. सं. १. २८. २. मा. सं. १. २८. ३. मा. सं. १. २८.
* 'ब्राह्मणाः' इति उव्वटादृतः पाठः । ४. मा. सं १. २८. ५. मा. सं. १. २८.

तऽएव स्फ्ये प्रोक्षणीरासादयेद्वज्रो ह समृच्छेयातां तथो ह व्वज्रौ न समृच्छेते तस्मादुपर्युपर्येव प्रोक्षणीषु धार्यमाणास्वथ स्फ्यमुद्यच्छति ॥ २० ॥ अथैतां व्वाचं वदति । "प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः सम्मृड्धि पत्नीꣳ सन्नह्याज्येनोदेहीं"ति सम्प्रैषऽएवैष स यदि कामयेत ब्रूयादेतद्यद्य कामयेताऽपि नाद्रियेत स्वयमु ह्येवैतद्देदेमतः कर्म कर्त्तव्यमिति ॥ २१ ॥ अथोदञ्चꣳ स्फ्यं प्रहरति । अमुष्मै त्वा व्वज्रं प्रहरामीति यद्यभिचरेद्वज्रो वै स्फ्यः स्तृणुते हैवैनेन ॥ २२ ॥ अथ पाणीऽअवनेनिक्ते । यज्ञस्य क्रूरमभूत्तज्ज्यम्याऽएतदहार्षीत्तस्मात्पाणीऽअवनेनिक्ते ॥ २३ ॥ स ये हाग्रऽईजिरे । ते ह स्मावमर्शं यजन्ते ते पापीयाꣳस आसुरथ ये नेजिरे ते श्रेयाꣳस आसुस्ततोऽश्रद्धा मनुष्यान्विवेद ये यजन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यजन्ते श्रेयाꣳसस्ते भवन्तीति ततऽइतो देवान्हविर्न जगामेतः प्रदानाद्धि देवाऽउपजीवन्ति ॥२४॥ ते ह देवाऽऊचुः । बृहस्पतिमाङ्गिरसमश्रद्धा वै मनुष्यानविदन्तेभ्यो ब्रूयेहि यज्ञामिति स हेत्योवाच बृहस्पतिराङ्गिरसः कथा न यजध्वऽइति ते होचुः किं काम्या यजेमहि ये यजन्ते पापीयाꣳसस्ते भवन्ति यऽउ न यजन्ते श्रेयाꣳसस्ते भवन्तीति ॥ २५ ॥ स होवाच । बृहस्पतिराङ्गिरसो यद्वै शुश्रुम देवानां परिप्लुतं तदेष यज्ञो भवति यच्छृतानि हवींꣳषि क्लृप्ता व्वेदिस्तेनावमर्शमचारिष्ट तस्मात्पापीयाꣳसोऽभूत तेनानवमर्शं यजध्वं तथा श्रेयाꣳसो भविष्यथेत्या कियतऽइत्या बर्हिषस्तरणादिति बर्हिषा ह वै खल्वेषा शाम्यति स यदि पुरा बर्हिषस्तरणात् किञ्चिदापद्येत बर्हिरेव तत्स्तृणन्नपास्येदथ यदा बर्हिस्तृणन्त्यपि पदाभितिष्ठन्ति स यो हैवं विद्वाननवमर्शं यजते श्रेयान् हैव भवति तस्मादनवमर्शमेव यजेत॥२६॥

Cf. का.श.२.२.३.तै.ब्रा.३.२.८.९. का.सं.३१.८. मै.सं.४.१०.१०.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे द्वितीयप्रपाठके तृतीयं ब्राह्मणम्
(इति द्वितीयोऽध्यायः)

स वै स्रुचः सम्मार्ष्टि । तद्यत्स्रुचः सम्मार्ष्टि यथा वै देवानां चरणं तद्वाऽअनु मनुष्याणां तस्माद्यदा मनुष्याणां परिवेषणमुपक्लृप्तं भवति ॥ १ ॥ अथ पात्राणि निर्णेनिजति । तैर्निर्णिज्य परिवेविषत्येवं वाऽएष देवानां यज्ञो भवति यच्छृतानि हवींषि कल्पन्ता व्वेदिस्तेषामेतान्येव पात्राणि यत्स्रुचः ॥ २ ॥ स यत्सम्मार्ष्टि । निर्णेनेक्त्येवैनाऽएतन्निर्णिक्ताभिः प्रचरार्णाति तद्वै द्वयेनैव देवेभ्यो निर्णेनिजत्येकेन मनुष्येभ्योऽद्भिश्च ब्रह्मणा च देवेभ्यऽआपो हि कुशा ब्रह्म यजुरेकेनैव मनुष्येभ्योऽद्भिरेवैवम्वेतन्नाना भवति ॥ ३ ॥ अथ स्रुवमादत्ते । तं प्रतपति "प्रत्युष्टꣳ रक्षः प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातय"ऽइति वा ॥ ४ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयाञ्चक्रुस्तद्यज्ञमुखादेवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति ॥ ५ ॥

(अर्धप्रपाठकः)

स वाऽइत्यग्रेरन्तरतः सम्मार्ष्टि । "अनिशितोऽसि सपत्नक्षि"दिति यथानुपरतो यजमानस्य सपत्नान् क्षिणुयादेवमेतदाह "व्वाजिनं त्वा व्वाजेध्यायै सम्मार्ज्मी"ति याज्ञियं त्वा यज्ञाय सम्मार्ज्मीत्येवैतदाहैतेनैव सर्व्वाः स्रुचः सम्मार्ष्टि व्वाजिनीं त्वेति स्रुचं तूष्णीं प्राशित्रहरणम् ॥ ६ ॥ स वाऽइत्यग्रेरन्तरतः सम्मार्ष्टीति । मूलैर्वाह्यतऽइतीव वाऽअयं प्राणऽइतीवोदानः प्राणोदानावेवैतद्दधाति तस्मादितीवेमानि लोमानीतीवेमानि ॥ ७ ॥ स वै सम्मृज्य सम्मृज्य प्रतप्य प्रतप्य प्रयच्छति । यथावमर्शं निर्णिज्यानवमर्शमुत्तमं परिक्षालयेदेवं तत्तस्मात्प्रतप्य प्रतप्य प्रयच्छति ॥ ८ ॥ स वै स्रुवमेवाग्रे

१. वरणमिति. ख. पु. २. हि इति ग. पु. ३. मा. सं. १. २९.
४. मा. सं. १. २९. ५. मा. सं. १. २९. ६. सम्मृज्य. इति. ग.

सम्मार्ष्टि । अथेतराः स्रुचो योषा वै स्रुग्वृषा स्रुवस्तस्माद्यद्यपि बहव्यऽइव स्त्रियः सार्धं यन्ति यऽएव तास्वपि कुमारकऽइव पुमान् भवति सऽएव तत्र प्रथमऽएत्यनूच्यऽइतरास्तस्मात्स्रुवमेवाग्रे सम्मार्ष्ट्यथेतराः स्रुचः ॥ ९ ॥ स वै तथैव सम्मृज्यात् । यथाग्निं नाभिव्युक्षेद्यथा यस्माऽअशनमाहरिष्यन्त्स्यात् पात्रनिर्णेजनेनाभिव्युक्षेदेवं तत्तस्मादु तथैव सम्मृज्याद्यथाग्निं नाभिव्युक्षेत् प्राङिवैवोत्क्रम्य ॥ १० ॥ तद्धैके । स्रुक्सम्मार्जनान्यग्नावभ्यादधति व्वेदस्याहाभूवन्त्स्रुचऽएभिः सममार्जिषुरिदं वै किञ्चिद्यज्ञस्य नेदिदं बहिर्द्धा यज्ञाद्भवदिति तदु तथा न कुर्याद्यथा यस्माऽअशनमाहरेत्तं पात्रनिर्णेजनं पाययेदेवं तत्तस्मादु परास्येदेवैतानि ॥ ११ ॥ अथ पत्नीꣳ सन्नह्यति । जघनार्धो वाऽएष यज्ञस्य यत्पत्नी प्राङ् मे यज्ञस्तायमानो यादिति युनक्त्येवैनामेतद्युक्त्वा मे यज्ञमन्वासाताऽइति ॥ १२ ॥ योक्त्रेण सन्नह्यति । योक्त्रेण हि योग्यं युञ्जन्त्यस्ति वै पत्न्याऽअमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्याऽएतद्योक्त्रेणान्तर्दधात्यथ मेध्येनैवोत्तरार्धेनाज्यमवेक्षते तस्मात्पत्नीꣳ सन्नह्यति ॥ १३ ॥ स वाऽअभिवासः सन्नह्यति । ओषधयो वै व्वासो व्वरुण्या रज्जुस्तदोषधीरेवैतदन्तर्दधाति तथो हैनामेषा व्वरुण्या रज्जुर्न हिनस्ति तस्मादभिवासः सन्नह्यति ॥ १४ ॥ स सन्नह्यति । "अदित्यै रास्नासी"तीयं वै पृथिव्यदितिः सेयं देवानां पत्न्येषा वाऽएतस्य पत्नी भवति तदस्याऽएतद्रास्नामेव करोति न रज्जुꣳ हिरो वै रास्ना तामेवास्याऽएतत्करोति ॥ १५ ॥ स वै न ग्रन्थिं कुर्य्यात् । व्वरुण्यो वै ग्रन्थिर्व्वरुणो ह पत्नीं गृह्णीयाद्यद्ग्रन्थिं कुर्य्यात्तस्मान्न ग्रन्थिं करोति ॥ १६ ॥ ऊर्ध्वमेवोद्गृह्णाति । "व्विष्णोर्व्वेष्योऽसी"ति सा वै न पश्चात्प्राची देवानां यज्ञमन्वासीतेयं वै पृथिव्यदितिः सेयं देवानां पत्नी सा पश्चात्प्राची देवानां यज्ञमन्वास्ते तद्धेमामभ्यारोहेत् सा

१. See. तै. ब्रा. ३. ३. २. १. २. मा. स. १. ३०. ३. मा. सं. १. ३०.

पत्नी क्षिप्रेऽमुं लोकमियात्तथो ह पत्नी ज्योग्जीवति तदस्या ऽएवैतन्निह्नुते तथो हैनामियं न हिनस्ति तस्मादु दक्षिणतऽइवैवान्वासीत ॥ १७ ॥ अथाज्यमवेक्षते । योषा वै पत्नी रेतऽआज्यं मिथुनमेवैतत्प्रजननं क्रियते तस्मादाज्यमवेक्षते ॥ १८ ॥ सावेक्षते । "अदब्धेन त्वा चक्षुषावपश्यामी"त्यनार्त्तेन त्वा चक्षुषावपश्यामीत्येवैतदाहा"ग्नेर्जिह्वासी"ति यदा वाऽएतदग्नौ जुह्वत्यथाग्नेर्जिह्वाऽइवोत्तिष्ठन्ति तस्मादाहाग्नेर्जिह्वासीति "सुहृदेवेभ्य"ऽइति साधु देवेभ्यऽइत्येवैतदाह "धाम्ने धाम्ने मे भव यजुषे यजुष"ऽइति सर्वस्मै म यज्ञायधात्यवतदाह ॥ १९ ॥ अथाज्यमादाय प्राङुदाद्रवति । तदाहवनीयेऽधिश्रयति यस्याहवनीये हवीꣳषि श्रपयन्ति सर्वो मे यज्ञऽआहवनीये शृतोऽसदित्यथ यदमुत्राग्रेऽधिश्रयति पत्नीꣳ यवकाशयिष्यन् भवति न हि तदवकल्पते यत्सामि प्रत्यग्घरेत्पत्नीमवकाशयिष्यामीत्यथ यत्पत्नीं नावकाशयेदन्तरियाद्ध यज्ञात् पत्नीं तथो ह यज्ञात्पत्नीं नान्तरेति तस्मादु सार्धमेव व्विलाप्य प्रागुदाहरत्यवकाश्य पत्नीं यस्यो पत्नी न भवत्यग्रऽएव तस्याहवनीयेऽधिश्रयति तत्ततऽआदत्ते तदन्तर्व्वेद्यासादयति ॥ २० ॥ तदाहुः । नान्तर्व्वेद्यासादयेदतो वै देवानां पत्नीः संयाजयन्त्यवसभाऽअह देवानां पत्नीः करोति परः पुꣳसो हास्य पत्नी भवतीति तदु होवाच याज्ञवल्क्यो यथादिष्टं पत्न्याऽअस्तु कस्तदाद्रियेत यत्परः पुꣳसा वा पत्नी स्याद्यथा वा यज्ञो व्वेदिर्यज्ञऽआज्यं यज्ञाद्यज्ञं निर्मिमाऽइति तस्मादन्तर्व्वेद्येवासादयेत् ॥२१॥ प्रोक्षणीषु पवित्रे भवतः । ते ततऽआदत्ते ताभ्यामाज्यमुत्पुनात्येको वाऽउत्पवनस्य बन्धुर्मेध्यमेवैतत्करोति ॥ २२ ॥ सऽउत्पुनाति । "सवितुस्त्वा प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मि

१. योषा इति. ग. पु. २. मा. सं. १. ३०. ३. मा. सं. १. ३०.
४. मा. सं. १. ३० ५. मा. सं. १. ३०. ६. प्राङुदाहरतीति. ग. पु.
७. पत्नीमिति. ख. पु. ८. तदाहुः इति. ग. पु. ९. मा सं १. ३१.

मि''रिति सोऽसावेव बन्धुः ॥ २३ ॥ (शतम् २००) अथाज्यलिप्ताभ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति "सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभि''रिति सोऽसावेव बन्धुः ॥२४॥ तद्यदाज्यलिप्ताभ्यां पवित्राभ्याम् । प्रोक्षणीरुत्पुनाति तदप्सु पयो दधाति तदिदमप्सु पयो हितमिदꣳहि यदा व्वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा ततऽएष रसः सम्भवति तस्मादु रसस्यो चैव सर्व्वत्वाय ॥ २५ ॥ अथाज्यमवेक्षते । तद्धैके यजमानमवख्याप्यन्ति तदु होवाच याज्ञवल्क्यः कथं नु न स्वयमध्वर्यवो भवन्ति कथꣳस्वयं नान्वाहुर्यत्र भूयस्यऽइवाशिषः क्रियन्ते कथं न्वेषामत्रैव श्रद्धा भवतीति यां वै कां च यज्ञऽऋत्विजऽआशिषमाशासते यजमानस्यैव सा तस्मादध्वर्युरेवावेक्षेत ॥ २६ ॥ सोऽवेक्षते । सत्यं वै चक्षुः सत्यꣳ हि वै चक्षुस्तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमिति यऽएव ब्रूयादहमदर्शमिति तस्माऽएव श्रद्दध्याम तत्सत्येनैवैतत्समर्द्धयति ॥२७॥ सोऽवेक्षते । "तेजोसि शुक्रमस्यमृतमसी''ति सऽएष सत्यऽएव मन्त्रस्तेजो ह्येतच्छुक्रꣳ ह्येतदमृतꣳ ह्येतत्तत्सत्येनैवैतत्समर्द्धयति ॥२८॥ Cf. का. श. २. २. ४. तै. ब्रा. ३. ३. १–४. का. सं. ३१. ९. मै. सं. ४. १. ११.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे द्वितीयप्रपाठके चतुर्थं ब्राह्मणम् ॥

---

१. अत्र कण्डिकानामादितः द्वितीयशतसंख्या पूर्णा भवति.
२. मा. सं. १. ३१. ३. सर्वत्वायेति. ग. पु.
४. see तै. ब्रा. ३. ३. ५. १. and आप. श्रौ. १. ६. ६.
५. मा. सं. १. ३१. ६. स. इति. ग. पु.

पुरुषो वै यज्ञः । पुरुषस्तेन यज्ञो येदेनं पुरुषस्तनुतऽएष वै तायमानो यावानेव पुरुषस्तावान् विधीयते तस्मात्पुरुषो यज्ञः ॥१॥ तस्येयमेव जुहूः । इयमुपभृदात्मैव ध्रुवा तद्वाऽआत्मनऽएवेमानि सर्व्वाण्यङ्गानि प्रभवन्ति तस्माद् ध्रुवायाऽएव सर्व्वो यज्ञः प्रभवति ॥२॥ प्राणऽएव स्रुवः । सोऽयं प्राणः सर्व्वाण्यङ्गान्यनुसञ्चरति तस्माद् स्रुवः सर्व्वाऽअनु स्रुचः सञ्चरति ॥ ३ ॥ तस्यासावेव द्यौर्जुहूः । अथेदमन्तरिक्षमुपभृदियमेव ध्रुवा तद्वाऽअस्याऽएवेमे सर्व्वे लोकाः प्रभवन्ति तस्माद् ध्रुवायाऽएव सर्व्वो यज्ञः प्रभवति ॥ ४ ॥ अयमेव स्रुवो योऽयं पवते । सोऽयमिमान्सर्व्वाँल्लोकाननुपवते तस्माद् स्रुवः सर्व्वाऽअनु स्रुचः सञ्चरति ॥ ५ ॥ सऽएष यज्ञस्तायमानः । देवेभ्यस्तायत ऋतुभ्यश्छन्दोभ्यो यज्ञविस्तदेवानां यत्सोमो राजा यत्पुरोडाशस्तत्तदादिश्य गृह्णात्यमुष्मै त्वा जुष्टं गृह्णामीत्येवमु हि तेषाम् ॥६॥ अथ यान्याज्यानि गृह्यन्ते । ऋतुभ्यश्चैव तानि छन्दोभ्यश्च गृह्यन्ते तत्तदनादिश्याज्यस्यैव रूपेण गृह्णाति स वै चतुर्जुहूवां गृह्णात्यष्टौ कृत्वऽउपभृति ॥ ७ ॥ स यच्चतुर्जुहूवां गृह्णाति । ऋतुभ्यस्तद् गृह्णाति प्रयाजेभ्यो हि तद्गृह्णात्यृतवो हि प्रयाजास्तत्तदनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्याद्वसन्ताय त्वा ग्रीष्माय त्वेति गृह्णीयात्तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥८॥ अथ यदष्टौकृत्वऽउपभृति गृह्णाति । छन्दोभ्यस्तद्गृह्णात्यनुयाजेभ्यो हि तद् गृह्णाति छन्दाꣳसि ह्यनुयाजास्तत्तदनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै जामि ह कुर्याद्वर्षायत्र्यै त्वा त्रिष्टुभे त्वेति गृह्णीयात्तस्मादनादिश्याज्यस्यैव रूपेण गृह्णाति ॥ ९ ॥ अथ यच्चतुर्ध्रुवायां गृह्णाति । सर्व्वस्मै तद्यज्ञाय गृह्णाति तत्तदनादिश्याज्यस्यैव रूपेण

---

१. हैतेषामिति ग. ग. पु. २. See. तै. ब्रा. ३. ३. ५. ५.

गृह्णाति कस्माऽउह्यादिशेद्यतः सर्व्वाभ्यऽएव देवताभ्योऽवद्यति तस्मा दनादिश्याज्यस्यैव रूपेण गृह्णाति ॥१०॥ यजमान ऽएव जुहूमनु । योऽस्माऽअरातीयति सऽउपभृतमन्वत्तैव जुहूमन्वाद्यऽउपभृतमन्वत्तैव जुहूराद्यऽउपभृत्स वै चतुर्जुह्वां गृह्णात्यष्टौ कृत्वऽउपभृति ॥११॥स यच्चतुर्जुह्वां गृह्णाति । अत्तारमेवैतत्परिमिततरं कनीयाᳬसं करोत्यथ यदष्टौ कृत्व ऽउपभृति गृह्णात्याद्यमेवैतदपरिमिततरं भूयाᳬसं करोति तद्धि समृद्धं यत्रात्ता कनीयानाद्यो भूयान ॥१२॥ स वै चतुर्जुहूवां गृह्णन् । भूयऽआज्यं गृह्णात्यष्टौ कृत्वऽउपभृति गृह्णन कनीय ऽआज्यं गृह्णाति ॥ १३ ॥ स यच्चतुर्जुहूवां गृह्णन् । भूयऽआज्यं गृह्णात्यत्तारमेवैतत्परिमिततरं कनीयाᳬसं कुर्व्वंस्तस्मिन्वीर्यं वलं दधात्यथ यदष्टौ कृत्व ऽउपभृति गृह्णन कनीयऽआज्यं गृह्णात्याद्यमेवैतदपरिमिततरं भूयाᳬसं कुर्व्वंस्तमवीर्यमवलीयाᳬसं करोति तस्मादुत राजापारां व्विशं प्रावसायाप्येकवेश्मनैव जिनाति त्वद्यथा त्वत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण यज्जुह्वां भूयऽआज्यं गृह्णाति स यज्जुह्वां गृह्णाति जुह्वैव तज्जुहोति यदुपभृति गृह्णाति जुह्वैव तज्जुहोति ॥१४॥ तदाहुः । कस्माऽउ तर्ह्युपभृति गृह्णीयाद्यदुपभृता न जुहोतीति स यद्धोपभृता जुहुयात्पृथग्घैवेमाः प्रजाः स्युर्नैवात्ता स्यान्नाद्यः स्यादथ यत्तज्जुह्वैव समानीय जुहोति तस्मादिमा व्विशः क्षत्रियाय वलिᳬहरन्त्यथ यदुपभृति गृह्णाति तस्मादु क्षत्रियस्यैव व्वशे सति व्वैश्यं पशवऽउपतिष्ठन्तेऽथ यत्तज्जुह्वैव समानीय जुहोति तस्माद्यदोत क्षत्रियः कामयतेऽथाह वैश्यमपि यत्ते परो निहितं तदाहरेति तं जिनाति त्वद्यथा त्वत्कामयते तथा सचतऽएतेनो ह तद्वीर्येण ॥ १५ ॥ तानि वाऽएतानि । छन्दोभ्यऽआज्यानि गृह्यन्ते स यच्चतुर्जुहूवां गृह्णाति गायत्र्यै तद् गृह्णात्यथ यदष्टौ कृत्वऽउपभृति गृह्णाति त्रिष्टुब्जगतीभ्यां तद्गृह्णात्यथ यच्चतुर्ध्रुवायां गृह्णात्य-

१. गृह्णाति. इति. ग. २. पृथगिति ग. पु. ३. वैश्यमयि इति. ग. पु.

नुष्टुभे तद्गृह्णाति व्वाग्वाऽअनुष्टुब्वाचो वाऽइदꣳ सर्व्वं प्रभवति तस्मादु ध्रुवायाऽएव सर्व्वो यज्ञः प्रभवतीयं वाऽ अनुष्टुवस्यै वाऽ इदꣳ सर्व्वं प्रभवति तस्मादु ध्रुवायाऽएव सर्व्वो यज्ञः प्रभवति ॥ १६ ॥ स गृह्णाति । "धाम नामासि प्रियं देवाना"मित्येतद्वै देवानां प्रियतमं धाम यदाज्यं तस्मादाह धाम नामासि प्रियं देवानामित्य"नाधृष्टं देवयजनमसी"ति व्वज्रो ह्याज्यं तस्मादाहानाधृष्टं देवयजनमसीति ॥ १७ ॥ सऽएतेन यजुषा । सकृज्जुहवां गृह्णाति त्रिस्तूष्णीमेतेनैव यजुषा सकृदुपभृति गृह्णाति सप्तकृत्वस्तूष्णीमेतेनैव यजुषा सकृद्ध्रुवायां गृह्णाति त्रिस्तूष्णीं *तदाहुस्त्रिस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्धि यज्ञऽइति तदु नु सकृत्सकृदेवात्रो ह्येव त्रिर्गृहीतꣳ सम्पद्यते ॥ १८ ॥ (Cf. का. श. २. ३. १., तै. ब्रा. ३. ३. ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे द्वितीयप्रपाठके पञ्चमं ब्राह्मणम् ॥

१. २. ६.

प्रोक्षणीरध्वर्युरादत्ते । सऽइध्ममेवाग्रे प्रोक्षति "कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टं प्रोक्षामी"ति तन्मेध्यमेवैतदग्नये करोति ॥ १ ॥ अथ व्वेदिं प्रोक्षति । "व्वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामी"ति तन्मेध्यामेवैतद्बर्हिषे करोति ॥२॥ अथास्मै बर्हिः प्रयच्छति । तत्पुरस्ताद् ग्रन्थ्यासादयति तत्प्रोक्षति "बर्हिरसि स्रुग्भ्यस्त्वा जुष्टं प्रोक्षामी"ति तन्मेध्यमेवैतत्स्रुग्भ्यः करोति ॥ ३ ॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ताभिरोषधीनां मूलान्युपानिनयत्य"दित्यै व्युन्दनमसी"तीयं वै

१. मा. सं. १. ३१. २. मा. सं. १. ३१. * See. तै. ब्रा. ३. ३. ४. ४.
३. मा. सं. २. १. ४. मा. सं. २. १. ५. प्रोक्षामीति क.
६. प्रयच्छन्तीति. ख. ७. मा. सं. २. १. ८. मा. सं. २. २.

पृथिव्यादितिस्तदस्या ऽएवैतदोषधीनां मूलान्युपोनत्ति ताऽइमाऽआर्द्रमूलाऽओषधयस्तस्माद्यद्यपि शुष्काण्यग्राणि भवन्त्यार्द्राण्येव मूलानि भवन्ति ॥ ४ ॥ अथ विस्रꣳस्य ग्रन्थिम् । पुरस्तात्प्रस्तरं गृह्णाति "विष्णोस्स्तुपोऽसी"ति यज्ञो वै विष्णुस्तस्येयमेव शिखा स्तुपऽएतामेवास्मिन्नेतद्दधाति पुरस्ताद् गृह्णाति पुरस्ताद्ध्ययꣳ स्तुपस्तस्मात्पुरस्ताद् गृह्णाति ॥ ५ ॥ अथ संनहनं विस्रꣳ सयति । प्रक्लृप्तꣳ हैवास्य स्त्री विजायतऽइति तस्मात्सन्नहनं विस्रꣳसयति तद्दक्षिणायाꣳ श्रोणौ निदधाति नीविर्हैवास्यैषा दक्षिणतऽइव हीयं नीविस्तस्माद्दक्षिणायाꣳ श्रोणौ निदधाति तत्पुनरभिच्छादयत्यभिच्छन्नेव हीयं नीविस्तस्मात्पुनरभिच्छादयति ॥ ६ ॥ अथ बर्हिस्तृणाति । अयं वै स्तुपः प्रस्तरोऽथ यान्यवाञ्चि लोमानि तान्येवास्य यदितरं बर्हिस्तान्येवास्मिन्नेतद्दधाति तस्माद्बर्हिस्तृणाति ॥ ७ ॥ योषा वै व्वेदिः । तामेतद्देवाश्च पर्यासते ये चेमे ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्तेष्वेवैनामेतत्पर्यासीनेष्वनग्नां करोत्यनग्नतायाऽएव तस्माद्बर्हिस्तृणाति ॥ ८ ॥ यावती वै व्वेदिः । तावती पृथिव्योषधयो बर्हिस्तदस्यामेवैतत्पृथिव्यामोषधीर्दधाति ताऽइमाऽअस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्माद्बर्हिस्तृणाति ॥ ९ ॥ तद्वै बहुलꣳ स्तृणीयादित्याहुः । यत्र वाऽअस्यै बहुलतमा ओषधयस्तदस्याऽउपजीवनीयतमं तस्माद्बहुलꣳस्तृणीयादिति तद्वै तदाहर्तयेवाधि त्रिवृत्स्तृणाति त्रिवृद्धि यज्ञोऽथोऽअपि प्रवर्हꣳस्तृणीयान्[2] "स्तृणन्ति बर्हिरानुषगि"ति ह्यृषिणाभ्यनूक्तमधरमूलꣳ स्तृणात्यधरमूलाऽइव हीमाऽअस्यां पृथिव्यामोषधयः प्रतिष्ठितास्तस्मादधरमूलꣳ स्तृणाति ॥ १० ॥ स स्तृणाति । "ऊर्णम्रदसं त्वा स्तृणामि स्वासस्थां देवेभ्य"ऽइति साध्वीं देवेभ्यऽइत्येवैतदाह यदाहोर्णम्रदसं त्वेति स्वासस्थां देवेभ्यऽइति स्वासदां देवेभ्यऽइत्येवैतदाह ॥ ११ ॥ अथाग्निं कल्पयति । शिरो वै

१. मा. सं. २. २. २. प्रवर्हं इति. ग. ३. मा .सं. २. २.

यज्ञस्याहवनीयः पूर्व्वाऽर्धो वै शिरः पूर्व्वार्धमेवैतद्यज्ञस्य कल्पयत्युपर्युपरि प्रस्तरं धारयन् कल्पयत्ययं वै स्तुपः प्रस्तरऽएतमेवास्मिन्नेतत्प्रति दधाति तस्मादुपर्युपरि प्रस्तरं धारयन् कल्पयति ॥ १२ ॥ अथ परिधीन् परिदधाति । तद्यत्परिधीन्परिदधाति यत्र वै देवाऽ अग्रेऽग्निꣳहोत्राय प्रावृणत तद्धोवाच न वाऽअहमिदमुत्सहे यद्धो होता स्यां यद्धो हव्यं वहेयं त्रीन्पूर्व्वान्प्रावृढ्वं ते प्राधन्विषुस्तान्न मेऽवकल्पयताऽथ वाऽअहमेतदुत्साक्ष्ये यद्धो होता स्यां यद्धो हव्यं वहेयमिति तथेति तानस्माऽएतानवाकल्पयंस्तऽएते परिधयः ॥ १३ ॥ स होवाच । व्वज्रो वै तान्वषट्कारः प्रावृणग्वज्राद्वै वषट्कारादिभेमि यन्मा व्वज्रो व्वषट्कारो न प्रवृञ्ज्यादेतेरेव मा परिधत्त तथा मा व्वज्रो व्वषट्कारो न प्रवक्ष्यतीति तथेति तमेतैः पर्यदधुस्तं न व्वज्रो व्वषट्कारः प्रावृणक् तद्धमैवैतदग्नये नह्यति यदेतैः परिदधाति ॥ १४ ॥ तऽ उ हैत ऽऊचुः । इदमु चेदस्मान्यज्ञे युङ्क्थास्त्वेवास्माकमपि यज्ञे भागऽइति ॥ १५ ॥ तथेति देवाऽअब्रुवन् । यद्बहिष्परिधि स्कन्त्स्यति तद्युष्मासु हुतमथ यद्वाऽउपर्युपरि होष्यन्ति तद्धोऽविष्यत्यथ यदग्नौ होष्यन्ति तद्धोऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यदेनानुपर्युपरि जुह्वति तदेनानवत्यथ यद्बहिष्परिधि स्कन्दति तदेतेषु हुतं तस्मादु ह नागऽ इव स्कन्नꣳ स्यादिमां वै ते पृथिवीं प्राविशन्यद्वा ऽइदं किञ्च स्कन्दत्यस्यामेव तत्सर्व्वं प्रतितिष्ठति ॥ १६ ॥ स स्कन्नमभिमृशति । "भुवपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहे"त्येतानि वै तेषामग्नीनां नामानि यद्भुवपतिर्भुवनपतिर्भूतानां पतिस्तद्यथा व्वषट्कृतꣳ हुतमेवमस्यैतेष्वग्निषु भवति ॥ १७ ॥ तद्धैके । इध्मस्यैवैतान् परिधीन् परिदधाति तदु तथा न कुर्यादनवक्लृप्ता ह तस्यैते भवन्ति यानिध्मस्य परिदधात्यभ्याधानाय होवेध्मः क्रियते तस्यो हैवैतेऽवक्लृप्ता भवन्ति यस्यैतानन्यानाहरन्ति

१. पूर्व्वार्धं इति. ग. पूर्व्वार्धं इति. क. २. तद्धमैवेति. ख. पु. ३. मा. सं. २. २.

परिधय ऽइति तस्मादन्यानेवाहरेयुः ॥ १८ ॥ ते वै पालाशाः स्युः । ब्रह्म वै पलाशो ब्रह्माग्निरग्नयो हि तस्मात्पालाशाः स्युः ॥ १९ ॥ यदि पालाशान्न विन्देत् । अथोऽअपि व्वैकङ्कतास्स्युर्यदि व्वैकङ्कतान्न विन्देदथोऽअपि काप्मर्यमयाः स्युर्यदि काप्मर्यमयान्न विन्देदथो ऽअपि वैल्वाः स्युरथो खादिरा ऽअथोऽऔदुम्बराऽएते हि वृक्षा यज्ञियास्तस्मादेतेषां व्वृक्षाणां भवन्ति ॥ २० ॥ (१. का. श. २. ३. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे द्वितीयप्रपाठके षष्ठं ब्राह्मणम् ॥

द्वितीयः प्रपाठकस्समाप्तः ॥

(कण्डिकाः) *१२२ ॥

अथ तृतीयः प्रपाठकः ॥

१. ३. १.

ते वाऽआर्द्राः स्युः । एतद्ध्येषां जीवमेतेन सतेजसऽएतेन व्वीर्यवन्तस्तस्मादार्द्राः स्युः ॥ १ ॥ स मध्यममेवाग्रे परिधिं परिदधाति । "गन्धर्व्वस्त्वा व्विश्वावसुः परिदधातु व्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडित"ऽइति ॥ २ ॥ अथ दक्षिणं परिदधाति । "इन्द्रस्य बाहुरसि दक्षिणो व्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडित"इति ॥ ३ ॥ अथोत्तरं परिदधाति । "मित्रावरुणौ त्वोत्तरतः परिधत्तां ध्रुवेण धर्मणा व्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिडऽईडित"ऽइत्यग्नयो हि तस्मादाहा-

१. काप्मर्यमया इति. ग. पु. * द्वितीयप्रपाठकस्थकण्डिकानां संख्येयम् ।
२. जीवमेतेनेति. क. ३. सतेजस इति क. ४. मा. स. २. ३.
५. मा. सं. २. ३. ६. इति ख. ७. मा. सं. २. ३.

ग्निरिड॒ऽईडितऽइति ॥ ४ ॥ अथ समि॒धमभ्या॒दधाति । स॒ मध्य॒मेवा॒ग्रे परिधिमु॒पस्पृशति ते॒नैतानग्रे स॒मिन्धे॒ऽथाग्ना॒वभ्या॒दधाति ते॒नोऽअग्नि॒ प्रत्य॒क्षꣳस॒मिन्धे ॥ ५ ॥ सोऽभ्या॒दधाति । "व्वीति॒होत्रं त्वा कवे द्युम॒न्तꣳ स॒मिधीमहि । अग्ने॒ बृह॒न्तमध्वर"ऽइत्ये॒तया गायत्र्या गायत्री॒मेवैतत्स॒मिन्धे स॒ा गायत्री स॒मिद्धान्या॒नि छ॒न्दाꣳसि स॒मिन्धे छ॒न्दाꣳसि स॒मिद्धानि देवे॒भ्यो यज्ञं॒ व्वहन्ति ॥ ६ ॥ अथ यां द्वि॒तीयाꣳ समि॒धमभ्या॒दधाति । व्वसन्त॒मेव त॒या स॒मिन्धे स॒ व्वसन्तः स॒मिद्धोऽन्या॒नृतून्त्स॒मिन्धऽऋ॒तवः स॒मिद्धाः प्रजा॒श्च प्रजन॒यन्त्योष॒धीश्च पचन्ति॒ सोभ्या॒दधाति "समि॒दसी"ति समिद्धि॒ व्वसन्तः ॥ ७ ॥ अथाभ्याधा॒य जपति । "सूर्य॒स्त्वा पुर॒स्तात्पातु॒ क॒स्याश्चिदभि॒शस्त्या"ऽइति गुप्त्यै वा॒ऽअभि॒तः परिध॒यो भ॒वन्त्यथैतत्सूर्य॒मेव॒ पुर॒स्ताद्गोप्ता॒रं करोति ने॒त्पुर॒स्तान्नाष्ट्रा॒ र॒क्षाꣳस्यभ्यवच॒रानि॒ति सूर्यो॒ हि॒ नाष्ट्राणाꣳ र॒क्षसामपहन्ता ॥ ८ ॥ अथ या॒मेवा॒मां तृ॒तीयाꣳ समि॒धमभ्या॒दधाति । अनुयाजे॒षु ब्राह्मण॒मेव त॒या स॒मिन्धे स॒ ब्राह्मणः स॒मिद्धो देवे॒भ्यो यज्ञं॒ व्वहति ॥ ९ ॥ अथ स्ती॒र्णां व्वे॒दिमु॒पावर्त्तते । स द्वे तृ॒णेऽ आदा॒य तिर॒श्ची नि॒दधाति "सवि॒तुर्बाहू॒ स्थ"ऽइत्ययं वै॒ स्तुपः॒ प्रस्तरो॒ऽथास्यैते भ्रुवावेव॒ तिर॒श्ची नि॒दधाति त॒स्मादिमे॒ तिर॒श्च्यौ भ्रुवौ क्षत्रं॒ वै॒ प्रस्तरो व्वि॒शऽइ॒तरं॒ बर्हिः॒ क्षत्र॒स्य चैव॒ व्विश॒श्च व्वि॒धृत्यै॒ त॒स्मात्तिर॒श्ची नि॒दधाति त॒स्माद्वेव व्वि॒धृती॒ ना॒म ॥ १० ॥ त॒त्प्रस्तर॒ꣳ स्तृणाति । "ऊ॒र्णम्रदसं त्वा स्तृणामि स्वासस्थं॒ देवे॒भ्य"ऽइति साधुं॒ देवे॒भ्य ऽइत्ये॒वैत॒दाह॒ यदा॒हो॒र्णम्रदसं त्वे॒ति स्वासस्थं॒ देवे॒भ्यऽइति स्वास॒दं देवे॒भ्य इत्ये॒वैत॒दाह॒ ॥ ११ ॥ त॒माभिनि॒दधाति । "आ॒ त्वा व्व॒सवो रुद्रा॒ ऽआदित्या॒ः स-

१. दधाति इति क. २. मा. सं. २. ४. ३. मा. सं. २. ५.

४. See. तै. सं. २. ६. १. ५. मा. सं. २. ५. ६. मा. सं. २. ५.

७. मा. सं. २. ५. ८. देवेभ्य. इति क. ९. मा. सं. २. ५.

दन्त्वि"त्येते वै त्रया देवा यद्वसवो रुद्रा ऽआदित्याऽएते त्वा सीदन्त्वित्येवैतदाहाभिनिहितऽएव सव्येन पाणिना भवति ॥ १२ ॥ अथ दक्षिणेन जुहूं प्रतिगृह्णाति । नेदिह पुरा नाष्ट्रा रक्षाꣳस्याविशानिति ब्राह्मणो हि रक्षसामपहन्ता तस्मादभिनिहित ऽएव सव्येन पाणिना भवति ॥ १३ ॥ अथ जुहूं प्रतिगृह्णाति । "घृताच्यसि जुहूर्नाम्ने"ति घृताची हि जुहूर्हि नाम्ना "सेदं प्रियेण धाम्ना प्रियꣳ सदऽआसीदे"ति "घृताच्यस्युपभृन्नाम्ने"त्युपभृतं घृताची ह्युपभृद्धि नाम्ना "सेदं प्रियेण धाम्ना प्रियꣳ सदऽआसीदे"ति "घृताच्यसि ध्रुवा नाम्ने"ति ध्रुवां घृताची हि ध्रुवा हि नाम्ना "सेदं प्रियेण धाम्ना प्रियꣳसद आसीदे"ति "प्रियेण धाम्ना प्रियꣳसदऽआसीदे"ति यदन्यद्धविः॥१४॥स वाऽउपरि जुहूꣳसादयति। अधऽइतराः स्रुचः क्षत्रं वै जुहूर्विशऽइतराः स्रुचः क्षत्रमेवैतद्विशऽउत्तरं करोति तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजाऽउपासते तस्मादुपरि जुहूꣳ सादयत्यधऽइतराः स्रुचः ॥ १५ ॥सोऽभिमृशति । "ध्रुवाऽअसदन्नि"ति ध्रुवा ह्यसद"न्नृतस्य योना"विति यज्ञो वा ऋतस्य योनिर्यज्ञे ह्यसद"स्ता व्विष्णो पाहि पाहि यज्ञं पाहि यज्ञपति"मिति तद्यजमानमाह"पाहि मां यज्ञन्य"मिति तदप्यात्मानं यज्ञान्नान्तरेति यज्ञो वै व्विष्णुस्तद्यज्ञायैवैतत्सर्व्वं परिददाति गुप्त्यै तस्मादाह ता व्विष्णो पाहीति ॥१६॥ Cf. का. श. २. ३. २., तै. सं. ३. ३. ६., मै. सं. ४. १. १३., काठ. सं. ३१. १०.

इति शुक्लयजुर्वेदीयमाध्यन्दिनीये शतपथब्राह्मणे
प्रथमकाण्डे तृतीयप्रपाठके प्रथमं ब्राह्मणम् ॥

१. मा. सं. २. ६. २. मा. सं. २. ६. ३. मा. सं. २. ६.
४. मा. सं. २. ६. ५. मा. सं. २. ६. ६. मा. सं. २. ६.
७. स्रुत्रमेवेति. क.ग. पु. ८. मा. सं. २. ६. ९. मा. सं. २. ६.
१०. मा. सं. २. ६. ११. यज्ञं इति. क. १२. मा. सं. २. ६.

इन्धे ह वाऽएतदध्वर्युः । इध्मेनाग्निं तस्मादिध्मो नाम समिन्धे सामिधेनीभिर्होता तस्मात्सामिधेन्यो नाम ॥ १ ॥ सऽआह । "अग्नये समिध्यमानायानुब्रूही"त्यग्नये ह्येतत्समिध्यमानायान्वाह ॥ २ ॥ तदु हैकऽआहुः । अग्नये समिध्यमानाय होतरनुब्रूहीति तदु तथा न ब्रूयादहोता वाऽएष पुरा भवति यदेवैनं प्रवृणीतेऽथ होता तस्मादु ब्रूयादग्नये समिध्यमानायानुब्रूहीत्येव ॥ ३ ॥ आग्नेयीरन्वाह । स्वयैवैनमेतद्देवतया समिन्धे गायत्रीरन्वाह गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसा समिन्धे व्वीर्यं गायत्री ब्रह्म गायत्री व्वीर्येणैवैनमेतत्समिन्धे ॥ ४ ॥ एकादशान्वाह । एकादशाक्षरा वै त्रिष्टुब्ब्रह्म गायत्री क्षत्रं त्रिष्टुबेताभ्यामेवैनमेतदुभाभ्यां व्वीर्याभ्याᳬं समिन्धे तस्मादेकादशान्वाह ॥ ५ ॥ स वै त्रिः प्रथमामन्वाह । त्रिरुत्तमां त्रिवृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमामन्वाह त्रिरुत्तमाम् ॥ ६ ॥ ताः पञ्चदश सामिधेन्यः सम्पद्यन्ते । पञ्चदशो वै व्वज्रो व्वीर्यं व्वज्रो व्वीर्यमेवैतत्सामिधेनीरभिसम्पादयति तस्मादेतास्वनूच्यमानासु यं द्विष्यात्तमङ्गुष्ठाभ्यामववाधेतेदमहममुमववाधऽइति तदेनमेतेन व्वज्रेणाववाधते ॥ ७ ॥ पञ्चदश वाऽअर्द्धमासस्य रात्रयः । अर्द्धमासशो वै संवत्सरो भवन्नेति तद्रात्रीराप्नोति ॥ ८ ॥ पञ्चदशानामु वै गायत्रीणाम् । त्रीणि च शतानि षष्टिश्चाक्षराणि त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति तद्वेव संवत्सरमाप्नोति ॥९॥ सप्तदश सामिधेनीः । इष्ट्वाऽअनुब्रूयादुपाᳬंशु तस्यै देवतायै यजति यस्याऽइष्टिं निर्व्वपति द्वादश वै मासाः संवत्सरस्य पञ्चर्त्तवऽएषऽएव प्रजापतिः सप्तदशः सर्व्वं वै प्रजापतिस्तत्सर्व्वेणैव तं काममनपराधᳬंराध्नोति यस्मैकामायेष्टिं निर्व्वपत्युपाᳬंशु देवतां यजत्यनिरुक्तं वाऽउपाᳬंशु सर्व्वं वाऽअनिरुक्तं तत्सर्व्वेणैव तं काममम-

१. प्रवृणीते इति. क. ग. पु. २. ब्रूहीति. ग.

नपराधꣳ राध्नोति यस्मै कामायेष्टिं निर्व्वपत्येषऽइष्टेरुपचारः ॥१०॥ एकविꣳशतिꣳ सामिधेनीः।अपि दर्शपूर्णमासयोरनुब्रूयादित्याहुर्द्वादश वै मासाः संवत्सरस्य पञ्चर्त्तवस्त्रयो लोकास्तद्विꣳशतिरेषऽएवैकविꣳशो यऽएष तपति सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति तस्मादेकविꣳशतिमनुब्रूयात् ॥ ११ ॥ ता हैता गतश्रेरेवानुब्रूयात् । यऽइच्छेन्न श्रेयांस्यान्न पापायानीति यादृशाय हैव स तेऽन्वाहुस्तादृङ्वा हैव भवति पापीयान्वा यस्यैवं विदुषऽएताऽअन्वाहुः सोऽएषा मीमाꣳसैव न त्वेवैताऽअनूच्यन्ते ॥ १२ ॥ त्रिरेव प्रथमां त्रिरुत्तमामनवानन्नुब्रूयात् । त्रयो वाऽइमे लोकास्तदिमानेवैतल्लोकान्त्सन्तनोतीमांल्लोकान्त्स्पृणुते त्रयऽइमे पुरुषे प्राणाऽएतमेवास्मिन्नेत्सन्ततमव्यवच्छिन्नं दधात्येतदनुवचनम् ॥ १३ ॥ स यावदस्य व्वशः स्यात् । एवमेवानुविवक्षेत्तस्यैतस्य परिचक्षोत सास्यवान्यादनवानन्नुविवक्षंस्तत्कर्म विवृह्येत सा परिचक्षा ॥ १४ ॥ स यद्येतन्नोदाशꣳसेत । अप्येकैकामेवानवानन्नुब्रूयात्तदेकैकयैवेमांल्लोकान्त्सन्तनोत्येकैकयेमांल्लोकान्स्पृणुतेऽथ यत्प्राणं दधाति गायत्री वै प्राणः स यत्कृत्स्नां गायत्रीमन्वाह तत्कृत्स्नं प्राणं दधाति तस्मादेकैकामेवानवानन्नुब्रूयात् ॥ १५ ॥ ता वै सन्ततऽअव्यवच्छिन्नाऽअन्वाह । संवत्सरस्यैवैतदहोरात्राणि सन्तनोति तानीमानि संवत्सरस्याहोरात्राणि सन्ततान्यव्यवच्छिन्नानि परिप्लवन्ते द्विपतऽउच्चैवैतद्भ्रातृव्याय नोपस्थान करोत्युपस्थानꣳ ह कुर्याद्यदसन्ततऽअनुब्रूयात्तस्माद्वैसन्ततऽअव्यवच्छिन्नाऽअन्वाह ॥ १६ ॥ Cf. का. श. २. ३. ३., तै. सं. २. ५. ७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे तृतीयप्रपाठके द्वितीयं ब्राह्मणम् ॥
(इति तृतीयोऽध्यायः)

१. वच इति. ग. २. परिचक्षोत इति. क. ३. परिचक्षा इति. ग.

हिङ्कृत्यान्वाह । नासामा यज्ञोऽस्तीति वाऽआहुर्न वाऽअहिङ्कृत्य साम गीयते स यद्धिङ्करोति तद्धिङ्कारस्य रूपं क्रियते प्रणवेनैव साम्नो रूपमुपगच्छत्योंऽ३ ॐऽ३मित्येतेनो ह्यस्यैष सर्वऽएव ससामा यज्ञो भवति ॥ १ ॥ यद्धेव हिङ्करोति । प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तस्मादपिगृह्य नासिके न हिङ्कर्त्तुꣳ शक्नोति व्वाचा वाऽऋचमन्वाह व्वाक्च वै प्राणश्च मिथुनं तदेतत्पुरस्तान्मिथुनं प्रजननं क्रियते सामिधेनीनां तस्माद्वै हिङ्कृत्यान्वाह ॥ २ ॥ स वाऽउपाꣳशु हिङ्करोति । अथ यदुच्चैर्हिङ्कुर्य्यादन्यतरदेव कुर्याद्वाचमेव तस्मादुपाꣳशु हिङ्करोति ॥ ३ ॥ स वाऽएति च प्रेति चान्वाह । गायत्रीमेवैतदर्व्वाचीं च पराचीं च युनक्ति पराच्यह देवेभ्यो यज्ञं व्वहत्यर्व्वाची मनुष्यानवति तस्माद्वाऽएति च प्रेति चान्वाह ॥ ४ ॥ यद्धेवेति च प्रेति चान्वाह । प्रेति वै प्राणऽएत्युदानः प्राणोदानावेवैतद्दधाति तस्माद्वाऽएति च प्रेति चान्वाह ॥ ५ ॥ यद्धेवेति च प्रेति चान्वाह । प्रेति वै रेतः सिच्यतऽएति प्रजायते प्रेति पशवो व्विनिष्ठन्तऽएति समावर्त्तन्ते सर्व्वं वाऽइदमेति च प्रेति च तस्माद्वाऽएति च प्रेति चान्वाह ॥ ६ ॥ सोऽन्वाह । प्र वो व्वाजाऽअभिद्यवऽइति तन्नु प्रेति भवत्यग्नऽआयाहि व्वीतयऽइति तद्वेति भवति ॥७॥ तदु हैकऽआहुः । उभयं वाऽएतत्प्रेति सम्पद्यतऽइति तदु तदातिविज्ञान्यमिव "प्र वो व्वाजाऽअभिद्यव"ऽइति तन्नु प्रेत्यग्नऽआयाहि व्वीतयऽइति तद्वेति ॥८॥ सोऽन्वाह । प्र वो व्वाजाऽअभिद्यवऽइति तन्नु प्रेति भवति व्वाजाऽइत्यन्नं वै व्वाजाऽअन्नमेवैतदभ्यनूक्तमभिद्यवऽइत्यर्द्धमासा वा ऽअभिद्यवोऽर्द्धमासानेवैतदभ्यनूक्तꣳ हविष्मन्तऽइति पशवो वै हविष्मन्तः पशूनेवैतदभ्यनूक्तम् ॥९॥ घृताच्येति । व्विदेघो ह माथवोऽग्निं व्वैश्वानरं मुखे बभार तस्य गोतमो राहूगण ऋषिः पुरोहितऽआस तस्मै ह स्मामन्त्र्यमाणो न प्रतिशृणोति नेन्मेऽग्निर्व्वैश्वानरो

मुखान्निष्पद्याताऽइति ॥ १० ॥ तमृग्भिर्ह्वयितुं दध्रे । व्वीतिहोत्रं त्वा कवे द्युमन्तꣳसमिधीमहि । अग्ने बृहन्तमध्वरे व्विदेघेति ॥११॥ स न प्रतिशुश्राव । उदग्ने शुचयस्तव शुक्रा भ्राजन्तऽईरते । तव ज्योतीꣳष्यर्च्चयो व्विदेघाऽइति ॥ १२ ॥ स ह नैव प्रतिशुश्राव । तं त्वा घृतस्नवीमहऽइत्येवाभिव्याहरद्यथाऽस्य घृतकीर्त्तावेवाग्निर्व्वैश्वानरो मुखादुज्जज्वाल तन्न शशाक धारयितुꣳसोऽस्य मुखान्निष्पेदे सऽइमां पृथिवीं प्रापादः ॥ १३ ॥ तर्हि व्विदेघो माथवऽआस । सरस्वत्याꣳ स ततऽएव प्राङ्दहन्न भीयायेमां पृथिवीं तं गोतमश्च राहूगणो व्विदेघश्च माथवः पश्चाद्दहन्तमन्वीयतुः स इमाः सर्व्वा नदीरतिददाह सदानीरेत्युत्तराद्गिरेर्निर्द्धावति ताꣳहैव नातिददाह ताꣳह स्म तां पुरा ब्राह्मणा न तरन्त्यनतिदग्धाग्निना व्वैश्वानरेणेति ॥ १४ ॥ ततऽएतर्हि । प्राचीनं बहवो ब्राह्मणास्तद्धाक्षेत्रतरमिवास स्रावितरमिवास्वदितमग्निना व्वैश्वानरेणेति ॥ १५॥ तदु हैतर्हि । क्षेत्रतरमिव ब्राह्मणाऽउ हि नूनमेनद्यज्ञैरसिष्वदन्त्सापि जघन्ये नैदाघे समिवैव कोपयति तावच्छीतानतिदग्धा ह्यग्निना व्वैश्वानरेण ॥ १६ ॥ स होवाच । व्विदेघो ह माथवः क्वाहं भवानीत्यतऽएव ते प्राचीनं भुवनमिति होवाच सैषाप्येतर्हि कोसलविदेहानां मर्यादा ते हि माथवाः ॥ १७ ॥ अथ होवाच । गोतमो राहूगणः कथं नु मे आमन्त्र्यमाणो न प्रत्यश्रौषीरिति स होवाचाऽग्निर्मे व्वैश्वानरो मुखेऽभूत्स नेन्मे मुखान्निष्पद्यातै तस्मात्ते न प्रत्यश्रौषमिति ॥१८॥ तदु कथमभूदिति । यत्रैव त्वं घृतस्नवीमहऽइत्यभिव्याहार्षीस्तदेव मे घृतकीर्त्तावग्निर्व्वैश्वानरो मुखादुदज्वालीत्तं नाशकं धारयितुꣳस मे मुखान्निरपादीति ॥ १९ ॥ स यत्सामिधेनीषु घृतवत् । सामिधेनमेव तत्समेवैनं तेनेन्धे व्वीर्यमेवाऽस्मिन्दधाति ॥ २० ॥ तदु घृताच्येति । "देवान्

१. मध्वरे इति ग. २. विदेघेति. ग. ३. प्रापाद इति. ग.

४. ह इति नाऽस्ति क. ग. पुस्तकयोः । ५. न इति क. पु.

जिगाति सुम्नयुरि"ति यजमानो वै सुम्नयुः स हि देवान् जिगीषति स हि देवान् जिघाꣳसति तस्मादाह देवान् जिगाति सुम्नयुरिति सैषाग्नेयी सत्यनिरुक्ता सर्व्वा वाऽअनिरुक्तꣳ सर्व्वेणैवैतत्प्रतिपद्यते ॥२१॥ "अग्नऽआयाहि व्वीतय"ऽइति। तद्वेति भवति व्वीतयऽइति समन्तिकमिव ह वाऽइमेऽग्रे लोकाऽआसुरित्युन्मृश्या हैव द्यौरास ॥ २२ ॥ ते देवाऽअकामयन्त । कथं नु नऽइमे लोका व्वितराꣳ स्युः कथं नऽइदं व्वरीयऽइव स्यादिति तानेतैरेव त्रिभिरक्षरैर्व्यनयन् वीतयऽइति त ऽइमे व्विदूरं लोकास्ततो देवेभ्यो व्वरीयोऽभवद्वरीयो ह वाऽअस्मै भवति यस्यैवं व्विदुषऽएतामन्वाहुर्व्वीतय ऽ इति ॥२३॥ "गृणानो हव्य दातय"ऽ इति । यजमानो वै हव्यदातिर्गृणानो यजमानायेत्येवैतदाह "निहोता सत्सि बर्हिषी"त्यग्निर्व्वै होतायं लोको बर्हिरस्मिन्नेवैतल्लोकेऽग्निं दधाति सोऽयमस्मिल्लोकेऽग्निर्हितः सैषेममेव लोकमभ्यनूक्तेममेवैतया लोकं जयति यस्यैवं व्विदुष ऽएतामन्वाहुः ॥ २४ ॥ "तं त्वा समिद्भिरङ्गिर"ऽइति । समिद्भिर्ह्येतमङ्गिरसऽएन्धताङ्गिरऽइत्यङ्गिराऽउ ह्यग्निर्घृतेन व्वर्द्धयामसीति तत्सामिधेनं पदꣳ समेवैनं तेनेन्धे व्वीर्यमेवास्मिन्दधाति ॥ २५ ॥ (शतम् ३०० ॥) "बृहच्छोचा यविष्ठ्ये"ति । बृहदु ह्येष शोचति समिद्धो यविष्ठ्येति यविष्ठो ह्यग्निस्तस्मादाह यविष्ठ्येति सैषैतमेव लोकमभ्यनूक्तान्तरिक्षलोकमेव तस्मादाग्नेयी सत्यनिरुक्ताऽनिरुक्तो ह्येष लोकऽएतमेवैतया लोकं जयति यस्यैवं व्विदुष ऽएतामन्वाहुः ॥२६॥ "सं नः पृथु श्रवाय्यमि"ति । अदो वै पृथु यस्मिन्देवा ऽएतच्छ्रवाय्यं यस्मिन्देवा "ऽअच्छा देव व्विवाससी"त्यच्छ देव व्विवाससैतन्नो गमयेत्येवैतदाह ॥ २७ ॥ "बृहदग्ने सुवीर्यमि"ति । अदो वै बृहद्यस्मिन्देवा ऽएतत्सुवीर्यं यस्मि-

१. ऋ. सं. ३. १. २८. १. सुम्नयुरिति क. पु. २. ऋ. सं. ४. ५. २२. ५.
३. अस्येति. ग. ४. वृणान. इति. ग. पु. ५. ऋ. सं. ४. ५. २३. १.
६. आदितः कण्डिका संख्येयम् ॥ ७. ऋ. सं. ४. ५. २३. २.

न्देवाः सैष्तमेव लोकमभ्यनूक्ता दिवमेवैतमेवैतया लोकं जयति यस्यैवं विदुष ऽएतामन्वाहुः ॥२८॥ सोऽन्वाह । "[1]ईडेन्यो नमस्य"ऽ इतीडेन्यो ह्येष नमस्यो ह्येष "तिरस्तमाꣳसि दर्शत" ऽइति तिरऽइव ह्येष तमाꣳसि समिद्धो ददृशे "समग्निरिध्यते वृषे"ति सꣳ हीध्यते वृषा "वृषो ऽअग्निः समिध्यतऽइति सꣳहीध्यते ॥२९॥ "अश्वो न देववाहन" ऽइति । अश्वो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति यद्वै नेत्यृच्योमिति तत्तस्मादाहाश्वो न देववाहन ऽइति ॥ ३० ॥ "तꣳ हविष्मन्तऽईडत"ऽइति । हविष्मन्तो ह्येतं मनुष्या ऽईडते तस्मादाह तꣳ हविष्मन्तऽईडतऽइति॥३१॥ "वृषणं त्वा वयं वृषन्वृषणः समिधीमही"ति । सꣳ ह्येनमिन्धते "ऽग्ने दीद्यतं बृहदि"ति दीदयेव ह्येष बृहत्समिद्धः ॥ ३२ ॥

(अर्धप्रपाठकः ६४)

तं वाऽएतम् । वृषणवन्तं त्रिचमन्वाहाग्नेय्यो वाऽएताः सर्वाः सामिधेन्यो भवन्तीन्द्रो वै यज्ञस्य देवतेन्द्रो वृषैतेनो हाऽस्यैताः सेन्द्राः सामिधेन्यो भवन्ति तस्माद्वृषणवन्तं त्रिचमन्वाह ॥ ३३ ॥ सोऽन्वाह । "अग्निं दूतं वृणीमह"ऽइति । देवाश्च वा ऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे तान् स्पर्धमानान् गायत्र्यन्तरा तस्थौ या वै सा गायत्र्यासीदियं वै सा पृथिवीयꣳ हैव तदन्तरा तस्थौ त ऽउभयऽएव विदाञ्चक्रुर्यतरान्वै न ऽइयमुपावत्स्यति ते भविष्यन्ति परेतरे भविष्यन्तीति तामुभयऽएवोपमन्त्रयाञ्चक्रिरेऽग्निरेव देवानां दूत ऽआस सहरक्षा ऽइत्यसुररक्षसमसुराणाꣳ साग्निमेवानुप्रेयाय तस्मा दन्वाहाग्निं दूतं वृणीमहऽइति स हि देवानां दूत ऽआसी"द्धोतारं विश्ववेदसमि"ति ॥ ३४ ॥ तदु हैकेऽन्वाहुः । होता यो विश्ववे-

१. ऋ. सं. ३१. ३०. ३. २. ऋ. सं. ३०. १. ३०. ४.
३. ऋ. सं. ३. १. ३०. ५. ४. त्रिचमन्वाहेति क. ग. पु.
५. तृतीयप्रपाठकादितस्संख्येयम् । ६. ऋ. सं. १. १. २२. १.

दसऽइति नेदरमित्यात्मानं ब्रवाणीति तदु तथा न ब्रूयात् मानुपꣳ ह ते यज्ञे कुर्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुपं नेद्यद्धं यज्ञे करवाणीति तस्माद्यथैवऽर्च्चानूक्तमेवमेवानुब्रूयाद्धोतारं विश्ववेदसमित्येवास्य यज्ञस्य सुक्रतुमित्येष हि यज्ञस्य सुक्रतुर्यदग्निस्तस्मादाहास्य यज्ञस्य सुक्रतुमिति सेयं देवानुपाववर्त्त ततो देवा ऽअभवन् परासुरा भवति ह वा ऽआत्मना परास्य सपत्ना भवन्ति यस्यैवं विदुप ऽएतामन्वाहुः ॥ ३५ ॥ तां वाऽअष्टमीमनुब्रूयात् । गायत्री वाऽएषा निदानेनाष्टाक्षरा वै गायत्री तस्मादष्टमीमनुब्रूयात् ॥ ३६ ॥ तद्धैके । पुरस्ताद्धाय्ये दधत्यन्नं धाय्ये मुखतऽइदमन्नाद्यं दध्म ऽइति व्यदन्तस्तदु तथा न कुर्य्यादनवक्लृप्ता ह तस्यैषा भवति यः पुरस्ताद्धाय्ये दधाति दशमी वा हि तर्ह्येकादशी वा सम्पद्यते तस्यो हैवैषावक्लृप्ता भवति यस्यैतामष्टमीमन्वाहुस्तस्मादुपरिष्टादेव धाय्ये दध्यात् ॥३७॥ "समिध्यमानो ऽअध्वर"ऽइति । अध्वरो वै यज्ञः समिध्यमानो यज्ञऽइत्येवैतदाह "अग्निः पावक ऽईड्य" इति पावको ह्येष ऽईड्यो ह्येष "शोचिष्केशस्तमीमह"ऽइति शोचन्तीव ह्येतस्य केशाः समिद्धस्य "समिद्धोऽअग्नऽआहुते"त्यतः प्राचीनꣳ सर्व्वमिध्ममभ्यादध्याद्यदन्यत्समिधोऽपवृङ्क्तऽइव ह्येतद्धोता यद्वाऽअन्यत्समिध ऽइध्मस्यातिरिच्यतेऽतिरिक्तं तद्यद्वै यज्ञस्यातिरिक्तं द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते तस्मादतः प्राचीनꣳ सर्व्वमिध्ममभ्यादध्याद्यदन्यत्समिधः ॥ ३८ ॥ "देवान्यक्षि स्वध्वरे"ति । अध्वरो वै यज्ञो देवान्यक्षि सुयज्ञियेत्येवैतदाह "त्वꣳ हि हव्यवाडसी"त्येष हि हव्यवाड्यदग्नि-

---

१. सुक्रतुरिति. ग. पु. २. ऋ. सं. ३. १. २८. ४. ३. ऋ. सं. ४. १. २२. ४.

'प्रवो वाजा अभिद्यव' इत्यारभ्य 'आ जुहोता दुवस्यत' इत्यन्ता एकादश ऋचस्साभिधेन्य इत्युच्यन्ते । आसां यद्यपि ब्राह्मणेऽत्र विनियोगो दृश्यते, तथाऽपि हौत्रत्वेन अनाध्वर्यवत्त्वान्न यजुस्संहितायामासां पाठः । ऋक्संहितायामितस्ततः पठिता एव ता आश्वलायनेन प्रतीकग्रहणेन सामिधेनीकार्ये विनियुक्ताः । यद्यपि तैत्तिरीयब्राह्मणे तृतीयाष्टके पञ्चमप्रपाठके सामिधेनीप्रकरणेऽनयैवाऽऽनुपूर्व्या आसां पाठो दृश्यते, तथाऽपि तास्त-

स्तस्मादाह त्वꣳ हि हव्यवाडसीत्या* "जुहोता दुवस्यतार्ग्नि प्रयत्यध्वरे व्वृणीध्वꣳ हव्यवाहनमि"ति सम्प्रेष्यत्येवैतया जुहुत च यजत च यस्मै कामाय समैन्धिद्वं तत्कुरुतेत्येवैतदाहा"र्ग्नि प्रयत्यध्वर"ऽइत्यध्वरो वै यज्ञोऽर्ग्नि प्रयति यज्ञऽइत्येवैतदाह "वृणीध्वꣳ हव्यवाहनमि"त्येष हि हव्यवाहनो यदग्निस्तस्मादाह व्वृणीध्वꣳ हव्यवाहनमिति ॥ ३९ ॥ तं वाऽएतम् । अध्वरवन्तं त्रिचमन्वाह देवान्ह वै यज्ञेन यजमानान्त्सपत्ना ऽअसुरा दुधूर्षाश्चक्रुस्ते दुधूर्षन्तऽ एवं न शेकुर्धूर्व्वितुं त पराबभूवुस्तस्माद्यज्ञोऽध्वरो नाम दुधूर्षन्ह वाऽएनꣳ सपत्नः पराभवति यस्यैवं विदुषोऽध्वरवन्तं त्रिचमन्वाहुर्य्यावद्वेव सौम्येनाऽध्वरेणेष्ट्वा जयति तावज्जयति ॥४०॥ Cf. का. श. २. ३. ४., तै. सं. २. ५. ७, ८.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे तृतीयप्रपाठके तृतीयं ब्राह्मणम् ॥

१. ३. ४.

एतद्ध वै देवा ऽअग्निं गरिष्ठे युञ्जन् । यद्धोतृत्वऽइदं नो हव्यं व्वहेति तमेतद्गरिष्ठे युक्त्वोपामदन्वीर्यवान्वै त्वमस्यलं वै त्वमेतस्माऽअसीति वीर्यं समादधतो यथेदमप्येतर्हि ज्ञातीनां यं गरिष्ठे युञ्जन्ति तमुपमदन्ति वीर्यवान्वै त्वमस्यलं वै त्वमेतस्माऽअसीति व्वीर्यं

च्छाखाध्येतॄणामुपयोगार्थं तत्र पठिता इति नाऽत्र विनियोगमर्हन्ति । तत्र च प्रमाणं सप्तमैकादशमन्त्रयोः पाठवैलक्षण्यमेव । अतो दाशतयीगता एवेमा ऋचः । अतश्च यत् कैश्चिदत्र ब्राह्मण उदाहृतानां सामिधेन्यृचां तैत्तिरीयशाखीयत्वमुल्लिखितं तत्प्रामादिकमेवेति ध्येयम् *

१. ऋ. सं. ४. १. २२. ५. २. प्रयत्यध्वरे इति. क. ग. पु.

समादधतः स यदत ऽऊर्ध्वमन्वाहोपस्तौत्येवैनमेतद्वीर्यमेवास्मिन्दधाति ॥१॥ "अग्ने महाँ २॥ ऽअसि ब्राह्मण भारते"ति । ब्रह्म ह्यग्निस्तस्मादाह ब्राह्मणेति भारतेत्येष हि देवेभ्यो हव्यं भरति तस्माद्भरतोऽग्निरित्याहुरेषऽउ वा ऽइमाः प्रजाः प्राणो भूत्वा बिभर्त्ति तस्माद्देवाह भारतेति ॥ २ ॥ अथार्षेयं प्रवृणीते । ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मादार्षेयं प्रवृणीते ॥ ३ ॥ परस्तादर्वाक् प्रवृणीते । परस्ताद्ध्यर्वाच्यः प्रजाः प्रजायन्ते ज्यायसस्पतयऽउ चैवैतं निह्नुतऽइदꣳ हि पितैवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्वाक् प्रवृणीते ॥ ४ ॥ स ऽआर्षेयमुक्त्वाह । *"देवेद्धो मन्विद्ध" ऽइति देवा ह्येतमग्रऽऐन्धत तस्मादाह देवेद्ध ऽइति मन्विद्धऽइति मनुर्ह्येतमग्र ऽऐन्ध तस्मादाह मन्विद्ध इति ॥ ५ ॥ "ऋषिष्टुत" ऽइति । ऋषयो ह्येतमग्रेऽस्तुवंस्तस्मादाहर्षिष्टुत ऽइति ॥६॥ "विप्रानुमदित" ऽइति । एते वै विप्रा यदृषय ऽएते ह्येतमन्वमदंस्तस्मादाह विप्रानुमदित इति ॥७॥ "कविशस्त" इति । एते वै कवयो यदृषय ऽएते ह्येतमशꣳसंस्तस्मादाह कविशस्त ऽइति ॥ ८ ॥ "ब्रह्मसꣳशित" ऽइति । ब्रह्मसꣳशितो ह्येष "घृताहवन" ऽइति घृताहवनो ह्येषः ॥९॥ "प्रणीर्यज्ञानाꣳरथीरध्वराणामि"ति । एतेन वै सर्वान्यज्ञान्प्रणयन्ति ये च पाकयज्ञा ये चेतरे तस्मादाह प्रणीर्यज्ञानामिति ॥१० ॥ रथीरध्वराणामिति । रथो ह वाऽएष भूत्वा देवेभ्यो यज्ञं वहति तस्मादाह रथीरध्वराणामिति ॥११॥ "अतृत्तो होता तूर्णिर्हव्यवाडि"ति । न ह्येतꣳरक्षाꣳसि तरन्ति तस्मादाहातृत्तो होतेति तूर्णिर्हव्यवाडिति सर्वꣳ ह्येष पाप्मानं तरति तस्मादाह तूर्णिर्हव्यवाडिति ॥१२॥

* 'देवेद्धो मन्विद्ध' इत्यादयोऽपि मन्त्रा न संहितायां पठिताः, क्वचित्तु परिशिष्टे पठिता अत्र ब्राह्मणे विनियुक्ताः । आश्वलायनेन तु श्रौतसूत्र इम एव तूद्धृताः । तैत्तिरीयब्राह्मणे तृतीयाष्टके पञ्चमप्रपाठके तृतीयानुवाके पठितास्तु पूर्ववदन्य एवेत्यवगन्तव्यम् ।

१. इति क. ग. पु.

"आस्पात्रं जुहूर्देवानामि"ति । देवपात्रं वाऽएष यदग्निस्तस्मादग्नौ सर्व्वेभ्यो देवेभ्यो जुह्वति देवपात्रꣳ ह्येष प्राप्नोति ह वै तस्य पात्रं यस्य पात्रं प्रेप्स्यति य ऽएवमेतद्वेद ॥१३॥ "चमसो देवपान" ऽइति । चमसेन ह वाऽएतेन भूतेन देवा भक्षयन्ति तस्मादाह चमसो देवपान ऽइति ॥१४ ॥ "अराँ२॥ऽइवाग्ने नेमिर्देवांस्त्वं परिभूरसी"ति । यथारान्नेमिः सर्व्वतः परिभूरेवं त्वं देवान्त्सर्व्वतः परिभूरसीत्येवैतदाह ॥ १५ ॥ "आवह देवान्यजमानाये"ति । तदस्मै यज्ञाय देवानावोढवाऽआहा"ग्निमग्नऽआवहे"ति तदाग्नेयायाज्यभागायाग्निमावोढवाऽआह "सोममावहे"ति तत्सौम्यायाज्यभागाय सोममावोढवाऽआहा- "ग्निमावहे"ति तद्य ऽएष ऽउभयत्राच्युत आग्नेयः पुरोडाशो भवति तस्माऽअग्निमावोढवाऽआह ॥१६॥ अथ यथादेवतम् । "देवां २ ॥ ऽआज्यपां २ ॥ ऽआवहे"ति तत्प्रयाजानुयाजानावोढवाऽआह प्रयाजानुयाजा वै देवा ऽआज्यपा ऽ"अग्निꣳ होत्रायावहे"ति तदग्निꣳ होत्रायावोढवाऽआह स्वं महिमानमावहेति तत्स्वं महिमानमावोढवाऽआह व्वाग्वाऽअस्य स्वो महिमा तद्वाचमावोढवाऽआहा "च व्वह जातवेदः सुयजा च यजे"ति तद्या ऽएवैतद्देवता ऽआवोढवाऽआह ता एवैतदाहा चैनावहानुष्ठ्या च यजेति यदाह सुयजा च यजेति ॥ १७ ॥ स वै तिष्ठन्नन्वाह । अन्वाह ह्येतदसौ ह्यनुवाक्या तदसावेवैतद्भूत्वान्वाह तस्मात्तिष्ठन्नन्वाह ॥ १८ ॥ आसीनो याज्यां यजति । इयꣳ हि याज्या तस्मान्न कश्चन तिष्ठन्याज्यां यजतीयꣳ हि याज्या तदियमेवैतद्भूत्वा यजति तस्मादासीनो याज्यां यजति ॥ १९ ॥ Cf. का. श. २. ४. १., तै. सं. २. ५. ९.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे तृतीयप्रपाठके चतुर्थं ब्राह्मणम् ॥

यो ह वा ऽअग्निः सामिधेनीभिः समिद्धः । अतितरा[1]ँ ह वै स ऽइतरस्मादग्नेस्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥ १ ॥ स यथा हैवाग्निः । सामिधेनीभिः समिद्धस्तपत्येव[2]ँ हैव ब्राह्मणः सामिधेनीर्विद्वाननुब्रुवंस्तपत्यनवधृष्यो हि भवत्यनवमृश्यः ॥ २ ॥ सोऽन्वाह । "प्र व" ऽइति प्राणो वै प्रवान् प्राणमेवैतया समिन्धे ऽ"ग्न ऽआ याहि वीतय"ऽइत्यपानो वा ऽएतवानपानमेवैतया समिन्धे "बृहच्छोचा यविष्ठ्ये"त्युदानो वै बृहच्छोचा ऽउदानमेवैतया समिन्धे ॥३॥ "स नः पृथु श्रवाय्यमि"ति । श्रोत्रं वै पृथु श्रवाय्यꣳ श्रोत्रेण हीदमुरु पृथु शृणोति श्रोत्रमेवैतया समिन्धे ॥ ४ ॥ "ईडेन्यो नमस्य" ऽइति । वाग्वा ऽईडेन्या वाग्घीदꣳ सर्वमीट्टे[3] वाचेदꣳ सर्वमीडितं वाचमेवैतया समिन्धे ॥ ५ ॥ "अश्वो न देववाहन" ऽइति । मनो वै देववाहनं मनो हीदं मनस्विनं भूयिष्ठं वनीवाह्यते मन ऽएवैतया समिन्धे ॥ ६ ॥ "अग्ने दीद्यतं बृहदि"ति । चक्षुर्वै दीदयेव चक्षुरेवैतया समिन्धे ॥ ७ ॥ "अग्निं दूतं वृणीमह" ऽइति । य ऽएवायं मध्यमः प्राण ऽएतमेवैतया समिन्धे सा हैषां तस्था प्राणानामतो ह्यन्य ऽऊर्ध्वाः प्राणा ऽअतोऽन्ये ऽवाञ्चोऽन्तस्था ह भवत्यन्तस्थामेनं मन्यन्ते य ऽएवमेतामन्तस्थां प्राणानां वेद ॥ ८ ॥ "शोचिष्केशस्तमीमह" ऽइति । शिश्नं वै शोचिष्केशꣳ शिश्नꣳहीदꣳशिश्निनं भूयिष्ठꣳ शोचयति शिश्नमेवैतया समिन्धे ॥ ९ ॥ "समिद्धोऽअग्न ऽआहुते"ति । य ऽएवायमवाङ्प्राण ऽएतमेवैतया समिन्धऽ"आ जुहोता दुवस्यते"ति सर्वमात्मानꣳ समिन्धऽआ नखेभ्योऽथो लोमभ्यः ॥१०॥ स यद्येनं प्रथमायाꣳसामिधेन्यामनुव्याहरेत् । तं प्रतिब्रूयात् "प्राणं वा ऽएतदात्मनो ऽग्नावाधाः प्राणेनात्मन ऽआर्त्तिमारिष्यसी"ति तथा

१. इतरस्तस्मादिति. ग. पु. २. मृश्यः इति. ग. पु. ३. सर्वमीट्टे इति. ग.पु.

हैव स्यात् ॥ ११ ॥ यदि द्वितीयस्यामनुव्याहरेत् । तं प्रतिब्रूया-
"दपानं वाऽएतदात्मनोऽग्नावाधा ऽअपानेनात्मन ऽआर्त्तिमारिष्यसी"-
ति तथा हैव स्यात् ॥ १२ ॥ यदि तृतीयस्यामनुव्याहरेत् । तं प्र-
तिब्रूया"दुदानं वाऽएतदात्मनोऽग्नावाधा ऽउदानेनात्मन ऽआर्त्तिमारि-
ष्यसी"ति तथा हैव स्यात् ॥ १३ ॥ यदि चतुर्थ्यामनुव्याहरेत् ।
तं प्रतिब्रूया"च्छ्रोत्रं वाऽएतदात्मनोऽग्नावाधाः श्रोत्रेणात्मन ऽआर्त्ति-
मारिष्यसि बधिरो भविष्यसी"ति तथा हैव स्यात् ॥ १४ ॥ यदि
पञ्चम्यामनुव्याहरेत् । तं प्रतिब्रूयात्"वाचं वाऽएतदात्मनोऽग्नावाधा
व्वाचात्मन ऽआर्त्तिमारिष्यसि मूको भविष्यसी"ति तथा हैव स्यात्
॥ १५ ॥ यदि षष्ठ्यामनुव्याहरेत् । तं प्रतिब्रूया"न्मनो वाऽएतदा-
त्मनोऽग्नावाधा मनसात्मन ऽआर्त्तिमारिष्यसि मनोमुपिगृहीतो मोमु-
ह्यश्चरिष्यसी"ति तथा हैव स्यात् ॥ १६ ॥ यदि सप्तम्यामनुव्याह-
रेत् । तं प्रति ब्रूया"च्चक्षुर्व्वाऽएतदात्मनोऽग्नावाधाश्चक्षुषात्मन ऽआ-
र्त्तिमारिष्यस्यन्धो भविष्यसी"ति तथा हैव स्यात् ॥ १७ ॥ यद्यष्ट-
म्यामनुव्याहरेत् । तं प्रतिब्रूया"न्मध्यं वाऽएतत्प्राणमात्मनोऽग्नावा-
धा मध्येन प्राणेनात्मन ऽआर्त्तिमारिष्यस्युद्ध्माय मरिष्यसी"ति तथा
हैव स्यात् ॥ १८ ॥ यदि नवम्यामनुव्याहरेत् । तं प्रतिब्रूया"च्छिश्नं
वाऽएतदात्मनोऽग्नावाधाः शिश्नेनात्मनऽआर्त्तिमारिष्यसि क्लीबो भ-
विष्यसीति तथा हैव स्यात् ॥ १९ ॥ यदि दशम्यामनुव्याहरेत् ।
तं प्रतिब्रूया"दवाञ्चं वाऽएतत्प्राणमात्मनो ऽग्नावाधा ऽअवाचा प्रा-
णेनात्मन ऽआर्त्तिमारिष्यस्यपिनद्धो मरिष्यसी"ति तथा हैव स्यात्
॥ २० ॥ यद्येकादश्यामनुव्याहरेत् । तं प्रतिब्रूया"त्सर्व्वं वाऽएतदा-
त्मानमग्नावाधाः सर्व्वेणात्मनार्त्तिमारिष्यासि क्षिप्रेऽमुं लोकमेष्यसी"-
ति तथा हैव स्यात् ॥ २१ ॥ स यथा हैवाग्निष्ठं । सामिधेनीभिः

१. मोमुग्ध इति. ख. पु. २. स्युध्नायेति. ख. पु.

समिद्धमापद्यात्ति न्येत्येव ँ हैव ब्राह्मणꣳ सामिधेनीर्विद्वाँ[1]सम नुब्रुवन्तमनुव्याहृत्यात्ति न्येति ॥२२॥ का. श. २. ४. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे तृतीयप्रपाठके पञ्चमं ब्राह्मणम् ॥

१. ३. ६.

तं वाऽएतमग्निꣳ समैन्धिषत । "समिद्धे देवेभ्यो जुहवामे"ति तस्मिन्नेतेऽएव प्रथमेऽआहुती जुहोति मनसे चैव वाचे च मनश्च ह वै वाक् च युजौ देवेभ्यो यज्ञं वहतः ॥ १ ॥ स यदुपाꣳशु क्रियते । तन्मनो देवेभ्यो यज्ञं वहत्यथ यद्वाचा निरुक्तं क्रियते तद्वाग्देवेभ्यो यज्ञं वहत्येतद्वाऽइदं द्वयं क्रियते तदेतेऽएवैतत्सन्तर्पयति तृप्ते प्रीते देवेभ्यो यज्ञं वहत ऽइति ॥ २ ॥ स्रुवेण तमाघारयति । यं मनसऽआघारयति वृषा हि मनो वृषा हि स्रुवः ॥३॥ स्रुचा तमाघारयति । यं वाचऽआघारयति योषा हि वाग्योषा हि स्रुक्॥४॥ तूष्णीं तमाघारयति । यं मनसऽआघारयति न स्वाहेति चनाऽनिरुक्तꣳ हि मनोऽनिरुक्तँ ह्येतद्यत्तूष्णीम् ॥ ५ ॥ मन्त्रेण तमाघारयति । यं वाचऽआघारयति निरुक्ता हि वाङ्निरुक्तो हि मन्त्रः ॥ ६ ॥ आसीनस्तमाघारयति । यं मनसऽआघारयति तिष्ठंस्तं यं वाचे मनश्च ह वै वाक् च युजौ देवेभ्यो यज्ञं वहतो यतरो वै युजोर्हसीयान् भवत्युपवहं वै तस्मै कुर्वन्ति वाग्वै मनसो हसीयस्युपरिमिततरमिव हि मनः परिमिततरेव हि वाक्तद्वाचऽएवैतदुपवहं करोति ते सयुजौ देवेभ्यो यज्ञं वहतस्तस्मात्तिष्ठन्वाचऽआघारयति॥ ७ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्य ऽआसङ्गाद्बिभयाञ्चक्रुस्तऽएतद्दक्षिणतः प्र-

१. विद्वाँ[1]सँसमन्विति. ग. पु. २. हैवति. ग. पु.

३. स्रुक् इति. क. ४. तूष्णीमिति. ग. पु.

त्युदश्रयन्नुच्छ्रितमिव हि व्वीर्यं तस्माद्दक्षिणतस्तिष्ठन्नाघारयति स यदुभयत ऽआघारयति तस्मादिदं मनश्च व्वाक्च समानमेव सन्नानेव शिरो ह वै यज्ञस्यैतयोरन्यतर ऽआघारयोर्मूलमन्यतरः ॥ ८ ॥ स्रुवेण तमाघारयति । यो मूलं यज्ञस्य स्रुचा तमाघारयति यः शिरो यज्ञस्य ॥ ९ ॥ तूष्णीं तमाघारयति । यो मूलं यज्ञस्य तूष्णीमिव हीदं मूलं नो ह्यत्र व्वाग्वदति ॥ १० ॥ मन्त्रेण तमाघारयति । यः शिरो यज्ञस्य व्वाग्घि मन्त्रः शीर्ष्णो हीयमधि व्वाग्वदति ॥ ११ ॥ आसीनस्तमाघारयति । यो मूलं यज्ञस्य निषण्णमिव हीदं मूलं तिष्ठंस्तमाघारयति यः शिरो यज्ञस्य तिष्ठतीव हीदꣳ शिरः ॥ १२ ॥ स स्रुवेण पूर्व्वमाघारमाघार्याह । "अग्निमग्नीन्त्सम्मृड्ढी"ति यथा धुरमध्यूहेदेवं तद्यत्पूर्व्वमाघारमाघारयत्यध्यूह्य हि धुरं युञ्जन्ति ॥ १३ ॥ अथ सम्मार्ष्टि । युनक्त्येवैनमेतद्युक्तो देवेभ्यो यज्ञं व्वहादिति तस्मात्सम्मार्ष्टि परिक्रामꣳ सम्मार्ष्टि परिक्रामꣳ हि योग्यं युञ्जन्ति त्रिस्त्रिस्सम्मार्ष्टि त्रिवृद्धि यज्ञः ॥ १४ ॥ स सम्मार्ष्टि । "अग्ने व्वाजजिद्वाजं त्वा सरिष्यन्तं त्वा व्वाजजितꣳ सम्माज्मी"ति यज्ञं त्वा व्वक्ष्यन्तं यज्ञियꣳ सम्माज्मीत्येवैतदाहाथोपरिष्टात्तूष्णीं त्रिस्तद्यथा युक्ता प्राजेत्प्रेहि व्वहेत्येवमेवैतत्कशयोपक्षिपति प्रेहि देवेभ्यो यज्ञं व्वहेति तस्मादुपरिष्टात्तूष्णीं त्रिस्तद्यदेतदन्तरेण कर्म क्रियते तस्मादिदं मनश्च व्वाक्च समानमेव सन्नानेव ॥ १५ ॥ Cf. का. श. २. ४. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे तृतीयप्रपाठके षष्ठं ब्राह्मणम् ॥

तृतीयः प्रपाठकस्समाप्तः ॥

कण्डिकाः १२८* ॥

१. युञ्जन्ति. क. ग. पु. २. यज्ञः इति. ग. पु. ३. मा. सं. २. ७.

४. त्वेति नाऽस्ति. ख. पु. * तृतीयप्रपाठकस्थकण्डिकानां संख्येयम् ।

अथ चतुर्थः प्रपाठकः ॥

१. ४. १.

स स्रुचोत्तरमाघारमाघारयिष्यन् । पूर्वेण स्रुचावञ्जलिं निद-धाति "नमो देवेभ्यः स्वधा पितृभ्य" ऽइति तद्देवेभ्यश्चैवैतत्पितृभ्य-श्चार्त्विज्यं करिष्यन्निह्नुते "सुयमे मे भूयास्तामि"ति स्रुचावादत्ते सुभरे मे भूयास्तं भर्त्तुं वाछं शकेयमित्येवैतदाह "स्कन्नमद्य देवेभ्यऽ आज्यꣳ सम्भ्रियासमि"त्यविक्षुब्धमद्य देवेभ्यो यज्ञं तनवाऽ इत्ये-वैतदाह ॥ १ ॥ "अङ्घ्रिणा विष्णो मा त्वावक्रमिषमि"ति । यज्ञो वै विष्णुस्तस्माऽएवैतन्निह्नुते मा त्वावक्रमिषमिति "वसुमतीमग्ने ते छायामुपस्थेषमि"ति साध्वीमग्ने ते छायामुपस्थेषमित्येवैतदाह ॥२॥ "विष्णोस्थानमसी"ति । यज्ञो वै विष्णुस्तस्यैव ह्येतदन्तिकं तिष्ठति तस्मादाह विष्णोस्थानमसीति "त ऽइन्द्रो वीर्यमकृणोदि"त्यनो हीन्द्रस्तिष्ठन्दक्षिणतो नाष्ट्रा रक्षाꣳस्यपाहन्स्तस्मादाहेत ऽइन्द्रो वीर्यमकृ-णोदि"त्यूर्ध्वोऽध्वर ऽआस्थादि"त्यध्वरो वै यज्ञ ऽऊर्ध्वो यज्ञ ऽआस्था-दित्येवैतदाह ॥ ३ ॥ "अग्ने वेहोत्रं वेदित्यमि"ति । उभयं वा ऽएत-दग्निर्देवानाꣳ होता च दूतश्च तदुभयं विद्धि यद्देवानामसीत्येवैत-दाहा "वतां त्वां द्यावापृथिवी ऽअव त्वं द्यावापृथिवी" ऽइति नात्र तिरोहितमिवास्ति "स्विष्टकृद्देवेभ्य ऽइन्द्र ऽआज्येन हविषाभूत्स्वाहे" तीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्र ऽआज्येनेति व्याचे वा ऽएतमा-घारमाघारयतीन्द्रो व्यागित्यु वाऽआहुस्तस्माद्देवाहेन्द्र ऽआज्येनेति ॥ ४ ॥ अथासꣳस्पर्शयन्त्स्रुचौ पर्येत्य । ध्रुवया समनक्ति शिरो वै यज्ञस्योत्तर ऽआघार ऽआत्मा वै ध्रुवा तदात्मन्येवैतच्छिरःप्रतिदधाति

१. मा. सं. २. ७. २. मा. सं. २. ७. ३. मा. सं. २. ८.
४. मा. सं. २. ८. ५. मा. सं. २. ८. ६. मा. सं. २. ८.
७. मा. सं. २. ८. ८. मा. सं. २. ८. ९. मा. सं. २. ९.
१०. मा. सं. २. ९. ११. मा. सं. २. ९. १२. आज्येनेति. क. ग.घ.

शिरो वै यज्ञस्योत्तर ऽआघारः श्रीर्व्वै शिरः श्रीर्हि वै शिरस्तस्माद्यो-ऽर्द्धस्य श्रेष्ठो भवत्यसावमुष्यार्द्धस्य शिर ऽइत्याहुः ॥ ५ ॥ यजमान ऽएव ध्रुवामनु । योऽस्माऽअरातीयति स ऽउपभृतमनु स यद्धोपभृता समञ्ज्याद्यो यजमानायारातीयति तस्मिञ्छ्रियं दध्यात्तद्यजमान ऽएवैतच्छ्रियं दधाति तस्माद्ध्रुवया समनक्ति ॥ ६ ॥ स समनक्ति । "सं ज्योतिषा ज्योतिरि"ति ज्योतिर्व्वा ऽइतरस्यामाज्यं भवति ज्योतिरितरस्यां ते ह्येतदुभे ज्योतिषी सङ्गच्छेते तस्मादेवꣳ समनक्ति ॥ ७ ॥ अथातो मनसश्चैव व्वाचश्च । अहं भद्र ऽ उदितं मनश्च ह वै व्वाक्चाहं भद्र ऽऊदाते ॥ ८ ॥ तद्ध मन ऽउवाच । अहमेव त्वच्छ्रयो-ऽस्मि न वै मया त्वं किं चनानभिगतं व्वदसि सा यन्मम त्वं कृता-नुकरानुवर्त्मास्यहमेव त्वच्छ्रयोऽस्मीति ॥ ९ ॥ अथ ह व्वागुवाच । अहमेव त्वच्छ्रेयस्यस्मि यद्वै त्वं व्वेत्थाहं तद्विज्ञपयाम्यहꣳ संज्ञपया-मीति ॥१०॥ ते प्रजापतिं प्रतिप्रश्नमयतुः । स प्रजापतिर्मनसऽएवा-नूवाच मन ऽएव त्वच्छ्रेयो मनसो वै त्वं कृतानुकरानुवर्त्मासि श्रेयसो वै पापीयान् कृतानुकरोऽनुवर्त्मा भवतीति ॥११॥ सा ह व्वाक्परो-क्ता व्विसिष्मिये । तस्यै गर्भः पपात सा ह व्वाक् प्रजापतिमुवाचाह-व्यवाड्वाहं तुभ्यं भूयासं यां मा परावोच ऽइति तस्माद्यत्किं च प्राजापत्यं यज्ञे क्रियत ऽ उपाꣳश्वेव तत् क्रियते ऽ हव्यवाड्हि व्वाक् प्रजा-पतय ऽआसीत् ॥ १२ ॥ तद्धैतद्देवाः । रेतश्चर्मन्वा यस्मिन्वा बभ्रु-स्तद्ध स्म पृच्छन्त्यत्रैव त्या३दिति ततोऽत्रिः सम्बभूव तस्मादप्यात्रे-य्या योषितैनस्व्येतस्यै हि योपायै व्वाचो देवताया ऽएते सम्भूताः ॥ १३ ॥ Cf. का. श. २. ४. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे चतुर्थप्रपाठके प्रथमं ब्राह्मणम् ॥
(इति चतुर्थोऽध्यायः)

१. मा. सं. २. ९. २. See. तै. सं. २. ५. ११. ४. ३. योषितेति. ग. पु.

स वै प्रवरायाश्रावयति । तद्यत्प्रवरायाश्रावयति यज्ञो वाऽआश्रावणं यज्ञमभिव्याहृत्याथ होतारं प्रवृणाऽइति तस्मात्प्रवरायाश्रावयति ॥ १ ॥ स ऽइध्मसन्नहनान्येवाभिपद्याश्रावयति । स यद्वानारभ्य यज्ञमध्वर्युराश्रावयेद्वेपनो वा ह स्यादन्यां व्वार्त्तिमाच्छेत् ॥२॥ तद्धैके । व्वेदे स्तीर्णायै वर्हिरभिपद्याश्रावयन्तीध्मस्य वा शकलमपच्छिद्याभिपद्याश्रावयन्तीदं वै किञ्चिद्यज्ञस्येदं यज्ञमभिपद्याश्रावयाम ऽइति व्वदन्तस्तदु तथा न कुर्यादेतद्वै किञ्चिद्यज्ञस्य यैरिध्मः सन्नद्धो भवत्यग्निꣳ सम्मृजन्ति तद्वेव खलु यज्ञमभिपद्याश्रावयति तस्मादिध्मसन्नहनान्येवाभिपद्याश्रावयेत् ॥ ३ ॥ स ऽआश्राव्य । य ऽएव देवानाꣳ होता तमेवाग्रे प्रवृणीतेऽग्निमेव तदग्नये चैवैतद्देवेभ्यश्च निह्नुते यदहाग्रेऽग्निं प्रवृणीते तदग्नये निह्नुते ऽथ यो देवानाꣳ होता तमग्रे प्रवृणीते तदु देवेभ्यो निन्हुते ॥ ४ ॥ स आह । "अग्निर्देवो देव्यो होते"त्यग्निर्हि देवानाꣳ होता तस्मादाहाग्निर्देवो देव्यो होतेति तदग्नये चैवैतद्देवेभ्यश्च निन्हुते यदहाग्रेऽग्निमाह तदग्नये निह्नुतेऽथ यो देवानाꣳ होता तमग्रऽआह तदु देवेभ्यो निन्हुते ॥५॥ "देवान्यक्षद्विद्वांश्चिकित्वानि"ति । एष वै देवाननु विद्वान्यदग्निः स ऽएनाननु विद्वाननुष्ठ्या यक्षदित्येवैतदाह ॥ ६ ॥ "मनुष्वद्भरतव"दिति । मनुर्ह वाऽअग्रे यज्ञेनेजे तदनुकृत्येमाः प्रजा यजन्ते तस्मादाह मनुष्वदिति मनोर्यज्ञऽइत्यु वाऽ आहुस्तस्माद्वेवाह मनुष्वदिति ॥७॥ भरतवदिति । एष हि देवेभ्यो हव्यं भरति तस्माद्भरतोऽग्निरित्याहुरेष ऽउवाऽइमाः प्रजाः प्राणो भूत्वा बिभर्त्ति तस्माद्वेवाह भरतवदिति ॥ ८ ॥ अथार्षेयं प्रवृणीते । ऋषिभ्यश्चैवैनमेतद्देवेभ्यश्च निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदिति तस्मा-

१. चैव देवेभ्य इति ग. पु. २. मनुष्वदिति. क. ग. पु. ३. देवेभ्य इति ग. पु.

दार्पेयं प्रवृणीते ॥९॥ परस्तादर्व्वाक्प्रवृणीते । परस्ताद्ध्यर्व्वाच्यः प्रजाः प्रजायन्ते ज्यायसम्पतयऽउच्चैवैतन्निहनुत ऽइदꣳ हि पितैवाग्रेऽथ पुत्रोऽथ पौत्रस्तस्मात्परस्तादर्व्वाक्प्रवृणीते॥१०॥स ऽआर्पेयमुक्त्वाह । ब्रह्मण्वदिति ब्रह्म ह्यग्निस्तस्मादाह ब्रह्मण्वदित्या च वक्षदिति तद्याऽएवैतद्देवता ऽआवोढवाऽआह ता ऽएवैतदाहा च व्वक्षदिति ॥११॥ "ब्राह्मणा ऽअस्य यज्ञस्य प्रावितार"ऽइति । एते वै ब्राह्मणा यज्ञस्य प्रावितारो येऽनूचाना ऽएते ह्येनं तन्वतऽएतऽएनं जनयन्ति तदु तेभ्यो निन्हुते तस्मादाह ब्राह्मणाऽअस्य यज्ञस्य प्रावितारऽइति ॥ १२ ॥ "असौ मानुष"ऽइति । तदिमं मानुषꣳ होतारं प्रवृणीते होता हैष पुरायैतर्हि होता ॥ १३ ॥ स प्रवृतो होता जपति । देवताऽउपधावति यथानुष्ठ्या देवेभ्यो व्यपदकुर्यात्यथानुष्ठ्या देवेभ्यो हव्यं व्वहेद्यथा न हलेदेवं देवता ऽउपधावति ॥ १४ ॥ तत्र जपति । "एतत्त्वा देव सवितर्वृणत"ऽइति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता"ग्निꣳ होत्रायै"ति तदग्नये चैवैतद्देवेभ्यश्च निहनुते यदग्रेऽग्निमाह तदग्नये निहनुतेऽथ यो देवानाꣳ होता तमग्र ऽआह तदु देवेभ्यो निहनुते ॥ १५ ॥ सह पित्रा व्वैश्वानरेणेति । संव्वत्सरो वै पिता व्वैश्वानरः प्रजापतिस्तत्संव्वत्सरायैवैतत्प्रजापतये निहनुतेऽ"ग्ने पृषन् बृहस्पते प्र च व्वद प्र च यजे"त्यनुवक्ष्यन्वा ऽएतद्वक्ष्यन् भवति तदेताभ्यऽएवैतद्देवताभ्यो निन्हुते यूयमनुब्रूत यूयं यजतेति ॥ १६ ॥ (शतम् ४००) "व्वसूनाꣳ रातौ स्याम । रुद्राणामुर्व्यायाꣳ स्वादित्याऽअदितये स्यामानेहस" ऽइत्येते वै त्रया देवा यद्वसवो रुद्रा ऽआदित्या ऽएतेषामभिगुप्तौ स्यामेत्येवैतदाह ॥ १७ ॥ "जुष्टामद्य देवेभ्यो व्वाचमुद्यासमि"ति । जुष्टमद्य देवेभ्योऽनूच्यासमित्येवैतदाह तद्धि समृद्धं यो जुष्टं देवेभ्यो ऽनुब्रवत् ॥ १८ ॥ "जुष्टां ब्रह्मभ्य" इति । जुष्टमद्य

१. तदिमं मानुषमिति. क. ग. पु. २. निहुत इति. क. ग. पु.

३. अत्र कण्डिकानामादितश्चतुर्थशतसंख्या पूर्णा भवति।

ब्राह्मणेभ्योऽनूच्यासमित्येवैतदाह तद्धि समृद्धं यो जुष्टं ब्राह्मणेभ्योऽनुब्रवत् ॥१९॥ "जुष्टां नराशꣳसायेति । प्रजा वै नरास्तत्सर्वाभ्यः प्रजाभ्य ऽआह तद्धि समृद्धं यश्च वेद यश्च न साध्वन्ववोचत्साध्वन्ववोचादित्येव व्विसृज्यन्ते "यदद्य होतृवर्ये जिह्मं चक्षुः परापतत् । अग्निष्टत्पुनराभ्रियाज्जातवेदा व्विचर्षणि"रिति यथा यानग्रेऽग्नीन होत्राय प्रावृणत ते प्राधन्वन्नेवं यन्मेऽत्र प्रवरेणामायि तन्मे पुनराप्याययेत्येवैतदाह तथो हास्यैतत्पुनराप्यायते ॥ २० ॥ अथाध्वर्युं चाऽऽग्नीध्रं च सम्मृशति । मनो वाऽअध्वर्युर्व्वाग्घोता तन्मनश्चैवैतद्वाचं च सन्दधाति ॥ २१ ॥ तत्र जपति । "पण्मोर्व्वीरꣳहसस्पान्त्वग्निश्च पृथिवी चापश्च व्वाजश्चाहश्च रात्रिश्चे"त्येता मा देवता ऽआर्त्तेर्गोपायन्त्वित्येवैतदाह तस्मो हि न हलास्ति यमेता देवता ऽआर्त्तेर्गोपायेयुः ॥ २२ ॥ अथ होतृषदनमुपावर्त्तते । स होतृषदनादेकं तृणं निरस्यति "निरस्तः परावसुरि"ति परावसुर्ह वै नामासुराणाꣳहोता स तमेवैतद्धोतृषदनान्निरस्यति॥ २३॥ अथ होतृषदन ऽउपविशति। "इदमहमर्व्वावसोः सदने सीदामी"त्यर्व्वावसुर्व्वै नाम देवानाꣳ होता तस्यैवैतत्सदने सीदति ॥ २४ ॥ तत्र जपति । "व्विश्वकर्म्मस्तनूपा ऽअसि मा मो दोषिष्टं मा मा हिꣳसिष्टमेषां लोक"ऽइत्युदङ्ङेजल्यन्तरा वाऽएतदाहवनीयं च गार्हपत्यं चास्ते तदु ताभ्यां निह्नुते मा मो दोषिष्टं मा मा हिꣳसिष्टमिति तथो हैनमेतौ न हिꣳस्तः ॥ २५ ॥ अथाग्निमीक्षमाणो जपति । "व्विश्वे देवाः शास्तन मा यथेह होता व्वृतो मनवै यन्निषद्य । प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो व्वहानी"ति यथा येभ्यः पक्वꣳ स्यात्तान् ब्रूयादनु मा शास्त यथा व ऽआहरिष्यामि यथा वः परिवेक्ष्यामीत्येवमेवैतद्देवेषु प्रशासनमिच्छते-

१ नराशꣳसायेति. क. पु. २ पान्त्विति. क. पु. ३. व्वातश्चेति ख. पु.

४ यथेहेति. ग. पु.

ऽनुमा शास्त यथा वोऽनुष्ठ्या व्वपट्कुर्यामनुष्ठ्या हव्यं व्वहेयमिति तस्मादेवं जपति ॥ २६ ॥ Cf का. श. २. ४. ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे चतुर्थप्रपाठके द्वितीयं ब्राह्मणम् ॥

१. ४. ३.

अग्निर्होता व्वेत्वग्नेर्होत्रमिति । अग्निरिदꣳ होता व्वेत्वित्येवैतदाहाग्नेर्होत्रमिति तस्यो हि होत्रं व्वेत्तु प्रावित्रमिति यज्ञो वै प्रावित्रं व्वेत्तु यज्ञमित्येवैतदाह "साध्व ते यजमान देवते"ति साधु ते यजमानदेवता यस्य तेऽग्निर्होतेत्येवैतदाह "घृतवतीमध्वर्यो स्रुचमास्यस्वे"ति तदध्वर्यु प्रसौति स यदेकामिवाह ॥ १ ॥ यजमानऽएव जुहूमनु । योऽस्मा ऽअरातीयति स ऽउपभृतमनु स यद्द्वे ऽइव ब्रूयाद्यजमानाय द्विषन्तं भ्रातृव्यं प्रत्युद्यामिनं कुर्यादत्तेव जुहूमन्वाद्यऽ उपभृतमनु स यद्द्वेऽइव ब्रूयादत्र ऽआद्यं प्रत्युद्यामिनं कुर्यात्तस्मादेकामिवैवाह ॥ २ ॥ "देवयुवं व्विश्ववारामि"ति । उपस्तौत्येवैनामेतन्महयत्येव यदाह देवयुवं व्विश्ववारामिती"डामहे देवाँ २ ॥ ऽईडेन्यान्नमस्याम नमस्यान्यजाम यज्ञिया"नितीडामहे तान्देवान्य ऽईडेन्या नमस्याम तान्ये नमस्या यजाम यज्ञियानिति मनुष्या वा ऽईडेन्याः पितरो नमस्या देवा यज्ञियाः ॥ ३ ॥ या वै प्रजा यज्ञेऽनन्वाभक्ताः। पराभूता वै ता ऽएवमेवैतद्या ऽइमाः प्रजा ऽअपराभूतास्ता यज्ञ ऽआभजति मनुष्यानन्नु पशवो देवाननु वयाꣳस्योषधयो व्वनस्पतयो यदिदं किञ्चैवमु तत्सर्व्वं यज्ञऽआभक्तम् ॥ ४ ॥ ता वाऽएताः । नव व्याहृतयो भवन्ति नवेमे पुरुषे प्राणा ऽएतानेवास्मिन्नेतद्दधाति तस्मा-

१. विश्ववारामिति. ग. पु. २. Sθe. तै. सं. २. ५.९.६.

न्नव व्याहृतयो भवन्ति ॥ ५ ॥ यज्ञो ह देवेभ्योऽपचक्राम । तं देवा ऽअन्वमन्त्रयन्ता नः शृणुप न ऽआवर्त्तस्वेति सो ऽस्तु तथेत्येव देवानुपाववर्त्त तेनोपावृत्तेन देवा ऽअयजन्त तेनेष्ट्वेतदभवन्यदिदं देवाः॥६॥

(काण्डस्याऽर्द्धम् ॥ ४१९ ॥)

स यदाश्रावयति । यज्ञमेवैतदनुमन्त्रयतऽआ नः शृणुप न ऽआवर्त्तस्वेत्यथ यत्प्रत्याश्रावयति यज्ञ ऽएवैतदुपावर्त्तेतऽस्तु तथेति तेनोपावृत्तेन रेतसा भृतेनर्त्विजः सम्प्रदायं चरन्ति यजमानेन परोक्षं यथा पूर्णपात्रेण सम्प्रदायं चरेयुरेवमेनेनऽर्त्विजः सम्प्रदायं चरन्ति तद्वाचैवैतत्सम्प्रदायं चरन्ति व्वाग्घि यज्ञो व्वागु हि रेतस्तदेतेनैवैतत्सम्प्रदायं चरन्ति ॥ ७ ॥ सो ऽ नुब्रूहीत्येवोक्ताऽध्वर्य्युः । नाऽपव्याहरेन्नोऽएव होतापव्याहरेदा श्रावयत्यध्वर्य्युस्तदग्नीधं यज्ञ ऽउपावर्त्तते ॥ ८ ॥ सोऽग्नीन्नापव्याहरेत् । आ प्रत्याश्रावणात्प्रत्याश्रावयत्याग्नीत्तत्पुनरध्वर्य्यु यज्ञ ऽउपावर्त्तते ॥ ९ ॥ सोऽध्वर्युर्नापव्याहरेत् । आ यजेति व्वक्तार्यजेत्येवाध्वर्युर्होत्रे यज्ञꣳ सम्प्रयच्छति ॥ १० ॥ स होता नाऽपव्याहरेत् । आवषट्कारात्तं व्वषट्कारेणाग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्व्वै योनिर्यज्ञस्य स ततः प्रजायतऽइति नु हविर्यज्ञेऽथ सौम्येध्वरे ॥ ११ ॥ स वै ग्रहं गृहीत्वाऽध्वर्य्युः । नाऽपव्याहरेदोपाकरणादुपावर्त्तध्वमित्येवाध्वर्य्युरुद्गातृभ्यो यज्ञꣳ सम्प्रयच्छति ॥ १२ ॥ त ऽ उद्गातारो नापव्याहरेयुः । ओत्तमाया ऽएषोत्तमेत्येवोद्गातारो होत्रे यज्ञꣳ सम्प्रयच्छन्ति ॥ १३ ॥ स होता नापव्याहरेत् । आ व्वषट्कारात्तं व्वषट्कारेणाग्नावेव योनौ रेतो भूतꣳ सिञ्चत्यग्निर्व्वै योनिर्यज्ञस्य स ततः प्रजायते ॥ १४ ॥ स यद्ध सोऽपव्याहरेत् । यं यज्ञ ऽउपावर्त्तते यथा पूर्णपात्रं परासिञ्चेदेवꣳ ह स यजमानं परासिञ्चेत्स यत्र हैवमृत्विजः सम्विदाना यज्ञेन चरन्ति सर्वमेव तत्र कल्पते न

मुह्यति तस्मादेवमेव यज्ञो भर्त्तव्यः ॥ १५ ॥ ता वाऽएताः । पञ्च व्याहृतयो भवन्त्यो "श्रावयास्तु श्रौषड्यज येयजामहे वौषडि"ति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्त्तवः सम्वत्सरस्यैषैका यज्ञस्य मात्रैषा सम्पत् ॥ १६ ॥ तासाꣳसप्तदशाक्षराणि । सप्तदशो वै प्रजापतिः प्रजापतिर्यज्ञ एषैका यज्ञस्य मात्रैषा सम्पत् ॥ १७ ॥ ओ श्रावयेति वै देवाः । पुरोवातꣳ समसृजिरेऽस्तु श्रौषडित्यभ्राणि समप्लावयन्यजेति विद्युतं ये यजामह ऽ इति स्तनयित्नुं वषट्कारेणैव प्रावर्षयन् ॥ १८ ॥ स यदि वृष्टिकामः स्यात् । यदीष्ट्वा वा यजेत दर्शपूर्णमासयोर्वैव ब्रूयाद्वृष्टिकामो वाऽअस्मीति तत्रो ऽ अध्वर्युं ब्रूयात्पुरोवातं च विद्युतञ्च मनसा ध्यायेत्यभ्राणि मनसा ध्यायेत्यग्नीधꣳ स्तनयित्नुं च वर्षं च मनसा ध्यायेति होतारꣳ सर्वाण्येतानि मनसा ध्यायेति ब्रह्माणं वर्षति हैव तत्र यत्रैवमृत्विजः सम्विदाना यज्ञेन चरन्ति ॥ १९ ॥ ओश्रावयेति वै देवाः । विराजमभ्याजुहुवुरस्तु श्रौषडिति वषट्समुषावासृजन्यजेत्युदजयन्ये यजामह ऽ इत्युपासीदन्वषट्कारेणैव विराजमदुहतेयं वै विराडस्यैवाऽएष दोहऽएवꣳ ह वा ऽ अस्माऽइयं विराट् सर्वान् कामान्दुहे यऽएवमेतं विराजो दोहं वेद ॥ २० ॥ (१) का. श. २. ४. ४.

इति शुक्लयजुर्वेदीये माध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे चतुर्थप्रपाठके तृतीयं ब्राह्मणम् ॥

१. तै. सं. १. [illegible] ११. १, २.

ऋतवो ह वै प्रयाजाः । तस्मात्पञ्च भवन्ति पञ्च ह्यृतवः ॥१॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरेऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरे ऽस्माकमयं भविष्यत्यस्माकमयं भविष्यतीति ॥ २ ॥

(अर्धप्रपाठकः ६१)

ततो देवाः । अर्चन्तः श्राम्यन्तश्चेरुस्तऽएतान्प्रयाजान् ददृशुस्तैरयजन्त तेऽर्कृतुन्त्संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात्सपत्नानन्तरायंस्तस्मात्प्रयाजाः प्रजया ह वै नामैतत्प्रयाजाऽइति तथोऽएवैष ऽएतैर्ऋतुन्त्संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात्सपत्नानन्तरेति तस्मात्प्रयाजैर्यजते ॥ ३ ॥ ते वाऽआज्यहविषो भवन्ति । व्यज्रो वाऽआज्यमेतेन वै देवा व्यज्रेणाज्येनर्तून्त्संवत्सरं प्राजयन्नृतुभ्यः संवत्सरात्सपत्नानन्तरायंस्तथोऽएवैषऽएतेन व्यज्रेणाज्येनऽर्तून्त्संवत्सरं प्रजयत्यृतुभ्यः संवत्सरात्सपत्नानन्तरेति तस्मादाज्यहविषो भवन्ति ॥ ४ ॥ एतद्वै संवत्सरस्य स्वं पयः । यदाज्यं तत्स्वेनैवैनमेतत्पयसा देवाः स्व्यकुर्वत तथोऽएवैनमेषऽएतत्स्वेनैव पयसा स्वीकुरुते तस्मादाज्यहविषो भवन्ति ॥५॥ स यत्रैव तिष्ठन् प्रयाजेभ्य ऽआश्रावयेत् । तत ऽएव नापक्रामेत्सङ्क्रामो वाऽएष सन्निधीयते यः प्रयाजैर्यजते यतरो वै संयत्तयोः पराजयतेऽप वै सङ्क्रामत्यभितरामु वै जयन् क्रामति तस्मादभितरामभितरामेव क्रामेदभितरामभितरामाहुतीर्जुहुयात् ॥ ६ ॥ तदु तथा न कुर्यात् । यत्रैव तिष्ठन् प्रयाजेभ्य ऽआश्रावयेत्तत ऽएव नापक्रामेद्यत्रोऽएव समिद्धतमं मन्येत तदाहुतीर्जुहुया-

१. प्रयाजा इति. ग. पु. २. देवा इति. ग. पु.

३. अभिव्रमणमिदं तैत्तरीयशाखायां विहितं—'अभिक्रामं जुहोति' इति । तस्य खण्डनं क्रियत इति भाति see. तै. सं. १. ३. १. ४.

त्समिद्धहोमेन ह्येव समृद्धा ऽआहुतयः ॥ ७ ॥ स ऽआश्राव्याह । समिधो यजेति तद्वसन्त समिन्द्धे स व्वसन्तः समिद्धोऽन्यानृतून्समिन्ध ऽऋतवः समिद्धाः प्रजाश्च प्रजनयन्त्योषधीश्च पचन्ति तद्वेव खलु सर्व्वानृतून्निराहाथ यज यजेत्येवोत्तरानाहाजामितायै जामि ह कुर्य्याद्यत्तनूनपातं यजेडो यजेति ब्रूयात्तस्माद्यज यजेत्येवोत्तरानाह ॥ ८ ॥ स वै समिधो यजति । स व्वसन्तो वै समिद्वसन्तमेव तद्देवा ऽअवृञ्जत व्वसन्तात्सपत्नानन्तरायन्वसन्तम्वेवैष ऽएतद्वृङ्क्ते व्वसन्तात्सपत्नानन्तरेति तस्मात्समिधो यजति ॥ ९ ॥ अथ तनूनपातं यजति । ग्रीष्मो वै तनूनपाद्ग्रीष्मो ह्यासां प्रजानां तनूस्तपति ग्रीष्ममेव तद्देवाऽअवृञ्जत ग्रीष्मात्सपत्नानन्तरायन् ग्रीष्मम्वेवैष ऽएतद्वृङ्क्ते ग्रीष्मात्सपत्नानन्तरेति तस्मात्तनूनपातं यजति ॥ १० ॥ अथेडो यजति । व्वर्षा वा ऽइडऽइति हि व्वर्षाऽइडो यदिदं क्षुद्रँसरीसृपं ग्रीष्महेमन्ताभ्यान्नित्यक्तं भवति तद्वर्षा ऽईडितमिवान्नमिच्छमानं चरति तस्माद्वर्षा ऽइडो व्वर्षा ऽएव तद्देवा ऽअवृञ्जत व्वर्षाभ्यः सपत्नानन्तरायन्वर्षा ऽउ ऽएवैष ऽएतद्वृङ्क्ते व्वर्षाभ्यः सपत्नानन्तरेति तस्मादिडो यजति ॥ ११ ॥ अथ बर्हिर्यजति । शरद्वै बर्हिरिति हि शरद्बर्हिर्या ऽइमा ऽओषधयो ग्रीष्महेमन्ताभ्यां नित्यक्ता भवन्ति ता व्वर्षा व्वर्द्धन्ते ताः शरदि बर्हिषो रूपं प्रस्तीर्णाः शेरे तस्माच्छरद्बर्हिः शरदमेव तद्देवाऽअवृञ्जत शरदः सपत्नानन्तरायंच्छरदम्वेवैष ऽएतद्वृङ्क्ते शरदः सपत्नानन्तरेति तस्माद्बर्हिर्यजति ॥ १२ ॥ अथ स्वाहा स्वाहेति यजति । अन्तो वै यज्ञस्य स्वाहाकारोऽन्त ऋतूनाँ हेमन्तो व्वसन्ताद्धि पराङ्ङ्योऽन्तेनैव तदन्तं देवा ऽअवृञ्जतान्तेनान्तात्सपत्नानन्तरायन्नन्तेनोऽएवैष ऽएतदन्तं वृङ्क्तेऽन्तेनान्तात्सपत्नानन्तरेति तस्मात्स्वाहास्वाहेति यजति ॥ १३ ॥ तद्वाऽएतत् । व्वसन्तऽएव हेमन्तात्पुनरसुरे तस्माद्ध्येष पुनर्भवति पुनर्ह वाऽअस्मिल्लोके भवति यऽ एवमेतद्वेद ॥ १४ ॥ स वै व्य-

न्तु व्वेत्विति यजति । अजामितायै जामि ह कुर्याद्यद्व्यन्तु व्यन्त्विति वैव यजेद्वेतु व्वेत्विति वा व्यन्त्विति वै योषा व्वेत्विति व्वृषा मिथुनमेवैतत्प्रजननं क्रियते तस्माद्व्यन्तु वेत्विति यजति ॥ १५ ॥ अथ चतुर्थे प्रयाजे समानयति बर्हिषि । प्रजा वै बर्ही रेत ऽआज्यं तत्प्रजास्वेवैतद्रेतः सिच्यते तेन रेतसा सिक्तेनेमाः प्रजाः पुनरभ्यावर्त्त प्रजायन्ते तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥ १६ ॥ सङ्ग्रामो वाऽएष सन्निधीयते । यः प्रयाजैर्यजते यतरं वै संयत्तयोर्मित्रमागच्छति स जयति तदेतदुपभृतोऽधि जुहूं मित्रमागच्छति तेन प्रजयति तस्माच्चतुर्थे प्रयाजे समानयति बर्हिषि ॥ १७ ॥ यजमान ऽएव जुहूमनु । योऽस्माऽअरातीयति स ऽउपभृतमनु यजमानायैवैतद्द्विषन्तं भ्रातृव्यं बलिꣳ हारयत्यत्तैव जुहूमन्वाद्यऽउपभृतमन्वत्रऽएवैतदाद्यं बलिꣳ हारयति तस्माच्चतुर्थे प्रयाजे समानयति ॥ १८ ॥ स वाऽअनवमृशन्त्समानयति । स यद्धावमृशेद्यजमानं द्विषता भ्रातृव्येणावमृशेदत्तारमाद्येनावमृशेत्तस्मादनवमृशन्त्समानयति ॥ १९ ॥ अथोत्तरां जुहूमध्यूहति । यजमानमेवैतद्द्विषति भ्रातृव्येऽध्यूहत्यत्तारमाद्येऽध्यूहति तस्मादुत्तरां जुहूमध्यूहति ॥२०॥ देवा ह वा ऽऊचुः । हन्त विजितमेवानु सर्व्वं यज्ञꣳ सꣳस्थापयाम यदि नोऽसुररक्षसान्यासजेयुः सꣳस्थित ऽएव नो यज्ञः स्यादिति ॥ २१ ॥ तऽउत्तमे प्रयाजे । स्वाहाकारेणैव सर्व्वं यज्ञꣳ समस्थापयन्त्स्वाहाग्निमिति तदाग्नेयमाज्यभागꣳसमस्थापयन्त्स्वाहा सोममिति तत्सौम्यमाज्यभागꣳ समस्थापयन्त्स्वाहाग्निमिति तद्य ऽएष ऽउभयत्राच्युत ऽआग्नेयः पुरोडाशो भवति तꣳ समस्थापयन् ॥ २२ ॥ अथ यथादेवतꣳ । "स्वाहा देवा ऽआज्यपा" ऽइति

१. सन्निधीयत इति. ग. पु. २. जुहूमनु इति. ग. पु.

३. यथादेवतꣳ इति. ग. पु.

तत्प्रयाजानुयाजान्त्समस्थापयन् प्रयाजानुयाजा वै देवा ऽआज्यपा जुषाणो ऽअग्निराज्यस्य व्वेत्त्विति तदग्निꣳ स्विष्टकृतꣳ समस्थापयन्नग्निर्हि स्विष्टकृत्स ऽएषोऽप्येतर्हि तथैव यज्ञः सन्तिष्ठते यथैवैनं देवाः समस्थापयंस्तस्मादुत्तमे प्रयाजे स्वाहा स्वाहेति यजति यावन्ति हवीꣳषि भवन्ति व्विजितमेवैतदनु सर्वं यज्ञꣳ सꣳस्थापयति तस्माद्यदत ऽऊर्ध्वं व्विलोम यज्ञे क्रियेत न तदाद्रियेत सꣳस्थितो मे यज्ञ ऽइति ह व्विद्यात्सहैष यज्ञो यातयामवाम यथा व्वषट्कृतꣳ हुतꣳ स्वाहाकृतम् ॥ २३ ॥ ते देवा ऽअकामयन्त । कथं न्विमं यज्ञं पुनराप्याययेमायातयामानं कुर्याम तेनायातयाम्ना प्रचरेमेति ॥२४॥ स यज्जुह्वामाज्यं परिशिष्टमासीत् । येन यज्ञꣳ समस्थापयंस्तेनैव यथापूर्वꣳ हवीꣳष्यभ्यघारयन्पुनरेवैनानि तदाप्याययन्नयातयामान्यकुर्व्वन्नयातयाम ह्याज्यं तस्मादुत्तमं प्रयाजमिष्ट्वा यथापूर्व्वꣳ हवीꣳष्यभिघारयति पुनरेवैनानि तदाप्याययत्ययातयामानि करोत्ययातयाम ह्याज्यं तस्माद्यस्य कस्य च हविषोऽवद्यति पुनरेव तदभिघारयति स्विष्टकृतऽएव तत्पुनराप्याययत्ययातयाम करोत्यथ यदा स्विष्टकृतेऽवद्यति न ततः पुनरभिघारयति नो हि ततः काञ्चन हविषोऽग्नावाहुतिꣳ होष्यन भवति ॥ २५ ॥ (Cf. का. श. २. ५. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे चतुर्थप्रपाठके चतुर्थं ब्राह्मणम् ॥

स वै समिधो यजति । प्राणा वै समिधः प्राणानेवैतत्समिन्द्धे प्राणैर्ह्ययं पुरुषः समिद्धस्तस्मादभिमृशेति ब्रूयाद्यद्युपतापी स्यात्स यद्युष्णः स्यादेव तावच्छꣳसेत समिद्धो हि स तावद्भवति यद्यु शीतः स्याद्वाशꣳसेन तत्प्राणानेवास्मिन्नेतद्दधाति तस्मात्समिधो यजति ॥ १ ॥ अथ तनूनपातं यजति । रेतो वै तनूनपाद्रेत ऽएवैतत्सिञ्चति तस्मात्तनूनपातं यजति ॥ २ ॥ अथेडो यजति । प्रजा वा ऽइडो यदा वै रेतः सिक्तं प्रजायतेऽथ तदीडितमिवान्नमिच्छमानं चरति तत्प्रैवैतज्जनयति तस्मादिडो यजति ॥ ३ ॥ अथ बर्हिर्यजति । भूमा वै बर्हिर्भूमानमेवैतत्प्रजनयति तस्माद्बर्हिर्यजति ॥ ४ ॥ अथ स्वाहा-स्वाहेति यजति । हेमन्तो वा ऽऋतूनाꣳ स्वाहाकारो हेमन्तो हीमाः प्रजाः स्वं व्वशमुपनयते तस्माद्धेमन् म्लायन्त्योषधयः प्र वनस्पतीनां पलाशानि मुच्यन्ते प्रतितरामिव व्वयाꣳसि भवन्त्यधस्तरामिव व्वयाꣳसि पतन्ति व्विपतितलोमेव पापः पुरुषो भवति हेमन्तो हीमाः प्रजाः स्वं व्वशमुपनयते स्त्री ह वै तमर्धं कुरुते श्रियेऽन्नाद्याय यस्मिन्नर्द्धे भवति य ऽएवमेतद्वेद ॥ ५ ॥ देवाश्च वा ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ते दण्डैर्धनुर्भिर्न व्यजयन्त ते हाविजयमाना ऽऊचुर्हन्त व्वाच्येव ब्रह्मन्विजिगीषामहै स यो नो व्वाचं व्याहृतां मिथुनेन नानुनिष्क्रामात्स सर्व्वं पराजयाताऽअथ सर्व्वमितरे जयानिति तथेति देवा ऽअब्रुवंस्ते देवा ऽइन्द्रमब्रुवन्व्याहरेति ॥ ६ ॥ स ऽइन्द्रोऽब्रवीत् । एको ममेत्यथास्माकमेकेतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ ह्येकश्चैका च ॥ ७ ॥ द्वौ ममेतीन्द्रोऽब्रवीत् । अथास्माकं द्वेऽइतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳ हि द्वौ च द्वे च ॥ ८ ॥ त्रयो ममेतीन्द्रोऽब्रवीत् । अथास्माकं तिस्रऽइती-

१. एवैतदिति. क. पु.

तरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳहि त्रयश्च तिस्रश्च ॥ ९ ॥ चत्वारो ममेतीन्द्रोऽब्रवीत् । अथास्माकं चतस्रऽइतीतरेऽब्रुवंस्तदु तन्मिथुनमेवाविन्दन्मिथुनꣳहि चत्वारश्च चतस्रश्च ॥ १० ॥ पञ्च ममेतीन्द्रोऽब्रवीत् । ततऽइतरे मिथुनं नाविन्दन्नो ह्यत ऽऊर्ध्वं मिथुनमस्ति पञ्च पञ्चेति ह्येवतदुभयं भवति ततोऽसुराः सर्व्वं पराजयन्त सर्व्वस्माद्देवा ऽ असुरानजयन्त्सर्व्वस्मात्सपत्नानसुराञ्छिरभजन् ॥ ११ ॥ तस्मात्प्रथमे प्रयाजऽइष्टे ब्रूयात् । "एको ममेत्येका तस्य यमहं द्वेष्मी"ति यद्यु न द्विष्यात् "योऽस्मान्द्वेष्टि यं च वयं द्विष्म"ऽइति ब्रूयात् ॥ १२ ॥ "द्वौ मम"ति द्वितीये प्रयाजे । "द्वे तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म"ऽइति ॥ १३ ॥ "त्रयो मम"ति तृतीये प्रयाजे । तिस्रस्तस्य "योऽस्मान्द्वेष्टि यं च वयं द्विष्म"ऽइति ॥ १४ ॥ "चत्वारो मम"ति चतुर्थे प्रयाजे । चतस्रस्तस्य "योऽस्मान्द्वेष्टि यं च वयं द्विष्म"ऽइति ॥ १५ ॥ "पञ्च मम"ति पञ्चमे प्रयाजे । "न तस्य किं चन योऽस्मान्द्वेष्टि यं च वयं द्विष्म"ऽइति स पञ्च पञ्चेत्येव भवन् पराभवति तथास्य सर्व्वꣳ संवृङ्क्ते सर्व्वस्मात्सपत्नाञ्छिरभजति य ऽएवमेतद्वेद ॥ १६ ॥ Cf का. श. २. ५. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे चतुर्थप्रपाठके पञ्चमं ब्राह्मणम् ॥

(इति पञ्चमोऽध्यायः)

१. ४. ६.

ऋतवो ह वै देवेषु यज्ञे भागमीषिरे । आ नो यज्ञे भजत मा नो यज्ञादन्तर्गतास्त्वेव नोऽपि यज्ञे भागऽइति ॥ १ ॥ तद्वै देवा

१. चत्वार. ग. पु. २. नजयञ्जिति. क. पु. ३. प्रयाज इति. क. ग. पु.
४. प्रयाज इति. ग. पु. ५. प्रयाज इति. ग. पु. ६. यज्ञभाग इति. क. पु.

न जज्ञुः । तऽऋतवो देवेष्वजानन्त्स्वसुरानुपावर्त्तन्ताप्रियान्देवानां द्विषतो भ्रातृव्यान् ॥ २ ॥ ते ह तामेधत मेधां चक्रिरे । यामेषामे तामनुश्रृण्वन्ति कृपन्तो ह स्मैव पूर्व्वे व्वपन्तो यन्ति लुनन्तोऽपरे मृणन्तः शश्वद्भ्योऽकृप्तपच्याऽएवौषधयः पेचिरे ॥ ३ ॥ तद्धै देवानामागऽआस । कनीयऽ इन्वतो द्विषन् द्विषतेऽरातीयति किम्वेतावन्मात्रमुपजानीत यथेदभितोऽन्यथासदिति ॥४॥ ते होचुः । ऋतूनेवानुमन्त्रयामहाऽइति केनेति प्रथमानेवनान्यज्ञे यजामेति ॥ ५ ॥ स होवाच । अथ यन्मां पुरा प्रथमं यजथ क्वाहं भवानीति न त्वामायतनाच्च्यावयामऽइति ते यदृतूनभिह्वयमानाऽअथाग्निमायतनाच्च्यावयंस्तस्मादग्निरच्युतो न ह वाऽआयतनाच्च्यवते यस्मिन्नायतने भवति यऽएवमेतमग्निमच्युतं व्वेद ॥ ६ ॥ ते देवाऽअग्निमब्रुवन् । परे ह्येनांस्त्वमेवानुमन्त्रयस्वेति स होत्याग्निरुवाचर्त्तवोऽविदं वै वो देवेषु यज्ञे भागमिति कथं नोऽविदऽइति प्रथमानेव वो यज्ञे यक्ष्यन्तीति ॥ ७ ॥ त ऋतवोऽग्निमब्रुवन् । आ वयं त्वामस्मासु भजामो यो नो देवेषु यज्ञे भागमविदऽइति स ऽएषोऽग्निर्ऋतुष्वाभक्तः समिधोऽ अग्ने तनूनपादग्न ऽ इडो ऽ अग्ने बर्हिरग्ने स्वाहाग्निमित्याभक्तो ह वै तस्यां पुण्यकृत्यायां भवति यामस्य समानो ब्रुवाणः करोत्यग्निमते ह वा ऽ अस्मा ऽ अग्निमन्त ऋतवऽओषधीः पचन्तीदꣳ सर्व्वं यऽएवमेतमग्निमृतुष्वाभक्तं व्वेद ॥८॥ तदाहुः । यदुत्तमान् प्रयाजानावाहयन्त्यथ कस्मादेनान् प्रथमान्यजन्तीत्युत्तमान्ह्येनान्यज्ञेऽवाकल्पयन् प्रथमान्वो यजामेत्यब्रुवंस्तस्मादुत्तमानावाहयन्ति प्रथमान्यजन्ति ॥ ९ ॥ चतुर्थेन वै प्रयाजेन देवाः । यज्ञमाप्नुवंस्तं पञ्चमेन समस्थापयन्नथ यदत ऽऊर्ध्वमसꣳ स्थितं यज्ञस्य स्वर्गमेव तेन लोकꣳ समाश्नुवत ॥ १० ॥ ते स्वर्गं लोकं यन्तः । असुररक्षसेभ्य ऽआसङ्गाद्विभयाञ्चक्रुस्तेऽग्निं पुरस्तादकुर्व्वत रक्षोहणꣳ

१. प्रथमं इति. ग. पु. २. मायतनादिति. क. पु.

रक्षसामपहन्तारमग्निं मध्यतोऽकुर्वत रक्षोहणꣳ रक्षसामपहन्तारमग्निं पश्चादकुर्वत रक्षोहणꣳ रक्षसामपहन्तारम् ॥ ११ ॥ स यद्येनान् पुरस्तात् । असुररक्षसान्यासिसंक्षन्नग्निरेव तान्यपाहन्क्षोहा रक्षसामपहन्ता यदि मध्यतऽआसिसंक्षन्नग्निरेव तान्यपाहन्क्षोहा रक्षसामपहन्ता यदि पश्चादासिसंक्षन्नग्निरेव तान्यपाहन्क्षोहा रक्षसामपहन्तातऽएवꣳ सर्व्वतोऽग्निभिर्गुप्यमानाः स्वर्गं लोकꣳ समाश्नुवत ॥ १२ ॥ तथोऽएवैषऽएतत् । चतुर्थेनैव प्रयाजेन यज्ञमाप्नोति तं पञ्चमेन सꣳस्थापयत्यथ यदत ऽऊर्ध्वमसꣳस्थितं यज्ञस्य स्वर्गमेव तेन लोकꣳ समश्नुते ॥ १३ ॥ स यदाग्नेयमाज्यभागं यजति । आग्निमेवैतत्पुरस्तात्कुरुते रक्षोहणꣳ रक्षसामपहन्तारमथ यदाग्नेयः पुरोडाशो भवत्यग्निमेवैतन्मध्यतः कुरुते रक्षोहणꣳ रक्षसामपहन्तारमथ यदग्निꣳ स्विष्टकृतं यजत्यग्निमेवैतत्पश्चात् कुरुते रक्षोहणꣳ रक्षसामपहन्तारꣳ ॥ १४ ॥ स यद्येनं पुरस्तात् । असुररक्षसान्यासिसंक्षन्त्यग्निरेव तान्यपहन्ति रक्षोहा रक्षसामपहन्ता यदि मध्यतऽआसिसंक्षन्त्यग्निरेव तान्यपहन्ति रक्षोहा रक्षसामपहन्ता यदि पश्चादासिसंक्षन्त्यग्निरेव तान्यपहन्ति रक्षोहा रक्षसामपहन्ता सऽएवꣳ सर्व्वतोऽग्निभिर्गुप्यमानः स्वर्गं लोकꣳ समश्नुते ॥ १५ ॥ स यद्येनं पुरस्तात् । यज्ञस्यानुव्याहरेत्तं प्रतिब्रूयान्मुख्यामार्त्तिमारिष्यस्यन्धो वा बधिरो वा भविष्यसीत्येता वै मुख्या ऽआर्त्तयस्तथा हैव स्यात् ॥१६॥ यदि मध्यतो यज्ञस्यानुव्याहरेत् । तं प्रति ब्रूयादप्रजा ऽअपशुर्भविष्यसीति प्रजा वै पशवो मध्यं तथा हैव स्यात् ॥ १७ ॥ यद्यन्ततो यज्ञस्यानुव्याहरेत् । तं प्रति ब्रूयादप्रतिष्ठितो दरिद्रः क्षिप्रेऽमुं लोकमेष्यसीति तथा हैव स्यात् तस्मादुह नानुव्याहारीव स्यादुत ह्येवंवित्पुरो भवति ॥ १८ ॥ संवत्सरꣳ ह वै प्रयाजैर्जय जयति । स ह न्वेवैनं जयति योऽस्य द्वाराणि व्वेद किꣳ हि स तैर्गृहैः कुर्याद्यानन्तरतो

न व्यव विद्याद्यथायथास्य[1] ते भवन्ति तस्य व्यसन्त ऽएव द्वारꣳ हेमन्तो द्वारं तं वाऽएतꣳ संवत्सरꣳ स्वर्गं लोकं प्रपद्यते सर्वं वै संवत्सरः सर्वं वाऽअक्षय्यमेतेनो हास्याक्षय्यꣳ सुकृतं भवत्यक्षय्यो लोकः ॥ १९ ॥ तदाहुः । किं देवत्यान्याज्यानीति प्राजापत्यानीति ह ब्रूयादनिरुक्तो वै प्रजापतिरनिरुक्तान्याज्यानि तानि हैतानि यजमानदेवत्यान्येव यजमानो ह्येव स्वे यज्ञे प्रजापतिरेतेन ह्युक्ता ऋत्विजस्तन्वते तं जनयन्ति ॥२०॥ सऽआज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति सैषाज्येन मिश्राहुतिर्हूयते यजमानेन हैवैषैतन्मिश्रा हूयते यदि ह वाऽ अपि दूरे सन्यजते यद्यन्तिके यथा हैवान्ते स त ऽइष्टꣳ स्यादेवꣳहैवैवं विदुष ऽइष्टं भवति यद्यु हापि बह्विव पापं करोति नो हैव बहिर्द्धा यज्ञाद्भवति य ऽएवमेतद्वेद॥२१

Cf. का. श. २. ५. ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे चतुर्थप्रपाठके षष्ठं ब्राह्मणम् ॥

चतुर्थः प्रपाठकस्समाप्तः ॥

(कण्डिकासंख्या ॥ १२१ ॥)



१. यथास्य त इति ग. पु. २. लोक इति ग. पु.

अथ पञ्चमः प्रपाठकः ॥

१. ५. १.

यज्ञेन व देवाः । इमां जितिं जिग्ययेयामिमां जितिस्ते होचुः कथं नऽइदं मनुष्यैरनभ्यारोह्यं स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम तद्वाऽऋषीणामनुश्रुतमास ॥ १ ॥ यज्ञेन ह वै देवाः । इमां जितिं जिग्ययेयामिमां जितिस्ते होचुः कथं नऽइदं मनुष्यैरनभ्यारोह्यं स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्निति तमन्वेष्टुं दध्रिरे ॥ २ ॥ तेऽर्चन्तः श्राम्यन्तश्चेरुः । श्रमेण ह स्म वै तद्देवा जयन्ति यदेषां जय्यमासर्पयश्च तेभ्यो देवा वैव प्ररोचयाञ्चक्रुः स्वयं वैव दध्रिरे प्रेत तदेष्यामो यतो देवाः स्वर्गं लोकं समाश्नुवतेति ते किं प्ररोचते किं प्ररोचतऽ इति चेरुरेतत्पुरोडाशमेव कूर्म्मं भूत्वा सर्पन्तं ते ह सर्व्वऽएव मेनिरेऽयं वै यज्ञऽइति ॥ ३ ॥ ते होचुः । अश्विभ्यां तिष्ठ सरस्वत्यै तिष्ठेन्द्राय तिष्ठेति स समर्पैवाग्नये तिष्ठेति ततस्तस्थावग्नये वाऽअस्थादिति तमग्नावेव परिगृह्य सर्व्वहुतमजुहवुराहुतिर्हि देवानां तत ऽएभ्यो यज्ञः प्ररोचत तमसृजन्त तमतन्वत सोऽयं परोऽवरं यज्ञोऽनूच्यते पितेव पुत्राय ब्रह्मचारिणे ॥ ४ ॥ स वा ऽएभ्यस्तत्पुरोऽदाशयत् । यऽएभ्यो यज्ञं प्ररोचयत्तस्मात्पुरोदाशः पुरोदाशो ह वै नामैतद्यत्पुरोडाशऽइति स ऽएषऽउभयत्राच्युत ऽआग्नेयोऽष्टाकपालः पुरोडाशो भवति ॥ ५ ॥ स न पौर्णमासं हविः । नामावास्यमग्नीषोमीय ऽएव पौर्णमासं हविः साक्षाय्यमामावास्यं यज्ञऽएवैष ऽउभयत्राव्यक्लृप्तो नेद्यज्ञादयानीतिन्वेव पुरस्तात्पौर्णमासस्य क्रियतऽएवं वामावास्यस्यैतन्नु तद्यस्मादत्र

१. यज्ञमिति. क. ग. पु. २. धीत्वा इति ग. पु. ३. See. तै. सं. २.६.५.

क्रियते ॥ ६ ॥ यद्यु ऽएनमुपधावेत् । इष्ट्या मा याजयेत्येतयैव याजयेद्यत्कामा वाऽएतमुपयोऽजुहवुः सऽएभ्यः कामः समार्ध्यत यत्कामो ह वाऽएतेन यज्ञेन यजते सोऽस्मै कामः समृध्यते यस्यै वैकस्यै च देवतायै हविर्गृह्यतेऽग्नौ वै तस्यै जुह्वत्यग्नाऽ उ चेद्धोप्यन्तस्याक्रिमन्यस्यै देवतायाऽ आदिशेत्तस्मादग्नयऽएव ॥ ७ ॥ अग्निर्वै सर्व्वा देवताः । अग्नौ हि सर्व्वाभ्यो देवताभ्यो जुह्वति तद्यथा सर्व्वा देवता ऽउपधावेदेवं तत्तस्मादग्नयऽ एव ॥ ८ ॥ (शतम् ५०० ॥) अग्निर्वै देवानामद्धातमाम् । यं वाऽअद्धातमं मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥९॥ अग्निर्वै देवानां मृदुहृदयतमः । यं वै मृदुहृदयतमं मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥१०॥ अग्निर्वै देवानां नेदिष्ठम् । यं वै नेदिष्ठमुपसर्त्तव्यानां मन्येत तमुपधावेत्तस्मादग्नयऽएव ॥ ११ ॥ स यदीष्टिं कुर्व्वीत । सप्तदश सामिधेनीरनुब्रूयादुपाꣳशु देवतां यजति तद्धीष्टिरूपं मूर्द्धन्वत्यौ याज्यानुवाक्ये स्यातां व्यावृत्त्यावाज्यभागौ द्विराजौ संयाज्ये ॥ १२ ॥ (cf. का. श. २. ५. ४

इति शुक्लयजुर्वेदीय माध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे पञ्चमप्रपाठके प्रथमं ब्राह्मणम् ॥

१. ५. २.

त्वष्टुर्ह वै पुत्रः । त्रिशीर्षा षडक्षऽआस तस्य त्रीण्येव मुखान्यासुस्तद्यदेव रूपऽआस तस्माद्विश्वरूपो नाम ॥ १ ॥ तस्य सोमपानमेवैकं मुखमास । सुरापाणमेकमन्यस्माऽअशनायैकं तमिन्द्रो दिद्वेष तस्य तानि शीर्षाणि प्रचिच्छेद ॥ २ ॥ स यत्सोमपानमास । ततः कपिञ्जलः समभवत्तस्मात्स वभ्रुकऽइव बभ्रुरिव हि सोमो राजा ॥३॥ अथ यत्सुरापाणमास । ततः कलविङ्कः समभवत्तस्मात्सोमि माद्यत्कऽइव वदत्यभिमाद्यन्निव हि सुरां पीत्वा व्यदति ॥ ४ ॥ अथ

१. आदितः कण्डिकानां संख्येयम् । २. राजा इति. ग.

यदन्यस्माऽअशनायास । ततस्तित्तिरिः समभवत्तस्मात्स विश्वरूपतमऽइव सन्त्येव घृतस्तोकाऽइव त्वन्मधुस्तोकाऽइव त्वत्पर्णेष्वाश्चुतिताऽएवꣳरूपमिव हि स तेनाशनमावयत् ॥५॥ स त्वष्टा चुक्रोध कुविन्मे पुत्रमवधीदिति सोऽपेन्द्रमेव सोममाजह्रे स यथायꣳ सोमः प्रसुत ऽएवमपेन्द्र ऽएवास ॥६॥ इन्द्रो ह वाऽईक्षाञ्चक्रे । इदं वै मा-सोमादन्तर्यन्तीति स यथा बलीयानबलीयसऽएवमनुपहृत ऽएव यो द्रोणकलशे शुक्र ऽआस तं भक्षयाञ्चकार स हैनं जिहिꣳस सोऽस्य ब्विष्वङ्ङेव प्राणेभ्यो दुद्राव मुखाद्धैवास्य न दुद्रावाथ सर्व्वेभ्योऽन्येभ्यः प्राणेभ्योऽद्रवत्तददः सौत्रामणीतीष्टिस्तस्यां तद्व्याख्यायते यथैनं देवा ऽअभिपज्यन् ॥ ७ ॥ स त्वष्टा चुक्रोध । कुविन्मेऽनुपहृतः सोममवभक्षदिति स स्वयमेव यज्ञवेशसं चक्रे स यो द्रोणकलशे शुक्रः परिशिष्ट ऽआस तं प्रवर्त्तयाञ्चकारेन्द्रशत्रुर्व्वर्द्धस्वेति सोऽग्निमेव प्राप्य सम्बभूवान्तरैव सम्बभूवेत्यु हैकऽआहुः सोऽग्नीषोमावेवाभिसम्बभूव सर्व्वा विद्याः सर्व्वं यशः सर्व्वमन्नाद्यꣳ सर्व्वाꣳ श्रीꣳ ॥ ८ ॥ स यद्वृत्तमानः समभवत् । तस्माद्वृत्रोऽथ यदपात्समभवत्तस्मादहिस्तं दनुश्च दनायुश्च मातेव च पितेव च परिजगृहतुस्तस्माद्दानव ऽइत्याहुः ॥ ९ ॥ अथ यदब्रवीदिन्द्रशत्रुर्व्वर्द्धस्वेति । तस्मादु हैनमिन्द्रऽएव जघानाथ यद्ध शश्वदवक्ष्यदिन्द्रस्य शत्रुर्व्वर्द्धस्वेति शश्वदु ह सऽएवेन्द्रमहनिष्यत् ॥ १० ॥ अथ यदब्रवीद्वर्द्धस्वेति । तस्मादु ह स्मेषुमात्रमेव तिर्यङ्वर्द्धतऽ इषुमात्रं प्राङ्क्सोऽवैवावरꣳ समुद्रं दधावेव पूर्व्वꣳ स यावत्स ऽआस सहैव तावदन्नादऽआस ॥ ११ ॥ तस्मै ह स्म पूर्व्वाह्णे देवाः । अशनमभिहरन्ति मध्यन्दिने मनुष्या ऽअपराह्णे पितरः ॥ १२ ॥ स वा ऽ इन्द्र-

१. रूपꣳहीति ग. पु. २. एवास इति क. पु. ३. तद्व्याख्यायत इति ग पु
४. श्रीमिति. ग. पु. ५. जघानेति. ग. पु. ६. देवा इति. ग. पु.

स्तथैवनुत्तश्चरन् । अग्नीषोमा ऽ उपमन्त्रयाञ्चक्रे ऽ ग्नीषोमौ युवं वै मम स्थो युवयोरहमस्मि न युवयोरेष किञ्चन कं मऽइमं दस्युं व्वर्धयथ ऽउप मा वर्त्तेथामिति॥१३॥ तौ होचतुः । किमावयोस्ततः स्यादिति ताभ्यामेतमग्नीषोमीयमेकादशकपालं पुरोडाशं निरवपत्तस्मादग्नीषोमीय ऽएकादशकपालः पुरोडाशो भवति ॥१४॥ तावेनमुपावृततुः । तावनु सर्व्वे देवाः प्रेयुः सर्व्वा व्विद्याः सर्व्वे यशः सर्व्वमन्नाद्यꣳ सर्व्वा श्रीस्तेनेष्ट्वेन्द्र ऽएतदभवद्यदिदमिन्द्र ऽएष ऽउ पौर्णमासस्य बन्धुः स यो हैवं व्विद्वान् पौर्णमासेन यजत ऽ एताꣳ हैव श्रियं गच्छत्येवं यशो भवत्येवमन्नादो भवति ॥ १५ ॥ तद्वेव खलु हतो व्वृत्रः । स यथा हतिर्निष्पीत ऽएवꣳ संव्लीनः शिश्ये यथा निर्धृतमक्तुर्भस्त्रैवꣳ संव्लीनः शिश्ये तमिन्द्रोऽभ्यादुद्राव हनिष्यन् ॥ १६ ॥ स होवाच । मानु मे प्रहार्षीस्त्वं वै तदेतर्ह्यसि यदहं व्येव मा कुरु मामुया भूवमिति स वै मेऽन्नमेधीति तथेति तं द्वेधान्वभिनत्तस्य यत्सौम्यं न्यक्तमास तं चन्द्रमसं चकाराथ यदस्यासुर्य्यमास तेनेमाः प्रजा ऽउदरेणाविध्यत्तस्मादाहुर्व्वृत्र ऽएव तर्ह्यन्नाद ऽआसीद्वृत्र ऽएतर्हीतीदꣳ हि यदसावापूर्यतेऽस्मादेवैतल्लोकादाप्यायतेऽथ यदिमाः प्रजाऽअशनमिच्छन्तेऽस्माऽएवैतद्वृत्रायोदराय बलिꣳ हरन्ति स यो हैवमेतं व्वृत्रमन्नादं व्वेदान्नादो हैव भवति ॥ १७ ॥ ताऽउ हैता देवताऽऊचुः । याऽइमाऽअग्नीषोमावन्वाजग्मुरग्नीषोमौ युवं वै नो भूयिष्ठभाजौ स्थो ययोर्वामिदं युवयोरस्मानन्वाभजतमिति ॥ १८ ॥ तौ होचतुः । किमावयोस्ततः स्यादिति यस्यै कस्यै च देवतायै हविर्निर्व्वपांस्तद्वां पुरस्तादाज्यस्य यजानिति तस्माद्यस्यै कस्यै च देवतायै हविर्निर्व्वपन्ति तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजन्ति तन्न सौम्येऽध्वरे न पशौ यस्यै कस्यै च देवतायै हविर्निर्वपा-

१. वृत्रः इति. ग. पु. २. संलीन इति ग. पु. ३. हनिष्यन् इति. ग. पु.
४. हविरिति नाऽस्ति. ग.

निति ह्यब्रुवन् ॥ १९ ॥ स ह्याग्निरुवाच । मय्येव वः सर्व्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मादग्नौ सर्वेभ्यो देवेभ्यो जुह्वति तस्मादाहुरग्निः सर्व्वा देवता ऽइति ॥२०॥ अथ ह सोम ऽउवाच । मामेव वः सर्व्वेभ्यो जुह्वतु तद्वोऽहं मय्याभजामीति तस्मात्सोमꣳ सर्व्वेभ्यो देवेभ्यो जुह्वति तस्मादाहुः सोमः सर्व्वा देवता ऽइति ॥२१॥ अथ यदिन्द्रे सर्वे देवास्तस्थानाः । तस्मादाहुरिन्द्रः सर्व्वा देवताऽइन्द्रश्रेष्ठा देवा ऽइत्येतद्ध वै देवास्त्रेधैकदेवत्या ऽअभवन्त्स यो हैवमेतद्वेदैकधा हैव स्वानाꣳ श्रेष्ठो भवति ॥ २२ ॥ द्वयं वाऽइदं न तृतीयमस्ति । आर्द्रं चैव शुष्कं च यच्छुष्कं तदाग्नेयं यदार्द्रं तत्सौम्यमथ यदिदं द्वयमेवाऽथ किमेतावत्क्रियतऽ इत्यग्नीषोमयोरेवाज्यभागावग्नीषोमयोरुपाꣳशुयाजोऽग्नीषोमयोः पुरोडाशो यदत ऽएकतमेनैवेदꣳ सर्व्वमाप्नोत्यथ किमेतावत्क्रियतऽइत्यग्नीषोमयोर्हैवैतावती व्विभूतिः प्रजातिः ॥२३॥ सूर्य ऽएवाग्नेयः । चन्द्रमाः सौम्योऽहरेवाग्नेयꣳ रात्रिः सौम्या य ऽएवापूर्यतेऽर्द्धमासः स ऽआग्नेयो योऽपक्षीयते स सौम्यः ॥२४॥ आज्यभागाभ्यामेव । सूर्याचन्द्रमसावाप्नोत्युपाꣳशुयाजेनैवाहोरात्रेऽ आप्नोति पुरोडाशेनैवार्द्धमासावाप्नोतीत्युहैकऽआहुः ॥२५॥ तदु होवाचासुरिः । आज्यभागाभ्यामेवातो यतमे वा यतमे वा द्वे ऽआप्नोत्युपाꣳशुयाजेनैवातो यतमे वा यतमे वा द्वे ऽआप्नोति पुरोडाशेनैवातो यतमे वा यतमे वा द्वे ऽआप्नोति सर्व्वं मऽआप्तमसत्सर्व्वं जितꣳ सर्व्वेण व्वृत्रꣳ हनानि सर्वेण द्विषन्तं भ्रातृव्यꣳ हनानीति तस्माद्द्वाऽ एतावत्क्रियत ऽइति ॥२६॥ तदाहुः । किमिदं जामि क्रियतेऽग्नीषोमयोरेवाज्यस्याग्नीषोमयोः पुरोडाशस्य यदनन्तर्हितं तेन जामीत्यनेन ह त्वेवाजाम्याज्यस्येतरं पुरोडाशस्येतरं तदन्यदिवेतरमन्यदिवेतरं भवत्यृचमनृच्य जुषाणेन यजत्यृचमनृच्यर्च्चा यजति तदन्यदिवेतर-

१. तस्थाना इति. ग. पु. २. वाप्येति. ग. पु.

३. वातोऽहोरात्रेऽआप्नोतीति. ग. पु. ४. वातोऽर्धमासावाप्नोतीति. ग. पु.

मन्यदिवेतरं भवत्यनेन ह त्वेवाजाम्युपाꣳश्वाज्यस्य यजत्युच्चैः पुरोडाशस्य स यदुपाꣳशु तत्प्राजापत्यꣳ रूपं तस्मात्तस्यानुष्टुभमनुवाक्यामन्वाह व्वाग्ध्यनुष्टुब्वाग्धि प्रजापतिः ॥ २७ ॥ एतेन वै देवाः । उपाꣳशुयाजेन यं यमसुराणामकामयन्त तमुपत्सर्यं व्वज्रेण व्वषट्कारेणाघ्नंस्तथोऽएवैष ऽएतेनोपाꣳशुयाजेन पाप्मानं द्विषन्तं भ्रातृव्यमुपत्सर्यं व्वज्रेण व्वषट्कारेण हन्ति तस्मादुपाꣳशुयाजं यजति ॥ २८ ॥ स वा ऽ ऋचमनूच्य जुपाणेन यजति । तदन्विमा ऽअन्यतरतोदन्ताः प्रजाः प्रजायन्तेऽस्थि ह्यृगस्थि हि दन्तोऽन्यतरतो ह्येतदस्थि करोति ॥ २९ ॥ अथर्चमनूच्यर्चा यजति । तदन्विमा ऽउभयतोदन्ताः प्रजाः प्रजायन्तेऽस्थि ह्यृगस्थि हि दन्त ऽउभयतो ह्येतदस्थि करोत्येता वाऽइमा द्वय्यः प्रजा ऽअन्यतरतोदन्ताश्चैवोभयतोदन्ताश्च स यो हैवं व्विद्वानग्नीषोमयोः प्रजातिं यजति बहुर्हैव प्रजया पशुभिर्भवति ॥३०॥ स वै पौर्णमासेनोपवत्स्यन । न सत्रा सुहित ऽइव स्यात्तेनेदमुदरमसुर्यं व्लिनात्याहुतिभिः प्रातर्देवमेष ऽउ पौर्णमासस्योपचारः ॥ ३१ ॥ स वै सम्प्रत्येवोपवसेत् । सम्प्रति व्वृत्रꣳ हनानि सम्प्रति द्विषन्तं भ्रातृव्यꣳ हनानीति ॥ ३२ ॥ स वा ऽ उत्तरामेवोपवसेत् । समिव वा ऽ एष क्रमते यः सम्प्रत्युपवसत्यनद्धा वै सङ्क्रान्तयोर्यदीतरो वेतरमभिभवतीतरो वेतरमथ य ऽउत्तरामुपवसति यथा पराञ्चमावृत्तꣳ सम्पिꣳष्यादप्रत्यालभमानꣳ सोऽन्यतो घात्येव स्यादेवं तद्य ऽउत्तरामुपवसति ॥३३॥ स वै सम्प्रत्येवोपवसेत् । यथा वा ऽ अन्यस्य हतꣳ सम्पिꣳष्यादेवं तद्य ऽउत्तरामुपवसति सोऽन्यस्यैव कृतानुकरोऽन्यस्योपावसायी भवति तस्मादु सम्प्रत्येवोपवसेत् ॥३४॥ प्रजापतेर्ह वै प्रजाः ससृजानस्य । पर्व्वाणि

१. See तै. सं. २. ६. २. २. २. करोतीति. ग. पु.

३. उपवत्स्यन् इति. ग. पु. ४. व्विनातीति. ग. पु. ५. उपचार इति ग. पु.

व्विसस्रꣳसुः स वै संवत्सरऽएव प्रजापतिस्तस्यैतानि पर्वाण्यहोरात्रयोः सन्धी पौर्णमासी चामावास्या चर्त्तुमुखानि ॥ ३५ ॥ स व्विस्रस्तैः पर्व्वभिः । न शशाक सꣳहातुं तमेतैर्हविर्यज्ञैर्देवा ऽअभिषज्यन्नग्निहोत्रेणैवाहोरात्रयोः सन्धी तत्पर्वाभिषज्यंस्तत्समदधुः पौर्णमासेन चैवामावास्येन च पौर्णमासीं चामावास्यां च तत्पर्वाभिषज्यंस्तत्समदधुश्चातुर्मास्यैरेवर्त्तुमुखानि तत्पर्वाभिषज्यंस्तत्समदधुः ॥३६॥ स सꣳहितैः पर्व्वभिः । इदमन्नाद्यमभ्युत्तस्थौ यदिदं प्रजापतेरन्नाद्यꣳ स यो हैवंविद्वान्त्सम्प्रत्युपवसति सम्प्रति हैव प्रजापतेः पर्व्व भिषज्यत्यवति हैनं प्रजापतिः सऽएवमेवान्नादो भवति यऽएवं विद्वान्त्सम्प्रत्युपवसति तस्मादु सम्प्रत्येवोपवसेत् ॥ ३७ ॥ चक्षुषी ह वा ऽएते यज्ञस्य यदाज्यभागौ । तस्मात्पुरस्ताज्जुहोति पुरस्ताद्धीमे चक्षुषी तत्पुरस्तादेवैतच्चक्षुषी दधाति तस्मादिमे पुरस्ताच्चक्षुषी ॥ ३८ ॥ उत्तरार्धपूर्वार्धे हैके । आग्नेयमाज्यभागं जुह्वति दक्षिणार्धपूर्वार्धे सौम्यमाज्यभागमेतत्पुरस्ताच्चक्षुषी दध्मऽइति व्यदन्तस्तदु तदाविज्ञान्यमिव हवीꣳषि ह वाऽआत्मा यज्ञस्य स यदेव पुरस्ताद्धविषां जुहोति तत्पुरस्ताच्चक्षुषी दधाति यत्रो ऽ एव समिद्धतमं मन्येत तदाहुतीर्जुहुयात्समिद्धहोमेन ह्येव समृद्धा ऽआहुतयः ॥३९॥ स वा ऽ ऋचमनूच्य जुषाणेन यजति । तस्मादिमेऽअस्थन्त्सत्यनस्थिके चक्षुषी ऽ आश्रिष्टे ऽ अथ यदृचमनूच्यर्चा यजेदस्थि हैव कुर्यान्न चक्षुः ॥ ४० ॥ ते वाऽएते । अग्नीषोमयोरेव रूपमन्वायत्ते यच्छुक्लं तदाग्नेयं यत्कृष्णं तत्सौम्यं यदि वेतरथा यदेव कृष्णं तदाग्नेयं यच्छुक्लं तत्सौम्यं यदेव व्वीक्षते तदाग्नेयꣳ रूपꣳ शुष्के ऽइव हि व्वीक्षमाणस्याक्षिणी भवतः शुष्कमिव ह्याग्नेयं यदेव स्वपिति तत्सौम्यꣳ रूपमार्द्रे ऽ इव हि सुषुपुषोऽक्षिणी भवत आर्द्र ऽइव हि

१. अयं तैत्तिरीयशाखास्थविधेरेवाऽनुवादस्तस्यैव च खण्डनम् । तत्रैव—"पूर्वार्धे जुहोति तस्मात् पूर्वार्धे चक्षुषी प्रबाहुक् जुहोति तस्मात् प्रबाहुक् चक्षुषी । उत्तरार्धेऽग्नये जुहोति दक्षिणार्धे सोमाय" (तै. सं. २. ६. २.) इति दर्शनात् ।

सोम ऽआजरसꣳ ह वाऽअस्मिल्लोके चक्षुष्मान् भवति सचक्षुरमुष्मिल्लोके सम्भवति यऽएवमेतौ चक्षुषी ऽ आज्यभागौ वेद ॥ ४१ ॥
Cf. का. श. २. ६. १. तै. सं. २. ६. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे पञ्चमप्रपाठके द्वितीयं ब्राह्मणम् ॥

१. ५. ३.

इन्द्रो ह यत्र वृत्राय वज्रं प्रजहार । सोऽबलीयान्मन्यमानो नास्तृषातीव बिभ्यन्निलयां चक्रे स पराः परावतो जगाम देवा ह वै विदां चक्रुर्हतो वै वृत्रोऽथेन्द्रो न्यलेष्टेति ॥ १ ॥ तमन्वेषुं दध्रिरे । अग्निर्देवतानाꣳ हिरण्यस्तूप ऽऋषीणां बृहती छन्दसां तमग्निरनुविवेद तेनैताꣳ रात्रिꣳ सहाजगाम स वै देवानां वसुर्वीरो ह्येषाम् ॥ २ ॥ ते देवा ऽअब्रुवन् । अमा वै नोऽद्य वसुर्वसति यो नः प्रावात्सीदिति ताभ्यामेतद्यथा ज्ञातिभ्यां वा सखिभ्यां वा सहागताभ्याꣳ समानमोदनं पचेदजं वा तदह मानुषꣳ हविर्देवानामेवमाभ्यामेतत्समानꣳ हविर्निरवपन्नैन्द्राग्नं द्वादशकपालं पुरोडाशं तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥३॥ स ऽइन्द्रोऽब्रवीत् । यत्र वै वृत्राय वज्रं प्राहरं तद्व्यस्मये स कृशऽइवास्मि न वै मेदं धिनोति यन्मा धिनवत्तन्मे कुरुतेति तथेति देवा ऽअब्रुवन् ॥४॥ ते देवा ऽअब्रुवन् । न वाऽइममन्यत्सोमाद्धिनुयात्सोममेवास्मै सम्भरामेति तस्मै सोमꣳ समभरन्नेष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैष ऽएताꣳ रात्रिं न पुरस्तान्न पश्चाद्दृदृशे तदिमं लोकमागच्छति स ऽइहापश्चौषधीश्च प्रविशति स वै देवानां वस्वन्नꣳ ह्येषां तद्यदेष ऽएताꣳ रात्रिमिहामा वसति तस्मादमावास्या नाम

१ तैत्तिरीयशाखायाम्—अन्वेषणमिदं पितृभिः कृतं, तैरेव चोपलब्ध इन्द्र इत्युक्तम् । See तै. सं. २. ५. ३. ७. २. इहैवापश्चेति. क. ग. पु.

॥ ५ ॥ तं गोभिरनुविष्टाप्य समभरन् । यदोषधीराश्नंस्तदोषधिभ्यो यदपोऽपिबंस्तदद्भ्यस्तमेवꣳ सम्भृत्यातच्य तीव्रीकृत्य तमस्मै प्रायच्छन् ॥ ६ ॥ सोऽब्रवीत् । धिनोत्येव मेदं नैव तु मयि श्रयते यथेदं मयि श्रयाते तथोपजानीतेति तꣳ श्रृतेनैवाश्रयन् ॥ ७ ॥

(अर्धप्रपाठकः ॥ ६० ॥)

तद्धाऽएतत् । समानमेव सत्पय ऽएव सदिन्द्रस्यैव सत्तत्पुनर्नानेवाचक्षते यदब्रवीद्धिनोति मेति तस्माद्दध्यथ यदेनꣳ श्रृतेनैवाश्रयंस्तस्माच्छृतꣳ ॥८॥ स यथाꣳशुराप्यायेत । एवमाप्यायताप पाप्मानꣳ हरिमाणमहतेप ऽउऽआमावास्यस्य बन्धुः स यो हैवं विद्वान्त्सन्नयत्येवꣳ हैव प्रजया पशुभिराप्यायतेऽप पाप्मानꣳ हते तस्माद्धैं सन्नयेत् ॥ ९ ॥ तदाहुः । नासोमयाजी संनयेत्सोमाहुतिर्वाऽएषा सानवरुद्धासोमयाजिनस्तस्मान्नासोमयाजी संनयेदिति ॥ १० ॥ तदु समेव नयेत् । नन्वत्रान्तरेण शुश्रुम सोमेन नु मा याजयताथ मऽएतदाप्यायनꣳ सम्भरिष्यथेत्यब्रवीदिति न वै मेदं धिनोति यन्मा धिनवत्तन्मे कुरुतेति तस्माऽएतदाप्यायनꣳ समभरंस्तस्मादप्यसोमयाजी समेव नयेत् ॥ ११ ॥ व्वार्त्रघ्नं वै पौर्णमासम् । इन्द्रो ह्येतेन व्वृत्रमहन्नथैतदेव व्वृत्रहत्यं यदामावास्यं व्वृत्रꣳ ह्यस्माऽएतज्जघ्नुपऽआप्यायनमकुर्वन् ॥ १२ ॥ तद्धाऽएतदेव व्वार्त्रघ्नम् । यत्पौर्णमासमथैप ऽएव व्वृत्रो यच्चन्द्रमाः स यत्रैपऽएताꣳ रात्रिं न पुरस्तान्न पश्चाद्ददृशे तदेनमेतेन सर्व्वꣳ हन्ति नास्य किञ्चन परिशिनष्टि सर्व्वꣳ ह वै पाप्मानꣳ हन्ति न पाप्मनः किं चन परिशिनष्टि य ऽएवमेतद्वेद ॥ १३ ॥ तद्धैके दृष्ट्वोपवसन्ति । श्वो नोदेते-

१. अनुवादोऽयं तैत्तिरीयशाखीयविधेरेव । तत्र ह्येवं श्रूयते—"नासोमयाजी सन्नयेदनागतं वा एतस्य पयो योऽसोमयाजी" (तै. सं. २. ५. ५.) इति । तस्यैव चाऽनन्तरस्मिन् खण्डे खण्डनम् ।

त्यदो हैव देवानामविक्षीणमन्नं भवत्यथैभ्यो व्ययमित ऽउपप्रदास्यामऽइति तद्धि समृद्धं यदक्षीणऽएव पूर्वस्मिन्नन्नेऽथापरमन्नमागच्छति स ह बह्वन्नऽएव भवत्यसोमयाजी तु क्षीरयाज्यदो हैव सोमो राजा भवति ॥ १४ ॥ अथ यथैव पुरा । केवलीरोषधीरश्नन्ति केवलीरपः पिबन्ति ताः केवलमेव पयो दुह्रऽएवं तदेष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स यत्रैषऽएताꣳ रात्रिं न पुरस्तान्न पश्चाद्दृश्यते तदिमं लोकमागच्छति सऽइहापश्चौषधीश्च प्रविशति तदेनमद्भ्यऽओषधिभ्यः सम्भृत्याहुतिभ्योऽधि जनयति सऽएषऽआहुतिभ्यो जातः पश्चाद्दृश्यते ॥ १५ ॥ तद्धाऽएतत् । अविक्षीणमेव देवानामन्नाद्यं परिप्लवतेऽविक्षीणꣳ ह वाऽअस्यास्मिंल्लोकेऽन्नं भवत्यक्षय्यममुष्मिंल्लोके सुकृतं य ऽएवमेतद्वेद ॥ १६ ॥ तद्धाऽएताꣳ रात्रिम् । देवेभ्योऽन्नाद्यं प्रच्यवते तदिमं लोकमागच्छति ते देवाऽअकामयन्त कथं नु न इदं पुनरागच्छेत्कथं नऽइदं परागेव न प्रणश्येदिति तद्यऽएव संनयन्ति तेष्वाशꣳसन्तऽएतऽएव नः सम्भृत्य प्रदास्यन्तीत्याह वाऽअस्मिन्त्स्वाश्च निष्ट्याश्च शꣳसन्ते य ऽएवमेतद्वेद यो वै परमतां गच्छति तस्मिन्नाशꣳसन्ते ॥१७॥ तद्धाऽएष ऽएवेन्द्रः । य ऽएष तपत्यथैष ऽएव व्वृत्रो यच्चन्द्रमाः सोऽस्यैष भ्रातृव्यजन्मेव तस्माद्यद्यपि पुरा व्विदूरमिवोदितोऽथैनमेताꣳ रात्रिमुपैवं न्याप्लवते सोऽस्य व्यात्तमापद्यते ॥ १८ ॥ तं ग्रसित्वोदेति । स न पुरस्तान्न पश्चाद्दृश्यते ग्रसते ह वै द्विषन्तं भ्रातृव्यमयमेवास्ति नास्य सपत्नाः सन्तीत्याहुर्य ऽएवमेतद्वेद ॥ १९ ॥ तं निर्धीय निरस्यति । स ऽएष धीतः पश्चाद्दृश्यते स पुनराप्यायते स ऽएतस्यैवान्नाद्याय पुनराप्यायते यदि ह वाऽअस्य द्विषन् भ्रातृव्यो व्वणिज्यया वा केनचिद्वा सम्भवत्येतस्य हैवान्नाद्याय पुनः सम्भवति य ऽएवमेतद्वेद ॥२०॥ तद्धैके महेन्द्रायेति कुर्व्वन्ति । इन्द्रो वाऽएष पुरा

१. पुरा इति क. ग. पु. २. See तै. सं. ६. ५. ५. ३.

व्वृत्रस्य व्वधादथ व्वृत्रꣳहत्वा यथा महाराजो विजिग्यानऽएवं महेन्द्रोऽभवत्तस्मान्महेन्द्रायेति तद्विन्द्रायेत्येव कुर्यादिन्द्रो वाऽएष पुरा व्वृत्रस्य व्वधादिन्द्रो वृत्रं जघ्निवांस्तस्माद्विन्द्रायेत्येव कुर्य्यात् ॥२१॥

Cf. क. श. २. ६. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे पञ्चमप्रपाठके तृतीयं ब्राह्मणम् ॥

(इति षष्ठोऽध्यायः)

१. ५. ४.

स वै पर्णशाखया वत्सानपाकरोति । तद्यत्पर्णशाखया व्वत्सानपाकरोति यत्र वै गायत्री सोममच्छापतत्तदस्याऽआहरन्त्याऽअपादस्ताभ्यायत्य पर्णं प्रचिच्छेद गायत्र्यै वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णोऽभवत्तस्मात्पर्णो नाम तद्यदेवात्र सोमस्य न्यक्तं तदिहाप्यसदिति तस्मात्पर्णशाखया व्वत्सानपाकरोति ॥१॥ तमाच्छिनत्ति । "इषे त्वोर्ज्जे त्वे"ति वृष्ट्यै तदाह यदाहेषे त्वेत्यूर्जे त्वेति यो व्वृष्टादूर्ग्रसो जायते तस्मै तदाह ॥२॥ अथ मातृभिर्व्वत्सान्त्समवार्ज्जन्ति । स व्वत्सꣳ शाखयोपस्पृशति "व्वायव स्थे"त्ययं वै वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्वं प्रप्याययति यदिदं किं च व्वर्षत्येष वाऽएतासां प्रप्याययिता तस्मादाह "व्वायवस्थेत्युपायवस्थे"त्यु हैकऽआहुरुप हि द्वितीयोऽवतीति तदु तथा न ब्रूयात् ॥३॥ अथ मातृणामेकाꣳशाखयोपस्पृशति । व्वत्सेन व्याकृत्य "देवो वः सविता प्रार्पयत्वि"ति सविता वै देवानां प्रसविता सवितृप्रसूता यज्ञꣳ सम्भरानिति तस्मादाह देवो वः सविता प्रार्पयत्विति॥४॥ "श्रेष्ठतमाय कर्मणे"ऽइति । यज्ञो वै श्रेष्ठतमं

१. मा. सं. १. १. २. मा. सं. १. १. ३. See. तै. सं. १. १. १.
४ मा. सं. १. १. ५. मा. सं. १. १. ६. See. तै. ब्रा. ३. २ १.

कर्म यज्ञाय हि तस्मादाह श्रेष्ठतमाय कर्मणऽइति ॥५॥ "आप्यायध्वमघ्न्या ऽइन्द्राय भागमि"ति। तद्यथैवादो देवतायै हविर्गृहणन्नादिशत्येवमेवैतद्देवतायाऽआदिशति यदाहाप्यायध्वमघ्न्या ऽइन्द्राय भागमिति॥६॥ "प्रजावतीरनमीवा ऽअयक्ष्मा" ऽइति । नात्र तिरोहितमिवास्ति "मा वस्तेन ऽईशत माघशꣳस"ऽइति मा वो नाष्ट्रा रक्षाꣳसीशतेत्येवैतदाह "ध्रुवाऽअस्मिन् गोपतौ स्यात बह्वी"रित्यनपक्रमिण्योऽस्मिन्यजमाने बह्व्यः स्यातेत्येवैतदाह ॥७॥ अथाहवनीयागारस्य वा पुरस्तात् । गार्हपत्यागारस्य वा शाखामुपगूहति "यजमानस्य पशून् पाही"ति तद्ब्रह्मणैवैतद्यजमानस्य पशून् परिददाति गुप्त्यै ॥८॥ तस्यां पवित्रं करोति। "व्वसोः पवित्रमसी"ति यज्ञो वै व्वसुस्तस्मादाह व्वसोः पवित्रमसीति ॥ ९ ॥ अथ यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति । आदिष्टं वा ऽ एतद्देवतायै हविर्भवति यत्पयः स यत्पयसा जुहुयाद्यथान्यस्यै देवतायै हविर्गृहीतं तदन्यस्यै जुहुयादेवं तत्तस्माद्यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति जुह्वत्यग्निहोत्रमुपक्लृप्तोखा भवत्यथाहोपसृष्टां प्रब्रूतादिति यदा प्राहोपसृष्टेति ॥ १० ॥ अथोखामादत्ते ।" द्यौरसि पृथिव्यसी"त्युपस्तौत्येवैनामेतन्महयत्येव यदाह द्यौरसि पृथिव्यसीति "मातरिश्वनो घर्म्मोऽसी"ति यज्ञमेवैतत्करोति यथा घर्मं प्रवृञ्ज्यादेवं प्रवृणक्ति "विश्वधा ऽअसि परमेण धाम्ना दृꣳहस्व मा ह्वारि"ति दृꣳहत्येवैनामेतदशिथिलां करोति "मा ते यज्ञपतिर्ह्वार्षी"दिति यजमानो वै यज्ञपतिस्तद्यजमानायैवैतदह्वलामाशास्ते ॥ ११ ॥ अथ पवित्रं निदधाति । तद्वै प्राङ्निदध्यात्प्राची हि देवानां दिगथोऽउदगुदीची हि मनुष्याणां दिगयं वै पवित्रं योऽयं पवते सोऽयमिमांल्लोकांस्तिर्यङनुपवते तस्मादुदङ्निदध्यात् ॥ १२ ॥ तद्यथैवादः ।

---

१. मा. सं. १. १. २. मा सं. १. १. ३. मा. सं. १. १.
४. मा. सं. १. १. ५. मा. सं. १. १. ६. मा. सं. १ .२.
७. मा. सं. १. २. ८. मा. सं. १. २. ९. मा. सं. १. २.
१०. मा. सं. १. २.

सोमꣳ राजानं पवित्रेण सम्पावयन्त्येवमेवैतत्सम्पावयत्युदीचीनदशं वै तत्पवित्रं भवति येन तत्सोमꣳ राजानꣳ सम्पावयन्ति तस्मादुदङ्निदध्यात् ॥१३॥ तन्निदधाति । "व्वसोः पवित्रमसी"ति यज्ञो वै व्वसुस्तस्मादाह व्वसोः पवित्रमसीति "शतधारꣳ सहस्रधारमि"त्युपस्तौत्येवैनदेतन्महयत्येव यदाह शतधारꣳ सहस्रधारमिति ॥१४॥ अथ व्वाचंयमो भवति । आ तिसृणां दोग्धोर्व्वाग्वै यज्ञोऽविक्षुब्धो यज्ञं तनवाऽइति ॥ १५ ॥ तदानीयमानमभिमन्त्रयते । "देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वे"ति तद्यथैवादः सोमꣳ राजानं पवित्रेण सम्पावयन्त्येवमेवैतत्सम्पावयति ॥१६॥ अथाह "कामधुक्ष" ऽइति । अमूमिति "सा विश्वायुरि"त्यथ द्वितीयां पृच्छति कामधुक्ष ऽइत्यमूमिति "सा विश्वकर्मे"त्यथ तृतीयां पृच्छति कामधुक्षऽइत्यमूमिति "सा विश्वधाया ऽइति तद्यत्पृच्छति व्वीर्य्याण्येवास्वेतद्दधाति तिस्रो दोग्धि त्रयो वाऽइमे लोका ऽएभ्य ऽएवैनदेतल्लोकेभ्यः सम्भरत्यथ कामं व्वदति ॥ १७ ॥ अथोत्तमां दोहयित्वा । येन दोहयति पात्रेण तस्मिन्नुदस्तोकमानीय पत्न्यङ्ग्य प्रत्यानयति यदत्र पयसोऽहायि तदिहाप्यसादिति रसस्यो वैव सर्वत्वायेदꣳ हि यदा व्वर्पत्यथौषधयो जायन्तऽओषधीर्ज्जग्ध्वापः पीत्वा तत ऽएष रसः सम्भवति तस्मादु रसस्यो वैव सर्वत्वाय तदुद्वास्यातनक्ति तीव्रीकरोत्येवैनदेतत्तस्मादुद्वास्यातनक्ति ॥ १८ ॥ स आतनक्ति । "इन्द्रस्य त्वा भागꣳ सोमेनातनच्मी"ति तद्यथैवादो देवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवताया ऽआदिशति यदाहेन्द्रस्य त्वा भागमिति सोमेनातनच्मीति स्वदयत्येवैनदेतद्देवेभ्यः ॥ १९ ॥ अथोदकवतोत्तानेन पात्रेणापिदधाति । नेदेनदुपरिष्टान्नाष्ट्रा रक्षाꣳस्यवमृशानिति

१. मा. सं. १. ३. २. मा. सं. १. ३. ३. मा. सं. १ ३.
४. मा. सं. १. ३. ५ मा. सं. १. ४. ६. मा. सं. १. ४.
७. आतनक्तीति. क. ग. घु. ८. मा. सं. १. ४.

व्व्रजो वाऽआपस्तद्व्रजेणैवैतन्नाष्ट्रा रक्षाꣳस्यतोऽपहन्ति तस्मादुदकवतोत्तानेन पात्रेणापिदधाति ॥२०॥ सोऽपिदधाति । विष्णो हव्यꣳ रक्षे"ति यज्ञो वै विष्णुस्तद्यज्ञायैवैतद्धविः परिददाति गुप्त्यै तस्मादाह विष्णो हव्यꣳ रक्षेति ॥ २१ ॥ (१. का. श. २. ६. ३, तै. ब्रा. ३. २. ३, मै. सं. ४. १. ३. का. सं. ३१. २, कपि. सं. ४७. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे पञ्चमप्रपाठके चतुर्थं ब्राह्मणम् ॥

१. ५. ५.

ऋणꣳ ह वै जायते योऽस्ति । स जायमान ऽएव देवेभ्यऽ ऋषिभ्यः पितृभ्यो मनुष्येभ्यः ॥ १ ॥ स यदेव यजेत । तेन देवेभ्य ऽऋणं जायते तद्ध्येभ्य ऽएतत्करोति यदेनान्यजते यदेभ्यो जुहोति॥२॥ अथ यदेवानुब्रुवीत । तेनर्षिभ्यऽ ऋणं जायते तद्ध्येभ्य ऽएतत्करोत्यृषीणान्निधिगोप ऽइति ह्यनूचानमाहुः ॥ ३ ॥ अथ यदेव प्रजामिच्छेत । तेन पितृभ्य ऽऋणं जायते तद्ध्येभ्य ऽएतत्करोति यदेषाꣳ सन्तानाव्यवच्छिन्ना प्रजा भवति ॥ ४ ॥ अथ यदेव व्वासयेत । तेन मनुष्येभ्य ऽऋणं जायते तद्ध्येभ्य ऽएतत्करोति यदेनान्वासयते यदेभ्योऽशनं ददाति स य ऽएतानि सर्वाणि करोति स कृतकर्म्मा तस्य सर्व्वमाप्तꣳ सर्व्वं जितम् ॥५॥ स येन देवेभ्य ऽऋणं जायते । तदेनांस्तदवदयते यद्यजतेऽथ यदग्नौ जुहोति तदेनांस्तदवदयते तस्माद्यत्किञ्चाग्नौ जुह्वति तदवदानं नाम ॥ ६ ॥ तद्वै चतुरवत्तं भवति । इदं वाऽअनुवाक्याथ याज्याथ व्वषट्कारोऽथ सा देवता चतुर्थी यस्यै देवतायै हविर्भवत्येवꣳ हि देवताऽअवदानान्यन्वायत्ताऽअव-

१. मा. सं. १. ४. २. See. तै. ६. ३. १०. ५.
३. अनुब्रुवीत इति. ग. पु. ४. माहुः इति. ग. पु. ४. जितꣳइति. ग. पु.

दानानि वा देवता ऽअन्वायत्तान्यतिरिक्तꣳ ह तदवदानं यत्पञ्चमं कस्माऽउ हि तदवद्येत्तस्माच्चतुरवत्तं भवति ॥ ७ ॥ उतो पञ्चावत्तमेव भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्त्तवः संवत्सरस्यैषो पञ्चावत्तस्य सम्पद्बहुर्हैव प्रजया पशुभिर्भवति यस्यैवं विदुषः पञ्चावत्तं क्रियतऽएतद्ध न्वेव प्रज्ञातं कौरुपाञ्चालं यच्चतुरवत्तं तस्माच्चतुरवत्तं भवति ॥ ८ ॥ स वै यावन्मात्रमिवैवावद्येत् । मानुषꣳ ह कुर्य्याद्यन्महदवद्येद्वृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्वृद्धं यज्ञे करवाणीति तस्माद्यावन्मात्रमिवैवावद्येत् ॥ ९ ॥ सऽआज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति द्वे वाऽआहुती सोमाहुतिरेवान्याज्याहुतिरन्या तत ऽएषा केवली यत्सोमाहुतिरथैषाज्याहुतिर्यद्धविर्यज्ञो यत्पशुस्तदाज्यमेवैतत्करोति तस्मादुभयत ऽआज्यं भवत्येतद्वै जुष्टं देवानां यदाज्यं तज्जुष्टमेवैतद्देवेभ्यः करोति तस्मादुभयत ऽआज्यं भवति ॥१०॥ असौ वाऽअनुवाक्येयं याज्या । तेऽउभे योषे तयोर्मिथुनमस्ति व्यषट्कारऽएव तद्वाऽएषऽएव व्यषट्कारो यऽएष तपति सऽउद्यन्नेवामुमधिद्रवत्यस्तं यन्निमामधिद्रवति तदेतेन व्यूष्णेमां प्रजातिं प्रजायेते यैनयोरियं प्रजातिः ॥११॥ सोऽनुवाक्यामनूच्य । याज्यामनुद्रुत्य पश्चाद्वषट्करोति पश्चाद्वै परीत्य व्यूषा योषामधिद्रवति तदेतेऽउभे पुरस्तात्कृत्वा व्यूष्णा व्यषट्कारेणाधिद्रावयति तस्मादु सह वैव व्यषट्कारेण जुहुयाद्वषट्कृते वा ॥ १२ ॥ देवपात्रं वाऽएष यद्वषट्कारः । तद्यथा पात्रऽउद्धृत्य प्रयच्छेदेवं तदथ यत्पुरा व्यषट्काराज्जुहुयाद्यथाधो भूमौ निदिग्धं तदमुया स्यादेवं तत्तस्मादु सह वैव व्यषट्कारेण जुहुयाद्वषट्कृते वा ॥ १३ ॥ (शतम् ६००) ॥ तद्यथा योनौ रेतः सिञ्चेत् । एवं तदथ यत्पुरा व्यषट्काराज्जुहुयाद्यथा योनौ रेतः सिक्तं तदमुया स्यादेवं तत्तस्मादु सह वैव व्यषट्कारेण जुहुयाद्वषट्कृते वा ॥१४॥

१. आदितःकण्डिकानां संख्येयम् ।

असौ वाऽअनुवाक्येयं याज्या । सा वै गायत्रीयं त्रिष्टुबसौ स वै गायत्रीमन्वाह तदमुमनुब्रुवन्नसौ ह्यनुवाक्येमामन्वाहेयꣳ हि गायत्री ॥ १५ ॥ अथ त्रिष्टुभा यजति । तदनया यजन्नियꣳ हि याज्यामुष्याऽअधि व्वषट्करोत्यसाऽउ हि त्रिष्टुप्तदेने सयुजौ करोति तस्मादिमे सम्भुञ्जातेऽअनयोरनु सम्भोगमिमाः सर्वाः प्रजा ऽअनु सम्भुञ्जते ॥ १६ ॥ स वाऽअङ्खयन्निवैवानुवाक्यामनुब्रूयात् । असौ ह्यनुवाक्या बृहद्ध्यसौ वार्हतꣳ हि तद्रूपं क्षिप्रऽएव याज्यया त्वरेतेयꣳ हि याज्या रथन्तरꣳ हीयꣳ राथन्तरꣳ हि तद्रूपꣳ ह्वयति वाऽअनुवाक्यया प्रयच्छति याज्यया तस्मादनुवाक्यायै रूपꣳहुवे हवामहऽआगच्छेदं बर्हिः सीदेति यद्ध्वयति हि तया प्रयच्छति याज्यया तस्माद्याज्यायै रूपं व्वीहि हविर्जुषस्व हविरावृपाय स्वाद्धि पिब प्रेति यत्प्र हि तया यच्छति ॥ १७ ॥ सा या पुरस्ताल्लक्षणा । सानुवाक्या स्यादसौ ह्यनुवाक्या तस्या ऽअमुष्याऽ अवस्ताल्लक्ष्म चन्द्रमा नक्षत्राणि सूर्य्यः[1] ॥ १८ ॥ अथ योपरिष्टाल्लक्षणा । सा याज्या स्यादियꣳ हि याज्या तस्या ऽअस्या ऽउपरिष्टाल्लक्ष्मौषधयो व्वनस्पतय ऽआपोऽग्निरिमाः प्रजाः[2] ॥१९॥ सा ह न्वेव समृद्धानुवाक्या । यस्यै प्रथमात्पदाद्देवतामभिव्याहरति सोऽएव समृद्धा याज्या यस्याऽउत्तमात् पदाद्देवतायाऽधि व्वषट्करोति व्वीर्यं वै देवतर्च्चस्तदुभयत ऽएवैतद्वीर्य्येण परिगृह्य यस्यै देवतायै हविर्भवति तस्यै प्रयच्छति ॥ २० ॥ स वै व्वागिति करोति । व्वाग्वै व्वषट्कारो व्वाग्रेतो रेतऽएवैतत्सिञ्चति षडित्यृतवो वै षट् तद्दतुष्वेवैतद्रेतः सिच्यते तद्दतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्मादेवं व्वषट्करोति ॥ २१ ॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुरेतावेवार्धमासौ यऽएवापूर्य्यते

१. सूर्य इति. क. गु. पु. २. प्रजा इति. क. पु.

तं देवा ऽउपायन्योऽपक्षीयते तमसुराः ॥ २२ ॥ ते देवा ऽअकामयन्त । कथं न्विममपि संवृञ्जीमहि योऽयमसुराणामिति तेऽर्च्चन्तः श्राम्यन्तश्चेरुस्तऽएतꣳहविर्यज्ञं ददृशुर्यद्दर्शपूर्णमासौ ताभ्यामयजन्त ताभ्यामिष्ट्वैतमपि समवृञ्जत ॥ २३ ॥ य ऽएषोऽसुराणामासीत् । यदा वाऽएताऽउभौ परिप्लवेतेऽअथ मासो भवति मासशः संवत्सरः सर्व्वं वै संव्वत्सरः सर्व्वमेव तद्देवा ऽअसुराणाꣳ समवृञ्जत सर्वस्मात्सपत्नानसुरान्निरभजन्त्सर्वं स्वेवैष ऽएतत्सपत्नानाꣳ संवृङ्क्ते सर्वस्मात्सपत्नान्निर्भजति य ऽएवमेतद्वेद ॥२४॥ स यो देवानामासीत् । स यवायुवत हि तेन देवा योऽसुराणाꣳ सोऽयवा न हि तेनासुरा ऽअयुवत ॥२५॥ अथोऽइतरथाहुः । य ऽएव देवानामासीत्सोऽयवा न हि तमसुराऽअयुवत योऽसुराणाꣳ स यवायुवत हि तं देवाः सव्दमहः सगरा रात्रिर्यव्या मासाः सुमेकः संव्वत्सरः स्वेको ह वै नामैतद्यत्सुमेक ऽइति यवा च हि वाऽअयवा यवेतीवाथ येनैतेषाꣳ होता भवति तद्याविहोत्रमित्याचक्षते ॥२६॥ (). का. श. २. ६. ४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् ॥

पञ्चमः प्रपाठकस्समाप्तः ॥

कंडिकासंख्या ॥ १२१ ॥

१. ६. १.

यज्ञेन वै देवाः । दिवमुपोदक्रामन्नथ योऽयं देवः पशूनामीष्टे सऽइहाहीयत तस्माद्वास्तव्य ऽइत्याहुर्व्वास्तौ हि तदहीयत ॥ १ ॥ स येनैव देवा दिवमुपोदक्रामन् । तेनोऽएवार्च्चन्तः श्राम्यन्तश्चेरुरथ योऽयं देवः पशूनामीष्टे यऽइहाहीयत ॥ २ ॥ सऽऐक्षत । अहास्यहान्तर्यन्त्यु मा यज्ञादिति सोऽनूचक्राम सऽआयतयोत्तरत ऽउपोत्पेदे सं ऽएष स्विष्टकृतः कालः ॥ ३ ॥ ते देवाऽअब्रुवन् । मा व्विस्रक्षीरिति ते वै मा यज्ञान्मान्तर्गतार्हुति मे कल्पयतेति तथेति स समवृहत्स नास्यत्स न कं चनाहिनत् ॥ ४ ॥ ते देवा ऽअब्रुवन् । यावन्ति नो हवींषि गृहीतान्यभूवन्त्सर्वेषां तेषाꣳ हुतमुपजानीत यथास्माऽआहुतिं कल्पयामेति ॥ ५ ॥ तेऽध्वर्युमब्रुवन् । यथापूर्वꣳ हवींष्यभिघारयैकस्माऽअवदानाय पुनराप्याययायातयामानि कुरुत त ऽएकैकमवदानमवद्येति ॥६॥ सोऽध्वर्युः । यथापूर्वꣳ हवींष्यभ्यघारयदेकस्माऽअवदानाय पुनराप्याययदयातयामान्यकरोत्तत ऽएकैकमवदानमवाद्यत्तस्माद्वास्तव्य ऽइत्याहुर्वास्तु हि तद्यज्ञस्य यद्धुतेषु हविष्षु तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तः सर्व्वत्र ह्येवैनं देवा ऽअन्वाभजन् ॥७॥ तद्वाऽअग्नयऽइति क्रियते । अग्निर्व्वै स देवस्तस्यैतानि नामानि शर्वऽइति यथा प्राच्याऽआचक्षते भवऽइति यथा वाहीकाः पशूनां पती रुद्रोऽग्निरिति तान्यस्याशान्तान्येवेतराणि नामान्यग्निरित्येव शान्ततमं तस्मादग्नयऽइति क्रियते स्विष्टकृतऽइति ॥ ८ ॥ ते होचुः । यत्त्वय्यमुत्र सत्ययक्ष्महि तन्नः स्विष्टं कुर्व्विति तदेभ्यः स्विष्टमकरोत्तस्मात्स्विष्टकृतऽइति ॥ ९ ॥ सोऽनुवाक्यामनूच्य सम्पश्यति । ये तथा-

१. देवाः इति. क. पु. २. यऽएष इति. क. ख. पु.

३. कालः इति क. पु. ४. इति इति. क. ग. पु.

ग्निꣳ स्विष्टकृत"मयाडग्निरग्नेः प्रिया धामानी"ति तदाग्नेयमाज्यभागमाहा"याट्सोमस्य प्रिया धामानी"ति तत्सौम्यमाज्यभागमाहा"याडग्नेः प्रिया धामानी"ति तद्य ऽएष ऽउभयत्राच्युत ऽआग्नेयः पुरोडाशो भवति तमाह ॥ १० ॥ अथ यथादेवतम् । "अयाड्देवानामाज्यपानां प्रिया धामानी"ति तत्प्रयाजानुयाजानाह प्रयाजानुयाजा वै देवा ऽआज्यपा "यक्षदग्नेर्होतुः प्रिया धामानी"ति तदग्निꣳहोतारमाह तदस्माऽएतां देवा ऽआहुतिं कल्पयित्वाथैनेनैतद्भूयः समशाम्यन् प्रिय ऽएनं धामन्नुपाह्वयन्त तस्मादेवꣳ सम्पश्यति ॥ ११ ॥ तद्धैके । देवतां पूर्वां कुर्वन्त्ययाट्कारादग्नेरयाट्सोमस्यायाडिति तदु तथा न कुर्य्याद्विलोम ह ते यज्ञं कुर्वन्ति ये देवतां पूर्वां कुर्वन्त्ययाट्कारादिदꣳ हि प्रथममभिव्याहरन्नयाट्कारमेवाभिव्याहरति तस्मादयाट्कारमेव पूर्वं कुर्यात् ॥ १२ ॥ "यक्षत्स्वं महिमान"मिति । यत्र वा ऽअदो देवता ऽआवाहयति तदपि स्वं महिमानमावाहयति तदतः प्राङ्नैव किं चन स्वाय महिम्न ऽइति क्रियते तदत्र तं प्रीणाति तथो हास्यैषोऽमोघायावाहितो भवति तस्मादाह यक्षत्स्वं महिमानमिति ॥ १३ ॥ "आ यजतामिज्या ऽइष"ऽइति । प्रजा वा ऽइषस्ता ऽएवैतद्यायजूकाः करोति ता ऽइमाः प्रजा यजमाना ऽअर्चन्त्यः श्राम्यन्त्यश्चरन्ति ॥ १४ ॥ "सो ऽअध्वरा जातवेदा जुषताꣳ हवि"रिति । तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जयति तस्मादाह जुषताꣳ हविरिति ॥ १५ ॥ तद्यदेतेऽअत्र । याज्यानुवाक्ये ऽअवक्लृप्ततमे भवतस्तृतीयसवनं वै स्विष्टकृद्विश्वदेवं वै तृतीयसवनं "पिप्रीहि देवां २॥ ऽउशतो यविष्ठे"ति तदनुवाक्यायै व्वैश्वदेव"मग्ने यदद्य व्विशो ऽअध्वरस्य होत"

१. 'अयाडग्निरग्नेः' इत्यारभ्य जुषतां हविः' इत्यन्तो भागः "पि प्री हि देवान्" "अग्ने यदद्य" इत्यृचौ च तैत्तिरीयब्राह्मणे ३. ५. ६. द्रष्टव्याः ।

२. देवतम् इति क. पु. ३. महिमानमिति इति क. पु.

रिति तद्याज्यायै व्वैश्वदेवं तद्यदेतेऽएवꣳरूपे भवतस्तेनोऽएते तृतीयसवनस्य रूपं तस्माद्वाऽएतेऽअत्र याज्यानुवाक्येऽ अवक्लृप्ततमे भवतः ॥ १६ ॥ ते वै त्रिष्टुभौ भवतः । व्वास्तु वा ऽ एतद्यज्ञस्य यत्स्विष्टकृद्वीर्य्यं वै व्वास्त्विन्द्रियं व्वीर्यं त्रिष्टुबिन्द्रियमेवैतद्वीर्यं व्वास्तौ स्विष्टकृति दधाति तस्मात्त्रिष्टुभौ भवतः ॥ १७ ॥ उतो ऽ अनुष्टुभावेव भवतः । व्वास्त्वनुष्टुब्व्वास्तु स्विष्टकृद्वास्तावेवैतद्वास्तु दधाति पेसुकं वै व्वास्तु पिस्यति ह प्रजया पशुभिर्यस्यैवं व्विदुषोऽनुष्टुभौ भवतः ॥ १८ ॥ तदु ह भाल्लवेयः । अनुष्टुभमनुवाक्यां चक्रे त्रिष्टुभं याज्यामेतदुभयं परिगृह्णामीति स रथात्पपात स पतित्वा बाहुमपिशश्रे स परिममृशे यत्किमकरं तस्मादिदमापदिति स हैतदेव मेने यद्विलोम यज्ञेऽकरमिति तस्मान्न विलोम कुर्य्यात्सच्छन्दसावेव स्यातामुभे वैवानुष्टुभाऽउभे वा त्रिष्टुभौ ॥ १९ ॥ स वा ऽ उत्तरार्धादवद्यति । उत्तरार्धे जुहोत्येषा ह्येतस्य देवस्य दिक्तस्मादुत्तरार्धादवद्यत्युत्तरार्धे जुहोत्येतस्यै वै दिशऽउदपद्यत तं ततऽएवाशमयंस्तस्मादुत्तरार्धादवद्यत्युत्तरार्धे जुहोति ॥ २० ॥ स वा ऽ अभ्यर्धऽ इवेतराभ्य ऽआहुतिभ्यो जुहोति । इतराऽआहुतीः पशवो वा ऽनुप्रजायन्ते रुद्रियः स्विष्टकृद्रुद्रियेण ह पशून् प्रसजेद्यदितराभिराहुतिभिस्सꣳसृजेत्तेऽस्य गृहाः पशवऽउपमूर्य्यमाणाऽईयुस्तस्मादभ्यर्धऽइवेतराभ्यऽआहुतिभ्यो जुहोति ॥ २१ ॥ एष वै स यज्ञः । येन तद्देवा दिवमुपोदक्रामन्नेषऽआहवनीयोऽथ यऽइहाहीयत स गार्हपत्यस्तस्मादेतं गार्हपत्यात्प्राञ्चमुद्धरन्ति ॥ २२ ॥ तं वाऽअष्टासु व्विक्रमेष्वादधीत । अष्टाक्षरा वै गायत्री गायत्र्यैवैतद्दिवमुपोत्क्रामति ॥२३॥ एकादशस्वादधीत । एकादशाक्षरा वै त्रिष्टुप्त्रिष्टुभैवैतद्दिवमुपोत्क्रामति ॥ २४ ॥ द्वादशस्वादधीत । द्वादशाक्षरा वै जगती जगत्यैवै-

१ तदुहेति. क. ग. पु. २. मापदीति. इति .ख पु.
३. वै दिश. इति. क. ग. पु. ४. ह इति नाऽस्ति क. ग. पुस्तकयोः

तद्दिवमुपोत्क्रामति नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत तदादधीत स यद्वाऽअप्यल्पकमिव प्राञ्चमुद्धरति तेनैव दिवमुपोत्क्रामति ॥ २५ ॥ तदाहुः । आहवनीये हवीꣳषि श्रपयेयुरतो वै देवा दिवमुपोदक्रामंस्तेनोऽएवार्चन्तः श्राम्यन्तश्चेरुस्तस्मिन्हवीꣳषि श्रपयाम तस्मिन्यज्ञं तनवामहाऽ इत्यपस्खलऽइव ह स हविषां यद्गार्हपत्ये श्रपयेयुर्यज्ञऽआहवनीयो यज्ञे यज्ञं तनवामहाऽइति ॥ २६ ॥ उतो गार्हपत्यऽएव श्रपयन्ति। आहवनीयो वाऽएष न वाऽएष तस्मै यदस्मिन्नश्रृतꣳ श्रपयेयुस्तस्मै वाऽएष यदस्मिञ्छृतं जुहुयुरित्यतो यतरथा कामयेत तथा कुर्यात् ॥ २७ ॥ स हैष यज्ञऽउवाच । नग्नताया वै बिभेमीति का तेऽनग्नतेत्यभितऽएव मा परिस्तृणीयुरिति तस्मादेतदग्निमभितः परिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृष्णिरिति ब्राह्मणस्यैव तृष्णिमनुतृप्येयमिति तस्मात्सꣳस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयाद्यज्ञमेवैतत्तर्पयति ॥२८॥ Cf.का. श. २.७.१.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे षष्ठप्रपाठके प्रथमं ब्राह्मणम् ॥

१. ६. २.

प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ। दिवं वोषसं वा मिथुन्येनया स्यामिति ताꣳ समभूव ॥ १ ॥ तद्वै देवानामागऽआस । यऽइत्थꣳ स्वां दुहितरमस्माकꣳ स्वसारं करोतीति ॥ २ ॥ ते ह देवा ऽऊचुः । योऽयं देवः पशूनामीष्टेऽतिसन्धं वा ऽ अयं चरति यऽइत्थꣳ स्वां दुहितरमस्माकꣳ स्वसारं करोति व्विध्येममिति तꣳ रुद्रोऽभ्यायत्य व्विव्याध तस्य सामि रेतः प्रचस्कन्द तथेन्नूनं तदास ॥ ३ ॥ तस्मादेतदृषिणाभ्यनूक्तम् । पिता यत्स्वां दुहितरमधिष्कन्

१. उतो इति. क. ग. पु.

क्ष्मया रेतः सञ्चग्मानो निपिञ्चदिति तदाग्निमारुतामित्युक्थं तस्मिंस्त-द्व्याख्यायते यथा तद्देवा रेतः प्राजनयंस्तेषां यदा देवानां क्रोधो व्यैदथ प्रजापतिमभिपद्यंस्तस्य तँ शल्यं निरकृन्तन्स वै यज्ञऽएव प्रजापतिः ॥४॥ ते होचुः । उपजानीत यथेदं नामुयासत् कनीयो हा-हुतेर्यथेदꣳ स्यादिति ॥५॥ ते होचुः । भगायैनद्दक्षिणतऽआसीनाय परिहरत तद्भगः प्राशिष्यति तद्यथाहुतमेवं भविष्यतीति तद्भगाय दक्षिणतऽआसीनाय पर्याजहुस्तद्भगोऽवेक्षां चक्रे तस्याक्षिणी निर्द-दाह तथेन्नूनं तदास तस्मादाहुरन्धो भग ऽइति ॥ ६ ॥ ते होचुः । नो न्वेधात्राशमत्पूष्णऽएनत्परिहरतेति तत्पूष्णे पर्याजहुस्तत्पूषा प्राश तस्य दतो निर्जग्मान तथेन्नूनं तदास तस्मादाहुरदन्तकः पूषेति त-स्माद्यं पूष्णे चरुं कुर्वन्ति प्रपिष्टानामेव कुर्वन्ति यथादन्तकायैवम् ॥७॥ ते होचुः । नो न्वेवात्राशमद्बृहस्पतयऽएनत्परिहरतेति तद्बृ-हस्पतये पर्याजहुः स बृहस्पतिः सवितारमेव प्रसवायोपाधावत्स-विता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाहिनत्ततोऽर्वाचीनꣳ शान्तं तदेतान्नि-दानेन यत्प्राशित्रम् ॥ ८ ॥ स यत्प्राशित्रमवद्यति । यदेवात्राविद्धं यज्ञस्य यद्दुष्टियं तदेवैतान्निर्मिमीतेऽथापऽउपस्पृशति शान्तिरापस्त दद्भिः शमयत्यथेडां पशून्त्समवद्यति ॥ ९ ॥ स वै यावन्मात्रमिवै-वावद्येत् । तथा शल्यः प्रच्यवते तस्माद्यावन्मात्रमिवैवावद्येदन्यतरत ऽ आज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा तथा खदन्निस्सरणवद्भवति तथा निस्रवति तस्मादन्यतरतऽआज्यं कुर्यादधस्ताद्वोपरिष्टाद्वा ॥ १० ॥ सऽआज्यस्योपस्तीर्य । द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघार-यति तद्यथैव यज्ञस्यावदानमेवमेव तत् ॥११॥ तन्न पूर्वेण परिहरेत् ।

---

१. पर्याजहुरिति. ख. पु. २. होचुरिति. क. पु. ३. अदन्तकायैवमिति. क. पु

४. होचुरिति क. पु. ५. प्राशित्रमिति. क. पु. ६. तत् इति. क. प.

पूर्व्वेण हैके परिहरन्ति पुरस्ताद्वै प्रत्यञ्चो यजमानं पशवऽउपतिष्ठन्ते रुद्रियेण ह पशून् प्रसेजद्यत्पूर्व्वेण परिहरेत्तेऽस्य गृहाः पशवऽउपमूर्यमाणाऽईयुस्तस्मादित्येव तिर्यक्प्राजिहीत तथा ह रुद्रियेण पशून्न प्रसजति तिर्यगेवैनं निर्मिमीते ॥ १२ ॥ तत्प्रतिगृह्णाति । "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामी"ति ॥ १३ ॥ तद्यथैवादो बृहस्पतिः । सवितारं प्रसवायोपाधावत्सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रासुवत्तदेनꣳ सवितृप्रसूतं नाहिनदेवमेवैष ऽएतत्सवितारमेव प्रसवायोपधावति सविता वै देवानां प्रसवितेदं मे प्रसुवेति तदस्मै सविता प्रसविता प्रसौति तदेनꣳ सवितृप्रसूतं न हिनस्ति ॥ १४ ॥ तत्प्राश्नाति । "अग्नेष्ट्वास्येन प्राश्नामी"ति न वाऽअग्निं किंचन हिनस्ति तथो हैनमेतन्न हिनस्ति ॥ १५ ॥ तन्न दद्भिः खादेत् । नेन्मऽइदꣳ रुद्रियं दतो हिनसदिति तस्मान्न दद्भिः खादेत् ॥ १६ ॥ अथापऽआचामति । शान्तिरापस्तद्भिः शान्त्या शमयतेऽथ परिक्षाल्य पात्रम् ॥ १७ ॥ अथास्मै ब्रह्मभागं पर्य्याहरन्ति । ब्रह्मा वै यज्ञस्य दक्षिणतऽआस्तेऽभिगोप्ता सऽएतं भागं प्रतिविदानऽआस्ते यत्प्राशित्रं तदस्मै पर्य्याहार्षुस्तत्प्राशीदथ यमस्मै ब्रह्मभागं पर्य्याहरन्ति तेन भागी स यदत ऽऊर्ध्वमसꣳस्थितं यज्ञस्य तदभिगोपायति तस्माद्वाऽअस्मै ब्रह्मभागं पर्याहरन्ति ॥ १८ ॥ स वै व्वाचंयमऽएव स्यात् । "ब्रह्मन् प्रस्थास्यामी"त्येतस्माद्वचसो व्विवृहन्ति वाऽएते यज्ञं क्षण्वन्ति ये मध्ये यज्ञस्य पाकयज्ञियेडया चरन्ति ब्रह्मा वाऽऋत्विजां भिषक्तमस्तद्ब्रह्मा सन्दधाति न ह सन्दध्याद्यद्धावद्यमानऽआसीत तस्माद्वाचंयमऽएव स्यात् ॥ १९ ॥ स यदि पुरा मानुषीं व्वाचं व्याहरेत् । तत्रो वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै व्विष्णु-

---

१. मा. सं. २. ११. २. तद्यथैवाद इति. क. ग. पु.

३. मा. सं. २. ११. ४. क्षण्वन्तीति. क. ग. पु.

स्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥ २० ॥ स यत्राह "ब्रह्मन् प्रस्थास्यामी"ति तद्ब्रह्मा जपत्ये"तं ते देव सवितर्यज्ञं प्राहुरि"ति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता "बृहस्पतये ब्रह्मण"ऽइति बृहस्पतिर्वै देवानां ब्रह्मा तद्यऽएव देवानां ब्रह्मा तस्माऽएवैतत्प्राह तस्मादाह बृहस्पतये ब्रह्मणऽइति "तेन यज्ञमव तेन यज्ञपतिं तेन मामवे"ति नात्र तिरोहितमिवास्ति ॥२१॥ "मनो जूतिर्जुषतामाज्यस्ये"ति । मनसा वाऽइदꣳ सर्वमाप्तं तन्मनसैवैतत्सर्वमाप्नोति "बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधात्वि"ति यद्बृहद्बृहं तत्सन्दधाति "विश्वे देवास ऽइह मादयन्ता"मिति सर्वं वै विश्वे देवाः सर्वेणैवैतत्सन्दधाति स यदि कामयेत ब्रूयात् "प्रतिष्ठे"ति यद्यु कामयेतापि नाद्रियेत ॥ २२ ॥ Cf. का. श. २. ७. २, तै. सं. २. ६. ८.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे षष्ठप्रपाठके द्वितीयं ब्राह्मणम् ॥
(इति सप्तमोऽध्यायः)

१. ६. ३.

मनवे ह वै प्रातः । अवनेग्यमुदकमाजहुर्यथेदं पाणिभ्यामवनेजनायाहरन्त्येवं तस्यावनेनिजानस्य मत्स्यः पाणीऽआपेदे ॥ १ ॥ स हास्मै व्वाचमुवाद । बिभृहि मा पारयिष्यामि त्वेति कस्मान्मा पारयिष्यसीत्यौघऽइमाः सर्व्वाः प्रजा निर्व्वोढा ततस्त्वा पारयितास्मीति कथं ते भृतिरिति ॥ २ ॥ स होवाच । यावद्वै क्षुल्लका भवामो वह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्यऽएव मत्स्यं गिलति कुम्भ्यां मात्रे

१. मा. सं. २. १२. २. मा. सं. २ १२. ३. मा. सं. २. १२.
४. मा. सं. २. १३. ५. मा. सं. २. १३. ६. मा. सं. २. १३.
७. मा. सं. २. १३. ८. प्रातः इति. क. ग. पु.

बिभरासि स यदा तामतिवर्धाऽअथ कर्पं खात्वा तस्यां मा बिभरासि स यदा तामतिवर्धाऽअथ मा समुद्रमभ्यवहरासि तर्हि वाऽअतिनाष्टो भवितास्मीति ॥३॥ शश्वद्ध ह्यपऽआस । स हि ज्येष्ठं वर्धतेऽथेतिथीꣳ समां तदौघऽआगन्ता तन्मा नावमुपकल्प्योपासासै सऽऔघऽउत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति ॥ ४ ॥ तमेव भूत्वा समुद्रमभ्यवजहार । स यतिथीं तत्समां परिदिदेश तितिथीꣳ समां नावमुपकल्प्योपासां चक्रे सऽ औघऽउत्थिते नावमापेदे तꣳ स मत्स्यऽउपन्यापुप्लुवे तस्य शृङ्गे नावः पाशं प्रतिमुमोच तेनैतमुत्तरं गिरिमतिदुद्राव ॥५॥ स होवाच । अपीपरं वै त्वा व्वृक्षे नावं प्रतिबध्नीष्व तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद्यावद्यावदुदकꣳ समवायात्तावत्तावदन्ववसर्पासीति स ह तावत्तावदेवान्ववससर्प तदप्येतदुत्तरस्य गिरेर्मनोरवसर्पणमित्यौघो ह ताः सर्व्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे ॥ ६ ॥

(अर्धप्रपाठकः ५६)

सोऽर्चच्छ्राम्यंश्चचार प्रजाकामः । तत्रापि पाकयज्ञेनेजे स घृतं दधि मस्त्वामिक्षामित्यप्सु जुहवांचकार ततः संवत्सरे योषित्सम्बभूव सा ह पिण्ड्यमानेवोदेयाय तस्यै ह स्म घृतं पदे सन्तिष्ठते तया मित्रावरुणौ सञ्जग्मातें ॥७॥ ताꣳ होचतुः कासीति । मनोर्दुहितेत्यावयोर्ब्रूष्वेति नेति होवाच यऽएव मामजीजनत तस्यैवाहमस्मीति तस्यामपि त्वमीषाते तद्धा जज्ञौ तद्धा न जज्ञावति त्वेवेयाय सा मनुमाजगाम ॥८॥ ताꣳ ह मनुरुवाच कासीति । तव दुहितेति कथं भगवति मम दुहितेति या ऽअमूरप्स्वाहुतीरहौषीर्घृतं दधि मस्त्वामिक्षां ततो मामजीजनथाः साशीरास्मि तां मा यज्ञेऽवकल्पय यज्ञे चेद्वै मावकल्पयिष्यसि बहुः प्रजया पशुभिर्भविष्यसि यामु मया कां चा-

१. स यदेति. ग. पु. २. होवाच अपीपरं इति. क. ग. पु.

शिपमाशासिष्यसे सा ते सर्व्वा समर्धिष्यत ऽ इति तामेतन्मध्ये यज्ञस्यावाकल्पयन्मध्यꣳ ह्येतद्यज्ञस्य यदन्तरा प्रयाजानुयाजान् ॥९॥ तयार्च्चच्छाम्यंश्चचार प्रजाकामः । तयेमां प्रजातिं प्रजज्ञे येयं मनोः प्रजातिर्याम्वेनया कां चाशिपमाशास्त सास्मै सर्व्वा समार्ध्यत ॥१०॥ सैषा निदानेन यदिडा । स यो हैवं विद्वानिडया चरत्येताꣳ हैव प्रजातिं प्रजायते यां मनुः प्राजायत याम्वेनया कां चाशिपमाशास्ते सास्मै सर्व्वा समृध्यते ॥११॥ सा वै पञ्चावत्ता भवति । पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पञ्चवत्ता भवति ॥१२॥ स समवदायेडाम् । पूर्व्वार्धे पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधाति ताꣳ होत्रे प्रदाय दक्षिणात्येति ॥ १३ ॥ स होतुरिह निलिम्पति । तद्धोतौष्ठयोर्निलिम्पते मनसस्पतिना ते हुतस्याश्नामीषे प्राणायेति ॥१४॥ अथ होतुरिह निलिम्पति । तद्धोतौष्ठयोर्निलिम्पते व्वाचस्पतिना ते हुतस्याश्नाम्यूर्ज्जऽउदानायेति ॥१५॥ एतद्ध वै मनुर्विभयाञ्चकार । इदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइह रक्षाꣳसि यज्ञं न हिꣳस्युरिति तामेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्यऽइत्येव प्रापयत तथोऽएवैनामेषऽएतत्पुरा रक्षोभ्यः पुरा रक्षोभ्यऽइत्येव प्रापयतेऽथ यत्प्रत्यक्षं न प्राश्नाति नेदनुपहूतां प्राश्नानीत्येतदेवैनां प्रापयते यदोष्ठयोर्निलिम्पते ॥ १६ ॥ अथ होतुः पाणौ समवद्यति । समवत्तामेव सतीं तदेनां प्रत्यक्षꣳ होतरि श्रयति तयात्मंच्छितया होता यजमानायाशिपमाशास्ते तस्माद्धोतुः पाणौ समवद्यति ॥१७॥ अथोपाꣳशूपह्वयते । एतद्ध वै मनुर्विभयां चकारेदं वै मे तनिष्ठं यज्ञस्य यदियमिडा पाकयज्ञिया यद्वै मऽइह रक्षाꣳसि यज्ञं न हन्युरिति तामेतत्पुरा रक्षोभ्यः पुरा रक्षोभ्यऽइत्येवोपाꣳशूपाह्वयत तथोऽएवैनामेषऽएतत्पुरा रक्षोभ्यः पुरा रक्षोभ्यऽइत्येवोपाꣳशूपह्वयते॥१८॥ स ऽउपह्वयते। उपहूतꣳ रथन्तरꣳ सह पृथिव्यो प मांꣳ रथन्तरꣳ सह पृथिव्या ह्वयतामुपहूतं व्वामदेव्यꣳ सहा-

न्तरिक्षेणोप मां व्वामदेव्यꣳ सहान्तरिक्षेण ह्वयतामुपहूतं बृहत्सह दिवोप मां बृहत्सह दिवा ह्वयतामिति तदेतामेवैतदुपह्वयमानऽइमांश्च लोकानुपह्वयतऽएतानि च सामानि ॥१९॥ उपहूता गावः सहर्षभाऽइति । पशवो वाऽइडा तदेनां परोक्षमुपह्वयते सहर्षभाऽइति स मिथुनामेवैनामेतदुपह्वयते ॥ २० ॥ उपहूता सप्तहोत्रेति । तदेनाꣳ सप्तहोत्रा सौम्येनाध्वरेणोपह्वयते ॥ २१ ॥ उपहूतेडा ततुरिति । तदेनां प्रत्यक्षमुपह्वयते ततुरिति सर्व्वꣳ ह्येषा पाप्मानं तरति तस्मादाह ततुरिरिति ॥ २२ ॥ उपहूतः सखा भक्षऽइति । प्राणो वै सखा भक्षस्तत्प्राणमुपह्वयतऽउपहूतꣳ हेगिति तच्छरीरमुपह्वयते तत्सर्वामुपह्वयते ॥ २३ ॥ अथ प्रतिपद्यते । "इडोपहूतोपहूतेडोपोऽअस्मां३॥ऽइडा ह्वयतामिडोपहूते"ति तदुपहूतामेवैनामेतत्सर्तां प्रत्यक्षमुपह्वयते या वै सासीद्गौर्वै सासीच्चतुष्पदी वै गौस्तस्माच्चतुरुपह्वयते ॥ २४ ॥ स वै चतुरुपह्वयमानः । अथ नानेवोपह्वयतेऽजामितायै जामि ह कुर्याद्यदिडोपहूतेडोपहूतेत्येवोपह्वयेतोपहूतेडेति वेडोपहूतेति तदर्वाचीमुपह्वयतऽउपहूतेडेति तत्पराचीमुपोऽअस्मां३॥ऽइडा ह्वयतामिति तदात्मानं चैवैतन्नान्तरेत्यन्यथेव च भवतीडोपहूतेति तत्पुनरर्वाचीमुपह्वयते तदर्वाचीं चैवैनामेतत्पराचीं चोपह्वयते ॥२५॥ मानवी घृतपदीति । मनुर्ह्येतामग्रेऽजनयत तस्मादाह मानवीति घृतपदीति यदेवास्यै घृतं पदे समतिष्ठत तस्मादाह घृतपदीति ॥ २६ ॥ उत मैत्रावरुणीति । यदेव मित्रावरुणाभ्याꣳ समगच्छत सऽएव मैत्रावरुणो न्यङ्गो "ब्रह्मा देवकृतोपहूते"ति ब्रह्मा ह्येषा देवकृतोपहूतोपहूता "दैव्याऽअध्वर्यवऽउपहूता मनुष्या"ऽइति तद्दैवांश्चैवैतदध्वर्यूनुपह्वयते ये च मानुषा व्वत्सा वै दैव्याऽअध्वर्यवोऽथ यऽइतरे ते मानुषाः ॥२७॥ "यऽइमं यज्ञमवान्ये च यज्ञपतिं व्वर्धा" निति । एते वै यज्ञमवन्ति ये ब्राह्मणाः शुश्रुवाꣳ सोऽनूचानाऽएते

१. प्राणो वै इति. क. पु. २. ह्येषां इति. क. ग. पु.

ह्येनं तन्वतऽएतऽएनं जनयन्ति तदु तेभ्यो निह्नुते व्वत्साऽउ वै यज्ञपतिं व्वर्धन्ति यस्य ह्येते भूयिष्ठा भवन्ति स हि यज्ञपतिर्व्वर्धते तस्मादाह "ये च यज्ञपतिं व्वर्धानि"ति॥२८॥"उपहूते द्यावापृथिवी पूर्व्वजेऽऋतावरी देवी देवपुत्रे"ऽइति । तदिमे द्यावापृथिवीऽउपह्वयते ययोरिदꣳ सर्व्वमभ्युपहूतोऽयं यजमानऽइति तद्यजमानमुपह्वयते तद्यदत्र नाम न गृह्णाति परोऽक्षꣳ ह्यत्राशीर्यदिडायां मानुषꣳ ह कुर्याद्यन्नाम गृह्णीयाद्वृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्वृद्धं यज्ञे करवाणीति तस्मान्न नाम गृह्णाति ॥ २९ ॥ उत्तरस्यां देवयज्यायामुपहूतऽइति । तदस्माऽएतज्जीवातुमेव परोक्षमाशास्ते जीवन् हि पूर्वमिष्ट्वाथाऽपरं यजते ॥ ३० ॥ तदस्माऽएतत्प्रजामेव परोक्षमाशास्ते । यस्य हि प्रजा भवत्यमुं लोकमात्मनैत्यथास्मिंल्लोके प्रजा यजते तस्मात्प्रजोत्तरा देवयज्या ॥ ३१ ॥ तदस्माऽएतत्पशूनेव परोक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्व्वमिष्ट्वाथापरं यजते ॥ ३२ ॥ "भूयसि हविष्करणऽउपहूत"ऽइति । तदस्माऽएतज्जीवातुमेव परोक्षमाशास्ते जीवन् हि पूर्वमिष्ट्वाथ भूयोभूयऽएव हविष्करोति ॥ ३३ ॥ तदस्माऽएतत्प्रजामेव परोक्षमाशास्ते । यस्य हि प्रजा भवत्येकऽआत्मना भवत्यथोत दशधा प्रजया हविष्क्रियते तस्मात्प्रजा भूयो हविष्करणम् ॥ ३४ ॥ तदस्माऽएतत्पशूनेव परोक्षमाशास्ते । यस्य हि पशवो भवन्ति स पूर्वमिष्ट्वाथ भूयो भूयऽएव हविष्करोति ॥ ३५ ॥ एषा वा ऽआशीः । "जीवेयं प्रजा मे स्याच्छ्रियं गच्छेयमि"ति तद्यत्पशूनाशास्ते तच्छ्रियमाशास्ते श्रीर्हि पशवस्तदेताभ्यामेवैतदाशीर्भ्याꣳ सर्व्वमाप्नं तस्माद्वाऽएतेऽअत्र द्वेऽआशिषौ क्रियेते ॥ ३६ ॥ "देवा मऽइदꣳ हविर्जुषन्तामि"ति । तस्मिन्नुपहूतऽइति तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते

१. देवयज्या इति. ग. पु. २. भूयसीति. क. पु.
३. हविष्करोति. क. ग. पु. ४. तद्यज्ञस्यैवैतदिति. क. ग. पु.

तेन हि महज्जयति तस्मादाह जुषन्तामिति ॥ ३७ ॥ (शतम् ७००) तां वै प्राश्नन्त्येव । नाग्नौ जुह्वति पशवो वाऽइडा नेत्पशूनग्नौ प्रवृणजामेति तस्मान्नाग्नौ जुह्वति ॥ ३८ ॥ प्राणेष्वेव हूयते । होतरि त्वद्यजमाने त्वदध्वर्यौ त्वदथ यत्पूर्वार्धे पुरोडाशस्य प्रशीर्य पुरस्ताद्ध्रुवायै निदधाति यजमानो वै ध्रुवा तद्यजमानस्य प्राशितं भवत्यथ यत्प्रत्यक्षं न प्राश्नाति नेदसꣳस्थिते यज्ञे प्राश्नानीत्येतदेवास्य प्राशितं भवति सर्वे प्राश्नन्ति सर्वेषु मे हुतासदिति पञ्च प्राश्नन्ति पशवो वाऽइडा पाङ्क्ता वै पशवस्तस्मात्पञ्च प्राश्नन्ति ॥३९॥ अथ यत्र प्रतिपद्यते । तच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति तदत्र पितॄणां भाजनेन चतस्रो वाऽअवान्तरदिशोऽवान्तरादिशो वै पितरस्तस्माच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति ॥४०॥ अथ यात्राहोपहूते द्यावापृथिवीऽइति । तदग्नीधऽआदधाति तदग्नीत्प्राश्नात्यु "पहूता पृथिवी मातोप मां पृथिवी माता ह्वयतामग्निराग्नीध्रात् स्वाहोपहूतो द्यौष्पितोप मां द्यौष्पिता ह्वयतामग्निराग्नीध्रात् स्वाहे"ति द्यावापृथिव्यो वाऽएष यदाग्नीध्रस्तस्मादेवं प्राश्नाति ॥४१॥ अथ यत्राशिषमाशास्ते । तज्जपति "मयीदमिन्द्रऽइन्द्रियं दधात्वस्मान् रायो मघवानः सचन्ताम् । अस्माकꣳसन्त्वाशिषः सत्या नस्सन्त्वाशिष"ऽइत्याशिषामेवैष प्रतिग्रहस्तद्याऽएवात्रऽर्त्विजो यजमानायाशिषऽआशासते ताऽएवैतत्प्रतिगृह्यात्मन् कुरुते ॥४२॥ अथ पवित्रयोर्मार्जयन्ते । पाकयज्ञियय्येव वाऽएतदिडयाचारिषुः पवित्रपूता यदतऽऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पवित्रयोर्मार्जयन्ते ॥ ४३ ॥ अथ ते पवित्रे प्रस्तरेऽपिसृजति । यजमानो वै प्रस्तरः प्राणोदानौ पवित्रे यज-

१. आदितः कण्डिकानां संख्येयम् । २. मा. सं. २. १०, ११.
३. मा. सं. २. १०. ४. इन्द्रियमिति. क. ग. पु.
५. यज्ञियय्येति. क. ग. पु.

माने तत्प्राणोदानौ दधाति तस्मात्ते पवित्रे प्रस्तरेऽपिसृजति ॥४४॥
का. श. २.७. ३, तै. सं. २. ६. ७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे षष्ठप्रपाठके तृतीयं ब्राह्मणम् ॥

१. ६. ४.

ते वाऽएतेऽउल्मुकेऽउद्दहन्ति । अनुयाजेभ्यो यातयामेव वाऽएतदग्निर्भवति देवेभ्यो हि यज्ञमूहिवान् भवत्ययातयाम्न्यनुयाजांस्तनवामहाऽइति तस्माद्वाऽएतेऽउल्मुकेऽउद्दहन्ति ॥१॥ ते पुनरनुसꣳस्पर्शयन्ति । पुनरेवैतदग्निमाप्याययन्त्ययातयामानं कुर्वन्त्ययातयाम्नि यदतऽऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्पुनरनुसꣳस्पर्शयन्ति ॥२॥ अथ समिधमभ्यादधाति । समिन्द्धऽएवैनमेतत्समिद्धे यदतऽऊर्ध्वमसꣳस्थितं यज्ञस्य तत्तनवामहाऽइति तस्मात्समिधमभ्यादधाति ॥३॥ ताꣳ होताऽनुमन्त्रयते । "एषां तेऽअग्ने समित्तया व्वर्धस्व चा च प्यायस्व । व्वर्धिषीमहि च व्वयमा च प्यासिषीमही"ति तद्यथैवादः समिध्यमानायान्वाहैवमेवैतदन्वाह तदेतद्धोतुः कर्म स यदि मन्येत न होता व्वेदेत्यपि स्वयमेव यजमानोऽनुमन्त्रयेत॥४॥अथ सम्मार्ष्टि । युनक्त्येवैनमेतद्युक्तो यदत ऊर्ध्वमसꣳस्थितं यज्ञस्य तद्वहादिति तस्मात्सम्मार्ष्टि सकृत्सकृत्संमार्ष्टि त्रिस्त्रिर्वाऽअग्रे देवेभ्यः सम्मृजन्ति नेत्तथा करवाम यथा देवेभ्यऽइति तस्मात्सकृत्सकृत्सम्माष्टर्यजामितायै जामि ह कुर्याद्यत्त्रिः पूर्वं त्रिरपरं तस्मात्सकृत्सकृत्सम्मार्ष्टि ॥५॥ स सम्मार्ष्टि । "अग्ने व्वाजजिद्वाजं त्वा ससृवाꣳसं व्वाजजितꣳसम्माज्मी"ति सरिष्यन्तमिति वाऽअग्रऽआह सारिष्यन्निव हि तर्हि भवत्यथात्र ससृवाꣳसमिति ससृवेव ह्यत्र भवति तस्मादाह ससृवाꣳसमिति ॥ ६ ॥ अथानुयाजान्यजति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्यऽएष यज्ञस्तायते सर्वा वै तत्ता

१. मा. सं. २. १४. २. मा. सं. २. १४.

ऽइष्टा भवन्ति तद्यत्तासु सर्वास्विष्टास्वथैतत्पश्चेवानुयजति तस्माद-
नुयाजा नाम ॥७॥ अथ यदनुयाजान्यजति । छन्दाꣳसि वाऽअनु-
याजाः पशवो वै देवानां छन्दाꣳसि तद्यथेदं पशवो युक्ता मनुष्ये-
भ्यो व्वहन्त्येवं छन्दाꣳसि युक्तानि देवेभ्यो यज्ञं व्वहन्ति तद्यत्र
छन्दाꣳसि देवान्त्समतर्प्पयन्नथ छन्दाꣳसि देवाः समतर्प्पयंस्तदत-
स्तत्प्रागभूद्यच्छन्दाꣳसि युक्तानि देवेभ्यो यज्ञमवाक्षुर्यदेनान्त्समती
तृपन् ॥८॥ अथ यदनुयाजान्यजति । छन्दाꣳसि वाऽअनुयाजाश्छ-
न्दाꣳस्येवैतत्सन्तर्प्पयति तस्मादनुयाजान्यजति तस्माद्येन व्वाहनेन
धावयेत्तद्विमुच्य ब्रूयात्पाययतैनत्सुहितं कुरुतेत्येषऽउ व्वाहनस्या-
पह्नवः ॥९॥ स वै खलु वर्हिः प्रथमं यजति । तद्वै कनिष्ठं छन्दः
सद्गायत्री प्रथमा छन्दसां युज्यते तदु तद्वीर्येणैव यच्छ्येनो
भूत्वा दिवः सोममाहरत्तदयथायथं मन्यन्ते यत्कनिष्ठं छन्दः
सद्गायत्री प्रथमा छन्दसां युज्यतेऽथात्र यथायथं देवाश्छन्दा-
ꣳस्यकल्पयन्ननुयाजेषु नेत्यापवस्यसमसदिति ॥ १० ॥ स वै
खलु वर्हिः प्रथमं यजति । अयं वै लोको वर्हिरोषधयो वर्हिरस्मिन्ने-
वैतल्लोकऽओषधीर्दधाति ताऽइमाऽअस्मिल्लोकऽओषधयः प्रतिष्ठिता-
स्तदिदꣳ सर्व्वं जगदस्यां तेनेयं जगती तज्जगतीं प्रथमामकुर्व्वन् ॥ ११ ॥
अथ नराशꣳसं द्वितीयं यजति । अन्तरिक्षं वै नराशꣳसः प्रजा वै
नरस्ता ऽइमा ऽअन्तरिक्षमनु वावद्यमानाः प्रजाश्चरन्ति यद्वै व्वदति श-
ꣳसतीति वै तदाहुस्तस्मादन्तरिक्षं नराशꣳसोऽन्तरिक्षमु वै त्रिष्टुप्तत्त्रि-
ष्टुभं द्वितीयामकुर्व्वन् ॥ १२ ॥ अथाग्निरुत्तमः । गायत्री वाऽअग्निस्तद्गा-
यत्रीमुत्तमामकुर्व्वन्नेवं यथायथेन क्लृप्तेन छन्दाꣳसि प्रत्यतिष्ठंस्तस्मादि-
दमपापवस्यसम् ॥ १३ ॥ देवान्यजेत्येवाध्वर्युराह । देवं देवमिति सर्वेषु
होता देवानां वै देवाः सन्ति छन्दाꣳस्येव पशवो ह्येषां गृहा हि
पशवः प्रतिष्ठो हि गृहाश्छान्दाꣳसि वाऽअनुयाजास्तस्माद्देवान्यजे-

१. नाम इति. क. पु. २. अपह्नव इति. ग. पु.

त्येवाध्वर्युराह देवं देवमिति सर्वेषु होता ॥१४॥ "व्वसुवने व्वसुधेयस्ये"ति। देवतायाऽएव व्वषट्क्रियते देवतायै हूयते न वाऽअत्र देवतास्त्यनुयाजेषु देवं बर्हिरिति तत्र नाग्निर्नेन्द्रो न सोमो देवो नराशꣳसऽइति नातऽएकं चन यो वाऽअत्राग्निर्गायत्री सा निदानेन ॥१५॥ अथ यद्वसुवने व्वसुधेयस्येति यजति । अग्निर्वै व्वसुवनिरिन्द्रो व्वसुधेयोऽस्ति वै छन्दसां देवतेन्द्राग्नी ऽएवैवमु हैतद्देवतायाऽएव व्वषट्क्रियते देवतायै हूयते ॥१६॥ अथोत्तममनुयाजमिष्ट्वा समानीय जुहोति । प्रयाजानुयाजा वाऽएते तद्यथैवादः प्रयाजेषु यजमानाय द्विषन्तं भ्रातृव्यं बलिꣳ हारयत्यत्रऽआद्यं बलिꣳ हारयत्येवमेवैतदनुयाजेषु बलिꣳ हारयति॥१७॥ Cf. का. श. २. ७. ४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे षष्ठप्रपाठके चतुर्थं ब्राह्मणम् ॥

षष्ठः प्रपाठकस्समाप्तः ॥

(कण्डिकाः १११.)

---

१. ७. १.

स वै स्रुचौ व्यूहति । "अग्नीषोमयोरुज्जितिमनूज्जेषं व्वाजस्य मा प्रसवेन प्रोहामी"ति जुहूं प्राचीं दक्षिणेन पाणिनाग्नीषोमौ तमपनुदतां योऽस्मान्द्वेष्टि यं च वयं द्विष्मो व्वाजस्यैनं प्रसवेनापोहामीत्युपभृतं प्रतीचीꣳ सव्येन पाणिना यदि स्वयं यजमानः ॥ १ ॥ यद्युऽअध्वर्युः। "अग्नीषोमयोरुज्जितिमनूज्जयत्वयं यजमानो व्वाजस्यैनं प्रसवेन प्रोहाम्यग्नीषोमौ तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि व्वाजस्यैनं प्रसवेनापोहामी"ति पौर्णमास्यामग्नीषोमीयंꣳ हि पौर्णमासꣳ हविर्भवति ॥२॥ अथामावास्यायाम् । "इन्द्राग्न्योरुज्जितिमनूज्जेषं व्वाजस्य मा प्रसवेन प्रोहामीन्द्राग्नी तमपनुदतां योऽ-

---

१. म निदानेनेति. क. ग. पु. २. मा. सं. २. १५. ३. मा. सं. २. १५.

स्मान्द्वेष्टि यं च वयं द्विष्मो व्वाजस्यैनं प्रसवेनापोहामी"ति यदि स्वयं यजमानः ॥३॥ यद्युऽअध्वर्य्युः । "इन्द्राग्न्योरुज्जितिमनूज्जयत्वयं यजमानो व्वाजस्यैनं प्रसवेन प्रोहामीन्द्राग्नी तमपनुदतां यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि व्वाजस्यैनं प्रसवेनापोहामी"त्यमावास्यायामैन्द्राग्नꣳ ह्यामावास्यꣳ हविर्भवत्येवं यथादेवतं व्यूहति तद्यदेवं व्यूहति ॥ ४ ॥ यजमानऽएव जुहूमनु । योऽस्माऽअरातीयति सऽउपभृतमनु प्राञ्चमेवैतद्यजमानमुदूहत्यपाञ्चं तमपोहति योऽस्माऽअरातीयत्यत्तैव जुहूमन्वाद्यऽउपभृतमनु प्राञ्चमेवैतदत्तारमुदूहत्यपाञ्चमाद्यमपोहति ॥ ५ ॥ तद्वाऽएतत् । समानऽएव कर्मन् व्याक्रियते तस्मादु समानादेव पुरुषादत्ता चाद्यश्च जायेतेऽइदꣳ हि चतुर्थे पुरुषे तृतीये सङ्गच्छामहऽइति व्विदेवं दीव्यमाना जात्या ऽआसतऽएतस्मादु तत् ॥ ६ ॥ अथ जुह्वा परिधीन्त्समनक्ति । यया देवेभ्योऽहौषीद्यया यज्ञꣳ समतिष्ठिपत्तयैवैतत्परिधीन् प्रीणाति तस्माज्जुह्वा परिधीन्त्समनक्ति ॥७॥ स समनक्ति । "व्वसुभ्यस्त्वा रुद्रेभ्यस्त्वादित्येभ्यस्त्वे" त्येते वै त्रया देवा यद्वसवो रुद्राऽआदित्याऽएतेभ्यस्त्वेत्येवैतदाह ॥ ८ ॥ अथ परिधिमभिपद्याश्रावयति । परिधिभ्यो ह्येतदाश्रावयति यज्ञो वाऽआश्रावणं यज्ञेनैवैतत्प्रत्यक्षं परिधीन् प्रीणाति तस्मात्परिधिमभिपद्याश्रावयति ॥ ९ ॥ सऽआश्राव्याह । "इषिता दैव्या होतार"ऽइति दैव्या वाऽएते होतारो यत्परिधयोऽग्नयो हीष्टा दैव्या होतारऽइत्येवैतदाह यदाहेषिता दैव्या होतारऽइति भद्रवाच्यायेति स्वयं वाऽएतस्मै देवा युक्ता भवन्ति यत्साधु व्वदेयुर्यत्साधु कुर्युस्तस्मादाह भद्रवाच्यायेति प्रेषितो मानुषः सूक्तवाकायेति तदिमं मानुषꣳ होतारꣳ सूक्तवाकाय प्रसौति ॥१०॥ अथ प्रस्तरमादत्ते । यजमानो वै प्रस्तरस्तद्यत्रास्य यज्ञोऽगंस्तद्वैतद्यजमानꣳ स्वगाकरो-

१. जुहूमनु इति. ग. पु. २. तदिति. ग. पु. ३. मा. सं. २, १६
४. त्रयो देवा इति. ग. पु.

ति देवलोकं वाऽअस्य यज्ञोऽगन्देवलोकमेवैतद्यजमानमपिनयति ॥ ११ ॥ स यदि व्वृष्टिकामः स्यात् । एतेनैवाददीत "सञ्ज्ञानाथां द्यावापृथिवी"ऽइति यदा वै द्यावापृथिवी सञ्ज्ञानातेऽअथ व्वर्षति तस्मादाह सञ्ज्ञानाथां द्यावापृथिवीऽइति "मित्रावरुणौ त्वा व्वृष्ट्यावतामिति तद्यो व्वर्षस्येष्टे स त्वा व्वृष्ट्यावत्वित्येवैतदाहायं वै व्वर्षस्येष्टे योऽयं पवते सोऽयमेकऽइवैव पवते सोऽयं पुरुषेऽन्तः प्रविष्टः प्राङ्च प्रत्यङ्च ताविमौ प्राणोदानौ प्राणोदानौ वै मित्रावरुणौ तद्यऽएव व्वर्षस्येष्टे स त्वा व्वृष्ट्यावत्वित्येवैतदाह तमेतेनैवाददीत यदा ह्येव कदा च व्वृष्टिः शामिव तमनक्त्याहुतिमेवैतत्करोत्याहुतिर्भूत्वा देवलोकं गच्छादिति ॥ १२ ॥ स वाऽअग्रं जुह्वामनक्ति । मध्यमुपभृति मूलं ध्रुवायामग्रमिव हि जुहूर्मध्यमिवोपभृन्मूलमिव ध्रुवा ॥ १३ ॥ सोऽनक्ति । "व्यन्तु व्वयोक्तꣳ रिहाणा"ऽइति व्वयऽएवैनमेतद्भूतमस्मान्मनुष्यलोकाद्देवलोकमभ्युत्पातयति तन्नीचैरिव हरति द्वयं तद्यस्मान्नीचैरिव हरेद्यजमानो वै प्रस्तरोऽस्याऽएवैनमेतत्प्रतिष्ठायै नोद्धन्तीहोऽएव व्वृष्टिं नियच्छति ॥ १४ ॥ स हरति । "मरुतां पृषतीर्गच्छे"ति देवलोकं गच्छेत्येवैतदाह यदाह मरुतां पृषतीर्गच्छेति "व्वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो व्वृष्टिमावहे"तीयं व्वै व्वशा पृश्निर्यदिदमस्यां मूलि चामूलं चान्नाद्यं प्रतिष्ठितं तेनेयं व्वशा पृश्निरियं भूत्वा दिवं गच्छेत्येवैतदाह ततो नो व्वृष्टिमावहेति व्वृष्टाद्धाऽऊर्ग्रसः सुभूतं जायते तस्मादाह ततो नो व्वृष्टिमावहेति ॥ १५ ॥ अथैकं तृणमपगृह्णाति । यजमानो वै प्रस्तरः स यत्कृत्स्नं प्रस्तरमनुप्रहरेत् क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति यावद्वेवास्येह मानुषमायुस्तस्माऽएवैतदपगृह्णाति ॥ १६ ॥ तन्मुहूर्त्तं धारयित्वानुप्रहरति । तद्यत्रास्येतरऽआत्मा-

१. ३. मा. सं. २. १६. २. सञ्ज्ञानाथे इति. ग. पु. ४. समिवेति. क. ग. पु.
५. मा. सं. २. १६. ६. मा. सं. २. १६. ७. मा. सं. २. १६.

गंस्तदेवास्यैतद्गमयत्यथ यन्नानुप्रहरेदन्तरियाद्ध यजमानं लोकात्तथो ह यजमानं लोकान्नान्तरेति ॥ १७ ॥ तं प्राञ्चमनुसमस्यति । प्राची हि देवानां दिगथोऽउदञ्चमुदीची हि मनुष्याणां दिक्तमङ्गुलिभिरेव योयुप्येरन्न काष्ठैर्दारुभिर्वाऽइतरꣳ शवं व्यृषन्ति नेत्तथा करवाम यथेतरꣳ शवमिति तस्मादङ्गुलिभिरेव योयुप्येरन्न काष्ठैर्यदा होता सूक्तवाकमाह ॥ १८ ॥ अथाग्नीदाहानुप्रहरेति । तद्यत्रास्येतरऽआत्मागंस्तदेवास्यैतद्गमयेत्येवैतदाह तूष्णीमेवानुप्रहृत्य "चक्षुष्पाऽअग्नेऽसि चक्षुर्मे पाहि"त्यात्मानमुपस्पृशति तेनोऽअप्यात्मानं नानुप्रवृणक्ति ॥ १९ ॥ अथाह "संव्वदस्वे"ति । संवादयैनं देवैरित्येवैतदाहागानग्नीदित्यगन् खल्वित्येवैतदाहागान्नितीतरःप्रत्याह 'श्रावये'ति तं वै देवैः श्रावय तमनुबोधयेत्येवैतदाह 'श्रौषड्'ति व्विदुर्व्वाऽएनमनु वाऽएनमभुत्सतेत्येवैतदाहैवमध्वर्युश्चाग्नीच्च देवलोकं यजमानमपिनयतः ॥२०॥ अथाह "स्वगा दैव्या होतृभ्य"ऽइति । दैव्या वाऽएते होतारो यत्परिधयोऽग्नयो हि तानेवैतत्स्वगाकरोति तस्मादाह स्वगा दैव्या होतृभ्यऽइति "स्वस्तिर्मानुषेभ्य"ऽइति तदस्मै मानुषाय होत्रेऽह्वलामाशास्ते ॥ २१ ॥ अथ परिधीननुप्रहरति । स मध्यममेवाग्रे परिधिमनुप्रहरति "यं परिधिं पर्यधत्थाऽअग्ने देव पणिभिर्गुह्यमानः । तं तऽएतमनु जोषं भराम्येष नेत्त्वदपचेतयाता"ऽइत्य "ग्नेः प्रियं पाथोऽपीतमि"तीतरावनुसमस्यति ॥ २२ ॥ अथ जुहूं चोपभृतं च सम्प्रगृह्णाति । अदो हैवाहुतिं करोति यदनक्त्याहुतिर्भूत्वा देवलोकं गच्छादिति तस्माज्जुहूं चोपभृतं च सम्प्रगृह्णाति ॥ २३ ॥ स वै व्विश्वेभ्यो देवेभ्यः सम्प्रगृह्णाति । यद्वाऽअनादिष्टं देवतायै हविर्गृह्यते सर्व्वा वै तस्मिन्देवताऽअपित्विन्यो मन्यन्ते न वाऽएतत्कस्यै चन देवतायै हविर्गृह्णन्नादिशति यदाज्यं तस्माद्विश्वेभ्यो देवेभ्यः सम्प्रगृह्णात्येतदु व्वैश्वदेवꣳ हविर्यज्ञे ॥ २४ ॥ स सम्प्रगृह्णाति । "सꣳ

१. मा. स. २. १६. २. आशास्ते इति. क. ग. पु.
३. मा. सं. २. १७. ४. मा. सं. २. १८.

स्रुवभागा स्थेषा बृहन्त''ऽइति सꣳस्रुवो ह्येव खलु परिशिष्टो भवति ''प्रस्तरेष्टाः परिधेयाश्च देवा''ऽइति प्रस्तरश्च हि परिधयश्चानुप्रहृता भवन्ती''मां व्वाचमभि विश्वे गृणन्त''ऽइत्येतदु व्वैश्वदेवं करो''त्यासद्यास्मिन् बर्हिषि मादयध्वꣳ स्वाहा व्वाड्ि''ति तद्यथा व्वषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥ २५ ॥ स यस्यानसो हविर्गृह्णन्ति । अनसस्तस्य धुरि व्विमुञ्चन्ति यतो युनजाम ततो व्विमुञ्चामेति यतो ह्येव युञ्जन्ति ततो व्विमुञ्चन्ति यस्यो पाश्यै स्फ्ये तस्य यतो युनजाम ततो व्विमुञ्चमेति यतो ह्येवं युञ्जन्ति ततो व्विमुञ्चन्ति ॥ २६ ॥ युजो ह वाऽएते यज्ञस्य यत्स्रुचौ । तेऽएतद्युङ्क्ते यत्प्रचरति स यं निधायावद्येद्यथा व्वाहनमवाच्छेदेवं तत्तेऽएतत्स्विष्टकृति व्विमोचनमागच्छतस्ते तत्सादयति तद्विमुञ्चति तेऽएतत्पुनः प्रयुङ्क्तेऽनयाजेषु सोऽनयाजैश्चरित्वैतद्विमोचनमागच्छति ते तत्सादयति तद्विमुञ्चति तेऽएतत्पुनः प्रयुङ्क्ते यत्सम्प्रगृह्णाति तद्यां गतिमभियुङ्क्ते तां गतिं गत्वा व्विमुञ्चते यज्ञं वाऽअनु प्रजास्तस्मादयं पुरुषो युङ्क्तेऽथ व्विमुञ्चतेऽथ युङ्क्ते तद्यां गतिमभियुङ्क्ते तां गतिं गत्वान्ततो व्विमुञ्चते स सादयति ''घृताची स्थो धुर्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्त''मिति साध्व्यौ स्थः साधौ मा धत्तमित्येवैतदाह॥२७॥

Cf. का. श. २. ८. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे सप्तमप्रपाठके प्रथमं ब्राह्मणम् ॥

(इत्यष्टमोऽध्यायः)

१. ७. २.

स यत्राह । ''इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मा-

१. मा. सं. २. १८. २. मा. सं. २. १८. ३. मा. सं. २. १८.
४. युनजाम इति. क. ग. ५. ह्येवमिति. ग. पु.
६. आगच्छतस्ते तत्सादयतीति. क. पु. ७. मा. सं. २. १९.
८. नाऽयं सांहितिको मन्त्रः ।

नुषः सूक्तवाकाये"ति यदनो होतान्वाह सूक्तैव तदाह यजमाना-
यैवैतदाशिषमाशास्ते तद्वाऽएतदुपरिष्टाद्यज्ञस्याशिषमाशास्ते द्वयं
तद्यस्मादुपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥१॥ यज्ञं वाऽएष जनयति ।
यो यजतऽएतेन ह्युक्ता ऋत्विजस्तन्वते तं जनयन्त्यथाशिषमाशास्ते
तामस्मै यज्ञऽआशिषꣳ सन्नमयति यामाशिषमाशास्ते यो माजीजन-
तेति तस्माद्वाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥ २ ॥ देवान्वाऽएष
प्रीणाति । यो यजतऽएतेन यज्ञेनर्ग्भिरिव त्वद्यजुर्भिरिव त्वादाहु-
तिभिरिव त्वत्स देवान् प्रीत्वा तेष्वपित्वी भवति तेष्वपित्वी भूत्वाथा-
शिषमाशास्ते तामस्मै देवाऽआशिषꣳ सन्नमयन्ति यामाशिषमाशास्ते
यो नोऽप्रैषीदिति तस्माद्वाऽउपरिष्टाद्यज्ञस्याशिषमाशास्ते ॥ ३ ॥ अथ
प्रतिपद्यते । "इदं द्यावापृथिवी भद्रमभूदि"ति भद्रꣳ ह्यभूद्यो यज्ञस्य
सꣳस्थामगन्ना"ध्र्म सूक्तवाकमुत नमोवाकमि"त्युभयं वाऽएतद्यज्ञऽएव
यत्सूक्तवाकश्च नमोवाकश्चारात्स्म यज्ञमविदाम यज्ञमित्येवैतदा-
हा"ग्ने त्वꣳ सूक्तवागस्युपश्रुती दिवस्पृथिव्यो"रित्यग्निमेवैतदाह
त्वꣳ सूक्तवागस्युपश्रृण्वत्योरनयोर्द्यावापृथिव्योरि"त्योमन्वती तेऽ-
स्मिन्यज्ञे यजमान द्यावापृथिवी स्ता"मित्यन्नवत्यौ तेऽस्मिन्यज्ञे यज-
मान द्यावापृथिवी स्तामित्येवैतदाह ॥ ४ ॥ "शङ्गवी जीवदानू"ऽ-
इति । शंगवी ते जीवदानू स्तामित्येवैतदाहा"त्रस्नूऽअप्रवेदे"ऽइति
माह कस्माच्चन प्रत्रासीर्मो तऽइदं पुष्टं कश्चन प्रविदतेत्येवैतदाह ॥५॥
"उरुगव्यूतीऽअभयङ्कृता"विति । उरुगव्यूती तेऽभये स्तामित्येवै-

१. सूक्तऽइवेति ग. पु. २. यजतऽर्ग्भिरिवेति. क. ग. पु.

३. नोऽप्रैषीदिति हीति. क. ग. पु.

४. सूक्तवाकमन्त्रस्समग्रोऽ आश्वलायनश्रौतसूत्रे पठितः । तैत्तिरीयब्राह्मणे तु किञ्चिदिव वैपरीत्येन पठितः । See तै. ब्रा. ३. ५. १०, आश्व. श्रौ. १. ९. ९.

५. यज यजमान इति. क. ग. पु. ६. शंगवी इति. क. ग. पु.

७. अप्रवेदेऽइति माह कस्माच्चन प्रत्रासीरिति. क. ग. पु.

तदाह "व्वृष्टिद्यावा रीत्यापे"ति व्वृष्टिमत्यौ ते स्तामित्येवैतदाह॥६॥ "शम्भुवौ मयोभुवा"विति । शम्भुवौ ते मयोभुवौ स्तामित्येवैतदाहो"र्ज्जस्वती च पयस्वती" चेति रसवत्यौ तऽउपजीवनीये स्तामित्येवैतदाह ॥ ७ ॥ "सूपचरणा च स्वधिचरणा चे"ति । सूपचरणाह तेऽसावस्तु यामधस्तादुपचरसि स्वधिचरणा तऽइयमस्तु यामुपरिष्टादधिचरसीत्येवैतदाह "तयोराविदी"ति तयोरनुमन्यमानयोरित्येवैतदाह ॥ ८ ॥ "अग्निरिद्ँ हविः । अजुषतावीवृधत महो ज्यायोऽकृते"ति तदाग्नेयमाज्यभागमाह "सोमऽइद्ँ हविरजुषतावीवृधत महो ज्यायोऽकृते"ति तत्सौम्यमाज्यभागमाहा"ग्निरिद्ँ हविरजुषतावीवृधत महो ज्यायोऽकृते"ति तद्य ऽएषऽउभयत्राच्युत ऽआग्नेयः पुरोडाशो भवति तमाह ॥ ९ ॥ अथ यथादेवतम् । "देवाऽआज्यपाऽआज्यमजुषन्तावीवृधन्त महो ज्यायोऽकृते"ति तत्प्रयाजानुयाजानानाह प्रयाजानुयाजा वै देवाऽआज्यपाऽ"अग्निर्होत्रेणेद्ँ हविरजुषतावीवृधत महो ज्यायोऽकृते"ति तदग्निँ होत्रेणाहाजुषतेत्येवं याऽइष्टा देवता भवन्ति ताः सम्पश्यत्यसौ हविरजुषतासौ हविरजुषतेति तद्यज्ञस्यैवैतत्समृद्धिमाशास्ते यद्धि देवा हविर्जुषन्ते तेन हि महज्जयति तस्मादाहाजुषतेत्यवीवृधतेति यद्वै देवा हविर्जोषयन्ते तदपि गिरिमात्रं कुर्व्वते तस्मादाहावीवृधतेति ॥ १० ॥ महो ज्यायोऽकृतेति । यज्ञो वै देवानां महस्तँ ह्येतज्ज्यायाᳬसमिव कुर्व्वते तस्मादाह महो ज्यायोऽकृतेति ॥ ११ ॥ "अस्यामृधेद्धोत्रायां देवङ्गमाया"मिति । अस्याँ राध्नोतु होत्रायां देवङ्गमायामित्येवैतदाहा"शास्तेऽयं यजमानोऽसा"विति नाम गृह्णाति तदेनं प्रत्यक्षमाशिषा सम्पादयति ॥ १२ ॥ "दीर्घायुत्वमाशास्त"ऽइति । सा यामुत्रोत्तरा देवयज्या तदिह प्रत्यक्षं दीर्घायुत्वँ ॥ १३ ॥ "सुप्रजास्त्वमाशा-

१. यामधस्तादिति क. ग. पु. २, ४. ज्यायोऽकृतेति ख. पु.

३. कुर्व्वत इति. क. ग. पु.

स्त''ऽइति । तद्यदमुत्र भूयो हविष्करणं तदिह प्रत्यक्षꣳ सुप्रजास्त्वं प्रशासनꣳ स कुर्य्याद्यऽएवं कुर्या''दुत्तरां देवयज्यामाशास्त''ऽइति त्वेव ब्रूयात्तदेव जीवातुं तत्प्रजां तत्पशून् ॥ १४ ॥ ''भूयो हविष्करणमाशास्त''ऽइति । तद्वेव त''त्सजातवनस्यामाशास्त''ऽइति प्राणा वै सजाताः प्राणैर्हि सह जायते तत्प्राणानाशास्ते ॥ १५ ॥ ''दिव्यं धामाशास्तऽ''इति । देवलोके मेऽप्यसदिति वै यजते यो यजते तद्देवलोकऽएवैनमेतदपित्विनं करोति ''यदनेन हविषाशास्ते तदश्यात्तद्दध्या''दिति यदनेन हविषाशास्ते तदस्मै सर्वꣳ समृध्यतामित्येवैतदाह ॥ १६ ॥ ता वाऽएताः । पञ्चाशिषः करोति तिस्र इडायां ता ऽअष्टावष्टाक्षरा वै गायत्री व्वीर्यं गायत्री व्वीर्यमेवैतदाशिषोऽभिसम्पादयति ॥ १७ ॥ नातो भूयसीः कुर्यात् । अतिरिक्तꣳ ह कुर्याद्यदतो भूयसीः कुर्याद्यद्वै यज्ञस्यातिरिक्तं द्विपन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते तस्मान्नातो भूयसीः कुर्यात् ॥ १८ ॥ अपीद्वै कनीयसीः सप्त । ''तदस्मै देवा रासन्ता''मिति तदस्मै देवा ऽअनुमन्यन्तामित्येवैतदाह ''तदग्निर्देवो देवेभ्यो व्वनुतां व्वयमग्नेः परि मानुषा''ऽइति तदग्निर्देवो देवेभ्यो व्वनुतां व्वयमग्नेरध्यस्माऽएतद्वनवामहाऽइत्येवैतदाह ॥ १९ ॥ ''इष्टं च व्वित्तञ्चे''ति । ऐषिषुरिव वाऽएतद्यज्ञं तमविदंस्तस्मादाहेष्टं च व्वित्तं चे''त्युभे चैनं द्यावापृथिवीऽअꣳहसस्पाता''मित्युभे चैनं द्यावापृथिवीऽआर्त्तेर्गोपायतामित्येवैतदाह ॥२०॥ तदु हैकऽआहुः । उभे च मेति तथा होताशिषऽआत्मानं नान्तरेतीति तदु तथा न ब्रूयाद्यजमानस्य वै यज्ञऽआशीः किं नु तत्रर्त्विजां यां वै काञ्च यज्ञऽऋत्विजऽआशिषमाशासते यजमानस्यैव सा न ह सऽएतां क चनाशिषं प्रतिष्ठापयति यऽआहोभे च मेति तस्मादु ब्रूयादुभे चैनमित्येव ॥२१॥ ''इह गति-

१. पशून् इति. क. पु. २. एताः इति. क. पु. ३. वित्तं चेति इति. क. पु.
४. ऐषिषुरिति. क. ग. पु. ५. यऽआहेति. क. ग. पु.

र्व्वामस्ये''ति । तद्यदेव यज्ञस्य साधु तदेवास्मिन्नेतद्दधाति तस्मादाहेह गतिर्व्वामस्येति॥२२॥''इदं च नमो देवेभ्य'' ऽइति । तद्यज्ञस्यैवैतत्सꣳस्थां गत्वा नमो देवेभ्यः करोति तस्मादाहेदं च नमो देवेभ्य ऽइति ॥२३॥ अथ शंयोराह । शंयुर्ह वै बार्हस्पत्योऽञ्जसा यज्ञस्य सꣳस्थां व्विदां चकार स देवलोकमपीयाय तत्तदन्तर्हितमिव मनुष्येभ्यऽआस ॥२४॥ तद्वाऽऋषीणामनुश्रुतमास । शंयुर्ह वै बार्हस्पत्योऽञ्जसा यज्ञस्य सꣳस्थां व्विदां चकार स देवलोकमपीयायेति ते तामेव यज्ञस्य सꣳस्थामुपायन् याꣳ शंयुर्बार्हस्पत्योऽवेद्यच्छंयोरब्रुवंस्तां वेवैषऽएतद्यज्ञस्य सꣳस्थामुपैति याꣳ शंयुर्बार्हस्पत्योऽवेद्यच्छंयोराह तस्माद्वै शंयोराह ॥२५॥ स प्रतिपद्यते । ''तच्छंयोरावृणीमह''ऽइति तां यज्ञस्य सꣳस्थामावृणीमहे याꣳ शंयुर्बार्हस्पत्योऽवेदित्येवैतदाह ॥२६॥ ''गातुं यज्ञाय गातुं यज्ञपतय''ऽइति । गातुꣳह्येष यज्ञायेच्छति गातुं यज्ञपतये यो यज्ञस्य सꣳस्थां ''दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्य''ऽइति स्वस्ति नो देवत्रास्तु स्वस्ति मनुष्यत्रेत्येवैतदाहो''र्ध्वं जिगातु भेषज''मित्यूर्ध्वं नोऽयं यज्ञो देवलोकं जयत्वित्येवैतदाह ॥२७॥ ''शं नोऽअस्तु द्विपदे शं चतुष्पद''ऽइति । एतावद्वाऽइदꣳ सर्व्वं यावद्द्विपाच्चैव चतुष्पाच्च तस्माऽएवैतद्यज्ञस्य सꣳस्थां गत्वा शं करोति तस्मादाह शं नोऽअस्तु द्विपदे शं चतुष्पदऽइति ॥२८॥ अथानयेत्युपस्पृशति । अमानुष ऽइव वाऽएतद्भवति यदार्त्विज्ये प्रवृतऽइयं वै पृथिवी प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तदु खलु पुनर्मानुषो भवति तस्मादनयेत्युपस्पृशति ॥ २९ ॥ Cf. का. श. २. ८. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे सप्तमप्रपाठके द्वितीयं ब्राह्मणम् ॥

१. इति क. पु. २. ऊर्ध्वो ख. पु. ३. तस्मादनयेत्युपस्पृशतीति. क. ग. पु.

१. ७. ३.

ते वै पत्नीः संयाजयिष्यन्तः प्रतिपरायन्ति । जुहूं च स्रुवं चाध्वर्युरादत्ते व्वेदꣳहोताज्यविलापनीमग्नीत् ॥ १ ॥

(अर्द्धप्रपाठकः ॥ १७ ॥)

तद्धैकेषामध्वर्युः । पूर्व्वेणाहवनीयं पर्येति तदु तथा न कुर्याद्बहिर्धा ह यज्ञात्स्याद्यत्तेनेयात् ॥२॥ जघनेनो हैव पत्नीम् । एकेषामध्वर्युरेति नोऽएव तथा कुर्यात्पूर्व्वार्धो वै यज्ञस्याध्वर्युर्ज्जघनार्धः पत्नी यथा भसत्तः शिरः प्रतिदध्यादेवं तद्बहिर्धा हैव यज्ञात्स्याद्यत्तेनेयात् ॥३॥अन्तरेणो हैव पत्नीम् । एकेषामध्वर्युरेति नोऽएव तथा कुर्यादन्तरियाद्ध यज्ञात्पत्नीं यत्तेनेयात्तस्मादु पूर्वेणैव गार्हपत्यमन्तरेणाहवनीयं चैति तथा ह न बहिर्धा यज्ञाद्भवति यथोऽएवादः प्रचरन्नन्तरेण सञ्चरति स ऽउऽएवास्यैष सञ्चरो भवति ॥ ४ ॥ अथ पत्नीः संयाजयन्ति । यज्ञाद्वै प्रजाः प्रजायन्ते यज्ञात्प्रजायमाना मिथुनात्प्रजायन्ते मिथुनात्प्रजायमानाऽअन्ततो यज्ञस्य प्रजायन्ते तदेनाऽएतदन्ततो यज्ञस्य मिथुनात्प्रजननात्प्रजनयति तस्मान्मिथुनात्प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते तस्मात्पत्नीः संयाजयन्ति ॥ ५ ॥ चतस्रो देवता यजति । चतस्रो वै मिथुनं द्वन्द्वं वै मिथुनं द्वे द्वे हि खलु भवतो मिथुनमेवैतत्प्रजननं क्रियते तस्माच्चतस्रो देवता यजति ॥६॥ ता वाऽआज्यहविषो भवन्ति । रेतो वाऽआज्यꣳरेतऽएवैतत्सिञ्चति तस्मादाज्यहविषो भवन्ति ॥ ७ ॥ तेनोपाꣳशु चरन्ति । तिरऽइव वै मिथुनेन चर्यते तिरऽइवैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥ ८ ॥ अथ सोमं यजति । रेतो वै सोमो रेतऽएवैतत्सिञ्चति तस्मात्सोमं यजति ॥ ९ ॥ अथ त्वष्टारं यजति । त्वष्टा वै सिक्तꣳरेतो व्विकरोति तदेषऽएवैतत्सिक्तꣳरेतो व्विकरोति तस्मात्त्वष्टारं यज-

१. अग्नीदिति. क. पु. २. अध्वर्युरिति. क. पु ३. तेनेयात् इति क. पु.
४. यजतीति. क. ग. पु.

ति ॥ १० ॥ अथ देवानां पत्नीर्यजति । पत्नीषु वै योनौ रेतः प्रतिष्ठितं तत्ततः प्रजायते तत्पत्नीष्वेवैतद्योनौ रेतः सिक्तं प्रतिष्ठापयति तत्ततः प्रजायते तस्माद्देवानां पत्नीर्यजति ॥ ११ ॥ स यत्र देवानां पत्नीर्यजति । तत्पुरस्तात्तिरः करोत्युप ह वै तावद्देवता ऽआसते यावन्न समिष्टयजुर्जुह्वतीदं नु नो जुह्वन्विति ताभ्य ऽएवैतात्तिरः करोति तस्मादिमा मानुष्य स्त्रियस्तिर ऽइवैव पुꣳसो जिघत्सन्ति या ऽइव तु ता ऽइवेति ह स्माह याज्ञवल्क्यः ॥१२॥ अथाग्निं गृहपतिं यजति । अयं वाऽअग्निर्लोकऽइममेवैतल्लोकमिमाः प्रजा ऽअभि प्रजनयति ता ऽइमं लोकमिमाः प्रजा ऽअभिप्रजायन्ते तस्मादग्निं गृहपतिं यजति ॥ १३ ॥ तदिडान्तं भवति । न ह्यत्र परिधयो भवन्ति न प्रस्तरो यत्र वाऽअदः प्रस्तरेण यजमानꣳ स्वगाकरोति पतिं वाऽअनु जाया तदेवास्यापि पत्नी स्वगाकृता भवतीयमि तꣳ ह कुर्याद्यत्प्रस्तरस्य रूपं कुर्यात्तस्मादिडान्तमेव स्यादुतो प्रस्तरस्यैव रूपं क्रियते ॥ १४ ॥ स यदि प्रस्तरस्य रूपं कुर्यात् । यथैवादः प्रस्तरेण यजमानꣳ स्वगाकरोत्येवमेवैतत्पत्नीꣳ स्वगाकरोति ॥ १५ ॥ स यदि प्रस्तरस्य रूपं कुर्यात् । व्वेदस्यैकं तृणमाच्छिद्याग्रं जुह्वामनक्ति मध्यꣳ स्रुवे बुध्नꣳ स्थाल्याम् ॥१६॥ अथाग्नीदाहा"नुप्रहरे"ति । तूष्णीमेवानुप्रहृत्य "चक्षुष्पा ऽअग्नेऽसि चक्षुर्मे पाही"त्यात्मानमुपस्पृशति तेनोऽअप्यात्मानं नानुप्रवृणक्ति ॥ १७ ॥ अथाह "संव्वदस्वे"ति । "अगानग्नीदगच्छावय । श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्बृही"ति ॥ १८ ॥ अथ जुहूं च स्रुवं च सम्प्रगृह्णाति । अदो हैवाहुतिं करोति यदनक्त्याहुतिर्भूत्वा देवलोकं गच्छादिति तस्माज्जुहूं च स्रुवं च सम्प्रगृह्णाति ॥ १९ ॥ स वाऽअग्नये सम्प्रगृह्णाति । "अग्ने-

१. कुर्यादिति. क. पु. २. स्थाल्यामिति. क. पु. ३. संवदस्वेतीति क. पु.
४. जुहूं च इति. क. पु. ५. मां. सं. २. २०.

ऽदब्धायोऽशीतमे''त्यमृतो ह्यग्निस्तस्मादाहादब्धायावित्यशीतमेत्यशिष्टो ह्यग्निस्तस्मादाहाशीतमेति ''पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्या''ऽइति सर्वाभ्यो मार्त्तिभ्यो गोपायेत्येवैतदाहा''विषं नः पितुं कृण्वि''त्यन्नं वै पितुरनमीवं नऽइदमकिल्विषमन्नं कुर्वित्येवैतदाह ''सुपदा योना''वित्यात्मन्येतदाह ''स्वाहा व्वाडि''ति तद्यथा व्वषट्कृतꣳ हुतमेवमस्यैतद्भवति॥२०॥ (शतसंख्या ॥८००॥) अथ व्वेदं पत्नी व्विस्रꣳसयति। योषा वै व्वेदिर्व्वृषा व्वेदो मिथुनाय वै व्वेदः क्रियतेऽथ यदेनेन यज्ञऽउपालभते मिथुनमेवैतत्प्रजननं क्रियते ॥२१॥ अथ यत्पत्नी व्विस्रꣳसयति । योषा वै पत्नी व्वृषा व्वेदो मिथुनमेवैतत्प्रजननं क्रियते तस्माद्वेदं पत्नी व्विस्रꣳसयति ॥ २२ ॥ सा व्विस्रꣳसयति । ''व्वेदोऽसि येन त्वं देव व्वेद देवेभ्यो व्वेदोऽभवस्तेन मह्यं व्वेदो भूया''ऽइति यदि यजुषा चिकीर्षेदेतेनैव कुर्यात् ॥२३॥ तमा व्वेदेः सꣳस्तृणाति । योषा वै व्वेदिर्व्वृषा व्वेदः पश्चाद्वै परीत्य व्वृषा योषामधिद्रवति पश्चादेवैनामेतत्परीत्य व्वृष्णा व्वेदेनाधिद्रावयति तस्मादा व्वेदेः सꣳस्तृणाति॥२४॥ अथ समिष्टयजुर्जुहोति प्राङ्ग्ने यज्ञोऽनुसन्तिष्ठाताऽइत्यथ यद्धुत्वा समिष्टयजुः पत्नीः संयाजयेत्प्रत्यङ् हैवास्यैष यज्ञः सन्तिष्ठेत तस्माद्वाऽएतर्हि समिष्टयजुर्जुहोति। प्राङ्ग्ने यज्ञोऽनुसन्तिष्ठाताऽइति॥२५॥अथ यस्मात्समिष्टयजुर्नाम । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्यऽएष यज्ञस्तायते सर्व्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्व्वासु समिष्टास्वथैतज्जुहोति तस्मात्समिष्टयजुर्नाम ॥२६॥ अथ यस्मात्समिष्टयजुर्जुहोति । या वाऽएतेन यज्ञेन देवता ह्वयति याभ्यऽएष यज्ञस्तायतऽउप ह वै ताऽआसते यावन्न समिष्टयजुर्जुह्वतीदं नु नो जुह्वत्विति ताऽएवैतद्यथायथं व्यवसृजति यत्र यत्रासां चरणं तदनु यज्ञं वाऽएत-

१. मा. सं. २. २०. २. मा. सं. २. २०. ३. मा. सं. २. २०.
४. आदितः कण्डिकानां संख्येयम् । ५. मा. सं. २. २१. ६. यत्रेति. ग. पु.

दजीजनत यदेनमतत तं जनयित्वा यत्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात् समिष्टयजुर्जुहोति ॥२७॥ स जुहोति । "देवा गातुविद" ऽइति गातुविदो हि देवा "गातुं व्वित्वे"ति यज्ञं व्वित्वेत्येवैतदाह "गातुमिते"ति तदेतेन यथायथं व्यवसृजति "मनसस्पतऽइमं देवयज्ञꣳ स्वाहा व्वाते धा"ऽइत्ययं वै यज्ञो योऽयं पवते तदिमं यज्ञꣳ सम्भृत्यैतस्मिन्यज्ञे प्रतिष्ठापयति यज्ञेन यज्ञꣳ सन्दधाति तस्मादाह स्वाहा व्वाते धाऽइति ॥२८॥ अथ बर्हिर्जुहोति । अयं वै लोको बर्हिरोषधयो बर्हिरस्मिन्नेवैतल्लोकऽओषधीर्दधाति ताऽइमा ऽअस्मिल्लोक ऽ ओषधयः प्रतिष्ठितास्तस्माद्बर्हिर्जुहोति ॥२९॥ तां वाऽअतिरिक्तां जुहोति । समिष्टयजुर्ह्येवान्तो यज्ञस्य यद्धयृर्ध्वꣳ समिष्टयजुषोऽतिरिक्तं तद्यदा हि समिष्टयजुर्जुहोत्यथैताभ्यो जुहोति तस्मादिमा ऽअतिरिक्ता ऽअसम्मिता ऽओषधयः प्रजायन्ते॥३०॥स जुहोति। "सं बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्व्वसुभिः सं मरुद्भिः। समिन्द्रो व्विश्वदेवेभिरङ्क्तां दिव्यं नभो गच्छतु यत्स्वाहे"ति ॥३१॥ अथ प्रणीता दक्षिणतः परीत्य निनयति । युङ्क्ते वाऽएतद्यज्ञं यदेनं तनुते स यन्न निनयेत्पराङु हाविमुक्तऽएव यज्ञो यजमानं प्रक्षिणीयात्तथो ह यज्ञो यजमानं न प्रक्षिणाति तस्मात्प्रणीता दक्षिणतः परीत्य निनयति ॥३२॥ स निनयति । "कस्त्वा व्विमुञ्चति स त्वा व्विमुञ्चति कस्मै त्वा व्विमुञ्चति तस्मै त्वा व्विमुञ्चति पोषाये"ति तत्पुष्टिमुत्तमां यजमानाय निराह स येनैव प्रणयति तेन निनयति येन ह्येव योग्यं युञ्जन्ति तेन व्विमुञ्चन्ति योक्त्रेण हि योग्यं युञ्जन्ति योक्त्रेण व्विमुञ्चन्त्यथ फलीकरणान् कपालेनाधोऽधः कृष्णाजिनमुपास्यति "रक्षसां भागोऽसी"ति ॥ ३३ ॥ देवाश्च च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरऽएतस्मिन्यज्ञे प्रजापतौ पितरि सम्वत्सरेऽस्मा

१. मा. सं. २. २१. २, ३. मा. सं २. २१. ४. मा. सं २. २१.
५. मा. सं. २. २२. ६. मा. सं. २. २३. ७. मा. सं. २. २३.

कमयं भविष्यत्यस्माकमयं भविष्यतीति ॥३४॥ ततो देवाः । सर्व्वं यज्ञꣳ सम्वृज्याथ यत्पापिष्ठं यज्ञस्य भागधेयमासीत्तेनैनान्निरभजन्नस्ना पशोः फलीकरणैर्हविर्यज्ञात्सुनिर्भक्ताऽअसन्नित्येष वै सुनिर्भक्तो यं भागिनं निर्भजन्त्यथ यमभागं निर्भजन्त्येव स तावच्छꣳसतऽउत हि व्वशं लब्ध्वाह किं मा बभक्थेति स यमेवभ्यो देवा भागमकल्पयंस्तमेवभ्यऽएषऽएतद्भागं करोत्यथ यदधोऽधः कृष्णाजिनमुपास्यत्यनग्नावेवभ्यऽएतदन्धे तमसि प्रवेशयति तथोऽएवासृक्पशो रक्षसां भागोऽसीत्यनग्नावन्धे तमसि प्रवेशयति तस्मात्पशोस्तेदनीं न कुर्व्वन्ति रक्षसाꣳ हि स भागः ॥३५॥ (पं. का. श. २. ८. ३; तै. सं. ३. ६. ९. १२.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे सप्तमप्रपाठके तृतीयं ब्राह्मणम् ॥

१. ७. ४.

सꣳस्थिते यज्ञे । दक्षिणतः परीत्य पूर्णपात्रं निनयति तथा ह्युदग्भवति तस्माद्दक्षिणतः परीत्य पूर्णपात्रं निनयति देवलोके मेऽप्यसदिति वै यजते यो यजते सोऽस्यैष यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणामन्वारभ्य यजमानः ॥१॥ स एष देवयानो वा पितृयाणो वा पन्थाः । तदुभयतोऽग्निशिखे समीपन्त्यौ तिष्ठतः प्रति तमोपतो यः प्रत्युष्योऽत्यु तꣳ सृजते योऽतिसृज्यः शान्तिरापस्तदेतमेवैतत्पन्थानꣳ शमयति ॥२॥ पूर्णं निनयति । सर्व्वं वै पूर्णꣳ सर्व्वेणैवैनमेतच्छमयति सन्ततमव्यवच्छिन्नं निनयति सन्ततेनैवैनमेतदव्यवच्छिन्नेन शमयति ॥३॥ यद्वेव पूर्णपात्रं निनयति । यद्वै यज्ञस्य मिथ्या क्रियते व्यस्य तद्बृहन्ति क्षण्वन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति ॥४॥ पूर्णं निनयति । सर्व्वं वै पूर्णꣳ सर्व्वेणैवैतत्सन्दधाति सन्ततमव्यव-

१ देवा इति. क. प

च्छिन्नं निनयति सन्ततेनैवैतद्व्यवच्छिन्नेन सन्दधाति ॥५॥ तदञ्ज-
लिना प्रतिगृह्णाति । ''सं व्वर्चसा पयसा सन्तनूभिरगन्महि मनसा
स शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्ट''
मिति यद्विवृढं तत्सन्दधाति ॥६॥ अथ मुखमुपस्पृशते । द्वयं तद्य-
स्मान्मुखमुपस्पृशतेऽमृतं वाऽआपोऽमृतेनैवैतत्स स्पृशतऽएतद्वै चैवै-
तत्कर्मात्मन कुरुते तस्मान्मुखमुपस्पृशते॥७॥अथ विष्णुक्रमान् क्रमते ।
देवान्वाऽएष प्रीणाति यो यजतऽएतेन यज्ञेनर्गिभिरिव त्वद्यजुर्भिरिव
त्वदाहुतिभिरिव त्वत्स देवान् प्रीत्वा तेष्वपित्वी भवति तेष्वपित्वी भू-
त्वा तानेवाभिप्रक्रामति॥८॥यद्वेव विष्णुक्रमान् क्रमते । यज्ञो वै विष्णुः
स देवेभ्य ऽइमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथ-
मेन पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैनाम्वेवैष ऽएत-
स्मै विष्णुर्यज्ञो विक्रान्तिं विक्रमते तस्माद्विष्णुक्रमान् क्रमते तद्वाऽइत
ऽएव परार्चीनं भूयिष्ठाऽइव क्रमन्ते॥९॥तदु तत् ''पृथिव्यां विष्णुर्व्यक्र-
ꣳस्त । गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्वि-
ष्मोऽन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वे-
ष्टि यं च वयं द्विष्मो दिवि विष्णुर्व्यक्रꣳस्त जागतेन छन्दसा ततो निर्भ-
क्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्म'' ऽइत्येवमिमांल्लोकान्त्समारुह्याथैषा
गतिरेषा प्रतिष्ठा य ऽएष तपति तस्य ये रश्मयस्ते सुकृतोऽथ यत्परं भाः
प्रजापतिर्व्वा स स्वर्गो वा लोकस्तदेवमिमांल्लोकान्त्समारुह्याथैतां गति-
मेतां प्रतिष्ठां गच्छति परस्तात्त्वेवार्व्वाङ् क्रमेत य ऽइतोऽनुशासनं चिकी-
र्षेद्वयं तद्यस्मात्परस्तादर्व्वाङ् क्रमेत ॥१०॥ अपसरणतो ह वाऽअग्रे देवा
जयन्तोऽजयन् । दिवमेवाग्रे ऽथेदमन्तरिक्षमथेतोऽनपसरणात्सपत्ना-
ननुदन्त तथोऽएवैष ऽएतदपसरणत ऽएवाग्रेऽजयन् जयति दिवमेवाग्रे-
ऽथेदमन्तरिक्षमथेतोऽनपसरणात्सपत्नानुदतऽइयं वै पृथिवी प्रतिष्ठा
तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति॥११॥तदु तत् ''दिवि विष्णुर्व्यक्र-

१. मा. सं. २. २४. २. अर्व्वाङ्क्रमेत इति. क. ग. पु. ३. मा. सं. २. २५.

ष्ठंस्त । जागतेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मोऽन्तरिक्षे विष्णुर्व्यक्रष्ठंस्त त्रैष्टुभेन छन्दसा ततो निर्भक्तो योऽस्मान्द्वेष्टि यं च वयं द्विष्मः पृथिव्या विष्णुर्व्यक्रष्ठंस्त गायत्रेण छन्दसा ततो निर्भक्तो योऽस्मान् द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठाया''ऽइत्यस्या[1] ह्येदष्ठं सर्वमन्नाद्यं प्रतिष्ठितं तस्मादाहास्मादन्नादस्यै प्रतिष्ठायाऽइति ॥१२॥ अथ प्राङ् प्रेक्षते । प्राची हि देवानां दिक्तस्मात्प्राङ् प्रेक्षते ॥१३॥ स प्रेक्षते । ''अगन्म स्व''रिति देवा वै स्वरगन्म देवानित्येवैतदाह ''सं ज्योतिषाभूम''ति सं देवैरभूमेत्येवैतदाह ॥१४॥ अथ सूर्यमुदीक्षते । सैषा गतिरेषा प्रतिष्ठा तदेतां गतिमेतां प्रतिष्ठां गच्छति तस्मात्सूर्यमुदीक्षते ॥१५॥ स ऽउदीक्षते । ''स्वयम्भूरसि श्रेष्ठो रश्मि''रित्येष वै श्रेष्ठो रश्मिर्यत्सूर्यस्तस्मादाह स्वयम्भूरसि श्रेष्ठो रश्मिरिति ''वर्चोदा ऽअसि वर्चो मे देही''ति त्वेवाहं ब्रवीमीति ह स्माह याज्ञवल्क्यस्तदुक्त्वैव ब्राह्मणेनैष्टव्यं यद्ब्रह्मवर्चसी स्यादित्युतो ह स्माहोपोदितं य ऽएष वाव मह्यं गा दास्यति गोदा गा मे देहीत्येवं यं कामं कामयते सोऽस्मै कामः समृध्यते ॥१६॥ अथावर्त्तते । ''सूर्यस्यावृतमन्वावर्त्ते''ऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृतमन्वावर्त्तते ॥१७॥ अथ गार्हपत्यमुपतिष्ठते । इयं तद्यस्माद्गार्हपत्यमुपतिष्ठते गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति यावद्ध्वास्येह मानुषमायुस्तस्माऽएवैतदुपतिष्ठते तस्माद्गार्हपत्यमुपतिष्ठते ॥१८॥ स ऽउपतिष्ठते । ''अग्ने गृहपते सुगृहपतिस्त्वयाग्नेऽहं गृहपतिना भूयासꣳ सुगृहपतिस्त्वं मयाग्ने गृहपतिना भूया''ऽइति नात्र तिरोहितमिवास्त्य ''स्थूरिणी गार्हपत्यानि

१. इति. क. ग.पु. २. प्रेक्षत इति. क. ग. पु. ३. मा. सं. २. २५.
४. मा.सं. २.२५. ५. मा. सं. २. २६. ६. मा. सं. २.२६.
७. मा.सं. २.२६. ८. उपतिष्ठते । अग्ने इति. क. ग. पु. ९. मा. सं. २. २७.
१०. मा. सं. २. २७.

सन्त्वि''न्यनार्त्तानि नो गार्हपत्यानि सन्त्वित्येवैतदाह ''शतꣳ हिमा''ऽइति शतं वर्षाणि जीव्यासमित्येवैतदाह तदप्येतद्ध्रुवन्नाद्रियेतापि हि भूयाꣳसि शताद्वर्षेभ्यः पुरुषो जीवति तस्मादप्येतद्ध्रुवन्नाद्रियेत ॥१९॥ अथावर्त्तते । ''सूर्यस्यावृतमन्वावर्त्त''ऽइति तदेतां गतिमेतां प्रतिष्ठां गत्वैतस्यैवावृतमन्वावर्त्तते ॥२०॥ अथ पुत्रस्य नाम गृह्णाति । इदं मेऽयं वीर्यं पुत्रोऽनुसन्तनवदिति यदि पुत्रो न स्यादप्यात्मन ऽएव नाम गृह्णीयात् ॥२१॥ अथाहवनीयमुपतिष्ठते । प्राङ्ग यज्ञोऽनुसन्तिष्ठाताऽइति तूष्णीमुपतिष्ठते ॥२२॥ अथ व्रतं विसृजते । ''इदमहं यऽएवास्मि सोऽस्मी''त्यमानुषऽइव वाऽएतद्भवति यद्व्रतमुपैति न हि तदवकल्पते यद्वयादिदमहꣳ सत्यादनृतमुपैमीति तदु खलु पुनर्मानुषो भवति तस्मादिदमहं यऽएवास्मि सोऽस्मीत्येव व्रतं विसृजेत ॥२३॥

Cf. का. श. २. ८. ४. तै. सं. १. ७. ५. ७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
प्रथमकाण्डे सप्तमप्रपाठके चतुर्थं ब्राह्मणम् ॥

इति सप्तमः प्रपाठकस्समाप्तः ॥

(इति नवमोऽध्यायः)

(कण्डिकासंख्या ११४)

इति शुक्लयजुर्वेदीये माध्यन्दिनीयशतपथब्राह्मणे हविर्यज्ञनाम प्रथमं काण्डं समाप्तम् ॥

(प्रथमकाण्डकण्डिकासङ्ख्या ८३८)

१. मा. सं. २. २७. २. मा. सं. २. २७.
३. प्रतिष्ठां इति. क. ग. पु. ४. उपतिष्ठत इति. क. ग. पु.
५. मा. सं. २. २८. ६. सप्तमप्रपाठकस्थकाण्डकानां संख्या ।

अथ एकपान्नाम द्वितीयं काण्डम्॥

॥ तत्र प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥

(अग्न्याधेयम्, पुनराधेयम्, अग्निहोत्रम्, अग्न्युपस्थानम्, पिण्डपितृयज्ञः, आग्रयणेष्टिः, दाक्षायणयज्ञः, चातुर्मास्यानि चात्र काण्डेऽभिधीयन्ते)

(अग्न्याधेयम)

२. १. १.

*हरिः ॐ । स यद्वाऽइतश्चेतश्च सम्भरति । तत्सम्भाराणाꣳ सम्भारत्वं यत्र यत्राग्नेर्न्यक्तं ततस्ततः सम्भरति तद्यशसेव त्वदेवैनमेतत्समर्धयति पशुभिरिव त्वन्मिथुनेनेव त्वत्सम्भरन ॥१॥ अथोल्लिखति । तद्यदेवास्यै पृथिव्याऽअभिष्टितं वाभिष्टृतं वा तदेवास्याऽएतदुद्धन्त्यथ यज्ञियायामेव पृथिव्यामाधत्ते तस्माद्वाऽउल्लिखति ॥२॥ अथाद्भिरभ्युक्षति । एष वाऽअपाꣳ सम्भारो यदद्भिरभ्युक्षति तद्यदपः सम्भरन्त्यन्नं वाऽआपोऽन्नꣳ हि वाऽआपस्तस्माद्यदेमं लोकमाप ऽआगच्छन्त्यथेहान्नाद्यं जायते तदन्नाद्येनैवैनमेतत्समर्द्धयति ॥३॥ योपा वाऽआपः । व्वपाग्निर्मिथुनेनैवैनमेतत्प्रजननेन समर्द्धयत्यद्भिर्वाऽइदꣳ सर्वमाप्तमद्भिरेवैनमेतदाप्त्वाधत्ते तस्मादपः सम्भरति ॥४॥ अथ हिरण्यꣳ सम्भरति । अग्निर्ह वाऽअपोऽभिदध्यौ मिथुन्याभिः स्यामिति ताः सम्बभूव तासु रेतः प्रासिञ्चत्ताद्धिरण्यमभवत्तस्मादेतदग्निसङ्काशमग्नेर्हि रेतस्तस्मादप्सु विन्दन्त्यप्सु हि प्रासिञ्चत्तस्मादेनेन न धावयति न किं चन करोत्यथ यशो देवरेतसꣳ हि तद्यशसैवैनमेतत्समर्द्धयति सरेतसमेव कृत्स्नमग्निमाधत्ते तस्माद्धिरण्यꣳ सम्भरति ॥५॥ अथो-

* काण्डमिदं काण्वशतपथे प्रथमकाण्डत्वेन परिगणितम ।

१. मिथुनेन. घ. २. तास्विति. घ.

पान्सम्भरति । असौ ह वै द्यौरस्यै पृथिव्याऽएतान पशून् प्रददौ तस्मात्पशव्यमूषरमित्याहुः पशवो ह्येवैते साक्षादेव तत्पशुभिरेवैनमेतत्समर्द्धयति तेऽमुतऽआगताऽअस्यां पृथिव्यां प्रतिष्ठितास्तमनयोर्द्यावापृथिव्योः रसं मन्यन्ते तदनयोरेवैनमेतद्द्यावापृथिव्योः रसेन समर्द्धयति तस्मादृषान्सम्भरति ॥६॥ अथाखुकरीषꣳ सम्भरति । आखवो ह वाऽअस्यै पृथिव्यै रसं विदुस्तस्मात्तेऽधोऽध इमां पृथिवीं चरन्तः पीविष्ठाऽअस्यै हि रसं विदुस्ते यत्र तेऽस्यै पृथिव्यै रसं विदुस्ततऽउत्किरन्ति तदस्याऽएवैनमेतत्पृथिव्यै रसेन समर्द्धयति तस्मादाखुकरीषꣳ सम्भरति पुरीष्यऽइति वै तमाहुर्यः श्रियं गच्छति समानं वै पुरीषं च करीषं च तदेतस्यैवावरुध्यै तस्मादाखुकरीषꣳ सम्भरति ॥७॥ अथ शर्कराः सम्भरति । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे सा हेयं पृथिव्यलेलायद्यथा पुष्करपर्णमेवं तां ह स्म वातः संवहति सोपैव देवाञ्जगामोपासुरान्त्सा यत्र देवानुपजगाम॥८॥ तद्धोचुः । हन्तेमां प्रतिष्ठां दृꣳहामहै तस्यां ध्रुवायामशिथिलायामग्नीऽआदधामहै ततोऽस्यै सपत्नान्निर्भक्ष्यामऽइति ॥९॥ तद्यथा शङ्कुभिश्चर्म विहन्यात् । एवमिमां प्रतिष्ठाꣳशर्कराभिः पर्यवृꣳहन्त सेयं ध्रुवाशिथिला प्रतिष्ठा तस्यां ध्रुवायामशिथिलायामग्नीऽआदधत ततोऽस्यै सपत्नान्निरभजन ॥१०॥ तथोऽएवैष ऽएतत् । इमां प्रतिष्ठाꣳ शर्कराभिः परिवृꣳहते तस्यां ध्रुवायामशिथिलायामग्नीऽआधत्ते ततोऽस्यै सपत्नान्निर्भजति तस्माच्छर्कराः सम्भरति ॥११॥ तान्वाऽएतान् । पञ्च सम्भारान्त्सम्भरति पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्य ॥१२॥ तदाहुः । षडेवर्तवः संवत्सरस्येति न्यूनमु तर्हि मिथुनं प्रजननं क्रियते न्यूनाद्धाऽइमाः प्रजाः प्रजायन्ते तच्छ्रेयसमुत्तरावत्तस्मात्पञ्च भवन्ति यद्यु षडेवर्तवः संवत्सरस्येत्यग्निरेवैतेषाꣳ षष्ठस्तथोऽएवैतदन्यूनं भवति ॥१३॥ तदाहुः । नैवैकञ्चन सम्भारꣳ सम्भरे-

१. तस्मादस्या इति. घ. २. तस्मादाखुकरीषमिति. ग. पु. ३. वृꣳहन्त. घ.
४. तदाहुः इति. ग. पु.

दित्यस्यां वाऽएते सर्वे पृथिव्यां भवन्ति स यदेवास्यामाधत्ते तत्सर्वान्सम्भारानाप्नोति तस्मान्नैवैकञ्चन सम्भारꣳ सम्भरेदिति तदु समेव भरेद्यदहैवास्यामाधत्ते तत्सर्वान्सम्भारानाप्नोति यदु सम्भारैः सम्भृतैर्भवति तदु भवति तस्मादु समेव भरेत् ॥१४॥ (१). का. श. १. १. १: तै. ब्रा. १. १. ३: मै. सं. १. ६. ३: का. सं. ८. २: कपि. सं. ६. ७: शा. ब्रा. १. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥

२. १. २.

कृत्तिकास्वग्नीऽआदधीत । एता वाऽअग्निनक्षत्रं यत्कृत्तिकास्तद्वै सलोम यो ऽग्निनक्षत्रेऽग्नी आदधाति तस्मात्कृत्तिकास्वादधीत ॥१॥ एकं ह त्रीणि । चत्वारीति वाऽअन्यानि नक्षत्राण्यथैता ऽएव भूयिष्ठा यत्कृत्तिकास्तद्भूमानमेवैतदुपैति तस्मात्कृत्तिकास्वादधीत ॥२॥ एता ह वै प्राच्यै दिशो न च्यवन्ते । सर्वाणि ह वाऽअन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते तत्प्राच्यामेवास्यैतद्दिश्याहितो भवतस्तस्मात्कृत्तिकास्वादधीत ॥३॥ अथ यस्मान्न कृत्तिकास्वादधीत । ऋक्षाणाꣳ ह वाऽएता ऽअग्रे पत्न्य ऽआसुः सप्तर्षीनु ह स्म वै पुरर्क्षा ऽइत्याचक्षते ता मिथुनेन व्यार्ध्यन्तामा ह्युत्तरा हि सप्त ऽऋषय ऽउद्यन्ति पुर ऽएता अशमिव वै तद्यो मिथुनेन व्यृद्धः स नेन्मिथुनेन व्यृध्याऽइति तस्मान्न कृत्तिकास्वादधीत ॥४॥ तद्वैव दधीत । अग्निर्वाऽएतासां मिथुनमग्निनैता मिथुनेन समृद्धास्तस्मादेव दधीत ॥५॥ रोहिण्यामग्नीऽआदधीत । रोहिण्याꣳ ह वै प्रजापतिः प्रजाकामोऽग्नीऽआदधे ऽस प्रजा असृजत ता ऽअस्य प्रजाः सृष्टा ऽएकरूपा ऽउपस्तब्धास्तस्थू रोहिण्यऽइवैव तद्वै रोहिण्यै रोहिणीत्वं बहुर्हैव प्रजया पशुभिर्भवति य ऽएवं

१. तस्मात्. घ. २. समेव घ. ३. एता. घ.
४, ५. आदधीत इति. ग. ६. तस्मादेव. घ

विद्वान् रोहिण्यामाधत्ते ॥६॥ रोहिण्यामु ह वै पशवः।अग्नीऽआदधिरे मनुष्याणां कामꣳरोहेमेति ते मनुष्याणां काममरोहन्यमु हैव तत्पशवो मनुष्येषु काममरोहंस्तमु हैव पशुषु कामꣳरोहति य ऽएवं विद्वान् रोहिण्यामाधत्ते ॥७॥ मृगशीर्षेऽग्नीऽआदधीत । एतद्वै प्रजापतेः शिरो यन्मृगशीर्षꣳ श्रीर्वै शिरः श्रीर्हि वै शिरस्तस्माद्योऽङ्गस्य श्रेष्ठो भवत्यसावमुष्याङ्गस्य शिर ऽइत्याहुः।श्रियꣳ ह गच्छति य ऽएवं विद्वान्मृगशीर्षेऽआधत्ते ॥८॥ अथ यस्मान्न मृगशीर्षेऽआदधीत । प्रजापतेर्वाऽएतच्छरीरं यत्र वाऽएनं तदविध्यंस्तदिषुणा त्रिकाण्डेनेत्याहुः स एतच्छरीरमजहाद्वास्तु वै शरीरमयज्ञियं निर्वीर्यं तस्मान्न मृगशीर्षेऽआदधीत ॥९॥ तद्वैव दधीत । न वाऽएतस्य देवस्य व्वास्तु नायज्ञियं न शरीरमस्ति यत्प्रजापतेस्तस्मादेव दधीत पुनर्वस्वोः पुनराधेयमादधीतेति ॥१०॥ फल्गुनीष्वग्नीऽआदधीत । एता वाऽइन्द्रनक्षत्रं यत्फल्गुन्योऽप्यस्य प्रतिनाम्न्योऽर्जुनो ह वै नामेन्द्रो यदस्य गुह्यं नामार्जुन्यो वै नामैतास्ता ऽएतत्परोक्षमाचक्षते फल्गुन्य ऽइति को ह्येतस्याहेति गुह्यं नाम ग्रहीतुमिन्द्रो वै यजमानस्तस्मव्वऽएवैतन्नक्षत्रेऽग्नी आधत्तऽइन्द्रो यज्ञस्य देवतैतेनो हास्यैतत्सेन्द्रमग्न्याधेयं भवति पूर्वयोरादधीत पुरस्तात्क्रतुर्हैवास्मै भवत्युत्तरयोरादधीत श्वः श्रेयसꣳ हैवास्माऽउत्तरावद्भवति ॥११॥ हस्तेऽग्नीऽआदधीत । यऽइच्छेत्प्र मे दीयेतेति तद्वाऽअनुष्ठ्या यज्ञस्तेन प्रदीयते प्र हैवास्मै दीयते ॥१२॥ चित्रायामग्नीऽआदधीत । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे तऽउभयऽएवामुं लोकꣳ समारुरुक्षांचक्रुर्हैवमेव ततोऽसुरा रौहिणमित्यग्निं चिक्यिरेऽनेनामुं लोकꣳ समारोक्ष्यामऽइति ॥१३॥ इन्द्रो ह वाऽईक्षां चक्रे । इमं चेद्वाऽइमे चिन्वते ततऽएव नोऽभिभवन्तीति स ब्राह्मणो ब्रुवाणऽएकेष्टकां प्रबध्येयाय ॥१४॥ स होवाच ।

१. यन्मृगशीर्षं इति. ख. २. आधत्ते. घ. ३. See ऐ. ब्रा. ३. ३. ९.
४. यादिति. घ. ५. ग्रहीतुमिति. घ. ६. समारुरुक्षाञ्चक्रुः. घ.
७. अनेनामुमिति. घ. ८. इति. घ.

हन्ताहमिमामप्युपदधाऽइति तथेति तामुपाधत्त तेषामल्पकादेवाग्निरसञ्चितऽआस ॥१५॥ अथ होवाच । अन्वाऽअहं तां दास्ये या ममेहेति तामभिषद्या ववर्ह तस्यामावृढायामग्निर्व्यवशशादाग्नेर्व्यवशादमन्वसुरा व्यवशेदुः स ताऽएवेष्टका व्यज्ञान् कृत्वा ग्रीवाः प्रचिच्छेद॥१६॥ ते ह देवाः समेत्योचुः । चित्रं वाऽअभूम यऽइयतः सपत्नानवधिष्मेति तद्ध चित्रायै चित्रात्वं चित्रꣳ ह भवति हन्ति सपत्नान् हन्ति द्विषन्तं भ्रातृव्यं यऽएवं विद्वांश्चित्रायामाधत्ते तस्मादेतत्क्षत्रियऽएव नक्षत्रमुपत्सेज्जिघाꣳसतीव ह्येष सपत्नान्वीव जिगीषते ॥१७॥ नाना ह वाऽएतान्यग्रे क्षत्राण्यासुः । यथैवासौ सूर्यऽएवं तेषामेषऽउद्यन्नेव वीर्यं क्षत्रमादत्त तस्मादादित्यो नाम यदेषां वीर्यं क्षत्रमादत्त ॥१८॥ ते ह देवाऽऊचुः । यानि वै तानि क्षत्राण्यभूवन्न वै तानि क्षत्राण्यभूवन्निति तद्ध नक्षत्राणां नक्षत्रत्वं तस्मादु सूर्यनक्षत्रऽएव स्यादेष ह्येषां वीर्यं क्षत्रमादत्त यद्यु नक्षत्रकामः स्यादेतद्वाऽअनपराद्धं नक्षत्रं यत्सूर्यः स ऽएतेनैव पुण्याहेन यदेतेषां नक्षत्राणां कामयेत तदुपत्सेत्तस्मादु सूर्यनक्षत्रऽएव स्यात ॥१९॥ Cf. का. श. १. १. २; तै. ब्रा. १. १. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे प्रथमप्रपाठके द्वितीयं ब्राह्मणम् ॥

२. १. ३.

वसन्तो ग्रीष्मो वर्षाः । ते देवा ऽऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य ऽएवापूर्यतेऽर्द्धमासः स देवा योऽपक्षीयते स पितरोऽहरेव देवा रात्रिः पितरः पुनरह्नः पूर्वाह्णो देवा ऽअपराह्णः पितरः ॥१॥ ते वाऽएतऽऋतवः । देवाः पितरः स यो हैवं विद्वान् "देवाः पितर" इति ह्वयत्या हास्य देवा देवहूयं गच्छन्त्या पितरः पितृहूयमवन्ति हैनं

१. व्यवशादिति. ग. २. चित्रात्वꣳ इति. ग. ३. वर्षाः इति. ग. घ.

देवा देवहूयेऽवन्ति पितरः पितृहूये य ऽएवं विद्वान्देवाः पितर ऽइति ह्वयति ॥२॥ स यत्रोदगावर्त्तते । देवेषु तर्हि भवति देवांस्तर्ह्यभिगोपायत्यथ यत्र दक्षिणा वर्त्तते पितृषु तर्हि भवति पितॄंस्तर्ह्यभिगोपायति॥३॥ स यत्रोदगावर्त्तते । तर्ह्यग्नीऽआदधीतापहतपाप्मानो देवा अप पाप्मानꣳ हतेऽमृता देवानामृतत्वमाशास्ति सर्वमायुरेति यस्तर्ह्याधत्तेऽथ यत्र दाक्षिणा वर्त्तते यस्तर्ह्याधत्तेऽनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरा हायुषो म्रियते यस्तर्ह्याधत्ते ॥४॥ ब्रह्मैव वसन्तः । क्षत्रं ग्रीष्मो विडेव वर्षास्तस्माद्ब्राह्मणो वसन्तऽआदधीत ब्रह्म हि वसन्तस्तस्मात्क्षत्रियो ग्रीष्मऽआदधीत क्षत्रꣳ हि ग्रीष्मस्तस्माद्वैश्यो वर्षास्वादधीत विड्ढि वर्षाः ॥५॥ स यः कामयेत । ब्रह्मवर्चसी स्यामिति वसन्ते स ऽआदधीत ब्रह्म वै वसन्तो ब्रह्मवर्चसी हैव भवति ॥६॥ अथ यः कामयेत । क्षत्रꣳ श्रिया यशसा स्यामिति ग्रीष्मे स ऽआदधीत क्षत्रं वै ग्रीष्मः क्षत्रꣳ हैव श्रिया यशसा भवति ॥७॥ अथ यः कामयेत । बहुः प्रजया पशुभिः स्यामिति वर्षासु सऽआदधीत विड्वै वर्षाऽअन्नं विशो बहुर्हैव प्रजया पशुभिर्भवति य ऽएवं विद्वान्वर्षास्वाधत्ते॥८॥ ते वाऽएतऽऋतवः । उभयऽएवापहतपाप्मानः सर्व ऽएवैषां पाप्मनोऽपहन्तोद्यन्नेवैषामुभयेषां पाप्मानमपहन्ति तस्माद्यदैवैनं कदा च यज्ञ उपनमेदथाग्नीऽआदधीत न श्वःश्वमुपासीत को हि मनुष्यस्य श्वो वेद ॥९॥ Cf. का. श. १. १. ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे प्रथमप्रपाठके तृतीयं ब्राह्मणम् ॥

२. १. ४.

यदहरस्य श्वोऽग्न्याधेयꣳस्यात् । दिवैवार्क्षीयान्मनो ह वै देवा

१. २. उदङ्ङावर्तत इति. ख. घ. ३. पाप्मानमिति. घ.
४. आधत्ते इति. घ. ५. वर्षाः घ. ६. क्षत्रामिति. ग. घ. ७. प्रजयेति. घ.
८. आधत्ते. घ. आधत्ते. ग. ९. यदहरस्येति. घ.

मनुष्यस्याजानन्ति तेऽस्यैतच्छ्वोऽग्न्याधेयं विदुस्तेऽस्य विश्वे देवा गृहानागच्छन्ति तेऽस्य गृहेषूपवसन्ति स ऽउपवसथः ॥१॥ तन्वेवानवक्लृप्तं यो मनुष्येष्वनश्नत्सु पूर्वोऽश्नीयादथ किमु यो देवेष्वनश्नत्सु पूर्वोऽश्नीयात्तस्माद् दिवैवाश्नीयात्तद्धापि काममेव नक्तमश्नीयान्नो ह्यनाहिताग्नेर्व्रतचर्यास्ति मानुषो ह्येवैष तावद्भवति यावदनाहिताग्निस्तस्माद्धापि काममेव नक्तमश्नीयात् ॥२॥ तद्धैकेऽजमुपवध्नन्ति । आग्नेयोऽजोऽग्नेरेव सर्वत्वायेति ब्रुवन्तस्तद् तथा न कुर्याद्यद्यस्याजः स्यादग्नीधऽएवैनं प्रातर्दद्यात्तेनैव तं काममाप्नोति तस्माद् तन्नाद्रियेत ॥३॥ अथ चातुष्प्राश्यमोदनं पचन्ति छन्दाꣳस्यनेन प्रीणीम ऽइति यथा येन ब्राह्मणेन स्यन्त्स्यन्त्स्यात्तत्सुहितं कर्त्तव्यं ब्रूयादेवमेतदिति ब्रुवन्तस्तद् तथा न कुर्याद्यद्वाऽअस्य ब्राह्मणाः कुले वसन्त्यृत्विजश्चानृत्विजश्च तेनैव तं काममाप्नोति तस्माद् तन्नाद्रियेत ॥४॥ तस्य सर्पिरासेचनं कृत्वा । सर्पिरासिच्याश्वत्थास्तिस्रः समिधो घृतेनान्वज्य समिद्भिर्घृतवतीभिर्ऋग्भिरभ्यादधति शमीगर्भमेतदाग्नम ऽइति ब्रुवन्तः स यः पुरस्तात्संवत्सरमभ्यादध्यात्स ह तं काममाप्नुयात्तस्माद् तन्नाद्रियेत ॥५॥ तद् होवाच भाल्लवेयः । यथा वाऽअन्यत्करिष्यन्त्सोऽन्यत्कुर्याद्यथान्यद्वदिष्यन्त्सोऽन्यद्वदेद्यथान्येन पथेष्यन्त्सोऽन्येन प्रतिपद्येतैवं तद्यऽएतं चातुष्प्राश्यमोदनं पचेदपराद्धिरेव सेति न हि तदवकल्पते यस्मिन्नग्नावृचा वा साम्ना वा यजुषा वा समिधं वाभ्यादध्यादाहुतिं वा जुहुयाद्यत्तं दक्षिणा वा हरेयुरनु वा गमयेयुर्दक्षिणा वा ह्येनꣳ हरन्त्यन्वाहार्यपचनो भविष्यतीत्यनु वा गमयन्ति ॥६॥ अथ जाग्रति जाग्रति

१. विदुस्ते इति. घ. २. उपवसथः इति. ग.घ.

३. See मै. सं. १.६.४; and आप. श्रौ. ५.२.१२.

४. See मै. सं. १. ६. १२; तै. ब्रा. १. १. ९. ८.

५. सर्पिरासेचनमिति. घ.

६. See मै. सं. १. ६. १२. and तै. ब्रा. १. १. ९. ३. अनयोरेव ब्राह्मणभागयोरत्र खण्डनमिति प्रतिभाति ।

देवाः । तद्देवानेवैतदुपावर्तते । स सदेवतरः श्रान्ततरस्तपस्वितरोऽग्नी ऽआधत्ते तद्धापि काममेव स्वप्यान्नो ह्यनाहिताग्निर्व्रतचर्यास्ति मानुषो ह्येष तावद्भवति यावदनाहिताग्निस्तस्माद्धापि काममेव स्वप्यात् ॥७॥ तद्धैकेऽनुदिते मथित्वा । तमुदिते प्राञ्चमुद्धरन्ति तदु तदुभेऽअहोरात्रे परिगृह्णीमः प्राणोदानयोर्मनसश्च वाचश्च पर्याप्त्याऽइति वदन्तस्तदु तथा न कुर्यादुभौ हैवास्य तथानुदितऽआहितौ भवतोऽनुदिते हि मथित्वा तमुदिते प्राञ्चमुद्धरन्ति स य ऽउदितऽआहवनीयं मन्थेत्स ह तत्पर्याप्नुयात् ॥८॥ अहर्वै देवाः । अनपहतपाप्मानः पितरो न पाप्मानमपहते मर्त्याः पितरः पुरा हायुषो म्रियते योऽनुदिते मन्थत्यपहतपाप्मानो देवा ऽअप पाप्मानꣳ हतेऽमृता देवा नामृतत्वस्याशास्ति सर्वमायुरेति श्रीर्देवाः श्रियं गच्छति यशो देवा यशो ह भवति य ऽएवं विद्वानुदिते मन्थति ॥९॥ तदाहुः । यन्नर्चा न साम्ना न यजुषाग्निराधीयतेऽथ केनाधीयतऽइति ब्रह्मणो हैवैष ब्रह्मणाधीयते वाग्वै ब्रह्म तस्यै वाचः सत्यमेव ब्रह्म ता वाऽएताः सत्यमेव व्याहृतयो भवन्ति तदस्य सत्येनैवाधीयते ॥१०॥ भूरिति वै प्रजापतिः । इमामजनयत भुव ऽइत्यन्तरिक्षꣳ स्वरिति दिवमेतावद्वाऽइदꣳ सर्वं यावदिमे लोकाः सर्वेणैवाधीयते ॥११॥ भूरिति वै प्रजापतिः । ब्रह्माजनयत भुव ऽइति क्षत्रꣳ स्वरिति विशमेतावद्वाऽइदꣳसर्वं यावद्ब्रह्मक्षत्रं विट्सर्वेणैवाधीयते ॥१२॥ भूरिति वै प्रजापतिः । आत्मानमजनयत भुव ऽइति प्रजाꣳ स्वरिति पशूनेतावद्वाऽइदꣳ सर्वं यावदात्मा प्रजा पशवः सर्वेणैवाधीयते ॥१३॥ स वै भूर्भुव ऽइति । एतावतैव गार्हपत्यमादधात्यथ यत्सर्वैरादध्यात्केनाहवनीयमादध्याद्वेऽअक्षरे परिशिनष्टि तेनोऽएतान्ययातयामानि भवन्ति तैस्सर्वैः पञ्चभिराहवनीयमादधाति भूर्भुवः स्वरिति तान्यष्टावक्षराणि सम्पद्यन्तेऽष्टाक्षरा वै गायत्री गायत्र-

१. अत्र 'तस्मिन्नुपव्युषमरणी निष्टपेत् । तं मथित्वा प्राञ्चमुद्धरति' इति तैत्तिरीयब्राह्मणगतं वाक्यद्वयं पर्यालोचनीयम् । तस्यैवेदं खण्डनम् ।

मग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते ॥१४॥ देवान् ह वाऽअग्नीऽआधास्यमानान् । तानसुररक्षसानि ररक्षुर्नाग्निर्जनिष्यते नाग्नीऽआधास्यध्वऽइति तद्यदरक्षंस्तस्माद्रक्षाᳬसि ॥१५॥

(अर्द्धप्रपाठकः ॥५७॥)

ततो देवा ऽएतं व्वज्रं ददृशुः । यदश्वं तं पुरस्तादुदश्रयंस्तस्याभयेऽनाष्ट्रे निवातेऽग्निरजायत तस्माद्यत्राग्निं मन्थिष्यन्स्यात्तदश्वमानेतवै ब्रूयात्स पूर्वेणोपतिष्ठते व्वज्रमेवैतदुच्छ्रयति तस्याभयेऽनाष्ट्रे निवातेऽग्निर्जायते ॥१६॥ स वै पूर्व्ववाट् स्यात् । स ह्यपरिमितं व्वीर्यमभिवर्द्धते यदि पूर्व्ववाहं न विन्देदपि य ऽएव कश्चाश्वः स्याद्यद्यश्वं न विन्देदप्यनड्वानेव स्यादेष ह्येवानड्वाहो बन्धुः ॥१७॥ तं यत्र प्राञ्चᳬ हरन्ति । तत्पुरस्तादश्वं नयन्ति तत्पुरस्तादेवैतन्नाष्ट्रा रक्षाᳬस्यपघ्नन्त्यथाभयेनानाष्ट्रेण हरन्ति ॥१८॥ तं वै तथैव हरेयुः । यथैनमेष प्रत्यङ्ङुपाचरेदेष वै यज्ञो यदग्निः प्रत्यङ् हैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ ऽउपनमत्यथ यस्मात्पराङ् भवति पराङु हैवास्माद्यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥१९॥ एष उ वै प्राणः । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङु हैवास्मात्प्राणो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्मात्प्राणोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥२०॥ शतम् ॥१०० ॥ अयं वै यज्ञो योऽयं पवते । तं वै तथैव हरेयुर्यथैनमेष प्रत्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं यज्ञः प्रविशति तं क्षिप्रे यज्ञ ऽउपनमत्यथ यस्मात्पराङ् भवति पराङुहै वास्माद्यज्ञो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्माद्यज्ञोऽभूदितीश्वरो ह यत्तथैव स्यात् ॥२१॥ एष उ वै प्राणः । तं वै तथैव हरेयुर्यथैनमेष प्र-

१. चरदिति. घ. २. तदेवेति. घ. ३. आदितश्शतसंख्येयम् ।

४. यं इति. घ. ५. ते इति. ग.

त्यङ्ङुपाचरेत्प्रत्यङ् हैवैनं प्राणः प्रविशत्यथ यस्मात्पराङ् भवति पराङ् हैवास्मात्प्राणो भवति स यो हैनं तत्रानुव्याहरेत्पराङस्मात्प्राणोऽभूदितीश्वरो ह यत्तथैव स्यात्तस्मादु तथैव हरेयुः ॥२२॥ अथाश्वमाक्रमयति । तमाक्रम्य प्राञ्चमुन्नयति तं पुनरावर्तयति तमुदञ्चं प्रमुञ्चति व्वीर्यं वाऽअश्वो नेदस्मादिदं पराग्वीर्यमसदिति तस्मात्पुनरावर्तयति ॥२३॥ तमश्वस्य पदऽआधत्ते । व्वीर्यं वाऽअश्वो व्वीर्यऽएवैनमेतदाधत्ते तस्मादश्वस्य पदऽआधत्ते ॥२४॥ स वै तूष्णीमेवाग्रऽउपस्पृशति । अथोद्यच्छत्यथोपस्पृशति भूर्भुवः स्वरित्येव तृतीयेनादधाति त्रयो वाऽइमे लोकास्तदिमानेवैतल्लोकानाप्नोत्येतं न्वेकम् ॥२५॥ अथेदं द्वितीयं । तूष्णीमेवाग्रऽउपस्पृशत्यथोद्यच्छति भूर्भुवः स्वरित्येव द्वितीयेनादधाति यो वाऽअस्यामप्रतिष्ठितो भारमुद्यच्छति नैनꣳ शक्नोत्युद्यन्तुꣳ सꣳ हैनꣳ शृणाति ॥२६॥ स यत्तूष्णीमुपस्पृशति । तदस्यां प्रतिष्ठायां प्रतितिष्ठन्ति सोऽस्यां प्रतिष्ठित ऽआधत्ते तथा न व्यथते तदु हैतत्पश्चेव दध्रिरऽआसुरिः पाञ्चिर्माधुकिः सर्वं वाऽअन्यदियसितमिव प्रथमेनैवोद्यत्यादध्याद्भूर्भुवः स्वरिति तदेवानियसितमित्यतो यतमथा कामयेत तथा कुर्यात् ॥२७॥ अथ पुरस्तात्परीत्य । पूर्वार्धमुलमुकानामभिपद्य जपति द्यौरिव भूम्ना पृथिवीव व्वरिम्णेति यथासौ द्यौर्वह्वी नक्षत्रैरेवं बहुर्भूयासमित्येवैतदाह यदाह द्यौरिव भूम्नेति पृथिवीव व्वरिम्णेति यथेयं पृथिव्युर्व्वेवमुरुर्भूयासमित्येवैतदाह तस्यास्ते पृथिवि देवयजनि पृष्ठऽइत्यस्यै ह्येनं पृष्ठऽआधत्तेऽग्निमन्नादमन्नाद्यायादधऽइत्यन्नादोऽग्निरन्नादो भूयासमित्येवैतदाह सैषाशीरेव स यदि कामयेत जपेदेतद्यद्यु कामयेतापि नाद्रियेत ॥२८॥ अथ सर्पराज्ञ्या ऽऋग्भिरुपतिष्ठते । "आयं गौः पृश्नि-

१. प्रत्यङिति. घ. २. आक्रमम्येति घ. ३. माधुकिः इति. घ.

४. See. तै. सं. १. ५. ४. १. मन्त्रत्रयमिदं माध्यन्दिनसंहितायां तृतीयाध्याये (३. ६. ८.) ऋग्वेदे (८. ८. ४५) च पठितम् । अत्राऽपि पुनः पाठः किमर्थ इति न ज्ञायते ।

रक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ॥ अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥ त्रिꣳशद्धाम विराजति वाक्पतङ्गाय धीयते । प्रति वस्तोरह द्युभि''रिति तद्यदेवास्यात्र सम्भारैर्वा नक्षत्रैर्वर्तुभिर्वाधानेन वानाप्तं भवति तदेवास्यैतेन सर्वमाप्तं भवति तस्मात्सर्पराज्ञ्या ऽऋग्भिरुपतिष्ठते ॥२९॥ तदाहुः । न सर्पराज्ञ्या ऽऋग्भिरुपतिष्ठतेतीयं वै पृथिवी सर्पराज्ञी स यदेवास्यामाधत्ते तत्सर्वान् कामानाप्नोति तस्मान्न सर्पराज्ञ्या ऽऋग्भिरुपतिष्ठतेति ॥३०॥ (Cf. का. श. १. १. ४: तै. ब्रा. १. १. ५: मै. सं. १. ६. ४: काठ. सं. ८. ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे प्रथमपाठके चतुर्थं ब्राह्मणम् ॥

(इति प्रथमोऽध्यायस्समाप्तः)

२. १. ५.

उद्धृत्याहवनीयं पूर्णाहुतिं जुहोति । तद्यत्पूर्णाहुतिं जुहोत्यन्नादं वाऽएतमात्मनो जनयते यदग्निं तस्माऽएतदन्नाद्यमपिदधाति यथा कुमाराय वा जाताय वत्साय वा स्तनमपिदध्यादेवमस्माऽएतदन्नाद्यमपिदधाति ॥१॥ स ऽएतेनान्नेन शान्तः । उत्तराणि हवीꣳषि श्रप्यमाणान्युपरमति शश्वद्ध वाऽअध्वर्युं वा यजमानं वा प्रदहेत्तौ ह्यस्य नेदिष्ठं चरतो यदस्मिन्नेतामाहुतिं न जुहुयात्तस्माद्वाऽएतामाहुतिं जुहोति ॥ २ ॥ तां वै पूर्णां जुहोति । सर्वं वै पूर्णꣳ सर्वेणैवैनमेतच्छमयति स्वाहाकारेण जुहोत्यनिरुक्तो वै स्वाहाकारः सर्वं वाऽअनिरुक्तꣳ सर्वेणैवैनमेतच्छमयति ॥३॥ यां वै प्रजापतिः । प्रथमामाहुतिमजुहोत्स्वाहेति वै तामजुहोत्सो स्विदेषा निदानेन तस्मात्स्वाहेति

१ तदाहुरिति. घ. २. See तै. सं. १. ५. ४. १.
३. जनयते इति. घ. ४. प्रदहेदिति. घ.

जुहोति तस्यां व्वरं ददाति सर्व्वं वै व्वरः सर्वेणैवेनमेतच्छमयति ॥४॥ तद्दाहुः। एतामेवाहुतिꣳ हुत्वाथोत्तराणि हवीꣳषि नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवीꣳषि निर्व्वपतीति ॥५॥ स वाऽअग्नये पवमानाय निर्व्वपति। प्राणो वै पवमानः प्राणमेवास्मिन्नेतद्दधाति तद्धेतयैवास्मिंस्तद्दधात्यन्नꣳ हि प्राणोऽन्नमेषाहुतिः ॥६॥ अथाग्नये पावकाय निर्व्वपति। अन्नं वै पावकमन्नमेवास्मिन्नेतद्दधाति तद्धेतयैवास्मिंस्तद्दधात्येषा ह्येव प्रत्यक्षमन्नमाहुतिः ॥७॥ अथाग्नये शुचये निर्व्वपति। व्वीर्यं वै शुचि यद्वाऽअस्यैतदुज्ज्वलत्येतदस्य व्वीर्यꣳ शुचि व्वीर्यमेवास्मिन्नेतद्दधाति तद्धेतयैवास्मिंस्तद्दधाति यदाह्येवास्मिन्नेतामाहुतिं जुहोत्यथास्यैतद्वीर्यꣳ शुच्युज्ज्वलति ॥८॥ तस्मादाहुः। एतामेवाहुतिꣳ हुत्वाथोत्तराणि हवीꣳषि नाद्रियेतैतयैव तं काममाप्नोति यमभिकाममुत्तराणि हवीꣳषि निर्व्वपतीति तदु निर्व्वपेदेवोत्तराणि हवीꣳषि परोक्षमिव वाऽएतद्यददस्तदिदमितीव ॥९॥ स यदग्नये पवमानाय निर्व्वपति। प्राणो वै पवमानो यदा वै जायतेऽथ प्राणोऽथ यावन्न जायते मातुर्वैव तावत्प्राणमनु प्राणिति यथा वा तज्जातऽएवास्मिन्नेतत्प्राणं दधाति ॥१०॥ अथ यदग्नये पावकाय निर्व्वपति। अन्नं वै पावकं तज्जातऽएवास्मिन्नेतदन्नं दधाति ॥११॥ अथ यदग्नये शुचये निर्व्वपति। व्वीर्यं वै शुचि यदा वाऽअन्नेन व्वर्धतेऽथ व्वीर्यं तदन्नेनैवैनमेतद्वर्द्धयित्वाथास्मिन्नेतद्वीर्यꣳ शुचि दधाति तस्मादग्नये शुचये ॥१२॥ तद्धेतदेव सद्विपर्यस्तमिव। अग्निर्ह यत्र देवेभ्यो मनुष्यानभ्युपाववर्त्त तद्धेक्षां चक्रे मैव सर्वेणैवात्मना मनुष्यानभ्युपावृतमिति ॥१३॥ स ऽएतास्तिस्रस्तनूरेषु लोकेषु व्विन्यधत्त। यदस्य पवमानꣳ रूपमासीत्तदस्यां पृथिव्यां न्यधत्ताथ यत्पावकं तदन्तरिक्षेऽथ यच्छुचि तद्दिवि तद्वाऽऋषयः प्रतिबुबुधिरे यऽउ तर्ह्यृषय आसुरसर्व्वेण वै न ऽआत्मनाग्निरभ्युपावृतदिति तस्माऽएतानि

१. नाद्रियेतैतयेति. ध. २. स यदग्नय इति. ध. ३. यावत् इति. ध.

हवीꣳषि निरवपन् ॥१४॥ स यदग्नये पवमानाय निर्व्वपति । यदेवास्यास्यां पृथिव्याꣳ रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये पावकाय निर्व्वपति यदेवास्यान्तरिक्षे रूपं तदेवास्यैतेनाप्नोत्यथ यदग्नये शुचये निर्व्वपति यदेवास्य दिवि रूपं तदेवास्यैतेनाप्नोत्येवमु कृत्स्नमेवाग्निमनपनिहितमाधत्ते तस्मादु निर्व्वपेदेवोत्तराणि हवीꣳषि ॥१५॥ केवलबर्हिः प्रथमꣳ हविर्भवति । समानबर्हिषीऽउत्तरेऽअयं वै लोकः प्रथमꣳ हविरथेदमन्तरिक्षं द्वितीयं द्यौरेव तृतीयं बहुलेव वाऽइयं पृथिवी लेलयेवान्तरिक्षं लेलयेवासौ द्यौरुभे चिदेनां प्रत्युद्यामिनीस्तामिति तस्मात्समानबर्हिषि ॥१६॥ अष्टाकपालाः सर्वे पुरोडाशा भवन्ति । अष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते तानि सर्व्वाणि चतुर्विꣳशतिः कपालानि सम्पद्यन्ते चतुर्विꣳशत्यक्षरा वै गायत्री गायत्रमग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसाधत्ते गायत्र्यो याज्यानुवाक्या भवन्ति गायत्रमग्नेश्छन्दः स्वेनैवैनमतच्छन्दसाधत्ते ॥१७॥ अथादित्यै चरुं निर्व्वपति । प्रच्यवतऽइव वाऽएषोऽस्माल्लोकाद्यऽएतानि हवीꣳषि निर्व्वपतीमान् हि लोकांत्समारोहन्नेति ॥१८॥ स यदादित्यै चरुं निर्व्वपति । इयं वै पृथिव्यदितिः सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति तस्मादादित्यै चरुं निर्व्वपति ॥१९॥ तस्यै व्विराजौ संयाज्ये स्यातामित्याहुः । व्विराड्हीयमित्यथो त्रिष्टुभौ त्रिष्टुब्भीयमित्यथो जगत्यौ जगती हीयमिति व्विराजावित्येव स्याताम् ॥२०॥ तस्यै धेनुर्दक्षिणा । धेनुरिव वाऽइयं मनुष्येभ्यः सर्व्वान् कामान्दुहे माता धेनुर्भातेव वाऽइयं मनुष्यान् बिभर्ति तस्माद्धेनुर्दक्षिणैतन्न्वेकमयनम् ॥२१॥ अथेदं द्वितीयम् । आग्नेयमेवाष्टाकपालं पुरोडाशं निर्व्वपति परोक्षमिव वाऽएतद्यदग्नये पवमानायाग्नये पावकायाग्नये शुचयऽइतीवाथाञ्जसैवैनमेतत्प्रत्यक्षमाधत्ते तस्मादग्नयेऽथादित्यै चरुं

---

१. अयं वै लोक इति. घ. २. कपालानि. इति. घ. ३. निर्व्वपतीति .
४. चरुं इति. ग. ५. स्यातामिति घ.

निर्व्वपति स य ऽएव चरोर्बन्धुः स बन्धुः ॥२२॥ Cf. का. श. १. २. १: मै. सं. १. ६. ७: ८: तै. ब्रा. १. १. ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे प्रथमप्रपाठके पञ्चमं ब्राह्मणम् ॥

२. १. ६.

घ्नन्ति वाऽएतद्यज्ञम्। यदेनं तन्वते यन्त्येव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति व्विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳहविर्यज्ञं घ्नन्ति ॥१॥ स ऽएष यज्ञो हतो न ददक्षे। तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध ऽएव यज्ञो भवति तस्माद्दक्षिणा ददाति ॥२॥ ता वै षड्दद्यात्। षड्वाऽऋतवः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥३॥ द्वादश दद्यात्। द्वादश वै मासाः संवत्सरस्य संवत्सरो यज्ञः प्रजापतिः स यावानेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयति ॥४॥ चतुर्विꣳशतिं दद्यात्। चतुर्विꣳशतिर्व्वै संवत्सरस्यार्द्धमासाः संवत्सरो यज्ञः प्रजापतिः स यावनेव यज्ञो यावत्यस्य मात्रा तावतीभिर्दक्षयत्येषा मात्रा दक्षिणानां दद्यात्त्वेव यथाश्रद्धं भूयसीस्तद्यद्दक्षिणा ददाति॥५॥ द्वया वै देवा देवाः। अहैव देवा अथ ये ब्राह्मणाः श्रुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा विभक्त ऽएव यज्ञ ऽआहुतय ऽएव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाꣳ श्रुश्रुवुषामनूचानानामाहुतिभिरेव देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणांच्छुश्रुवुषोऽनूचानास्तऽएनमुभये देवाः प्रीताः सुधायां दधति ॥६॥ तद्यथा योनौ रेतो दध्यात्। एवमेवैतदृत्विजो यजमानं लोके दधति तद्यदेभ्य ऽएत-

१. यज्ञस्येति. घ. २. यज्ञः इति. ग. घ. ३. स इति नास्ति घ. पु.
४. यथाश्रद्धमिति. घ. ५. द्वेधा इति ग.

हदाति ये मेद॑ँ सम्प्रापिपन्निति नु दक्षिणानाम् ॥७॥ देवाश्च वाऽ-असुराश्च । उभये प्राजापत्याः पस्पृधिरे तऽउभयऽएवानात्मानऽआसु-र्मर्त्या ह्यासुरनात्मा हि मर्त्यस्तेषूभयेषु मर्त्येष्वग्निरेवामृतऽआस तँ ह स्मोभयेऽमृतमुपजीवन्ति स यँ ह स्मैषां घ्नन्ति तद्धस्मै व स भवति ॥८॥ ततो देवाः । तनीयाँस इव परिशिशिषिरे तेऽर्चन्तः श्राम्यन्तश्चरुरुतासुरान्त्सपत्नान्मर्त्यानभिभवेमेति तऽएतदमृतमग्न्याधेयं ददृशुः ॥९॥ ते होचुः । हन्तेदममृतमन्तरात्मन्नादधामहे तऽइदम-मृतमन्तरात्मन्नाधायामृता भूत्वा स्तर्या भूत्वा स्तर्यान्त्सपत्नान्मर्त्यान-भिभविष्याम ऽइति ॥१०॥ ते होचुः । उभयेषु वै नोऽयमग्निः प्रत्त्वेवा-सुरेभ्यो ब्रवामेति ॥११॥ ते होचुः । आ वै व्वयमग्नी धास्यामहेऽथ यूयं किं करिष्यथेति ॥१२॥ ते होचुः । अथैनं व्वयं न्येव धास्याम-हेऽत्र तृणानि दहात्र दारूणि दहात्रौदनं पचात्र माँसं पचेति स यं तमसुरा न्यदधत तेनानेन मनुष्या भुञ्जते ॥१३॥ अथैनं देवाः । अ-न्तरात्मन्नादधत तऽइममृतमन्तरात्मन्नाधायामृता भूत्वा स्तर्या भूत्वा-स्तर्यान्त्सपत्नान्मर्त्यानभ्यभवंस्तथोऽएवैष एतदमृतमन्तरात्मन्नाधत्ते[4] नामृतत्वस्याशास्ति सर्वमायुरेत्यस्तर्यो हैव भवति न हैनँ सपत्न-स्तुस्तूर्षमाणश्च न स्तृणुते तस्माद्यदाहिताग्निश्चानाहिताग्निश्च स्पर्धे-तेऽआहिताग्निरेवाभिभवत्यस्तर्यो हि खलु स तर्हि भवत्यमृतः ॥१४॥ तद्यत्रैनमदो मन्थन्ति । तज्जातमभिप्राणिति प्राणो वाऽअग्निर्जातमेवै-नमेतत्सन्तं जनयति स पुनरपानिति तदेनमन्तरात्मन्नाधत्ते सोऽस्यै-षोऽन्तरात्मन्नग्निराहितो भवति ॥१५॥ तमुद्दीप्य समिन्द्धे । इह यथ्यऽइह सुकृतं करिष्यामीत्येवैनमेतत्समिन्द्धे योऽस्यैषोऽन्तरात्मन्न-ग्निराहितो भवति ॥१६॥ अन्तरेणागाद्व्यवृतदिति । न ह वाऽअस्यैतं कंश्चनान्तरेणैति यावज्जीवति योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति

१. श्राम्यन्त इति. घ. २. भूत्वाऽस्तर्या इति. घ. ३. एतदमृतमिति. घ.
४. आधत्ते इति. घ. ५. कश्चनान्तरेणेति. घ.

तस्मादु तन्नाद्रियेत यदनुगच्छेन्न ह वाऽअस्यैषोऽनुगच्छति यावज्जीवति योऽस्यैषोऽन्तरात्मन्नग्निराहितो भवति ॥१७॥ ते वाऽएते प्राणाऽएव यदग्नयः । प्राणोदानावेवाहवनीयश्च गार्हपत्यश्च व्यानोऽन्वाहार्यपचनः ॥१८॥ तस्य वाऽएतस्याग्न्याधेयस्य । सत्यमेवोपचारः स यः[1] सत्यं वदति यथाग्निꣳ समिद्धं तं घृतेनाभिषिञ्चेदेवꣳहैनꣳ स ऽउद्दीपयति तस्य भूयो भूय ऽएव तेजो भवति श्वः श्वः श्रेयान् भवत्यथ योऽनृतं वदति यथाग्निꣳ समिद्धं तमुदकेनाभिषिञ्चेदेवꣳहैनꣳस जासयति तस्य कनीयः कनीय ऽएव तेजो भवति श्वः श्वः पापीयान् भवति तस्मादु सत्यमेव वदेत् ॥१९॥ तदु हाप्यरुणमौपवेशिं ज्ञातय ऽऊचुः । स्थविरो वाऽअस्यग्नीऽआधत्स्वेति स होवाच ते मेतद्ब्रूथ वाचंयम एवैधि न वाऽआहिताग्निनानृतं वदितव्यं न वदज्ञातु नानृतं वदेत्तावत्सत्यमेवोपचार ऽइति ॥२०॥ C। का. श. १. २. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे प्रथमप्रपाठके षष्ठं ब्राह्मणम् ॥

प्रथमप्रपाठकश्च समाप्तः ॥

(कण्डिकासंख्या ॥ ११४ ॥)

(पुनराधानविधिः)

२. २. १.

वरुणो हैनद्राज्यकाम ऽआदधे । स राज्यमगच्छत्तस्माद्यश्च वेद यश्च न वरुणो राजेत्येवाहुः सोमो यशस्कामः स यशोऽभवत्तस्माद्यश्च सोमे लभते यश्च नोभावेवागच्छतो यश ऽएवैतद्द्रष्टुमागच्छन्ति

---

१ यः इति. ग. २. श्व इति. घ. ३. योऽनृतमिति. घ. ४. जातु इति. घ.

यशो ह भवति राज्यं गच्छति य ऽएवं विद्वानाधत्ते ॥१॥ अग्नौ ह वै देवाः । सर्व्वाणि रूपाणि निदधिरे यानि च ग्राम्याणि यानि चारण्यानि विजयं वोपप्रैष्यन्तः कामचारस्य वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥२॥ तान्यु हाग्निर्निचकमे । तैः संगृह्यर्तून् प्रविवेश पुनरम ऽइति देवा ऽएदग्निं तिरोभूतं तेषाꣳहेयसेवास किमिह कर्तव्यं केह प्रज्ञेतीव ॥३॥ तत एतत्त्वष्टा पुनराधेयं ददर्श । तदादधे तेनाग्नेः प्रियं धामोपजगाम सोऽस्माऽउभयानि रूपाणि प्रतिनिःससर्ज यानि च ग्राम्याणि यानि चारण्यानि तस्मादाहुस्त्वाष्ट्राणि वै रूपाणीति त्वष्टुर्ह्येव सर्वꣳ रूपमुप ह त्वेवान्याः प्रजा यावत्सो यावत्स ऽइव तिष्ठन्ते ॥४॥ तस्मै कं पुनराधेयमादधीत । एवꣳ हैवाग्नेः प्रियं धामोपगच्छति सोऽस्माऽउभयानि रूपाणि प्रतिनिःसृजति यानि च ग्राम्याणि यानि चारण्यानि तस्मिन्नेतान्युभयानि रूपाणि दृश्यन्ते परमता वै सा स्पृहयन्त्यु हास्मै तथा पुष्यति लोक्यस्येवापि ॥५॥ आग्नेयोऽयं यज्ञः । ज्योतिरग्निः पाप्मनो दग्धा सोऽस्य पाप्मानं दहति स ऽइह ज्योतिरेव श्रिया यशसा भवति ज्योतिरमुत्र पुण्यलोकत्वेतन्नु तद्यस्मादादधीत ॥६॥ स वै व्वर्षास्वादधीत । व्वर्षा वै सर्वऽऋतवो वर्षा हि वै सर्वऽऋतवोऽथादो व्वर्षमकुर्मादो व्वर्षमकुर्मेति संवत्सरान्संपश्यन्ति व्वर्षा ह त्वेव सर्वेषामृतूनाꣳ रूपमुत हि तद्वर्षासु भवति यदाहुर्ग्रीष्मऽइव वाऽअद्येत्युतो तद्वर्षासु भवति यदाहुः शिशिरऽइव वाऽअद्येति व्वर्षादिद्वर्षाः ॥७॥ अथैतदेव परोक्षꣳ रूपम्। यदेव पुरस्ताद्वाति तद्वसन्तस्य रूपं यत्स्तनयति तद्ग्रीष्मस्य यद्वर्षति तद्वर्षाणां यद्विद्योतते तच्छरदो यद्वृष्टाद्गृह्णाति तद्धेमन्तस्य व्वर्षाः सर्व्वऽऋतव ऋतून् प्राविशदृतुभ्य ऽएवैनमेतन्निर्मिमीते ॥८॥ आदित्यस्त्वेव सर्व्वऽऋतवः । यदैवोदेत्यथ व्वसन्तो यदा सङ्गवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ व्वर्षा यदापराह्णोऽथ

१. आधत्ते इति. घ. २ प्रज्ञेति वेति. घ.

शरद्यदेवास्तमेत्यथ हेमन्तस्तस्मादु मध्यन्दिनऽएवादधीत तर्हि होपोऽस्य लोकस्य नेदिष्ठं भवति तन्नेदिष्ठादेवैनमेतन्मध्याग्निर्मिमीते ॥९॥ छाययेव वाऽअयं पुरुषः । पाप्मनानुपक्तः सोऽस्यात्र कनिष्ठो भवत्यधस्पदमिवेयस्यते तत्कनिष्ठमेवैतत्पाप्मानमवबाधते तस्मादु मध्यन्दिनऽएवादधीत ॥१०॥ तं वै दर्भैरुद्धरति । दारुभिर्व्वै पूर्व्वमुद्धरति दारुभिः पूर्व्वं दारुभिरपरं जामि कुर्यात्समदं कुर्यादापो दर्भा ऽआपो व्वर्षा ऋतून् प्राविशदद्भिरेवैनमेतदद्भ्यो निर्मिमीते तस्माद्दर्भैरुद्धरति ॥११॥ अर्क्कपलाशाभ्यां । व्रीहिमयमपूपं कृत्वा यत्र गार्हपत्यमाधास्यन् भवति तन्निदधति तद्गार्हपत्यमादधाति ॥१२॥ अर्क्कपलाशाभ्यां । यवमयमपूपं कृत्वा यत्राहवनीयमाधास्यन् भवति तन्निदधाति तदाहवनीयमादधाति पूर्व्वाभ्यामेवैनावेतदग्निभ्यामन्तर्दध्म ऽइति व्वदन्तस्तदु तथा न कुर्याद्रात्रिभिर्ह्येवान्तर्हितौ भवतः ॥१३॥ आग्नेयमेव । पञ्चकपालं पुरोडाशं निर्व्वपति तस्य पञ्चपदाः पङ्क्तयो याज्यानुवाक्या भवन्ति पञ्च वाऽऋतव ऽऋतून् प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥१४॥ सर्व्व ऽआग्नेयो भवति । एवꣳ हि त्वष्टाग्नेः प्रियं धामोपागच्छत्तस्मात्सर्व आग्नेयो भवति ॥१५॥ तेनोपाꣳशु चरन्ति । यद्वै ज्ञातये वा सख्ये वा निष्केवल्यं चिकीर्षति तिर इव वैतेन वोभवद्वैश्वदेवोऽन्यो यज्ञोऽथैष निष्केवल्य ऽआग्नेयो यद्वै तिर इव तदुपाꣳशु तस्मादुमापाꣳशु चरन्ति ॥१६॥ उच्चैरुत्तममनुयाजं यजति । कृतकर्मैव हि स तर्हि भवति सर्व्वो हि कृतमनुबुध्यते ॥१७॥ स ऽ आश्राव्याह । समिधो यजेति तदाग्नेयꣳरूपं परोक्षं त्वग्नीन्यजेति त्वेव ब्रूयात्तदेव प्रत्यक्षमाग्नेयꣳ रूपम् ॥१८॥ स यजति । अग्नऽआज्यस्य व्यन्तु व्वौझगग्निमाज्यस्य व्वेतु व्वौझगग्निनाज्यस्य व्यन्तु व्वौझगग्निराज्यस्य व्वेतु व्वौझगिति ॥१९॥ अथ स्वाहाग्निमित्याह । आग्नेयमाज्यभागꣳ स्वाहाग्निं पवमानमिति यदि पवमानाय ध्रियेरन्त्स्वाहाग्निमिन्दुमन्तमिति

१. धामोपागच्छदिति. घ. २. इवैतेनेति. ग. ३. वौझगितीति. ग.

यद्यग्नयऽइन्दुमते ध्रियेरन्त्स्वाहाग्निꣳ स्वाहाग्नीनाज्यपाञ्जुषाणोऽअग्निराज्यस्य व्वेत्विति यजति ॥२०॥ अथा ऽऽहाग्नयेऽनुब्रूहीति । आग्नेयमाज्यभागꣳ सोऽन्वाहा"ग्निꣳस्तोमेन बोधय समिधानोऽअमर्त्यम् । हव्या देवेषु नो दध"दिति स्वपितीव खलु वाऽएतद्यदुद्वासितो भवति सम्प्रबोधयत्येवैनमेतत्समुदीर्पयति जुषाणोऽअग्निराज्यस्य व्वेत्विति यजति ॥२१॥ अथ यद्यग्नये पवमानाय ध्रियेरन् । अग्नये पवमानायानुब्रूहीति ब्रूयात्सोऽन्वाहा"ग्नऽआयूꣳषि पवसऽआसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुना"मिति तथाहाग्नेयो भवति सोमो वै पवमानस्तद् सौम्यादाज्यभागान्नयन्ति जुषाणोऽअग्निः पवमान ऽआज्यस्य व्वेत्विति यजति ॥२२॥ अथ यद्यग्नयऽइन्दुमते ध्रियेरन् । अग्नयऽइन्दुमतेऽनुब्रूहीति ब्रूयात्सोऽन्वाहे"ह्यूषु ब्रवाणि तेऽग्नऽइत्थेतरा गिरः । एभिर्वर्द्धासऽइन्दुभि"रिति तथा हाग्नेयो भवति सोमो वाऽइन्दुस्तद् सौम्यादाज्यभागान्नयन्ति जुषाणोऽअग्निरिन्दुमानाज्यस्य व्वेत्विति यजत्येवमु सर्वमाग्नेयं करोति ॥२३॥ अथाहाग्नयेऽनुब्रूहीति हविषः । अग्निं यजाग्नये स्विष्टकृतेऽनुब्रूह्यग्निꣳ स्विष्टकृतं यजेत्यथ यद्देवान्यजेत्यग्नीन्यजेत्येवैतदाह ॥२४॥ स यजति । अग्नेर्व्वसुवने व्वसुधेयस्य व्वेतु व्वौझग्गन्नाऽउ व्वसुवने व्वसुधेयस्य व्वेतु व्वौझग्देवोऽअग्निः स्विष्टकृदिति स्वयमाग्नेयस्तृतीय ऽएवं वाग्नेयाननुयाजान् करोति॥२५॥ ता वाऽएताः । षड्विभक्तीर्यजति चतश्रः प्रयाजेषु द्वेऽअनुजाजेषु षड्वाऽऋतव ऋतून् प्राविशदृतुभ्य एवैनमेतन्निर्मिमीते ॥२६॥ द्वादश वा त्रयोदश वाक्षराणि भवन्ति । द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः संवत्सरमृतून् प्राविशदृतुभ्यऽएवैनमेतत्संवत्सरान्निर्मिमीते न द्वे चन सहाजामितायै जामि ह कुर्याद्यद्द्वे चित्सह स्यातां व्य-

---

१. अग्नयेऽनुब्रूहीति. घ.

२. ऋ. सं ४. १. ६; तै. सं ४. १. ११. ४; वाजसनेयिसंहितायां नेयमृक् पठिता ।

३. मा. सं. १९. ३८. ४. मा. सं. २६. १३.

५. यजेत्यग्नीनिति. घ.

न्तु व्वेन्वित्येव प्रयाजानाꣳ रूपं व्वसुवने व्वसुधेयस्येत्यनुयाजानाम् ॥२७॥ तस्य हिरण्यं दक्षिणा । आग्नेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणानड्वान्वा स हि व्वहेनाग्नेयोऽग्निदग्धमिव ह्यस्य व्वहं भवति देवानाꣳ हव्यवाहनोऽग्निरिति व्वहति वाऽएष मनुष्येभ्यस्तस्मादनड्वान् दक्षिणा ॥२८॥ Cf. का. श. १. २. ३; तै. सं. १. ५. १. ५; and तै. ब्रा. १. ३. १. मै. सं. १. ७. २, ३; काठ. सं. ८. १५; कपिष्ठ. सं. ८. ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे द्वितीयप्रपाठके प्रथमं ब्राह्मणम् ॥

(अग्निहोत्रम्)

२. २. २.

प्रजापतिर्ह वाऽइदमग्रऽएक ऽएवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत सोऽग्निमेव मुखाज्जनयाञ्चक्रे तद्यदेनं मुखादजनयत तस्मादन्नादोऽग्निः स यो हैवमेतमग्निमन्नादं व्वेदान्नादो हैव भवति ॥१॥ तद्धाऽ एनमेतदग्रे देवानामजनयत । तस्मादग्निराग्निर्ह वै नामैतद्यदग्निरिति स जातः पूर्व्वः प्रेयाय यो वै पूर्व्व ऽएत्यग्रऽएतीति वै तमाहुः सोऽएवास्याग्निना ॥२॥ सऽ ऐक्षत प्रजापतिः । अन्नादं वाऽइममात्मनोऽजीजने यदग्निं न वाऽइह मदन्यदन्नमस्ति यं वाऽअयं नाद्यादिति काल्वालीकृता हैव तर्हि पृथिव्यास नौषधय आसुर्न व्वनस्पतयस्तदेवास्य मनस्यास ॥३॥ अथैनमग्निर्व्यान्तेनोपपर्यावर्त्त । तस्य भीतस्य स्वो महिमापचक्राम व्वाग्वाऽअस्य स्वो महिमा व्वागस्यापचक्राम सऽ आत्मन्येवाहुतिमीषे स ऽउदमृष्ट तद्यदुदमृष्ट तस्मादिदं चालोमकमिदं च तत्र व्विवेद घृताहुतिं वैव पयऽआहुतिं वोभयꣳ ह त्वेव तत्पय ऽएव ॥४॥ सा हैनं नाभिराधयाञ्चकार । केशमिश्रेव हास तां व्यौक्षदोषं धयेति तत ओषधयः सम-

१. आत्मन्नेवेति. ग. २ वौक्षदिति. घ.

भवंस्तस्मादोषधयो नाम स द्वितीयमुदसृष्ट तत्रापरामाहुतिं विवेद घृताहुतिं वेव पयऽ आहुतिं वोभयꣳ ह त्वेव तत्पय एव ॥५॥ सा हैनमभिराधयाञ्चकार । स व्यचिकित्सज्जुहवानीऽइमा हापाऽइमिति तꣳ स्वो महिमाभ्युवाद जुहुधीति स प्रजापतिर्विदाञ्चकार स्वो वै मा महिमाहेति स स्वाहेत्येवाजुहोत्तस्मादु स्वाहेत्येव हूयते तत एष उदियाय य एष तपति ततोऽयं प्रवभूव योऽयं पवते तत एवाग्निः पराङ् पर्य्यावर्तत ॥६॥ स हुत्वा प्रजापतिः । प्र चाजायतात्म्यतश्चाग्नेर्मृत्योरात्मानमत्रायत स यो हैवं विद्वानग्निहोत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यां प्रजापतिः प्राजायतैवमु हैवात्म्यतोऽग्नेर्मृत्योरात्मानं त्रायते ॥७॥ स यत्र म्रियते । यत्रैनमग्नावभ्यादधति तदेषोऽग्नेरधिजायतेऽथास्य शरीरमेवाग्निर्दहति तद्यथा पितुर्वा मातुर्वा जायतैवमेषोऽग्नेरधिजायते शश्वद्ध वाऽएष न सम्भवति योऽग्निहोत्रं न जुहोति तस्माद्वाऽअग्निहोत्रꣳ होतव्यम् ॥८॥ तद्धा एतत् । एव विचिकित्सायै जन्म यत्प्रजापतिर्व्यचिकित्सत्स विचिकित्सञ्छ्रेयस्यध्रियत यः प्र चाजायतात्म्यतश्चाग्नेर्मृत्योरात्मानमत्रायत स यो हैवमेतद्विचिकित्सायै जन्म वेद यद्ध किं च विचिकित्सति श्रेयसि हैव ध्रियते ॥९॥ स हुत्वा न्यसृष्ट । ततो विकङ्कतः समभवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्षस्तत एते देवानां वीरा अजायन्ताग्नियोऽयं पवते सूर्यः स यो हैवमेतान् देवानां वीरान् वेदाहास्य वीरो जायते ॥१०॥ तऽउ हैतऽऊचुः । वयं वै प्रजापतिं पितरमनु स्मो हन्त वयं तत्सृजामहै यदस्मानन्वसदिति ते परिश्रित्य गायत्रेणापहिङ्कारेण तुष्टुविरे तद्यत्पर्यश्रयन्त्स समुद्रोऽथेयमेव पृथिव्यास्तावः ॥११॥ ते स्तुत्वा प्राञ्च ऽउच्चक्रमुः । पुनरेम इति देवा एद्धाꣳ सम्भूताꣳ सा हैनानुदीक्ष्य हिञ्चकार ते देवा विदाञ्चकुरेष साम्नो हिङ्कार इत्यप-

---

१. एव इति. घ. २. योऽयं पवत इति. ग.

३. एवेति. घ. ४. प्रजापतिरिति. घ.

हिङ्कारꣳ हैव पुरा ततः सामास स एष गवि साम्नो हिङ्कारस्तस्मादेषोपजीवनीयोपजीवनीयो ह वै भवति य ऽएवमेतं गवि साम्नो हिङ्कारं वेद ॥१२॥ ते होचुः । भद्रं वाऽइदमजीजनामहि ये गामजीजनामहि यज्ञो ह्येवयं नो ह्यते गोर्यज्ञस्तायतेऽन्नꣳ ह्येवयं यद्धि किञ्चान्नं गौरेव तदिति ॥१३॥ तद्वाऽएतदेवैतासां नाम । एतद्यज्ञस्य तस्मादेतत्परिहरेत्साधु पुण्यमिति बह्वयो ह वाऽअस्यैता भवन्त्युपनामुक एनं यज्ञो भवति य ऽएवं विद्वानेतत्परिहरति साधु पुण्यमिति ॥१४॥ तासु हाग्निरभिदध्यौ । मिथुन्येनया स्यामिति ताꣳ सम्बभूव तस्याꣳ रेतः प्रासिञ्चत्तत्पयोऽभवत्तस्मादेतदामायां गवि सन्यꣳ श्रृतमग्नेर्हि रेतस्तस्माद्यदि कृष्णायां यदि रोहिण्याꣳ शुक्लमेव भवत्यग्निसङ्काशमग्नेर्हि रेतस्तस्मात्प्रथमदुग्धमुष्णं भवत्यग्नेर्हि रेतः ॥१५॥ ते होचुः । हन्तेदं जुहवामहाऽइति कस्मै न इदं प्रथमाय होष्यन्तीति मह्यमिति हैवाग्निरुवाच मह्यमिति योऽयं पवते मह्यमिति सूर्यस्ते न सम्पादयाञ्चकुस्ते हासम्पाद्योचुः प्रजापतिमेव पितरं प्रत्ययाम स यस्मै न इदं प्रथमाय होतव्यं वक्ष्यति तस्मै न इदं प्रथमाय होष्यन्तीति ते प्रजापतिं पितरं प्रतीत्योचुः कस्मै न इदं प्रथमाय होष्यन्तीति ॥१६॥ स होवाच । अग्नयेऽग्निरनुष्ठ्या स्वष्ठꣳरेतः प्रजनयिष्यते तथा प्रजनिष्यध्वऽइत्यथ तुभ्यमिति सूर्यमथ यदेव हूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवतऽइति तदेभ्य इदमप्येतर्हि तथैव जुह्वत्यग्नयऽएव सायꣳ सूर्याय प्रातरथ यदेव हूयमानस्य व्यश्नुते तदेवैतस्य योऽयं पवते ॥१७॥ ते हुत्वा देवाः । इमां प्रजातिं प्राजायन्त येषामियं प्रजातिरिमां विजितिं व्यजयन्त येयमेषां विजितिरिममेव लोकमग्निरजयदन्तरिक्षं वायुर्दिवमेव सूर्यः स यो हैवं विद्वानग्निहोत्रं जुहोत्येताꣳ हैव प्रजातिं प्रजायते यामेतऽएतत्प्राजायन्तैतां विजितिं विज-

१. प्रथमायेति. घ. २. सूर्य इति. ग. घ. ३. विजितिरिममेवेति. घ.

यते यामेतऽएतद्यजयन्तैतेरु हैव सलोको भवति य एवं विद्वान-
ग्निहोत्रं जुहोति तस्माद्वाऽअग्निहोत्रꣳहोतव्यम् ॥१८॥ Cf. का. श.
१. २. ४: तै. ब्रा. २. १. २: मै. सं. १. ८. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् ॥

(इति द्वितीयकाण्डे द्वितीयोऽध्यायस्समाप्तः)

२. २. ३.

सूर्यो ह वाऽअग्निहोत्रम् । तद्यदेतस्याऽअग्रऽआहुतेरुदैत्तस्मात्सू
र्योऽग्निहोत्रꣳ ॥१॥ स यत्सायमस्तमिते जुहोति । य ऽइदं तस्मिन्निह
सति जुहवानीत्यथ यत्प्रातरनुदिते जुहोति य ऽइदं तस्मिन्निह सति
जुहवानीति तस्माद्वै सूर्योऽग्निहोत्रमित्याहुः ॥२॥ (शतम् १००० ॥)
अथ यदस्तमेति । तदग्नावेव योनौ गर्भो भूत्वा प्रविशति तं गर्भं
भवन्तमिमाः सर्वाः प्रजा अनु गर्भा भवन्तीलिता हि शेरे सञ्जानाना
ऽअथ यद्रात्रिस्तिर ऽएवैतत्करोति तिर ऽइव हि गर्भाः॥३॥स यत्सा-
यमस्तमिते जुहोति । गर्भमेवैतत्सन्तमभिजुहोति गर्भꣳसन्तमभिक-
रोति स यद्गर्भꣳ सन्तमभिजुहोति तस्मादिमे गर्भा अनश्नन्तो जीव-
न्ति ॥४॥ अथ यत्प्रातरनुदिते जुहोति । प्रजनयत्येवैनमेतत्सोयं तेजो
भूत्वा विभ्राजमान उदेति शश्वद्ध वै नादियाद्यदस्मिन्नेतामाहुतिं
न जुहुयात्तस्माद्वाऽएतामाहुतिं जुहोति ॥५॥

(अर्धप्रपाठकः ५१)

स यथाहिस्त्वचो निर्मुच्येत । एवꣳ रात्रेः पाप्मनो निर्मु-
च्यते यथाह वाऽअहिस्त्वचो निर्मुच्येतैवꣳसर्वस्मात्पाप्मनो
निर्मुच्यते य ऽएवं विद्वानग्निहोत्रं जुहोति तदेतस्यैवानु प्रजा-
तिमिमाः सर्वाः प्रजा ऽअनु प्रजायन्ते वि हि सृज्यन्ते यथार्थꣳ
॥६॥ स यः पुरादित्यस्यास्तमयात् । आहवनीयमुद्धरत्येते वै

१. मित्याहुः इति. क. २. आदितः कण्डिकानां संख्येयम् ।

विश्वे देवा रश्मयोऽथ यत्परं भाः प्रजापतिर्वा स ऽइन्द्रो वैतदु ह वै विश्वे देवा ऽअग्निहोत्रं जुह्वतो गृहानागच्छन्ति स यस्यानुद्धृतमागच्छन्ति तस्माद्देवा अपप्रयन्ति तद्वाऽअस्मै तद्वृध्यते यस्माद्देवा ऽअपप्रयन्ति तस्यानु व्यृद्धिं यश्च वेद यश्च नानुद्धृतमभ्यस्तमगादित्याहुः ॥७॥ अथ यः पुरादित्यस्यास्तमयात् । आहवनीयमुद्धरति यथा श्रेयस्यागमिष्यन्त्यावसथेनोपक्लृप्तेनोपासीतैवं तत्स यस्योद्धृतमागच्छन्ति तस्याहवनीयं प्रविशन्ति तस्याहवनीये निविशन्ते ॥८॥ स यत्सायमस्तमिते जुहोति । अग्नावेवैभ्य ऽएतत्प्रविष्टेभ्यो जुहोत्यथ यत्प्रातरनुदिते जुहोत्यप्रेतेभ्य ऽएवैभ्य ऽएतज्जुहोति तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रं मन्यामहऽइति ह स्माहागुर्यथा शून्यमावसथमाहरेदेवं तदिति ॥९॥ द्वयं वाऽइदं जीवनम् । मूलि चैवामूलं च तदुभयं देवानाꣳ सन्मनुष्या उपजीवन्ति पशवो मूला ऽओषधयो मूलिन्यस्ते पशवो मूलाऽओषधीर्मूलिनीर्जग्ध्वापः पीत्वा तत एष रसः सम्भवति ॥१०॥ स यत्सायमस्तमिते जुहोति । अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि यदेषामिदꣳ सदुपजीवाम इति स यत्ततो रात्र्याश्नाति हुतोच्छिष्टमेव तन्निरवत्तबल्यश्नाति हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता ॥११॥ अथ यत्प्रातरनुदिते जुहोति । अस्य रसस्य जीवनस्य देवेभ्यो जुहवानि यदेषामिदꣳसदुपजीवाम ऽइति स यत्ततोऽह्नाश्नाति हुतोच्छिष्टमेव तन्निरवत्तबल्यश्नाति हुतोच्छिष्टस्य ह्येवाग्निहोत्रं जुह्वदशिता ॥१२॥ तदाहुः । समेवान्ये यज्ञास्तिष्ठन्तेऽग्निहोत्रमेव न सन्तिष्ठतेऽपि द्वादशसंवत्सरमन्तवदेवाथैतदेवानन्तꣳ सायꣳ हि हुत्वा वेद प्रातर्होष्यामीति प्रातर्हुत्वा वेद पुनः सायꣳ होष्यामीति तदेतदनुपस्थितमग्निहोत्रं तस्यानुपस्थितिमन्वनुपस्थिता इमाः प्रजाः प्रजायन्तेऽनुपस्थितो ह वै श्रिया प्रजया प्रजायते य एवमेतदनुपस्थितमग्निहोत्रं वेद॥१३॥तदुग्ध्वाधिश्रयति । शृतमसदिति तदाहुर्यद्युदन्तं तर्हि शृतं तर्हि जुहुयादिति तद्वै नोदन्तं कुर्यादुप ह दहेद्यदुदन्तं कुर्यादप्रजज्ञि वै रेत ऽउपदग्धं तस्मान्नोदन्तं कुर्यात् ॥१४॥

अधिश्रित्यैव जुहुयात् । यन्वेवैतदग्ने रेतस्तेन न्वेव शृतं यद्वेनदग्ना-वधिश्रयन्ति तेनोऽएव शृतं तस्मादधिश्रित्यैव जुहुयात् ॥ १५ ॥ तद-वज्योतयति । शृतं व्वेदानीन्यथापः प्रत्यानयति शान्त्यै न्वेव रसस्यो चैव सर्व्वत्वायेदꣳ हि यदा व्वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा तत एष रसः सम्भवति तस्मादु रसस्यो चैव सर्व्वत्वाय तस्मा-द्यद्येनं क्षीरं केवलं पानेऽभ्याभवेदुदस्तोकमाश्रोतयितवै ब्रूयाच्छान्त्यै न्वेव रसस्यो चैव सर्वत्वाय ॥१६॥ अथ चतुरन्नयति । चतुर्धाविहि-तꣳ हीदं पयोऽथ समिधमादायोदाद्रवति समिद्धहोमायैव सोऽनु-पसाद्य पूर्वामाहुतिं जुहोति स यदुपसादयेद्यथा यस्माऽअशनमाहरि-ष्यन्स्यात्तदन्तरा निदध्यादेवं तदथ यदनुपसाद्य यथा यस्माऽअशन-माहरेत्तस्माऽआहुत्यैवोपनिदध्यादेवं तदुपसाद्योत्तरां नानावीर्येऽएवैने ऽएतत्करोति मनश्च ह वै व्वाक्चैतेऽआहुती तन्मनश्चैवैतद्वाचं च व्याव-र्तयति तस्मादिदं मनश्च वाक्च समानमेव सन्नानेव॥१७॥स वै द्विरग्नौ जुहोति । द्विरुपमार्ष्टि द्विः प्राश्नाति चतुरन्नयति तद्दश दशाक्षरा वै वि-राड्विराडेव यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥१८॥ स यदग्नौ जुहोति । तद्देवेषु जुहोति तस्माद्देवाः सन्त्यथ यदुपमार्ष्टि तत्पितृषु चौषधिषु च जुहोति तस्मात्पितरश्चौषधयश्च सन्त्यथ यद्भुत्वा प्रा-श्नाति तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्ति ॥१९॥ या वै प्रजा यज्ञऽनन्वाभक्ताः । पराभूता वै ता एवमेवैतद्या इमाः प्रजा अपरा-भूतास्ता यज्ञमुखऽआभजति तेनो ह पशवोऽन्वाभक्ता यन्मनुष्या-ननु पशवः ॥२०॥ तदु होवाच याज्ञवल्क्यः । न वै यज्ञ इव मन्त-वै पाकयज्ञ इव वाऽइतीदꣳ हि यदन्यस्मिन्यज्ञे स्रुच्यवद्यति सर्व्वं तदग्नौ जुहोत्यथैतदग्नौ हुत्वोत्सृप्याचामति निर्लेढि तदस्य पाकयज्ञ-स्येवेति तदस्य तत्पशव्यꣳ रूपं पशव्यो हि पाकयज्ञः ॥२१॥ सैषै-काहुतिरेवाग्रे । यामेवामुं प्रजापतिरजुहोदथ यदेतऽएतत्पश्चेवाधिय-न्ताग्नियोऽयं पवते सूर्यस्तस्मादेषा द्वितीयाहुतिर्हूयते ॥२२॥ सा या पूर्व्वाहुतिः । साग्निहोत्रस्य देवता तस्मात्तस्यै जुहोत्यथ योत्तरा स्वि-

प्रकृद्धाजनमेव सा तस्मात्तामुत्तरार्धे जुहोत्येषा हि दिक् स्विष्टकृत-स्तन्मिथुनायैवैषा द्वितीयाहुतिर्हूयते द्वन्द्वं हि मिथुनं प्रजननम् ॥२३॥ तद्द्वयमेवैतेऽआहुती । भूतं चैव भविष्यच्च जातं च जनिष्य-माणं चागतं चाशा चाद्य च श्वश्च तद्द्वयमेवानु ॥२४॥ आत्मैव भूतं । अद्धा हि तद्यद्भूतमद्धो तद्यदात्मा प्रजैव भविष्यदनद्धा हि तद्यद्भविष्यदनद्धो तद्यत्प्रजा ॥२५॥ आत्मैव जातम । अद्धा हि तद्यज्जातमद्धो तद्यदात्मा प्रजैव जनिष्यमाणमनद्धा हि तद्य-ज्जनिष्यमाणमनद्धा तद्यत्प्रजा ॥२६॥ आत्मैवागतम् । अद्धा हि तद्य-दागतमद्धो तद्यदात्मा प्रजैवाशानद्धा हि तद्यदाशानद्धो तद्यत्प्रजा ॥२७॥ आत्मैवाद्य । अद्धा हि तद्यदद्याद्धो तद्यदात्मा प्रजैव श्वोऽ-नद्धा हि तद्यच्छ्वोऽनद्धो तद्यत्प्रजा ॥ २८ ॥ सा या पूर्वाहुतिः । सा-त्मानमभि हूयते तां मन्त्रेण जुहोत्यद्धा हि तद्यन्मन्त्रोऽद्धो तद्यदात्मा-ऽथ योत्तरा सा प्रजामभि हूयते तां तूष्णीं जुहोत्यनद्धा हि तद्यत्तूष्णी-मनद्धो तद्यत्प्रजा॥२९॥स जुहोति । "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहे"-त्यथ प्रातः "सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहे"ति तत्सत्येनैव हूयते यदा होव सूर्योऽस्तमेत्यथाग्निर्ज्योतिर्यदा सूर्य उदेत्यथ सूर्यो ज्योतिर्यद्वै सत्येन हूयते तद्देवान् गच्छति ॥३०॥ तदु हैतदेवारुणये ब्रह्मवर्चस-कामाय तक्षानूवाचाग्निर्ब्रह्मा ज्योतिर्ब्रह्मः सूर्यो ब्रह्मा ज्योतिर्ब्रह्म ऽइति ब्रह्मवर्चसी हैव भवति यऽ एवं विद्वानग्निहोत्रं जुहोति ॥३१॥ तद्व-स्त्येव प्रजननस्येव रूपम् । "अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहे"ति तदुभय-तो ज्योती रेतो देवतया परिगृह्णात्युभयतःपरिगृहीतं वै रेतः प्रजा-यते तदुभयत एवैतत्परिगृह्य प्रजनयति ॥३२॥ अथ प्रातः । "सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहे"ति तदुभयतो ज्योती रेतो देवतया परि-गृह्णात्युभयतःपरिगृहीतं वै रेतः प्रजायते तदुभयत एवैतत्परिगृह्य प्रजनयति तत्प्रजननस्य रूपम् ॥३३॥ तदु होवाच जीवलश्चैलकिः ।

१. तद्द्वयमेवानु इति ग

गर्भमेवारुणिः करोति न प्रजनयतीति स एतेनैव सायं जुहुयात् ॥३४॥ अथ प्रातः। "ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहे"ति तद्बहिर्धा ज्योती रेतो देवतया करोति बहिर्धा वै रेतः प्रजातं भवति तदेनत्प्रजनयति ॥३५॥ तदाहुः। अग्नावेवैतत्सायꣳ सूर्ये जुहोति सूर्ये प्रातरग्निमिति तद्वै तदुदितहोमिनामेव यदा ह्येव सूर्योऽस्तमेत्यथाग्निर्ज्योतिर्यदा सूर्यऽउदेत्यथ सूर्यो ज्योतिर्नास्य सा परिचक्षेयमेव परिचक्षा यत्तस्यै नाद्धा देवतायै हूयते याग्निहोत्रस्य देवताग्निर्ज्योतिर्ज्योतिराग्निः स्वाहेति तत्र नाग्नये स्वाहेत्यथ प्रातः सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति तत्र न सूर्याय स्वाहेति ॥३६॥ अनेनैव जुहुयात्। "सजूर्देवेन सवित्रे"ति तत्सवितृमत्प्रसवाय सजूराज्येन्द्रवत्येति तद्राज्या मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता जुषाणोऽअग्निर्वेतु स्वाहेति तदग्नये प्रत्यक्षं जुहोति ॥३७॥ अथ प्रातः। "सजूर्देवेन सवित्रे"ति तत्सवितृमत्प्रसवाय सजूरुपसेन्द्रवत्येत्यहेति वा तदह्नां वोपसां वा मिथुनं करोति सेन्द्रं करोतीन्द्रो हि यज्ञस्य देवता "जुषाणः सूर्यो व्वेतु स्वाहे"ति तत्सूर्याय प्रत्यक्षं जुहोति तस्मादेवमेव जुहुयात् ॥३८॥ ते होचुः। को न इदꣳ होष्यतीति ब्राह्मण एवेति ब्राह्मणेदं नो जुहुधीति किं मे ततो भविष्यतीत्यग्निहोत्रोच्छिष्टमेवेति स यत्स्रुचि परिशिनष्टि तदग्निहोत्रोच्छिष्टमथ यत्स्थाल्यां यथा परीणहो निर्वपेदेवं तत्तस्मात्तद्य एव कश्च पिबेत्तद्वै नाब्राह्मणः पिबेदग्नौ ह्यधिश्रयन्ति तस्मान्नाब्राह्मणः पिबेत् ॥३९॥ Cf का. श. १. ३. १. तै. ब्रा. २. १. ३, ४. मै. सं १. ८. ३. ४. काठ. सं. ६. ३, ४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे द्वितीयप्रपाठके तृतीयं ब्राह्मणम् ॥

२. २. ४.

(अग्न्युपस्थानम्)

एता ह वै देवता योऽस्ति। तस्मिन्वसन्तीन्द्रो यमो राजा

नड्डो नैषिधोऽनश्नन्त्साङ्गमनोऽसन् पाꣳसवः ॥१॥ तद्वाऽएष एवेन्द्रः। यदाहवनीयोऽथैष एव गार्हपत्यो यमो राजाथैष एव नड्डो नैषिधो यदन्वाहार्यपचनस्तद्यदेतमहरहर्दक्षिणतऽआहरन्ति तस्मादाहुरहरहर्व्वै नड्डो नैषिधो यमꣳ राजानं दक्षिणतऽउपनयतीति[1] ॥२॥ अथ यऽएष सभायामग्निः। एष एवानश्नन्त्साङ्गमनस्तद्यदेतमनशित्वोपसङ्गच्छन्ते तस्मादेषोऽनश्नन्नथ यदेतद्भस्मोद्धृत्य परावपन्त्येषऽएवासन् पाꣳसवः स यो हैवमेतद्वेदैवं मय्येता देवता व्वसन्तीति सर्वान् हैवैतांल्लोकान् जयति सर्वाल्लोकाननुसञ्चरति॥३॥तेषामुपस्थानम्। यदेव सायं प्रातराहवनीयमुप च तिष्ठतऽउप चास्ते तदेव तस्योपस्थानमथ यदेव प्रतिपरेत्य गार्हपत्यमास्ते वा शेते वा तदेव तस्योपस्थानमथ यत्रैव संवृजन्नन्वाहार्यपचनमुपस्मरेत्तदेव तं मनसोपतिष्ठेत तदेव तस्योपस्थानम्॥४॥अथ प्रातः। अनशित्वा मुहूर्तꣳ सभायामासित्वापि कामं पल्ययेत तदेव तस्योपस्थानमथ यत्रैव भस्मोद्धृतमुपनिगच्छेत्तदेव तस्योपस्थानमेवमु हास्यैता देवता ऽउपस्थिता भवन्ति ॥५॥ यजमानदेवत्यो वै गार्हपत्यः। अथैष भ्रातृव्यदेवत्यो यदन्वाहार्यपचनस्तस्मादेतं नाहरहराहरेयुर्न ह वाऽअस्य सपत्ना भवन्ति यस्यैवं विदुष ऽएतं नाहरहराहरन्त्यन्वाहार्यपचनो वाऽएषः ॥६॥ उपवसथऽएवैनमाहरेयुः। यत्रैवास्मिन् यक्ष्यन्तो भवन्ति तथो हास्यैषोऽमोघायाहुतो भवति ॥७॥ नवावसिते वैनमाहरेयुः। तस्मिन् पचेयुस्तद्ब्राह्मणा ऽअश्नीयुर्यद्यु तन्न विन्देयुत्पचेदपि गोरेव दुग्धमधिश्रयितवै ब्रूयात्तस्मिन् ब्राह्मणान् पाययितवै ब्रूयात्पापीयाꣳसो ह वाऽअस्य सपत्ना भवन्ति यस्यैवं विदुष एवं कुर्वन्ति तस्मादेवमेव चिकीर्षेत् ॥८॥ तद्यत्रैतत्प्रथमꣳ समिद्धो भवति। धूप्यतऽइव तर्हि हैष भवति रुद्रः स यः कामयेत यथेमा रुद्रः प्रजा ऽअश्रद्धयेव त्वत्सहसेव त्वन्निघातमिव त्वत्सचतऽएवमन्नमद्यामिति तर्हि ह स जुहुयात्प्राप्नो-

१. उपनयतीति. इति. ग. घ. २. प्रातराहवनीयमिति. ग. घ.

ति हैवैतदन्नाद्यं यऽएवं विद्वांस्तर्हि जुहोति ॥९॥ अथ यत्रैतत्प्रदीप्ततरो भवति । तर्हि हैष भवति व्वरुणः स यः कामयेत यथेमा व्वरुणः प्रजा गृह्णन्निव त्वत्सहसेव त्वन्निघातमिव त्वत्सन्नतऽएवमन्नमद्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥१०॥ अथ यत्रैतत्प्रदीप्तो भवति । उच्चैर्धूमः परमया जूत्या वल्वलीति तर्हि हैष भवतीन्द्रः स यः कामयेतेन्द्र इव श्रिया यशसा स्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥११॥ अथ यत्रैतत्प्रतितरामिव । तिरश्चीवार्चिचः स शाम्यतो भवति तर्हि हैष भवति मित्रः स यः कामयेत मैत्रेणेदमन्नमद्यामिति यमाहुः सर्व्वस्य वाऽअयं ब्राह्मणो मित्रं न वाऽअयं कं चन हिनस्तीति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं यऽएवं विद्वांस्तर्हि जुहोति ॥१२॥ अथ यत्रैतदङ्गाराश्चाकश्यन्तऽइव । तर्हि हैष भवति ब्रह्म स यः कामयेत ब्रह्मवर्चसी स्यामिति तर्हि ह स जुहुयात्प्राप्नोति हैवैतदन्नाद्यं य एवं विद्वांस्तर्हि जुहोति ॥१३॥ एतेषामेकꣳसंवत्सरमुपेत्सेत् । स्वयं जुह्वद्यदि वास्यान्यो जुहुयादथ योऽन्यथान्यथा जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यꣳ स सामि निवर्तेतैवं तदथ यः सार्धं जुहोति यथापो वाभिखनन्नन्यद्वान्नाद्यं तत्क्षिप्रेऽभितृन्द्यादेवं तत् ॥१४॥ अभ्रयो ह वाऽएता अन्नाद्यस्य यदाहुतयः । अभि हैवैतदन्नाद्यं तृणत्ति यऽएवं विद्वानग्निहोत्रं जुहोति॥१५॥ सा या पूर्व्वाहुतिः । ते देवाऽअथ योत्तरा ते मनुष्याऽअथ यत्स्रुचि परिशिनष्टि ते पशवः ॥१६॥ स वै कनीय इव पूर्व्वामाहुतिं जुहोति । भूयऽइवोत्तरां भूयऽइव स्रुचि परिशिनष्टि ॥१७॥ स यत्कनीय इव पूर्व्वामाहुतिं जुहोति । कनीयाꣳसो हि देवा मनुष्येभ्योऽथ यद्भूयऽइवोत्तरां भूयाꣳसो हि मनुष्या देवेभ्योऽथ यद्भूय इव स्रुचि परिशिनष्टि भूयाꣳसो हि पशवो मनुष्येभ्यः कनीयाꣳसो ह वाऽअस्य भार्या भवन्ति भूयाꣳसः पशवो य ऽएवं विद्वानग्निहोत्रं जुहोति तद्वै

समृद्धं यस्य कनीयाꣳसो भार्या ऽअसन् भूयाꣳसः पशवः* ॥१८॥

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे द्वितीयप्रपाठके चतुर्थं ब्राह्मणम् ॥

द्वितीयः प्रपाठकस्समाप्तः ॥

(कण्डिकासंख्या ॥ १०३ ॥)

अथ तृतीयः प्रपाठकः ॥

२. ३. १.

यत्र वै प्रजापतिः प्रजाः ससृजे । स यत्राग्निꣳ ससृजे स इदं जातः सर्व्वमेव दग्धुं दध्रऽइत्येवाविलमेव ता यास्तर्हि प्रजा आसुस्ता हैनꣳ सम्पेष्टुं दध्रिरे सोऽतितिक्षमाणः पुरुषमेवाभ्येयाय ॥१॥ स होवाच । न वाऽअहमिदं तितिक्षे हन्त त्वा प्रविशानि तं मा जनयित्वा बिभृहि स यथैव मां त्वमस्मिंल्लोके जनयित्वा भरिष्यस्येवमेवाहं त्वाममुष्मिंल्लोके जनयित्वा भरिष्यामीति तथेति तं जनयित्वाबिभः ॥२॥ स यदग्नीऽआधत्ते । तदेनं जनयति तं जनयित्वा बिभर्ति स यथा हैवैष एतमस्मिंल्लोके जनयित्वा बिभर्त्येवमु हैवैष एतममुष्मिंल्लोके जनयित्वा बिभर्ति ॥३॥ तन्न साम्युद्वासयेत । सामि हास्मै स ग्लायति स यथा हैवैष एतस्माऽअस्मिंल्लोके सामि ग्लायत्येवमु हैवैष एतस्माऽअमुष्मिंल्लोके सामि ग्लायति तस्मान्न साम्युद्वासयेत ॥४॥ स यत्र म्रियते । यत्रैनमग्नावभ्यादधति तदेषोऽग्नेरधिजायते स एष पुत्रः सन् पिता भवति ॥५॥ तस्मादेतदृषिणाभ्यनूक्तꣳ । "शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोरि"ति पुत्रो ह्येष सन्त्स पुनः पिता भवत्येतन्नु तद्यस्मादग्नीऽआदधीत ॥६॥ तद्धाऽएषऽएव मृत्युः ।

* इदमग्निमं चेति ब्राह्मणद्वयं महोपस्थानविधायकं काण्वशतपथे नास्ति । किन्तु इतः आग्रयणेष्टिविधिरारब्धः ।

य एष तपति तद्यदेष एव मृत्युस्तस्माद्या एतस्मादर्वाच्यः प्रजास्ता म्रियन्तेऽथ याः पराच्यस्ते देवास्तस्मादु तेऽमृतास्तस्येमाः सर्वाः प्रजा रश्मिभिः प्राणेष्वभिहिता यथाश्वोऽश्वाभिधान्या वाभीशुभिर्व्वेवमस्येमास्सर्वाः प्रजा रश्मिभिः प्राणेष्वभिहितास्तस्मादु रश्मयः प्राणानभ्यवतायन्ते ॥७॥ स यस्य कामयते । तस्य प्राणमादायोदेति स म्रियते स यो हैतं मृत्युमनतिमुच्याथामुं लोकमेति यथा हैवास्मिंल्लोके न संयतमाद्रियते यदा यदैव कामयतेऽथ मारयत्येवमु हैवामुष्मिंल्लोके पुनः पुनरेव प्रमारयति ॥८॥ स यत्सायमस्तमिते द्वेऽआहुती जुहोति । तदेताभ्यां पूर्वाभ्यां पद्भ्यामेतस्मिन्मृत्यौ प्रतितिष्ठत्यथ यत्प्रातरनुदिते द्वेऽआहुती जुहोति तदेताभ्यामपराभ्यां पद्भ्यामेतस्मिन्मृत्यौ प्रतितिष्ठति स एनमेष उद्यन्नेवादायोदेति तदेतं मृत्युमतिमुच्यते सैषाग्निहोत्रे मृत्योरतिमुक्तिरति ह वै पुनर्मृत्युं मुच्यते य एवमेतामग्निहोत्रे मृत्योरतिमुक्तिं वेद॥९॥यथावाऽइषोरनीकम् । एवं यज्ञानामग्निहोत्रं येन वाऽइषोरनीकमेति सर्वा वैतेनेषुरेत्येतेनो हास्य सर्वे यज्ञक्रतव ऽएतं मृत्युमतिमुक्ताः ॥१०॥अहोरात्रे ह वाऽअमुष्मिंल्लोके परिप्लवमाने । पुरुषस्य सुकृतं क्षिणुतोऽर्वाचीनं वाऽअतोऽहोरात्रे तथो हास्याहोरात्रे सुकृतं न क्षिणुतः ॥११॥ स यथा रथोपस्थे तिष्ठन् । उपरिष्टाद्रथचक्रे पल्यङ्कमानेऽउपावेक्षेतैवं परस्तादर्वाचीनोऽहोरात्रेऽउपावेक्षते न ह वाऽअस्याहोरात्रे सुकृतं क्षिणुतो य ऽएवमेतामहोरात्रयोरतिमुक्तिं वेद ॥१२॥ पूर्वेणाहवनीयं परीत्य । अन्तरेण गार्हपत्यं चैति न वै देवा मनुष्यं विदुस्तऽएनमेतदन्तरेणातियन्तं विदुरयं वै न इदं जुहोतीत्यग्निर्वै पाप्मनोऽपहन्ता तावस्याहवनीयश्च गार्हपत्यश्चान्तरेणातियतः पाप्मानमपहतः सोऽपहतपाप्मा ज्योतिरेव श्रिया यशसा भवति ॥१३॥ उत्तरतो वाऽअग्निहोत्रस्य द्वारꣳ । स यथा द्वारा प्रपद्येतैवं तदथ यो दक्षिणत एत्यास्ते यथा बहिर्धा चरेदेवं तत् ॥१४॥ नौर्हवाऽएषा स्वर्ग्या । यदग्निहोत्रं तस्याऽएतस्यै नावः स्वर्ग्याया आहवनीयश्चैव गार्हपत्यश्च नौमण्डेऽअथैष एव नावाजो यत्क्षीरहोता ॥१५॥ स य-

त्प्राङुपोदैति । तदेनां प्राचीमभ्यजति स्वर्गं लोकमभि तया स्वर्गं लोकꣳ समश्नुते तस्या उत्तरत ऽआरोहणꣳ सैनꣳस्वर्गं लोकꣳ समापयत्यथ यो दक्षिणत एत्यास्ते यथा प्रतीर्णायामागच्छेत्स द्विहीयेत स तत एव बहिर्धा स्यादेवं तत् ॥१६॥ अथ यामेताꣳ समिधमभ्यादधाति सेष्टका येन मन्त्रेण जुहोति तद्यजुर्येनताभिष्टकामुपदधाति यदा वाऽइष्टकोपधीयतेऽथाहुतिर्हूयते तदस्योपहितास्वेवेष्टकास्वेता आहुतयो हूयन्ते या ऽएता अग्निहोत्राहुतयः ॥१७॥ प्रजापतिर्व्वाऽअग्निः । संवत्सरो वै प्रजापतिः संवत्सरे संवत्सरे ह वाऽअस्याग्निहोत्रं चित्येनाग्निना सन्तिष्ठते संवत्सरे संवत्सरे चित्यमग्निमाप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतदु हास्याग्निहोत्रं चित्येनाग्निना सन्तिष्ठते चित्यमग्निमाप्नोति ॥१८॥ सप्त च वै शतान्यशीतीनामृचः । विꣳशतिश्च स यत्सायं प्रातरग्निहोत्रं जुहोति ते द्वेऽआहुती ता ऽअस्य संवत्सरऽआहुतयः सम्पद्यन्ते ॥१९॥ सप्त चैव शतानि विꣳशतिश्च । संवत्सरे संवत्सरे ह वाऽअस्याग्निहोत्रं महतोक्थेन सम्पद्यते संवत्सरे संवत्सरे महदुक्थमाप्नोति य एवं विद्वानग्निहोत्रं जुहोत्येतदु हास्याग्निहोत्रं महतोक्थेन सम्पद्यते महदुक्थमाप्नोति ॥२०॥

इति शुक्लयजुर्वेदीयमाध्यान्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे तृतीयप्रपाठके प्रथमं ब्राह्मणम् ॥

२. ३. २.

अग्नौ ह वै देवाः । सर्व्वान् पशूनिदधिरे ये च ग्राम्या ये चारण्या विजयं वोपप्रैष्यन्तः कामचारस्य वा कामायायं नो गोपिष्ठो गोपायदिति वा ॥१॥ तानु हाग्निर्निचकमे । तैः संगृह्य रात्रिं प्रविवेश पुनरेम इति देवा एदाग्निं तिरोभूतं ते ह विदां चक्रुरिह वै प्राविक्षद्रात्रिं वै प्राविक्षदिति तमेतत्प्रत्यायत्याꣳरात्रौ सायमुपातिष्ठन्त देहिनः पशून् पुनर्नः पशून्देहीति तेभ्योऽग्निः पशून् पुनरददात् ॥२॥ तस्मै कमग्नीऽउपतिष्ठते । अग्नी वै दातारौ तावेवैतद्याचते सायमुपातिष्ठेत सा-

यꣳ हि देवा ऽउपातिष्ठन्त दत्तो हैवास्माऽएतौ पशून्य एवं विद्वा-नुपतिष्ठते ॥३॥ अथ यस्मान्नोपतिष्ठेत । उभये ह वाऽइदमग्रे सहा-सुरैर्देवाश्च मनुष्याश्च तद्यद्ध स्म मनुष्याणां न भवति तद्ध स्म देवा-न्याचन्तऽइदं वै नो नास्तीदं नोऽस्त्विति ते तस्याऽएव याञ्च्यायै द्वेषेण देवास्तिरोभूता नेद्धिनसानि नेद्द्वेष्योऽसानीति तस्मान्नोपति-ष्ठेत ॥४॥ अथ यस्मादुपैव तिष्ठेत । यज्ञो वै देवानामाशीर्यजमानस्य तद्वाऽएष एव यज्ञो यदाहुतिराशीरेव यजमानस्य तद्यद्देवास्यात्र तदे-वैतदुपतिष्ठमानः कुरुते तस्मादुपैव तिष्ठेत ॥५॥ अथ यस्मान्नोपतिष्ठेत । यो वै ब्राह्मणं वा सꣳसमानोऽनु चरति क्षत्रियं वायं मे दास्यत्ययं मे गृहान् करिष्यतीति यो वै तं वाचेन वा कर्मणा वाभिराराधयिषति तस्मै वै स देयं मन्यतेऽथ य आह किं नु त्वं ममासि यो मे न ददा सीतीश्वर एनं द्वेष्टोरीश्वरो निर्व्वेदं गन्तोस्तस्मान्नोपतिष्ठेतैतदित्येवैष एतं याचते यदिन्द्धे यज्जुहोति तस्मान्नोपतिष्ठेत ॥६॥ अथ यस्मादु-पैव तिष्ठेत । उत वै याचन्दातारं लभतऽएवातो भर्ता भार्यं नानुबु-ध्यते स यदेवाह भार्यो वै तेऽस्मि बिभृहि मेत्यथैनं व्वेदाथैनं भार्यं मन्यते तस्मादुपैव तिष्ठेतेदमित्तु समस्तं यस्मादुपातिष्ठेत ॥७॥ प्रजा-पतिर्वाऽएष भूत्वा । यावत ईष्टे यावदेनमनु तस्य रेतः सिञ्चति यदग्निहोत्रं जुहोतीदमेवैतत्सर्व्वमुपतिष्ठमानोऽनुविकरोतीदꣳ सर्व्वम-नुप्रजनयति ॥८॥ स वाऽउपवत्या प्रतिपद्यते । इयं वाऽउप द्वयेने-यमुप यद्धीदं किं च जायतेऽस्यां तदुपजायतेऽथ यन्न्यृच्छत्यस्यामेव तदुपोप्यते तदह्ना रात्र्या भूयो भूय एवाक्षय्यं भवति तदक्षय्येणैवैत-द्ब्रह्मा प्रतिपद्यते ॥९॥ स आह । उपप्रयन्तोऽअध्वरमित्यध्वरो वै यज्ञ उपप्रयन्तो यज्ञमित्येवैतदाह मन्त्रं वोचेमाग्नयऽइति मन्त्रमु ह्यस्माऽए-तद्वक्ष्यन् भवत्यारे अस्मे च शृण्वतऽइति यद्यप्यस्मदारकादस्यथ न

१ See तै. सं. १. ५. १०.

१ "उपप्रयन्तः" इत्यारभ्य "परिते दूडभ०" इत्यन्ता महोपस्थानमन्त्रा मा ध्यन्दिनसंहितायां ११–३६ कण्डिकासूक्ताः ॥

एतच्छृण्वेवैवमेवैतन्मन्यस्वेत्येवैतदाह ॥१०॥ "अग्निर्मूर्धा दिवः । ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वती"त्यन्वेव धावति तद्यथा याचन् कल्याणं व्वदेदामुष्यायणो वै त्वमस्यलं वै त्वमेतस्माऽअसीत्येवमेषा ॥११॥ अथेन्द्राग्नी । "उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै । उभा दातारावि षाꣳ रयीणामुभा व्वाजस्य सातये हुवे वा"मित्येष वाऽइन्द्रो य एष तपति स यदस्तमेति तदाहवनीयं प्रविशति तदुभावेवैतत्सह सन्ताऽउपतिष्ठतऽउभौ मे सह सन्तौ दत्तामिति तस्मादैन्द्राग्नी ॥ १२ ॥ "अयं ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः । तं जानन्नग्नऽआरोहाथा नो व्वर्धया रयि"मिति पुष्टं वै रयिर्भूयो भूयऽएव न'इदं पुष्टं कुर्व्वित्येवैतदाह ॥१३॥ "अयमिह प्रथमः । धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः । यमप्नवानो भृगवो व्विरुरुचुर्वनेषु चित्रं व्विभ्वं व्विशे विश"ऽइत्यन्वेव धावति तद्यथा याचन् कल्याणं व्वदेदामुष्यायणो वै त्वमस्यलं वै त्वमेतस्माऽअसीत्येवमेषा यथोऽएवैष तथोऽएवैनमेतदाह यदाह व्विभ्वं व्विशे व्विशऽइति विभूर्ह्येष व्विशे विशे ॥१४॥ अस्य प्रत्नाम् । अनु द्युतꣳ शुक्रं दुदुह्रेऽअह्रयः । पयः सहस्रसामृषिमिति परमा वाऽएषा सनीनां यत्सहस्रसनिस्तदेतस्यैवावरुद्ध्यै तस्मादाह पयः सहस्रसामृषिमिति ॥१५॥ तदेतत्समाहार्यꣳषड्रचम् । तस्योपवती प्रथमा प्रत्नवत्युत्तमावोचाम तद्यस्मादुपवत्यथाद एव प्रत्नं यावन्तो ह्येव सनाग्रे देवास्तावन्त एव देवास्तस्माददः प्रत्नं तदिमेऽएवान्तरेण सर्वे कामास्तेऽअस्माऽइमे सञ्जानाने सर्वान् कामान्त्सन्नमतः ॥१६॥ स वै त्रिः प्रथमां जपति । त्रिरुत्तमां त्रिवृत्प्रायणा हि यज्ञास्त्रिवृदुदयनास्तस्मात्त्रिः प्रथमां जपति त्रिरुत्तमाम् ॥१७॥ यद्ध वाऽअत्राग्निहोत्रं जुह्वत् । वाद्येन वा कर्मणा वा मिथ्या करोत्यात्मनस्तदवद्यत्यायुषो वा वर्चसो वा प्रजायै वा ॥१८॥ तदु खलु तनूपाऽअग्नेऽसि । तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि । अग्ने यन्मे तन्वा ऊनं तन्मऽआपृणेति ॥१९॥ यद्ध वाऽअत्राग्निहोत्रं

जुहुत् । वाचेन वा कर्मणा वा मिथ्या करोत्यात्मनस्तदवद्यत्यायुषो वा व्वर्चसो वा प्रजायै वा तन्मे पुनराप्याययेत्येवैतदाह तथो हास्यै-तत्पुनराप्यायते ॥२०॥ इन्धानास्त्वा । शतꣳ हिमा द्युमन्तꣳ समि-धीमहीति शतं व्वर्षाणि जीव्यास्मेत्येवैतदाह तावत्त्वा महान्तꣳसमि-महीति यदाह द्युमन्तꣳ समिधीमहीति व्वयस्वन्तो व्वयस्कृतꣳ सह-स्वन्तः सहस्कृतमिति व्वयस्वन्तो व्वयं भूयास्म व्वयस्कृत्वं भूया इत्ये-वैतदाह सहस्वन्तो व्वयं भूयास्म सहस्कृत्वं भूया इत्येवैतदाहा"ग्ने सपत्नदम्भनमदब्धासोऽअदाभ्य"मिति त्वया व्वयꣳ सपत्नान् पापीयसः क्रियास्मेत्येवैतदाह ॥२१॥ "चित्रावसो स्वस्ति ते पारमशीये"ति । त्रिरेतज्जपति रात्रिर्वै चित्रावसुः सा हीयꣳ संगृह्येव चित्राणि व्वसति तस्मान्नारकाञ्चित्रं ददृशे ॥२२॥ एतेन ह स्म वाऽऋषयः । रात्रेः स्वस्ति पारꣳ समश्नुवतऽएतेनो ह स्मैनानात्रेर्नाष्ट्रा रक्षाꣳसि न विन्दन्त्येतेनोऽएवैष एतद्रात्रेः स्वस्ति पारꣳ समश्नुतऽएतेनोऽएनꣳ रात्रेर्नाष्ट्रा रक्षाꣳसि न विन्दन्त्येतावन्नु तिष्ठन् जपति ॥२३॥ अथा-सीनः । "स त्वमग्ने सूर्यस्य" व्वर्चसा गथाऽइति तद्यदस्तं यन्नादित्य आहवनीयं प्रविशति तेनैतदाह "समृषीणाꣳ स्तुतेने"ति तद्यदुपतिष्ठते तेनैतदाह "सं प्रियेण धाम्ने"त्याहुतयो वाऽअस्य प्रियं धामाहुतिभिरेव तदाह "समहमायुषा सं व्वर्चसा सं प्रजया सꣳरायस्पोषेण ग्मिषी-ये"ति यथा त्वमेतैः समगथा एवमहमायुषा व्वर्चसा प्रजया रायस्पोषे-णेति यद्ध्म्नेति तदेवमहमेतैः सङ्गच्छाऽइत्येवैतदाह ॥२४॥ अथ गाम-भ्येति । "अन्धः स्थान्धो वो भक्षीय महः स्थ महो वो भक्षीये"ति यानि वो व्वीर्याणि यानि वो महाꣳसि तानि वो भक्षीयेत्येवैतदाहो"र्ज स्थोर्ज वो भक्षीये"ति रस स्थ रसं वो भक्षीयेत्येवैतदाह "रायस्पोष स्थ रायस्पोषं वो भक्षीये"ति भूमा स्थ भूमानं वो भक्षीतेत्येवैतदाह ॥ २५ ॥ "रेवती रमध्व"मिति रेवन्तो हि पशवस्तस्मादाह रेवती रमध्वमित्यस्मिन्योनावस्मिन् गोष्ठेऽस्मिल्लोकेऽस्मिन्क्षये । "इहैव स्त मापगाते"त्यात्मन एवतदाह मदेव मापगातेति ॥ २६ ॥ अथ

गामभिमृशति। "सꣳहितासि विश्वरूपी"ति विश्वरूपा इव हि पशवस्तस्मादाह विश्वरूपी"त्यूर्जा माविश गौपत्येने"त्यूर्जेति यदाह रसेनेति तदाह गौपत्येनेति यदाह भूम्नेति तदाह ॥२७॥ अथ गार्हपत्यमभ्यैति। स गार्हपत्यमुपतिष्ठतऽ"उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम। नमो भरन्त एमसी"ति नम एवास्माऽएतत्करोति यथैनं न हिꣳस्यात् ॥२८॥ "राजन्तमध्वराणां। गोपामृतस्य दीदिविम्। वर्धमानꣳस्वे दम"इति स्वं वै तऽइदं यन्मम तन्नो भूयो भय एव कुर्वित्येवैतदाह ॥२९॥ "स नः पितेव सूनवे। अग्ने सूपायनो भव। सचस्वा नः स्वस्तये"ऽइति यथा पिता पुत्राय सूपचरो नैवैनं केन चन हिनस्त्येवं नः सूपचरऽएधि मैव त्वा केन चन हिꣳसिष्मेत्येवैतदाह ॥३०॥ अथ द्विपदाः। "अग्ने त्वं नोऽअन्तम उत त्राता शिवो भवा वरूथ्यः। वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमꣳ रयिं दाः॥ तं त्वा शोचिष्ट दीदिवः सुम्नाय नूनमीमहे सखिभ्यः। स नो बोधि श्रुधी हवमुरुष्याणोऽअघायतः समस्मा"दिति ॥३१॥ यद्वा आहवनीयमुपतिष्ठते। पशूंस्तद्याचते तस्मात्तमुच्चावचैश्छन्दोभिरुपतिष्ठतऽउच्चावचा इव हि पशवोऽथ यद्गार्हपत्यं पुरुषांस्तद्याचते तद्गायत्रं प्रथमं त्रिचं गायत्रं वाऽअग्नेश्छन्दः स्वेनैवैनमेतच्छन्दसोपपरैति ॥३२॥ अथ द्विपदाः। पुरुषछन्दसं वै द्विपदा द्विपाद्वाऽअयं पुरुषः पुरुषानेवैतद्याचते पुरुषान्हि याचते तस्माद्द्विपदाः पशुमान्ह वै पुरुषवान् भवति यऽएवं विद्वानुपतिष्ठते ॥३३॥ अथ गामभ्यैति। "इडऽएह्यदितऽएही"तीडा हि गौरदितिर्हि गौस्तामभिमृशति "काम्या एते"ति मनुष्याणाꣳ ह्येतासु कामाः प्रविष्टास्तस्मादाह काम्या एतेति "मयि वः कामधरणं भूयादि"त्यहं वः प्रियो भूयासमित्येवैतदाह ॥३४॥ अथान्तरणाहवनीयं च गार्हपत्यं च। प्राङ् तिष्ठन्नग्निमीक्षमाणो जपति "सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः॥ यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः॥

मा नः शꣳसोऽअररुषो धूर्त्तिः प्रणङ् मर्त्यस्य । रक्षाणो ब्रह्मणस्पत''ऽइति ॥३५॥ यद्वाऽआहवनीयमुपतिष्ठते । "दिवं तदुपतिष्ठतेऽथ यद्गार्हपत्यं पृथिवीं तदथैतदन्तरिक्षमेषा हि दिग्बृहस्पतेरेताꣳ ह्येतद्दिशमुपतिष्ठते तस्माद्बार्हस्पत्यं जपति ॥३६॥ "महि त्रीणामवोऽस्तु । शुक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ न हि तेषाममाचन नाध्वसु वारणेषु । ईशे रिपुरवशꣳसः ॥ ते हि पुत्रासो अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्र''मिति तत्रास्ति नाध्वसु वारणेष्वित्येते ह वाऽअध्वानो वारणा यऽइमेऽन्तरेण द्यावापृथिवीऽएतान्ह्येतदुपतिष्ठते तस्मादाह नाध्वसु वारणेष्विति ॥३७॥ अथेन्द्री । इन्द्रो वै यज्ञस्य देवता सेन्द्रमेवैतदग्न्युपस्थानं कुरुते "कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुष''ऽइति यजमानो वै दाश्वान्न यजमानाय दुह्यसीत्येवैतदाह ॥३८॥ अथ सावित्री । सविता वै देवानां प्रसविता तथो हास्माऽएते सवितृप्रसूता एव सर्वे कामाः समृध्यन्ते "तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदया''दिति ॥३९॥ अथाग्नेयी । तदग्नयऽएवैतदात्मानमन्ततः परिददाति गुप्त्यै "परि ते दूडभो रथोऽस्मां ३॥ऽअश्नोतु विश्वतः । येन रक्षसि दाशुष'' इति यजमाना वै दाश्वाꣳसो यो ह वाऽअस्यानाधृष्यतमो रथस्तेनैव यजमानानभिरक्षति स यस्तेऽनाधृष्यतमो रथो येन यजमानानभिरक्षसि तेन नः सर्वतोऽभिगोपायेत्येवैतदाह त्रिरेतज्जपति ॥४०॥ अथ पुत्रस्य नाम गृह्णाति । "इदं मेऽयं वीर्यं पुत्रोऽनुसन्तनव''दिति यदि पुत्रो न स्यादप्यात्मन एव नाम गृह्णीयात् ॥ ४१ ॥ (१) तै. सं. १. ५. ७, ८. मै. सं. १. ५. ९-१२. काठ. सं. ७-६-८.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे तृतीयप्रपाठके द्वितीयं ब्राह्मणम् ॥ (३. ४)

इति द्वितीयकाण्डे तृतीयोऽध्यायस्समाप्तः ॥

२. ३. ३.

(क्षुल्लकोपस्थानम्)

अथ हुतेऽग्निहोत्रऽउपतिष्ठते । "भूर्भुवः स्व"रिति तत्सत्येनैवैतद्वाचꣳ समर्धयति यदाह भूर्भुवः स्वरिति तया समृद्ध्याशिषमाशास्ते "सुप्रजाः प्रजाभिःस्या"मिति तत्प्रजामाशास्ते "सुवीरो वीरै"रिति तद्वीरानाशास्ते "सुपोषः पोषैरि"ति तत्पुष्टिमाशास्ते ॥१॥ यद्वाऽअदो दीर्घमग्न्युपस्थानम् । आशीरेव साशीरियं तदेतावतैवैतत्सर्वमाप्नोति तस्मादेतेनैवोपतिष्ठतेतेन त्वेव व्वयमुपचरामइति ह स्माहासुरिः ॥२॥ अथ प्रवत्स्यन । गार्हपत्यमेवाग्रऽउपतिष्ठतेऽथाहवनीयꣳ ॥३॥ स गार्हपत्यमुपतिष्ठते । "नय प्रजां मे पाही"ति प्रजाया हैष ईष्टे तत्प्रजामेवास्माऽएतत्परिददाति गुप्त्यै ॥४॥ अथाहवनीयमुपतिष्ठते । "शꣳस्य पशून्मे पाही"ति पशूनाꣳ हैष ईष्टे तत्पशूनेवास्माऽएतत्परिददाति गुप्त्यै ॥५॥ अथ प्र वा व्रजति प्र वा धावयति । स यत्र व्वेलां मन्यते तत्स्यन्त्वा व्वाचं व्विसृजतेऽथ प्रोष्य परेत्य यत्र व्वेलां मन्यते तद्वाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव तमुपयात् ॥६॥ स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तद्गृहेष्वेवैतत्प्रतिष्ठायां प्रतितिष्ठति ॥७॥ स आहवनीयमुपतिष्ठते । "आगन्म व्विश्ववेदसमस्मभ्यं व्वसुवित्तमम् । अग्ने सम्राडभि द्युम्नमभि सह आयच्छस्वे"त्यथोपविश्य तृणान्यपलुम्पति ॥ ८ ॥ अथ गार्हपत्यमुपतिष्ठते । "अयमग्निर्गृहपतिर्गार्हपत्यः प्रजाया व्वसुवित्तमः । अग्ने गृहपतेऽभिद्युम्नमभि सह आयच्छस्वे"त्यथोपविश्य तृणान्यपलुम्पत्येतन्नु जपेनैतेन त्वेव भूयिष्ठा इवोपतिष्ठन्ते ॥९॥ स वै खलु तूष्णीमेवोपतिष्ठेत । इदं वै यस्मिन्वसति ब्राह्मणो वा राजा वा श्रेयान्मनुष्यो त्वेव तमेव नार्हति व्वक्तुमिदं मे त्वं गोपाय प्राहं

---

१. मा. सं. ३. ३७. २. मा. सं. ३. ३८. ३. मा. सं. ३. ३९.

वत्स्यामीत्यथास्मिन्नेते श्रेयाꣳसो व्वसन्ति देवा अग्नयः क उ तानर्हति व्वक्तुमिदं मे यूयं गोपायत प्राहं व्वत्स्यामीति ॥१०॥ मनो ह वै देवा मनुष्यस्याजानन्ति । स व्वेद गार्हपत्यः परिदां मेदमुपागादिति तूष्णीमेवाहवनीयमुपतिष्ठते स व्वेदाहवनीयः परिदां मेदमुपागादिति ॥११॥ अथ प्र वा वृजति प्र वा धावयति । स यत्र व्वेलां मन्यते तत्स्यन्त्वा वाचं विसृजतेऽथ प्रोप्य परेक्ष्य यत्र वेलां मन्यते तद्वाचं यच्छति स यद्यपि राजान्तरेण स्यान्नैव तमुपेयात् ॥१२॥ स आहवनीयमेवाग्रऽउपतिष्ठते । अथ गार्हपत्यं तूष्णीमेवाहवनीयमुपतिष्ठते तूष्णीमुपविश्य तृणान्युपलुम्पति तूष्णीमेव गार्हपत्यमुपतिष्ठते तूष्णीमुपविश्य तृणान्युपलुम्पति ॥१३॥ अथातो गृहाणामेवोपचारः । एतद्ध वै गृहपतेः प्रोपुप आगताद्गृहाः समृत्तस्ता इव भवन्ति किमयमिह व्वदिष्यति किं वा करिष्यतीति स यो ह तत्र किञ्चिद्वदति वा करोति वा तस्माद्गृहाः प्रत्रसन्ति तस्येश्वरः कुलं विक्षोब्धोरथ यो ह तत्र न व्वदति न किं चन करोति तं गृहा उपसꣳश्रयन्ते न वाऽअयमिहावादीन्न किं चनाकरदिति स यदिहापि सुक्रुद्ध इव स्याच्छ्व एव ततस्तत्कुर्याद्यद्वादिष्यन्वा करिष्यन्वा स्यादेष उ गृहाणामुपचारः ॥१४॥ (४. १.) ॥ Cf. मै. सं. १. ५. १४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे तृतीयप्रपाठके तृतीयं ब्राह्मणम् ॥

२. ३. ४.

(पिण्डपितृयज्ञः)

प्रजापतिं वै भूतान्युपासीदन् । प्रजा वै भूतानि व्वि नो धेहि यथा जीवामेति ततो देवा यज्ञोपवीतिनो भूत्वा दक्षिणं जान्वाच्योपासीदंस्तानब्रवीद्यज्ञो व्वोऽन्नममृतत्वं व ऊर्ग्वः सूर्यो वो ज्योतिरिति ॥१॥ अथैनं पितरः । प्राचीनावीतिनः सव्यं जान्वाच्योपासीदंस्तानब्रवीन्मासि मासि वोऽशनꣳ स्वधा वो मनोजवो नश्चन्द्रमा

वो ज्योतिरिति ॥२॥ अथैनं मनुष्याः । प्रावृता उपस्थं कृत्वोपासी-
दंस्तानब्रवीत्सायं प्रातर्वोऽशनं प्रजा वो मृत्युर्वोऽग्निर्वो ज्योतिरिति
॥३॥ अथैनं पशव उपासीदन् । तेभ्यः स्वैषमेव चकार यदैव यूयं-
कदा च लभाध्वै यदि काले यद्यनाकालेऽथैवाश्नाथेति तस्मादेते यदैव
कदा च लभन्ते यदि काले यद्यनाकालेऽथैवाश्नन्ति ॥४॥ अथ हैनꣳ
शश्वदप्यसुरा उपसेदुरित्याहुः । तेभ्यस्तमश्च मायां च प्रददावस्त्यहै-
वासुरमायेतीव पराभूता ह त्वेव ताः प्रजास्ता इमाः प्रजास्तथैवोप-
जीवन्ति यथैवाभ्यः प्रजापतिर्व्यदधात् ॥५॥ नैव देवा अतिक्रामन्ति ।
न पितरो न पशवो मनुष्या एवैकेऽतिक्रामन्ति तस्माद्यो मनुष्याणां
मेद्यत्यशुभं मेद्यति विहूर्च्छति हि न ह्ययनाय चन भवत्यनृतꣳ हि
कृत्वा मेद्यति तस्मादु सायंप्रातराश्येव स्यात्स यो हैवं विद्वान्सायं-
प्रातराशी भवति सर्वꣳ हैवायुरेति यदु ह किं च वाचा व्याहरति
तदु हैव भवत्येतद्धि देवसत्यं गोपायति तद्धैतत्तेजो नाम ब्राह्मणं य
एतस्य व्रतꣳ शक्नोति चरितुम् ॥ ६ ॥ तद्धाऽएतत् । मासिमास्येव
पितृभ्यो ददतो यदैवैष न पुरस्तान्न पश्चाद्दृदशेऽथैभ्यो ददात्येष वै
सोमो राजा देवानामन्नं यच्चन्द्रमाः स एताꣳ रात्रिं क्षीयते तस्मि-
न्क्षीणे ददाति तथैभ्योऽसमदं करोत्यथ यदक्षीणे दद्यात्समदꣳह कुर्या-
द्देवेभ्यश्च पितृभ्यश्च तस्माद्यदैवैष न पुरस्तान्न पश्चाद्दृदशेऽथैभ्यो
ददाति ॥७॥ स वाऽअपराह्णे ददाति । पूर्वाह्णो वै देवानां मध्यन्दिनो
मनुष्याणामपराह्णः पितॄणां तस्मादपराह्णे ददाति ॥८॥ स जघनेन
गार्हपत्यम् । प्राचीनावीती भूत्वा दक्षिणासीन एतं गृह्णाति स तत
एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवहन्ति सकृत्फलीक-
रोति सकृद्धि ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥९॥ तꣳ
श्रपयति । तस्मिन्नधिश्रितऽआज्यं प्रत्यानयत्यग्नौ वै देवेभ्यो जुह्वत्यु-
द्धरन्ति मनुष्येभ्योऽथैव पितॄणां तस्मादधिश्रित ऽआज्यं प्रत्यानयति
॥१०॥ स उद्धास्याग्नौ द्वेऽआहुती जुहोति देवेभ्यः । देवान्वाऽएष

उपावर्तते य आहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृयज्ञेनेवाचारीत्तद् देवेभ्यो निह्नुते स देवैः प्रसूतोऽथैतत्पितृभ्यो ददाति तस्मादुद्वास्याग्नौ द्वेऽआहुती जुहोति देवेभ्यः ॥११॥ स वाऽअग्नये च सोमाय च जुहोति । स यदग्नये जुहोति सर्वत्र ह्येवाग्निरन्वाभक्तोऽथ यत्सोमाय जुहोति पितृदेवत्यो वै सोमस्तस्मादग्नये च सोमाय च जुहोति ॥१२॥ स जुहोति । "अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहे"त्यग्नौ मेक्षणमभ्यादधाति तस्त्वष्टृकृद्भाजनमथ दक्षिणेनान्वाहार्यपचनꣳ सकृदुल्लिखति तद्वेदिभाजनꣳसकृद् ह्येव पराञ्चः पितरस्तस्मात्सकृदुल्लिखति ॥१३॥ अथ परस्तादुल्मुकं निदधाति । स यदनिधायोल्मुकमथैतत्पितृभ्यो दद्यादसुररक्षसानि हैषामेतद्विमथ्नीरंस्तथो हैतत्पितॄणामसुररक्षसानि न विमथ्नते तस्मात्परस्तादुल्मुकं निदधाति ॥१४॥ स निदधाति । "येरूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । परापुरो निपुरो ये भरन्त्यग्निष्टांल्लोकात्प्रणुदात्यस्मा"दित्यग्निर्हि रक्षसामपहन्ता तस्मादेवं निदधाति ॥१५॥ अथोदपात्रमादायावनेजयति । "असाववनेनिक्ष्वे"त्येव यजमानस्य पितर"मसाववनेनिक्ष्वे"ति पितामह"मसाववनेनिक्ष्वे"ति प्रपितामहं तद्यथाऽऽशिष्यतेऽभिषिञ्चेदेवं तत् ॥१६॥ अथ सकृदाच्छिन्नान्युपमूलं दिनानि भवन्ति । अग्रमिव वै देवानां मध्यमिव मनुष्याणां मूलमिव पितॄणां तस्मादुपमूलं दिनानि भवन्ति सकृदाच्छिन्नानि भवन्ति सकृद् ह्येव पराञ्चः पितरस्तस्मात्सकृदाच्छिन्नानि भवन्ति ॥१७॥ तानि दक्षिणोपस्तृणानि । तत्र ददाति स वाऽइति ददातीतीव वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैवं पितॄणां तस्मादिति ददाति ॥१८॥ स ददाति । "असावेतत्त"ऽइत्येव यजमानस्य पित्रे "ये च त्वामन्वि"त्यु हैकऽआहुस्तदु तथा न ब्रूयात्स्वयं वै तेषाꣳ सह येषाꣳ

१. मा. गं. २. ३०.

२ एतत्ते तत ये च त्वामनु, एतत्ते पितामह प्रपितामह ये च त्वामनु' इत्येव तैत्तिरीये पाठः । तै. सं. ३. २. ५. ३.

सह तस्मादु ब्रूयादसावेतत्तऽइत्येव यजमानस्य पित्रेऽसावेतत्तऽइति पितामहायासावेतत्तऽइति प्रपितामहाय तद्यदिनः परागद्दाति सकृद्ध्येव पराञ्चः पितरः ॥१९॥ तत्र जपति । "अत्र पितरो मादयध्वं यथाभागमावृषायध्वमि"ति यथाभागमश्नीतेत्येवैतदाह ॥२०॥ अथ पराङ् पर्यावर्तते । तिर इव वै पितरो मनुष्येभ्यस्तिर इवैतद्भवति स वाऽआ तमितोरासीतेत्याहुरेतावान्ह्यसुरिति स वै मुहूर्तमेवासित्वा ॥२१॥ अथोपपत्न्यस्य जपति । "अमीमदन्त पितरो यथाभागमावृषायिषते"ति यथाभागमाशिषुरित्येवैतदाह ॥२२॥ अथोदपात्रमादायावनेजयति । असाववनेनिध्वेत्येव यजमानस्य पितरमसाववनेनिध्वेति पितामहमसावनेनिध्वेति प्रपितामहं तद्यथा जक्षुषऽभिषिञ्चेदेवं तत् ॥२३॥ अथ नीविमुद्ग्रथ्य नमस्करोति । पितृदेवत्या वै नीविस्तस्मान्नीविमुद्ग्रथ्य नमस्करोति यज्ञो वै नमो यज्ञियानेवैनानेतत्करोति षट् कृत्वो नमस्करोति षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट् कृत्वो नमस्करोति "गृहान्नः पितरो दत्ते"ति गृहाणाꣳ ह पितर ईशतऽएषोऽएतस्याशीः कर्मणोऽथावजिघ्रति प्रत्यवधाय पिण्डान्त्स यजमानभागोऽग्नौ सकृदाच्छिन्नान्यभ्यादधाति पुनरुल्मुकमपिसृजति ॥२४॥ Cf. का. श. १. ३. ३. (४. २.) ॥

इति शुक्लयजुर्वेदीयमाध्यान्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे तृतीयप्रपाठके चतुर्थं ब्राह्मणम् ॥

२. ३. ५.

(आग्रयणेष्टिः)

तदु होवाच कहोडः कौषीतकिः । अनयोर्वाऽअयं द्यावापृथिव्योरसोऽस्य रसस्य हुत्वा देवेभ्योऽथममश्नामेति तस्माद्वाऽआग्रयणेष्ट्या यजतऽइति ॥ १ ॥ तदु होवाच याज्ञवल्क्यः । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः पस्पृधिरे ततोऽसुरा उभयीरोषधीर्याश्च मनुष्या

१. मां. सं. २. ३१. २ मा. सं. २. ३२.

उपजीवन्ति याश्च पशवः कृत्ययेव त्वद्विषेणेव त्वत्प्रलिलिपुरुतैवं चिद्देवानभिभवेमेति ततो न मनुष्या आशुर्न पशव आलिलिशिरे ता हेमाः प्रजा अनाशकेन नोत्पराबभूवुः ॥२॥ तद्धै देवाःशुश्रुवुः । अनाशकेन ह वाऽइमाः प्रजाः पराभवन्तीति ते होचुर्हन्तेदमासामपजिघाꣳसामेति केनेति यज्ञेनैवेति यज्ञेन ह स्म वै तद्देवाः कल्पयन्ते यदेषां कल्प्यमासऽर्षयश्च ॥३॥ ते होचुः । कस्य न इदं भविष्यतीति ते मम ममेत्येव न सम्पादयां चक्रुस्ते हासम्पाद्योचुराजिमेवास्मिन्नजामहै स यो न उज्जेष्यति तस्य न इदं भविष्यतीति तथेति तस्मिन्नाजिमाजन्त ॥४॥ ताविन्द्राग्नी ऽउदजयताम् । तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीन्द्राग्नी ह्यस्य भागधेयमुदजयतां तौ यत्रेन्द्राग्नीऽउज्जिगीवाꣳसौ तस्थतुस्तद्विश्वे देवा अन्वाजग्मुः ॥५॥ क्षत्रं वाऽइन्द्राग्नी । विशो विश्वे देवा यत्र वै क्षत्रमुज्जयत्यन्वाभक्ता वै तत्र विशस्तद्विश्वान्देवानन्वाभजतां तस्मादेष वैश्वदेवश्चरुर्भवति ॥६॥ तं वै पुराणानां कुर्यादित्याहुः । क्षत्रं वाऽइन्द्राग्नी नेन्क्षत्रमभ्यारोहयाणीति तौ वाऽउभावेव नवानाꣳ स्यातां यद्धि पुरोडाश इतरश्चरुरितरस्तेनैव क्षत्रमनभ्यारूढं तस्मादुभावेव नवानाꣳ स्याताम् ॥७॥ तऽउ ह विश्वे देवा ऊचुः । अनयोर्वाऽअयं द्यावापृथिव्योरसो हन्तेमेऽअस्मिन्नाभजामेति ताभ्यामेतं भागमकल्पयन्नेतं द्यावापृथिव्यमेककपालं पुरोडाशं तस्माद्द्यावापृथिव्य एककपालः पुरोडाशो भवति तस्येयमेव कपालमेकेव हीयं तस्मादेककपालो भवति ॥८॥ तस्य परिचक्षा । यस्यै वै कस्यै च देवतायै हविर्गृह्यते सर्वत्रैव स्विष्टकृदन्वाभक्तोऽथैतꣳसर्वमेव जुहोति न स्विष्टकृतेऽवद्यति सा परिचक्षोतो हुतः पर्यावर्तते ॥९॥ तदाहुः । पर्याभूद्वाऽअयमेककपालो मोहिष्यति राष्ट्रमिति नास्य सा परिचक्षाहवनीयो वाऽआहुतीनां प्रतिष्ठा स यदाहवनीयं प्राप्यापि दशकृत्वः पर्यावर्तेत न तदाद्रियेत यदीत्वन्ये वदन्ति कस्तत्सन्धमुपेयात्तस्मादाज्यस्यैव यजेदा-

ज्यꣳ ह वाऽअनयोर्द्यावापृथिव्योः प्रत्यक्षꣳ रसस्तत्प्रत्यक्षमेवैनेऽ-एतत्स्वेन रसेन मेध्येन प्रीणाति तस्मादाज्यस्यैव यजेत् ॥१०॥ एतेन वै देवाः । यज्ञेनेष्ट्वोभयीनामोषधीनां याश्च मनुष्या उपजीवन्ति याश्च पशवः कृत्यामिव त्वद्विषमिव त्वदपजघ्नुस्तत आश्नन्मनुष्या आलिशन्त पशवः ॥११॥ अथ यदेष एतेन यजते । तन्नाह न्वेवैतस्य तथा कश्चन कृत्ययेव त्वद्विषेणेव त्वत्प्रलिम्पतीति देवा अकुर्वन्निति त्वेवैष एतत्करोति यमु चैव देवा भागमकल्पयन्त तमु चैवभ्य एष एतद्भागं करोतीमा उ चैवैतदुभयीरोषधीर्याश्च मनुष्या उपजीवन्ति याश्च पशवस्ता अनमीवा अकिल्बिषाः कुरुते ता अस्यानमीवा अकिल्बिषा इमाः प्रजा उपजीवन्ति तस्माद्वाऽएष एतेन यजते ॥१२॥ तस्य प्रथमजो गौर्दक्षिणा । अग्न्यमिव हीदꣳ स यदीजानः स्याद्दर्शपूर्णमासाभ्यां वा यजेतार्थेतेन यजेत यद्युऽअनीजानः स्याच्चातुष्प्राश्यमेवैतमोदनमन्वाहार्यपचने पचेयुस्तं ब्राह्मणाऽअश्नीयुः ॥१३॥ द्वया वै देवा देवाः । अहैव देवाऽअथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तद्यथा व्वषट्कृतेऽहुतमेवमस्यैतद्भवति तत्रो यच्छक्नुयात्तद्दद्यान्नादक्षिणꣳ हविः स्यादिति ह्याहुर्नाग्निहोत्रे जुहुयात्समदꣳ ह कुर्याद्यदग्निहोत्रे जुहुयादन्यद्वाऽआग्रयणमन्यदग्निहोत्रं तस्मान्नाग्निहोत्रे जुहुयात् ॥१४॥ Cf. का. श. १. ३. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे तृतीयप्रपाठके पञ्चमं ब्राह्मणम् ॥

इति तृतीयः प्रपाठकस्समाप्तः ॥

(कण्डिकाः ॥११३॥)

अथ द्वितीयकाण्डे चतुर्थः प्रपाठकः ॥

२. ४. १.

(दाक्षायणयज्ञः)

प्रजापतिर्ह वाऽएतेनाग्रे यज्ञेनेजे । प्रजाकामो बहुः प्रजया पशुभिः स्याᳬं श्रियं गच्छेयं यशः स्यामन्नादः स्यामिति ॥१॥ स वै दक्षो नाम । तद्यदेनेन सोऽग्रेऽयजत तस्माद्दाक्षायणयज्ञो नामैतेनमेके वसिष्ठयज्ञऽइत्याचक्षतऽएष वै वसिष्ठ ऽएतमेव तदन्वाचक्षते स ऽएतेन यज्ञेनेजे स ऽएतेन यज्ञेनेष्ट्वा येयं प्रजापतेः प्रजातिर्या श्रीरेतद्बभूवैताᳬं ह वै प्रजातिं प्रजायतऽएताᳬं श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥ २ ॥ तेनो ह तत ईजे । प्रतीदर्शः श्वैक्तः स ये तं प्रत्यासुस्तेषां विवचनमिवास विवचनमिव ह वै भवति य ऽएवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥३॥ तमाजगाम । सुप्ला सार्ञ्जयो ब्रह्मचर्यं तस्मादेतं च यज्ञमनूचेऽन्यमु च सोऽनूच्य पुनः सृञ्जयान्जगाम ते ह सृञ्जया विदां चक्रुर्यज्ञं वै नोऽनूच्यागन्निति ते होचुः सह वै नस्तद्देवैरागन्यो नो यज्ञमनूच्यागन्निति स वै सहदेवः सार्ञ्जयस्तदप्येतन्निवचनमिवास्त्यन्यद्वाऽअरे सुप्ला नाम दध्रऽइति स ऽएतेन यज्ञेनेजे स ऽएतेन यज्ञेनेष्ट्वा येयᳬं सृञ्जयानां प्रजातिर्या श्रीरेतद्बभूवैताᳬं ह वै प्रजातिं प्रजायतऽएताᳬं श्रियं गच्छति य ऽएवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥४॥ तेनो ह तत ईजे । देवभागः श्रौतर्षः स उभयेषां कुरूणां च सृञ्जयानां च पुरोहित ऽआस परमता वै सा यो न्वेवैकस्य राष्ट्रस्य पुरोहितो ऽसन्सा न्वेव परमता किमु यो द्वयोः परमतामिवं ह वै गच्छति य ऽएवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥५॥ तेनो ह तत ऽईजे। दक्षः पार्वतिस्तऽइमेऽप्येतर्हि दाक्षायणा राज्यमिवैव प्राप्ता राज्यमिव ह वै प्राप्नोति य ऽएवं विद्वाने-

तेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत स वाऽएकैक एवानूचीनाहं पुरोडाशो भवत्येतेनो हास्यासपत्नानुपबाधा श्रीर्भवति स वै द्वे पौर्णमास्यौ यजते द्वेऽअमावास्ये द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥६॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥७॥ अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रꣳ सान्नाय्यं ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥८॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां ते द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियते ॥९॥ अथ प्रातराग्नेयः पुरोडाशो भवति । मैत्रावरुणी पयस्या नेद्यज्ञादयानीति न्वेवाग्नेयः पुरोडाशोऽथैतावेव मित्रावरुणौ द्वे देवते द्वे वै मिथुनं मिथुनमेवैतत्प्रजननं क्रियतऽएतद्दु हास्य तद्रूपं येन बहुर्भवति येन प्रजायते ॥१०॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यां यमेवामुमुपवसथेऽग्नीषोमीयं पशुमालभते स एवास्य सः ॥११॥ अथ प्रातः । आग्नेयः पुरोडाशो भवत्यैन्द्रꣳ सान्नाय्यं प्रातःसवनमेवास्याग्नेयः पुरोडाश आग्नेयꣳहि प्रातःसवनमथैन्द्रꣳसान्नाय्यं माध्यन्दिनमेवास्य तत्सवनमैन्द्रꣳहि माध्यन्दिनꣳ सवनम् ॥१२॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां तृतीयसवनमेवास्य तद्विश्वदेवं वै तृतीयसवनमिन्द्राग्नी वै विश्वे देवाः ॥१३॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यज्ञादयानीति न्वेवाग्नेयः पुरोडाशोऽथ यामेवामुं मैत्रावरुणीं व्वशामनुबन्ध्यामालभते सैवास्य मैत्रावरुणी पयस्या स पौर्णमासेन चामावास्येन चेष्ट्वा यावत्सौम्येनाध्वरेणेष्ट्वा जयति तावज्जयति तदु खलु महायज्ञो भवति ॥१४॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यामेतेन वाऽइन्द्रो व्वृत्रमहन्नेतेनोऽएव व्यजयत यास्येयं व्विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳहन्ति तथोऽएव व्विजयतेऽथ यत्सन्नयत्यामावास्यं वै सान्नाय्यं दूरे तद्यदमावा-

स्येति क्षिप्रऽएवैतद्वृत्रं जघ्नुषे तमेतेन रसेनाप्रीणन्क्षिप्रं ह वै पाप्मानमपहते य एवं विद्वान् पौर्णमास्याꣳ सन्नयत्येष वै सोमो राजा देवानामन्नं यच्चन्द्रमास्तमेतत्पूर्वेद्युरभिपुण्वन्ति प्रातर्भक्षयिष्यन्तस्तमेतद्भक्षयन्ति यदपक्षीयते ॥१५॥ अथ यत्पूर्वेद्युः । अग्नीषोमीयेण यजते पौर्णमास्यामभिपुणोत्येवैनमेतत्तस्मिन्नभिषुतऽएतꣳरसं दधात्येतेन रसेन तीव्रीकरोति स्वदयति ह वै देवेभ्यो हव्यꣳ स्वदते हास्य देवेभ्यो हव्यं य एवं विद्वान् पौर्णमास्याꣳ सन्नयति ॥१६॥ अथ यत्पूर्वेद्युः । ऐन्द्राग्नेन यजतेऽमावास्यायां दर्शपूर्णमासयोर्वै देवते स्त इन्द्राग्नीऽएव तेऽएवैतदञ्जसा प्रत्यक्षं यजत्यञ्जसा ह वाऽअस्य दर्शपूर्णमासाभ्यामिष्टं भवति य ऽएवमेतद्वेद ॥१७॥ अथ प्रातः । आग्नेयः पुरोडाशो भवति मैत्रावरुणी पयस्या नेद्यन्नादयानीति न्वेवाग्नेयः पुरोडाशोऽथैतावेवार्धमासौ मित्रावरुणौ य एवापूर्यते स वरुणो योऽपक्षीयते स मित्रस्तावेतावाꣳ रात्रिमुभौ समागच्छतस्तदुभावेवैतत्सह सन्तौ प्रीणाति सर्वꣳ ह वाऽअस्य प्रीतं भवति सर्वमाप्तं य ऽएवमेतद्वेद ॥१८॥ तद्वाऽएताꣳरात्रिम् । मित्रो वरुणे रेतः सिञ्चति तदेतेन रेतसा प्रजायते यदापूर्यते तद्यदेषात्र मैत्रावरुणी पयस्यावक्लृप्ततमा भवति ॥१९॥ सान्नाय्यभाजना वाऽअमावास्या । तद्दस्तत्पौर्णमास्यां क्रियते स यद्धात्रापि सन्नयेज्जामि कुर्यात्समदं कुर्यात्तदेनमद्भ्य ओषधिभ्यः सम्भृत्याहुतिभ्योऽधिजनयति स एष आहुतिभ्यो जातः पश्चाद्दृश्ये ॥२०॥ मिथुनादिद्वाऽएनमेतत्प्रजनयति । योषा पयस्या रेतो वाजिनं तद्वाऽअनुष्ठ्या यन्मिथुनाज्जायते तदेनमेतस्मान्मिथुनात्प्रजननात्प्रजनयति तस्मादेषात्र पयस्या भवति ॥२१॥ अथ वाजिभ्यो वाजिनं जुहोति । ऋतवो वै वाजिनो रेतो वाजिनं तद्वनुष्ठ्येवैतदेतः सिच्यते तदृतवो रेतः सिक्तमिमाः प्रजाः प्रजनयन्ति तस्माद्वाजिभ्यो वाजिनं जुहोति ॥२२॥ स वै पश्चादिव यज्ञस्य जुहोति । पश्चाद्वै परीत्य वृषा योषामधि द्रवति तस्याꣳ रेतः सिञ्चति स वै प्रागेवाग्रे जुहोत्य'ग्ने व्रीहीं'त्यनु वषट्करोति

तस्विष्टकृद्भाजनꣳ स वै प्रागेव जुहोति ॥२३॥ अथ दिशो व्याघारयति । "दिशः प्रदिश आदिशो विदिश उद्दिशो दिग्भ्यः स्वाहे"ति पञ्च दिशः पञ्चर्तवस्तदृतुभिरेवैतद्दिशो मिथुनीकरोति ॥ २५॥ तद्धैके पञ्चैव भक्षयन्ति । होता चाध्वर्युश्च ब्रह्मा चाग्नीच्च यजमानः पञ्च वाऽ ऋतवस्तदृतूनामेवैतद्रूपं क्रियते तदृतुष्वेवैतद्रेतः सिक्तं प्रतिष्ठापयति यजमानो भक्षयति प्रथमो रेतः परिगृह्णानीत्यथोऽअप्युत्तमो मय्युत्तमं रेतः प्रतितिष्ठादित्युपहूत उपह्वयस्वेति सोममेवैतत्कुर्वन्ति ॥ २५ ॥ (का. श. १. ३. ४. शां. ब्रा. ४. ४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे चतुर्थप्रपाठके प्रथमं ब्राह्मणम् ॥ (४. ४.)

द्वितीयकाण्डे चतुर्थोऽध्यायस्समाप्तः ॥

२. ४. २.

अथ चातुर्मास्यविधिः ॥

(वैश्वदेवपर्व)

प्रजापतिर्ह वाऽइदमग्रऽएक एवास । स ऐक्षत कथं नु प्रजायेयेति सोऽश्राम्यत्स तपोऽतप्यत स प्रजा ऽअसृजत ता ऽअस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि व्वयाꣳसि पुरुषो वै प्रजापतेर्नेदिष्ठं द्विपाद्वा अयं पुरुषस्तस्माद्द्विपादो व्वयाꣳसि ॥१॥ स ऐक्षत प्रजापतिः । यथा न्वेव पुरैकोऽभूवमेवमु न्वेवाप्येतर्ह्येक एवास्मीति स द्वितीयाः ससृजे ता अस्य परैव बभूवुस्तदिदं क्षुद्रꣳ सरीसृपं यदन्यत्सर्पेभ्यस्तृतीयाः ससृजऽइत्याहुस्ताऽअस्य परैव बभूवुस्तऽइमे सर्पा एता ह न्वेव द्वयीर्याज्ञवल्क्य उवाच त्रयीरु तु पुनर्ऋचा ॥२॥ सोऽर्चञ्छ्राम्यन् प्रजापतिरीक्षांचक्रे । कथं नु मे प्रजाः सृष्टाः पराभवन्तीति स हैतदेव ददर्शानशनतया वै मे प्रजाः पराभवन्तीति स ऽआत्मन एवाग्रे स्तनयोः पय ऽआप्याययांचक्रे स प्रजा ऽअसृजत ता अस्य प्रजाः सृष्टा

स्तनावेवाभिपद्य तास्ततः सम्बभूवुस्ता इमा अपराभूताः ॥३॥ तस्मादेतदृषिणाभ्यनूक्तम् । "प्रजा ह तिस्रोऽअत्यायमीयु"रिति तद्याः पराभूतास्ता एवैतदभ्यनूक्तं "न्यन्या अर्कमभितो विविश्र"इत्यग्निर्वाऽअर्कस्तद्या इमाः प्रजा अपराभूतास्ता अग्निमभितो निविष्टास्ता एवैतदभ्यनूक्तम् ॥४॥ "महद्ध तस्थौ भुवनेष्वन्तरि"ति। प्रजापतिमेवैतदभ्यनूक्तं "पवमानो हरित आविवेशे"ति दिशो वै हरितस्ता अयं वायुः पवमान आविष्टस्ता एवैषर्गभ्यनूक्ता ता ऽइमाः प्रजास्तथैव प्रजायन्ते यथैव प्रजापतिः प्रजा असृजतेदꣳ हि यदेव स्त्रियै स्तनावाप्यायतेऽऊधः पशूनामथैव यज्जायते तज्जायते तास्ततस्तनावेवाभिपद्य सम्भवन्ति ॥५॥ तद्धैष पय एवान्नम् । एतद्धयग्रे प्रजापतिरन्नमजनयत तद्वाऽअन्नमेव प्रजा अन्नाद्धि सम्भवन्तीदꣳ हि यासां पयो भवति स्तनावेवाभिपद्य तास्ततः सम्भवन्त्यथ यासां पयो न भवति जातमेव ता अप्यादयन्ति तदु ता अन्नादेव सम्भवन्ति तस्माद्धन्नमेव प्रजाः ॥६॥ स यः प्रजाकामः । एतेन हविषा यजतऽआत्मानमेवैतद्यज्ञं विधत्ते प्रजापतिं भूतꣳ ॥७॥ स वाऽआग्नेयोऽष्टाकपालः पुरोडाशो भवति । अग्निर्वै देवतानां मुखं प्रजनयिता स प्रजापतिस्तस्मादाग्नेयो भवति ॥८॥ अथ सौम्यश्चरुर्भवति । रेतो वै सोमस्तदग्नौ प्रजनयितरि सोमꣳ रेतः सिञ्चति तत्पुरुस्तान्मिथुनं प्रजननम् ॥९॥ अथ सावित्रः । द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता प्रजापतिर्मध्यतः प्रजनयिता तस्मात्सावित्रो भवति ॥१०॥ अथ सारस्वतश्चरुर्भवति । पौष्णश्चरुर्योषा वै सरस्वती व्वृषा पूषा तत्पुनर्मिथुनं प्रजननमेतस्माद्वाऽउभयतो मिथुनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा इतश्चावाचीस्तथोऽएवैष एतस्मादुभयत एव मिथुनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वाऽएतानि पञ्च हवीꣳ

१. "बृहद्ध तस्थौ" इति ऋक्संहितापाठः See. ऋ. सं. ६. ७. ८.

२. भूतं इति क.

पि भवन्ति ॥११॥ अथातः पयस्याया एवायतनम्। मारुतस्तु सप्त-कपालो द्विशो वै मरुतो देवविशस्ता हेदमनिषेद्धा इव चेरुस्ताः प्रजापतिं यजमानमुपत्योचुर्वि वै ते मथिष्यामहऽइमाः प्रजा या एतेन हविषा स्रक्ष्यसऽइति ॥१२॥ स ऐक्षत प्रजापतिः। परा मे पूर्वाः प्रजा अभूवन्निमा उ चेदिमे विमथनते न ततः किं चन परिशेष्यत-ऽइति तेभ्य एतं भागमकल्पयदेतं मारुतꣳ सप्तकपालं पुरोडाशꣳ स एष मारुतः सप्तकपालस्तद्यत्सप्तकपालो भवति सप्त-सप्त हि मारुतो गणस्तस्मान्मारुतः सप्तकपालः पुरोडाशो भवति ॥१३॥ तं वै स्वतवोभ्य इति कुर्यात्। स्वयꣳ हि तऽएतं भागमकुर्वतो तो स्वतवोभ्यो याज्यानुवाक्ये न विन्दन्ति स उ खलु मारुत एव स्या-त्स वाऽएष प्रजाभ्य एवाहिꣳसायै क्रियते तस्मान्मारुतः ॥१४॥ अथातः पयस्यैव। पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्त-द्यत एव सम्भूता यतः सम्भवन्ति तदेवाभ्य एतत्करोति तद्याः पूर्वै-र्हविर्भिः प्रजाः सृजते ता एतस्मात्पयस एतस्यै पयस्यायै सम्भवन्ति ॥१५॥ तस्यां मिथुनमस्ति। योषा पयस्या रेतो द्व्याजिनं तस्मान्मि-थुनाद्विश्वमसम्मितमनु प्राजायत तद्यदेतस्मान्मिथुनाद्विश्वमसम्मित-मनु प्राजायत तस्माद्विश्वदेवी भवति ॥१६॥ अथ द्यावापृथिव्य एक-कपालः पुरोडाशो भवति। एतैर्वै हविर्भिः प्रजापतिः प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां पर्यगृह्णात्ता ऽइमा द्यावापृथिवीभ्यां परिगृहीता-स्तथोऽएवैष एतद्या ऽएतैर्हविर्भिः प्रजाः सृजते ता द्यावापृथिवीभ्यां परिगृह्णाति तस्माद् द्यावापृथिव्य एककपालः पुरोडाशो भवति ॥१७॥ अथात आवृदेव। नोपकिरन्त्युत्तरवेदिं विसृष्टमसत्सर्वमसद्विश्वदेव-मसदिति त्रेधा बर्हिः संनद्धं भवति तत्पुनरेकधैतद्धि प्रजननस्य रूपं प्रजननमु हीदं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रेधा सत्पुनरे-कधा पस्त्व उपसंनद्धा भवन्ति तं प्रस्तरं गृह्णाति प्रजननमु हीदं प्रज-

१. कृगियं माध्यन्दिनसंहितायां नास्ति।

ननमु हि प्रस्वस्तस्मात्प्रसूः प्रस्तरं गृह्णाति ॥१८॥ आसाद्य हवीꣳष्यग्निं मन्थन्ति । अग्निꣳ ह वै जायमानमनु प्रजापतेः प्रजा जज्ञिरे तथोऽएवैतस्याग्निमेव जायमानमनु प्रजा जायन्ते तस्मादासाद्य हवीꣳष्यग्निं मन्थन्ति ॥१९॥ नवप्रयाजं भवति । नवानुयाजं दशाक्षरा वै विराड्थैतामुभयतो न्यूनां विराजं करोति प्रजननायैतस्माद्वाऽउभयतो न्यूनात् प्रजननात् त्प्रजापतिः प्रजाः ससृज इतश्चोर्ध्वा इतश्चावाचीस्तथो एवैष एतस्मादुभयत एव न्यूनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम् ॥२०॥ त्रीणि समिष्टयजूꣳषि भवन्ति । ज्यायऽ इव हीदꣳ हविर्यज्ञाद्यत्र नवप्रयाजं नवानुयाजमथोऽअप्येकमेव स्याद्धविर्यज्ञो हि तस्य प्रथमजो गौर्दक्षिणा ॥२१॥ एतेन वै प्रजापतिः यज्ञेनेष्ट्वा । येयं प्रजापतेः प्रजातिर्या श्रीरेतद्वभूवेताꣳ ह वै प्रजातिं प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥२२॥

Cf. का. श. १. ४. ३. तै. सं. १. ८. २. तै. ब्रा. १. ६. २ मै. सं. १. १०. १. काठ. सं. ९. ४. ३६. १–४. कपि. सं. ८. ७. and शां. ब्रा. ५. १. २.

इति शुक्लयजुर्वेदीयमाध्यन्दिनीयशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे चतुर्थप्रपाठके द्वितीयं ब्राह्मणम् ॥ (५. १.)

२. ४. ३.

(वरुणप्रघासपर्व)

वैश्वदेवेन वै प्रजापतिः । प्रजाः ससृजे ता अस्य प्रजाः सृष्टा व्वरुणस्य यवान् जक्षुर्वरुण्यो ह वाऽअग्रे यवस्तद्यन्वेव वरुणस्य यवान्प्रादंस्तस्माद्वरुणप्रघासा नाम ॥१॥ ता वरुणो जग्राह । ता वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निषेदुश्च प्राणो-

१, २. मन्थति इति. पाठान्तरम् ।

दानौ हैवाभ्यो नापचक्रमतुरथान्याः सर्व्वा देवता ऽअपचक्रमुस्तयोर्हैवास्य हेतोः प्रजा न परावभूवुः ॥२॥ ता ऽएतेन हविषा प्रजापतिरभिषज्यत् । तद्याश्चैवास्य प्रजा जाता आसन्याश्चाजातास्ता उभयीर्व्वरुणपाशात्प्रामुञ्चत्ता ऽ अस्यानमीवा अकिल्बिषाः प्रजाः प्राजायन्त ॥३॥ अथ यदेष ऽ एतश्चतुर्थे मासि यजते । तन्नाहु न्वेवैतस्य तथा प्रजा व्वरुणो गृह्णातीति देवा ऽअकुर्व्वन्निति न्वेवैष ऽ एतत्करोति याश्च न्वेवास्य प्रजा जाता याश्चाजातास्ता ऽउभयीर्व्वरुणपाशात्प्रमुञ्चति ता ऽअस्यानमीवा ऽअकिल्बिषाः प्रजाः प्रजायन्ते तस्माद्वाऽएष एतश्चतुर्थे मासि यजते ॥४॥ तद्वे द्वे व्वेदी द्वावग्नी भवतः । तद्यद्वे व्वेदी द्वावग्नी भवतस्तदुभयत ऽएवैतद्वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्माद्वे व्वेदी द्वावग्नी भवतः ॥ ५ ॥ स उत्तरस्यामेव व्वेदौ । उत्तरवेदिमुपकिरति न दक्षिणस्यां क्षत्रं व्वै व्वरुणो व्विशो मरुतः क्षत्रमेवैतद्विश उत्तरं करोति तस्मादुपर्यासीनं क्षत्रियमधस्तादिमाः प्रजा उपासते तस्मादुत्तरस्यामेव व्वेदाऽउत्तरवेदिमुपकिरति न दक्षिणस्याम् ॥६॥ अथैतान्येव पञ्च हवींषि भवन्ति । एतैर्वै हविर्भिः प्रजापतिः प्रजा ऽअसृजतैतैरुभयतो व्वरुणपाशात्प्रजाः प्रामुञ्चदितश्चोर्ध्वाऽइतश्चावाचस्तिस्माद्वाऽएतानि पञ्च हवींषि भवन्ति ॥७॥ अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । प्राणोदानौ वाऽइन्द्राग्नी तद्यथा पुण्यं चक्रुषे पुण्यं कुर्य्यादेवं तत्तयोर्हैवास्य हेतोः प्रजा न पराबभूवुस्तत्प्राणोदानाभ्यामेवैतत्प्रजा भिषज्यति प्राणोदानौ प्रजासु दधाति तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥ उभयत्र पयस्ये भवतः । पयसो वै प्रजाः सम्भवन्ति पयसः सम्भूतास्तद्यत एव सम्भूता यतः सम्भवन्ति तत एवैतदुभयतो व्वरुणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा ऽइतश्चावाचीस्तस्मादुभयत्र पयस्ये भवतः ॥९॥

१. सर्व्वा इति. घ. २. प्राजायत इति. ग. घ. ३. त्वेवैष इति. क. घ.

४. त्वेवास्येति. क. घ. ५. प्रजायत इति. ग. घ. ६. तद्विश इति. क.

व्वारुण्युत्तरा भवति । व्वरुणो ह वाऽअस्य प्रजा ऽअगृह्णात्तत्प्रत्यक्षं व्वरुणपाशात्प्रजाः प्रमुञ्चति मारुती दक्षिणाजामितायै न्वेव मारुती भवति जामि ह कुर्य्याद्यदुभे व्वारुण्यौ स्यातामतो ह वाऽअस्य दक्षिणतो मरुतः प्रजा ऽअजिघाᳬसंस्तानेतेन भागेनाशमयत्तस्मान्मारुती दक्षिणा ॥१०॥ तयोरुभयोरेव करीराण्यावपति । कं वै प्रजापतिः प्रजाभ्यः करीरैरकुरुत कम्वेवैष एतत्प्रजाभ्यः कुरुते ॥११॥ तयोरुभयोरेव शमीपलाशान्यावपति । शं वै प्रजापतिः प्रजाभ्यः शमीपलाशैरकुरुत शम्वेवैष एतत्प्रजाभ्यः कुरुते ॥१२॥ अथ काय एककपालः पुराडाशो भवति । कं वै प्रजापतिः प्रजाभ्यः कायेनैककपालेन पुरोडाशेनाकुरुत कम्वेवैषऽ एतत्प्रजाभ्यः कायेनैककपालेन पुरोडाशेन कुरुते तस्मात्काय एककपालः पुरोडाशो भवति ॥१३॥ अथ पूर्वेद्युः । अन्वाहार्यपचनेऽतुपानिव यवान् कृत्वा तानीषदिवोपतप्य तेषां करम्भपात्राणि कुर्व्वन्ति यावन्तो गृह्याः स्युस्तावन्त्येकेनातिरिक्तानि ॥१४॥ तत्रापि मेषं च मेषीं च कुर्व्वन्ति । तयोर्मेषं च मेष्यां च यद्यनैडकीरुर्णा विन्देत्ताः प्रणिज्य निश्लेषयेद्यद्यऽअनैडकीर्न विन्देदथो ऽअपि कुशोर्णाऽएव स्युः ॥१५॥ तद्यन्मेषश्च मेषी च भवतः । एष वै प्रत्यक्षं व्वरुणस्य पशुर्यन्मेषस्तत्प्रत्यक्षं व्वरुणपाशात्प्रजाः प्रमुञ्चति यवमयौ भवतो यवान्हि जक्षुषीर्व्वरुणो ऽगृह्णान्मिथुनौ भवतो मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥१६॥ सऽउत्तरस्यामेव पयस्यायां मेषीमवदधाति । दक्षिणस्यां मेषमेवमिव हि मिथुनं क्रूरमुत्तरतो हि स्त्री पुमाᳬसमुपशेते ॥१७॥ स सर्व्वाण्येव हवीᳬष्यध्वर्युः । उत्तरस्यां व्वेदावासादयत्यथैतामेव पयस्यां प्रतिप्रस्थाता दक्षिणस्यां व्वेदावासादयति ॥१८॥ आसाद्य हवीᳬष्याग्निं मन्थति । अग्निं मन्थित्वानुप्रहृत्याभिजुहोत्यथाध्वर्युरेवाहा'ग्नये समिध्यमानायानुब्रूही'ति ताऽउभावेवेध्मावभ्याधत्त उभौ समिधौ परिशिᳬष्टऽउभौ पूर्व्वावाघारावाघारयतोऽथाध्वर्युरे-

१. अध्वर्युरिति ध. २. 'मथिष्वा' इति भाष्ये प्रतीकग्रहणम् ।

वाहा शिमन्नीत्संमृद्ढी त्यसंमृष्टमेव भवति सम्प्रोपितम् ॥१९॥ अथ प्रतिप्रस्थाता प्रतिपरैति । स पत्नीमुदानेष्यन् पृच्छति केन चरसीति व्वरुणयं वाऽएतत्स्त्री करोति यदन्यस्य सत्यन्येन चरत्यथो नेन्मेऽन्तःशल्या जुहवदिति तस्मात्पृच्छति निरुक्तं वाऽएनः कनीयो भवति सत्यछंहि भवति तस्माद्वेव पृच्छति सा यत्र प्रतिजानीत ज्ञातिभ्यो हास्य तदहितछंस्यात् ॥२०॥ तां व्वाचयति । "प्रघासिनो हवामहे मरुतश्च रिशादसः । करम्भेण सजोषस"ऽइति यथा पुरोऽनुवाक्यं-वंभपतयैवैनानेतेभ्यः पात्रेभ्यो ह्वयति ॥२१॥ तानि वै प्रतिपुरुषम् । यावन्तो गृह्याः स्युस्तावन्त्येकेनातिरिक्तानि भवन्ति तत्प्रतिपुरुषमेवैतदेकैकेन या ऽअस्य प्रजा जातास्ता व्वरुणपाशात्प्रमुञ्चत्येकेनातिरिक्तानि भवन्ति तद्या एवास्य प्रजा अजातास्ता व्वरुणपाशात्प्रमुञ्चति तस्मादेकेनातिरिक्तानि भवन्ति ॥२२॥ पात्राणि भवन्ति । पात्रेषु ह्यशनमश्यते यवमयानि भवन्ति यवान्हि जक्षुषीर्व्वरुणोऽगृह्णाच्छूर्पेण जुहोति शूर्पेण ह्यशनं क्रियते पत्नी जुहोति मिथुनादेवैतद्वरुणपाशात्प्रजाः प्रमुञ्चति ॥२३॥ पुरा यज्ञात्पुराहुतिभ्यो जुहोति । अहुतादो वै विशो विशो वै मरुतो यत्र वै प्रजापतेः प्रजा व्वरुणगृहीताः परिदीर्णा अनत्यश्च प्राणत्यश्च शिश्यिरे च निपेदुश्च तद्धासां मरुतः पाप्मानं विमेथिरे तथोऽएवैतस्य प्रजानां मरुतः पाप्मानं विमथ्नते तस्मात्पुरा यज्ञात्पुराहुतिभ्यो जुहोति ॥२४॥ स वै दक्षिणेऽग्नौ जुहोति । "यद्ग्रामे यदरण्य"ऽइति ग्रामे वा ह्यरण्ये वैनः क्रियते "यत्सभायां यदिन्द्रिय"ऽइति यत्सभायामिति यन्मानुषऽइति तदाह यदिन्द्रियऽइति यद्देवत्रेति तदाह "यदेनश्चकृमा व्वयमिदं तदवयजामहे स्वाहे"ति यत्किं च व्वयमेनश्चकृमेदं व्वयं तस्मात्सर्व्वस्मात्प्रमुच्यामहऽइत्येवैतदाह ॥२५॥ अथैन्द्रीं मरुत्वतीं जपति । यत्र वै प्रजापतेः

१. शल्या इति. ग. २. मा. सं. ३. ४४. ३. प्रतिपुरुषं इति ग.
४. सा. इति. क. ५. मा. सं. ३. ४५. ६. तदाहेति. क.

प्रजानां मरुतः पाप्मानं व्विमेथिरे तद्धेक्षांचक्रऽइमे ह मे प्रजा न व्विमथ्नीरन्निति ॥२६॥ स एतामिन्द्रीं मरुत्वतीमजपत् । क्षत्रं वाऽइन्द्रो व्विशो मरुतः क्षत्रं वै व्विशो निषेद्धा निषिद्धा असन्निति तस्मादिन्द्री ॥२७॥ "मो षूणः । इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः । महश्चिद्यस्य मीढुषो यव्या हविष्मतो मरुतो व्वन्दते गी" रिति ॥२८॥ अथैनां व्वाचयति । "अकन् कर्म कर्मकृत" ऽइत्यकन्हि कर्म कर्मकृतः "सह व्वाचा मयोभुवे"ति सह हि व्वाचाऽकन् "देवेभ्यः कर्म कृत्वे"ति देवेभ्यो हि कर्म कृत्वा "स्तं प्रेत सचाभुव" इत्यन्यतो ह्योढया सह भवन्ति तस्मादाह सचाभुव इत्यस्तं प्रेतेति जघनार्धो वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रासीषदद्गृहा वाऽअस्तं गृहाः प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति ॥२९॥ प्रतिपराणीयोदेति प्रतिप्रस्थाता । संमृजन्त्यग्निꣳ संमृष्टेऽग्नौ ताऽउभावेवोत्तरावाघारावाघारयतोऽथाध्वर्युरेवाश्राव्य होतारं प्रवृणीते प्रवृतो होतोत्तरस्यै व्वेदेर्होतृषदनऽउपविशत्युपविश्य प्रसौति ताऽउभावेव प्रसूतौ स्रुच आदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह 'समिधो यजे'ति यज यजेति चतुर्थे चतुर्थे प्रयाजे समानयमानौ नवभिः प्रयाजैश्चरतः ॥३०॥ अथाध्वर्युरेवा 'हाग्नयऽनुब्रूही'ति । आग्नेयमाज्यभागं ता उभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहा'ग्निं यजे'ति ताऽउभावेव व्वषट्कृते जुहुतः ॥३१॥ अथाध्वर्युरेवाह 'सोमायानुब्रूही'ति । सौम्यमाज्यभागं ताऽउभावेव चतुराज्यस्यावदायातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह 'सोमं यजे'ति ताऽउभावेव व्वषट्कृते जुहुतः ॥३२॥ तद्यत्किं च व्वाचा कर्तव्यम् । अध्वर्युरेव तत्करोति न प्रतिप्रस्थाता तद्यदध्वर्युरेवाश्रा-

१. तस्मादिन्द्री इति. ग. २. म. सं. ३. ४६. ३. शुष्मिन्नवया इति. क.
४. महश्चिद्यस्येति घ. ५. मा. सं. ३. ४७. ६. भवतीति. क.
७. प्रतिप्रस्थाता इति. घ. ८. होतृषदन इति. ग. ९. अध्वर्युरेवेति. घ

वयतीहैव यत्र व्यपदक्रियते ॥३३॥ कृतानुकरऽएव प्रतिप्रस्थाता । क्षत्रं वै व्वरुणो व्विशो मरुतस्तत्क्षत्रायैवैतद्विशं कृतानुकरामनुवर्त्मानं करोति प्रत्युद्यामिनीछं ह क्षत्राय व्विशं कुर्याद्यदपि प्रतिप्रस्थाताऽऽश्रावयेत्तस्मात्र प्रतिप्रस्थाताश्रावयति॥३४॥ पाणावेव प्रतिप्रस्थाता । स्रुचौ कृत्वोपास्तेऽथाध्वर्युरेवैतैर्हविर्भिः प्रचरत्याग्नेयेनाष्टाकपालेन पुरोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन वाष्टाकपालेन वा पुरोडाशेन सारस्वतेन चरुणा पौष्णेन चरुणैन्द्राग्नेन द्वादशकपालेन पुरोडाशेन ॥३५॥ अथैताभ्यां पयस्याभ्यां प्रचरिष्यन्तौ व्विपरिहरतः । स यो मेषो भवति मारुत्यां तं व्वारुण्यामवदधाति या मेषी भवति व्वारुण्यां तां मारुत्यामवदधाति तद्यदेवं व्विपरिहरतः क्षत्रं वै व्वरुणो व्वीर्यं पुमान्वीर्यमेवैतत्क्षत्रे धत्तेऽवीर्या वै स्त्री व्विशो मरुतस्तदवीर्यामेवैतद्विशं कुरुतस्तस्मादेवं व्विपरिहरतः॥३६॥ अथाध्वर्युरेवाह 'व्वरुणायानुब्रूही'ति । स ऽउपस्तृणीतऽआज्यमथास्यै व्वारुण्यै पयस्यायै द्विरवद्यति सोऽन्यतरेणावदानेन सह मेषमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽ अतिक्रामत्यतिक्रम्याश्रावयाह 'व्वरुणं यजे'ति व्वषट्कृते जुहोति ॥३७॥ सव्ये पाणावध्वर्युः । स्रुचौ कृत्वा दक्षिणेन प्रतिप्रस्थानुर्व्वासोऽन्वारभ्याह 'मरुद्भ्योऽनुब्रूही'त्युपस्तृणीतऽआज्यं प्रतिप्रस्थाताथास्यै मारुत्यै पयस्यायै द्विरवद्यति सोऽन्यतरेणावदानेन सह मेषीमवदधात्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्यथाध्वर्युरेवाश्रावयाह 'मरुतो यजे'ति व्वषट्कृते जुहोति ॥३८॥ अथाध्वर्युरेव कायेन । एककपालेन पुरोडाशेन प्रचरति कायेनैककपालेन पुरोडाशेन प्रचर्याध्वर्युरेवाहा 'ग्नये स्विष्टकृतेऽनुब्रूही'ति स सर्वेषामेव हविषामध्वर्युः सक्रु-

१. प्रस्थाता इति. ग. प्रस्थाता इति घ, २. सौम्येनेति. ग. घ.

३. अध्वर्युरिति ग. अध्वर्युरिति घ, Sco. तै.सं.६.५-८.२. तस्मात् स्त्रियोनिरिन्द्रियाः

४. प्रस्थातुरिति. ग. घ. ५. अस्यै इति ग. घ. ६. कायेनेति. घ.

त्सकृदवद्यत्यथैतस्या ऽएव पयस्यायै प्रतिप्रस्थाता सकृदवद्य-त्यथोपरिष्टाद्[1]द्विराज्यस्याभिघारयतस्ताऽउभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहा'ग्निꣳस्विष्टकृतं यजे'ति ताऽउभावेव व्यपदकृते जुहुतः ॥३९॥ अथाध्वर्युरेव प्राशित्रमवद्यति । इडाꣳ समवदाय प्रतिप्रस्थात्रेऽतिप्रजिहीते तत्रापि प्रतिप्रस्थाता मारुत्यै पयस्यायै द्विरभ्यवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयत्युपहृत्य मार्जयन्ते ॥४०॥ अथाध्वर्युरेवाह 'ब्रह्मन् प्रस्थास्यामि । समिधमाधायाग्निमग्नीत्संमृडढ्वी'ति स स्रुचोरेवाध्वर्युः पृषदाज्यं व्यानयतेऽथ यदि प्रतिप्रस्थातुः पृषदाज्यं भवति तत्स द्वेधा व्यानयतऽउतो तत्र पृषदाज्यं न भवति स यदेवोपभृत्याज्यं तत्स द्वेधा व्यानयेत ताऽउभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाह'देवान्यजे'ति यज यजेति चतुर्थे चतुर्थेऽनुयाजे समानयमानो नवभिरनुयाजैश्चरतस्तद्यन्नवप्रयाजं भवति नवानुयाजं तदुभयत एवैतद्ऋणपाशात्प्रजाः प्रमुञ्चतीतश्चोर्ध्वा इतश्चावाचीस्तस्मान्नवप्रयाजं भवति नवानुयाजम्॥४१॥ताऽउभावेव सादयित्वा स्रुचो व्यूहतः । स्रुचो व्यूह्य परिधीन्समज्य परिधिमभिपद्याश्राव्याध्वर्युरेवाहे "पिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाये"ति सूक्तवाकꣳ होता प्रतिपद्यतेऽथैताऽउभावेव प्रस्तरौ समुल्लुम्पतऽउभावनुप्रहरत उभौ तूष्णेऽअपगृह्योपासाते यदा होता सूक्तवाकमाह ॥४२॥ अथाग्नीदाहानुप्रहरति । ताऽउभावेवानुप्रहरतऽउभावात्मानाऽउपस्पृशेते ॥४३॥ अथाह 'संवदस्वे'ति । 'अगानग्नीदगच्छावय श्रोषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूही'त्यध्वर्युरेवैतदाह ताऽउभावेव परिधीननुप्रहरत उभौ स्रुचः सम्प्रगृह्य स्फ्ये[7] सादयतः ॥४४॥ अथाध्वर्युरेव प्रतिपरेत्य । पत्नीः संयाजयत्युपास्तऽएव प्रतिप्रस्थाता पत्नीः संयाज्योदैत्यध्वर्युः

१. उपरिष्टादिति. घ. २. स स्रुचोरिति. घ. ३. स्रुचो इति.घ.
४. आश्राव्येति. घ. ५. माह इति ग. माह इति. घ.
६. मानुषेभ्य इति घ. ७. स्फ्ये इति घ. ८. अध्वर्युरिति. घ.

॥४५॥ त्रीणि समिष्टयजूंषि जुहोति । तूष्णीमेव प्रतिप्रस्थाता स्रुचं प्रगृह्णाति तस्यै व्वैश्वदेवेन यजमानयोर्व्वाससी परिहिते स्यातां तेऽ एवात्रापि स्यातामथास्यै व्वारुण्यै पयस्यायै क्षामकर्षमिश्रमादायावभृथं यन्ति व्वरुण्यं वाऽएतन्निर्व्वरुणतायै तत्र न साम गीयते न ह्यत्र साम्ना किं चन क्रियते तूष्णीमेवेत्याभ्यवेत्योपमारयति ॥४६॥ "अवभृथ निचुम्पुण । निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोऽयासिषमव मर्त्यैर्मर्त्यकृतं । पुरुराव्णो देव रिपस्पाहीं"ति कामꣳहैते यस्मै कामयेत तस्मै दद्यान्न हि दीक्षितवसने भवतः सं यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्व्वस्मात्पाप्मनो निर्मुच्यते ॥४७॥ अथ केशश्मश्रूण्वा । समारोह्याग्नीऽउदवसायैव ह्येतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽउत्सन्नयज्ञऽइव वाऽएष यच्चातुर्मास्यान्यथैष कल्पतः प्रतिष्ठितो यज्ञो यत्पौर्णमासं तत्कल्पेनैवैतद्यज्ञेनान्ततः प्रतितिष्ठति तस्मादुदवस्यति ॥४८॥ Cf. का. श. १. ५. १; तै. ब्रा. १. ६. ४, ५; मै. सं. १. ९. १, २; काठ. सं. ९. ४. ३१; ५–७. कपि. सं. ८. ७; शां ब्रा. ५. ३, ४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे चतुर्थप्रपाठके तृतीयं ब्राह्मणम् ॥

२. ४. ४.

(साकमेधपर्व)

व्वरुणप्रघासैर्वै प्रजापतिः । प्रजा व्वरुणपाशात्प्रामुञ्चत्ता अस्यानमीवा अकिल्बिषाः प्रजाः प्राजायन्तैथैतैः साकमेधैरेतैर्वै देवा वृत्रमघ्नन्नेतैर्व्वैव व्यजयन्त येयमेषां व्विजितिस्तां तथोऽएवैष ऽएतैः पा-

१. स्यातामिति. घ. २. मा. स. ३. ४८.
३. निचुम्पुण इति. ग. निचुम्पुण इति घ, ४. भवत इति.क.
५ स यथाहिः इति. घ. ६. तस्मादुदवस्यतीति ग. घ.
७. प्राजायन्त इति घ. ८. व्यैवं इति ङ०

पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव विजयते तस्माद्वाऽएष एतैश्चतुर्थे मासि यजते स वै द्व्यहमनूचीनाहं यजते ॥१॥ स पूर्वेद्युः । अग्नयेऽनीकवतेऽष्टाकपालं पुरोडाशं निर्वपत्यग्निꣳह वै देवाऽअनीकं कृत्वोपप्रेयुर्वृत्रꣳ हनिष्यन्तः स तेजोऽग्निर्नाव्यथत तथोऽएवैष ऽएतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्नग्निमेवानीकं कृत्वोपप्रैति स तेजोऽग्निर्न व्यथते तस्मादग्नयेऽनीकवते ॥२॥ अथ मरुद्भ्यः सान्तपनेभ्यः । मध्यन्दिने चरुं निर्वपति मरुतो ह वै सान्तपना मध्यन्दिने व्वृत्रꣳ सन्तेपुः सं सन्तप्तोऽनन्तेव प्राणन् परिदीर्णः शिश्ये तथोऽएवैतस्य पाप्मानं द्विषन्तं भ्रातृव्यं मरुतः सान्तपनाः सन्तपन्ति तस्मान्मरुद्भ्यः सान्तपनेभ्यः ॥३॥ अथ मरुद्भ्यो गृहमेधिभ्यः । शाखया व्वत्सानपाकृत्य पवित्रवति सन्दोह्य तं चरुꣳ श्रपयति चरुरु ह्येव स यत्र क्व च तण्डुलानावपन्ति तन्मेधो देवा दधिरे प्रातर्वृत्रꣳ हनिष्यन्तस्तथोऽएवैष ऽएतत्पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्मेधो धत्ते तद्यत्क्षीरौदनो भवति मेधो वै पयो मेधस्तण्डुलास्तमुभयं मेधमात्मन्धत्ते तस्मात्क्षीरौदनो भवति ॥४॥ तस्यावृत् । सैव स्तीर्णा व्वेदिर्भवति या मरुद्भ्यः सान्तपनेभ्यस्तस्यामेव स्तीर्णायां व्वेदौ परिधींश्च शकलांश्चोपनिदधाति तथा सन्दोह्य चरुꣳ श्रपयति श्रपयित्वाभिघार्योद्वासयति ॥५॥ अथ द्वे पिशीले वा पात्र्यौ वा निर्णेनिजाति । तयोरेनं द्वेधोद्धरन्ति तयोर्मध्ये सर्पिरासेचने कृत्वा सर्पिरासिञ्चति स्रुवं च स्रुचं च संमार्ष्ट्यथैताऽओदनावादायोदेति स्रुवं च स्रुचं चादायोदेति स इमामेव स्तीर्णां व्वेदिमभिमृश्य परिधीन् परिधाय यावतः शकलान् कामयते तावतोऽभ्यादधात्यथैताऽओदनावासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृपदने स्रुवं च स्रुचं चाददान आह ॥६॥ 'अग्नयेऽनुब्रूही'ति । आग्नेयमाज्यभागꣳ स दक्षिण-

---

१. स संतप्तो इति. घ. २. सपन्तानेभ्य इति. ग. ३. तस्यावृत् इति. ग.

स्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहा'ग्निं यजे'ति व्वषट्कृते जुहोति ॥७॥ अथाह 'सोमायानुब्रूही'ति । सौम्यमाज्यभागꣳ स उत्तरस्यौदनस्य सर्पिरासेचनाच्चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह 'सोमं यजे'ति व्वषट्कृते जुहोति ॥८॥ अथाह 'मरुद्भ्यो गृहमेधिभ्योऽनुब्रूही'ति । स दक्षिणस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याह 'मरुतां गृहमेधिनां यजे'ति व्वषट्कृते जुहोति ॥९॥ अथाहा'ग्नये स्विष्टकृतेऽनुब्रूही'ति । स उत्तरस्यौदनस्य सर्पिरासेचनात्तत आज्यमुपस्तृणीते तस्य द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयत्यतिक्रामत्यतिक्रम्याश्राव्याहा'ग्निꣳ स्विष्टकृतं यजे'ति व्वषट्कृते जुहोत्यथेडामेवावद्यति न प्राशित्रमुपहृत्य मार्जयन्तऽएतन्वेकमयनम् ॥१०॥ अथेदं द्वितीयꣳ । सैव स्तीर्णा व्वेदिर्भवति या मरुद्भ्यः सांतपनेभ्यस्तस्यामेव स्तीर्णायां व्वेदौ परिधींश्च शकलांश्चोपनिदधाति तथा सन्दोह्य चरुꣳश्रपयति नेदेवं प्रतिवेशमाज्यमधिश्रयति श्रपयित्वाभिघार्योद्वास्यानक्ति स्थाल्यामाज्यमुद्वासयति स्रुवं च स्रुचं च संमार्ष्टयथैतꣳ सोपमेवं चरुमादायोदैति स्थाल्यामाज्यमादायोदैति स्रुवं च स्रुचं चादायोदैति स इमामेव स्तीर्णां व्वेदिमभिमृश्य परिधीन् परिधाय यावतः शकलान् कामयते तावतोऽभ्यादधात्यथैतꣳ सोपमेव चरुमासादयति स्थाल्यामाज्यमासादयति स्रुवं च स्रुचं चासादयत्युपविशति होता होतृषदने स्रुवं च स्रुचं चाददान आह ॥११॥ 'अग्नयेऽनुब्रूही'ति । आग्नेयमाज्यभागꣳ स स्थाल्यै चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याहा'ग्निं यजे'ति व्वषट्कृते जुहोति॥१२॥ अथाह 'सोमायानुब्रूही'ति । सौम्यमाज्यभागꣳ स स्थाल्याऽएव चतुराज्यस्यावदायातिक्रामत्यतिक्रम्याश्राव्याह 'सोमं यजे'ति व्वषट्-

१. द्वितीयꣳइति. ग. २. तदेवेति. क. ३. मुद्वासयतीति. घ.

४. सोखमेवेति. ग. घ. ५. अत्रापि 'सोखमेव' इति. ग. घ.

कृते जुहोति ॥१३॥ अथाह 'मरुद्भ्यो गृहमेधिभ्योऽनुब्रूही'ति । स ऽउपस्तृणीतऽआज्यमथास्य चरोर्द्विरवद्यत्यथोपरिष्टादाज्यस्याभिघारयति प्रत्यनक्त्यवदानेऽअतिक्रामत्यतिक्रम्याश्राव्याह 'मरुतो गृहमेधिनो यजे'ति व्वषट्कृते जुहोति ॥१४॥ अथाहा'ग्नये स्विष्टकृतेऽनुब्रूही'ति । स ऽउपस्तृणीतऽआज्यमथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयति न प्रत्यनक्त्यवदानमतिक्रामत्यतिक्रम्याश्राव्याहा ग्निꣳ स्विष्टकृतं यजे'ति व्वषट्कृते जुहोति ॥१५॥ अथेडामेवावद्यति न प्राशित्रम् । उपहृय प्राश्नन्ति यावन्तो गृह्या हविरुच्छिष्टाशाः स्युस्तावन्तः प्राश्नीयुरथो ऽअप्यृत्विजः प्राश्नीयुरथो ऽअप्यन्ये ब्राह्मणाः प्राश्नीयुर्यदि बहुरोदनः स्यादथैतामनिरशितां कुम्भीमपिधाय निदधाति पूर्णदर्व्याय मातृभिर्व्वत्सान्त्समवार्जन्ति तदु पशवो मेधमान्मन्दधते यवाग्वैताꣳ रात्रिमग्निहोत्रं जुहोति निवान्यां प्रातर्दुहन्ति पितृयज्ञाय ॥१६॥ अथ प्रातर्हुते वाहुते वा । यतरथा कामयेत सोऽस्याऽअनिरशितायै कुम्भ्यै दर्व्यापहन्ति "पूर्णा दर्व्वि परापत सुपूर्णा पुनरापत । व्वस्नेव व्विक्रीणावहाऽइषमूर्जꣳ शतक्रत"विति यथा पुरोऽनुवाक्यैवमेषैतयैवैनमेतस्मै भागाय ह्वयति ॥१७॥ अथऽर्षभमाह्वयितवै ब्रूयात् । स यदि रुयात्स व्वषट्कार इत्यु हैकऽआहुस्तस्मिन्व्वषट्कारे जुहुयादित्यथो ऽइन्द्रमेवैतत्स्वेन रूपेण ह्वयति व्वृत्रस्य व्वधायैतद्वाऽइन्द्रस्य रूपं यदृषभस्तत्स्वेनैवैनमेतद्रूपेण ह्वयति व्वृत्रस्य व्वधाय स यदि रुयादामऽइन्द्रो यज्ञमगन्त्सेन्द्रो मे यज्ञ इति ह व्विद्याद्यद्यु न रुयाद्ब्राह्मण एव दक्षिणत आसीनो ब्रूयाज्जुहुधीति सैवेन्द्री वाक् ॥१८॥ स जुहोति । 'देहि मे ददामि ते नि मे धेहि नि ते दधे । निहारं च

१. प्रत्यनक्तीति. ग. घ. २. See तै.ब्रा.१.६ ८.४.अभिवान्या ३. यज्ञायेति. घ.
४. मा. सं ३. ४९. ५. रूपेणेति. क. ६. स्वेनैवैनमिति. घ.
७. ज्यादिति. क. ८. वाक इति. ग. ९. मा सं ३. ५०.

हरासि मे निहारं निहराणि ते स्वाहे[1]ति ॥१९॥ अथ मरुद्भ्यः क्रीडिभ्यः। सप्तकपालं पुरोडाशं निर्वपति मरुतो ह वै क्रीडिनो व्वृत्रꣳ हनिष्यन्तामिन्द्रमागतं तमभितः परिचिक्रीडुर्महयन्तस्तथोऽएवैतं पाप्मानं द्विषन्तं भ्रातृव्यꣳ हनिष्यन्तमभितः परिक्रीडन्ते महयन्तस्तस्मान्मरुद्भ्यः क्रीडिभ्योऽयातो महाहविष एव तद्यथा महाहविषस्तथो तस्य ॥ २० ॥ (१ का. श. १. ५. २: तै. ब्रा. १. ६. ६, ७: मै. सं. १. १०. १, २: १४–१६: काठ. सं. ९. ५: ३६. ८–१०: शां. ब्रा. ५. ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे चतुर्थप्रपाठके चतुर्थं ब्राह्मणम् ॥ (५. ३.)

इति द्वितीयकाण्डे चतुर्थः प्रपाठकस्समाप्तः ॥

(कण्डिकाः ॥११५॥)

२. ५. १.

(महाहविः–साकमेधप्रधानहविः)

महाहविषा ह वै देवा व्वृत्रं जघ्नुः। तेनोऽएव व्यजयन्त येयमेषां व्विजितिस्तां तथोऽएवैष एतेन पाप्मानं द्विषन्तं भ्रातृव्यꣳ हन्ति तथोऽएव व्विजयते तस्माद्वाऽएष एतेन यजते ॥१॥ तस्यावृत्। उप किरन्त्युत्तरवेदिं गृह्णन्ति पृषदाज्यं मन्थन्त्यग्निं नवप्रयाजं भवति नवानुयाजं त्रीणि समिष्टयजूꣳषि भवन्त्यथैतान्येव पञ्च हवाꣳषि भवन्ति ॥२॥ स यदाग्नेयोऽष्टाकपालः पुरोडाशो भवति। अग्निना ह वाऽएनं तेजसाघ्नन्त्स तेजोऽग्निर्नाव्यथत तस्मादाग्नेयो भवति[3] ॥३॥ अथ यत्सौम्यश्चरुर्भवति। सोमेन ह वाऽएनꣳ राज्ञाघ्नन्त्सोमराजान एव तस्मात्सौम्यश्चरुर्भवति ॥४॥ अथ यत्सावित्रः।[4]

१. स्वाहेति. ग. स्वाहेति. घ. २. तस्यावृदिति. घ. वृत्. इति. ग.
३. भवतीति. घ. ४. सावित्र इति. घ. सावित्र. ग.

द्वादशकपालो वाष्टाकपालो वा पुरोडाशो भवति सविता वै देवानां प्रसविता सवितृप्रसूता हैवैनमघ्नंस्तस्मात्सावित्रो भवति ॥५॥ अथ यत्सारस्वतश्चरुर्भवति । वाग्वै सरस्वती वागु हैवानुममाद प्रहर जहीति तस्मात्सारस्वतश्चरुर्भवति ॥६॥ अथ यत्पौष्णश्चरुर्भवति । इयं वै पृथिवी पूषेयꣳहैवैनं वधाय प्रतिप्रददावनया हैवैनं प्रतिप्रत्तं जघ्नुस्तस्मात्पौष्णश्चरुर्भवति ॥७॥ अथैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति । एतेन हैवैनमघ्नंस्तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्र एताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नन् ब्रह्म वाऽअग्निः क्षत्रमिन्द्रस्तेऽउभे सꣳरभ्य ब्रह्म च क्षत्रं च सयुजौ कृत्वा ताभ्यामेनमुभाभ्यां वीर्याभ्यामघ्नंस्तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवति ॥८॥

अथ माहेन्द्रश्चरुर्भवति । इन्द्रो वाऽएष पुरा वृत्रस्य वधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यान एवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रश्चरुर्भवति महान्तमु चैवनमेतत्खलु करोति वृत्रस्य वधाय तस्माद्वेव माहेन्द्रश्चरुर्भवति ॥९॥ अथ वैश्वकर्मण एककपालः पुरोडाशो भवति । विश्वं वाऽएतत्कर्म कृतꣳ सर्वं जितं देवानामासीत्साकमेधैरीजानानां विजिग्यानानां विश्वम्वैवैतस्यैतत्कर्म कृतꣳ सर्वं जितं भवति साकमेधैरीजानस्य विजिग्यानस्य तस्माद्वैश्वकर्मण एककपालः पुरोडाशो भवति ॥१०॥ एतेन वै देवाः । यज्ञेनेष्ट्वा[1] येयं देवानां प्रजातिर्या श्रीरेतद्बभूवुरेताꣳ ह वै प्रजातिं प्रजायतऽएताꣳ श्रियं गच्छति य एवं विद्वानेतेन यज्ञेन यजते तस्माद्वाऽएतेन यजेत ॥११॥ Cf. का. श. १. ५. ३; तै. सं. १. ८. ४. २; मै. सं. १. १०. १६; काठ. ३६. ८; शां. ब्रा. ५. ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
द्वितीयकाण्डे पञ्चमप्रपाठके प्रथमं ब्राह्मणम् ॥
इति द्वितीयकाण्डे पञ्चमोऽध्यायस्समाप्तः ॥

---

१. यज्ञेनेष्ट्वेति. घ. २. प्रजातिरिति. ग. घ. ३. यज्ञेनेति. घ.

२. ५. २.

(महापितृयज्ञः साकमेधान्तर्गतः)

महाहविषां ह वै देवा व्यृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां विजितिस्तामथ यानेवैषां तस्मिन्त्संग्रामेऽघ्नंस्तान् पितृयज्ञेन समैरयन्त पितरो वै तऽआसंस्तस्मात्पितृयज्ञो नाम ॥१॥ तद्वसन्तो ग्रीष्मो वर्षाः । एते ते ये व्यजयन्त शरद्धेमन्तः शिशिरस्तऽउ ते यान् पुनः समैरयन्त ॥२॥ अथ यदेष एतेन यजेत । तन्नाह न्वेवैतस्य तथा कं चन घ्नन्तीति देवाऽअकुर्वन्निति न्वेवैष एतत्करोति यमु चैवैभ्यो देवा भागमकल्पयंस्तमु चैवैभ्य एष एतद्भागं करोति यानु चैव देवाः समैरयन्त तानु चैवैतदवति स्वानु चैवैतत्पितॄंच्छेयाᳬसं लोकमुपोन्नयति यदु चैवास्यात्रात्मनोऽचरणेन हन्यते वा मीयते वा तदु चैवास्यैतेन पुनराप्यायते तस्माद्वाऽएष एतेन यजते ॥३॥ स पितृभ्यः सोमवद्भ्यः । षट्कपालं पुरोडाशं निर्वपति सोमाय वा पितृमते षड्वाऽऋतव ऋतवः पितरस्तस्मात्षट्कपालो भवति ॥४॥ अथ पितृभ्यो बर्हिषद्भ्यः । अन्वाहार्यपचने धानाः कुर्वन्ति ततोऽर्धाः पिᳬषन्त्यर्धा ऽइत्येव धाना अपिष्टा भवन्ति ता धानाः पितृभ्यो बर्हिषद्भ्यः ॥५॥ अथ पितृभ्योऽग्निष्वात्तेभ्यः । निवान्यायै दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति सकृद्धि ह्येव पराञ्चः पितरस्तस्मात्सकृदुपमथितो भवत्येतानि हवीᳬषि भवन्ति ॥६॥ तद्ये सोमेनेजानाः । ते पितरः सोमवन्तोऽथ ये दत्तेन पक्वेन लोकं जयन्ति ते पितरो बर्हिषदोऽथ ये ततो नान्यतरच्चन यानग्निरेव दहन्त्स्वदयति ते पितरोऽग्निष्वात्ता एतऽउ ते ये पितरः ॥७॥ स जघनेन गार्हपत्यम् । प्राचीनावीती भूत्वा दक्षिणासीन

---

१. हविषा इति. ग. २. पुनः समैरयन्तेति. घ.

३. यमु चैवैभ्य इति. घ. ४. यदु इति. घ. ५. वा इति. घ.

६. बर्हिषद्भ्य इति क. ७. ईजाना इति. ग. ईजाना इति. घ, ८. भूत्वेति. घ.

एतꣳषट्कपालं पुरोडाशं गृह्णाति स तत एवोपोत्थायोत्तरेणान्वाहार्यपचनं दक्षिणा तिष्ठन्नवहन्ति सकृत्फलीकरोति सकृद् ह्येव पराञ्चः पितरस्तस्मात्सकृत्फलीकरोति ॥८॥ स दक्षिणैव दृषदुपलेऽउपदधाति। दक्षिणार्धे गार्हपत्यस्य षट् कपालान्युपदधाति तद्यदेतां दक्षिणां दिशꣳ सचन्तऽएषा हि दिक् पितॄणां तस्मादेतां दक्षिणां दिशꣳ सचन्ते ॥९॥ अथ दक्षिणेनान्वाहार्यपचनम्। चतुस्रक्तिं व्वेदिं करोत्यवान्तरदिशोऽनुस्रक्तीः करोति चतस्रो वाऽअवान्तरदिशोऽवान्तरदिशो वै पितरस्तस्मादवान्तरदिशोऽनु स्रक्तीः करोति ॥१०॥ तन्मध्येऽग्निꣳसमादधाति। पुरस्ताद्वै देवाः प्रत्यञ्चो मनुष्यानभ्युपावृत्तास्तस्मात्तेभ्यः प्राङ् तिष्ठञ्जुहोति सर्व्वतः पितरोऽवान्तरदिशो वै पितरः सर्व्वत ऽइव हीमा अवान्तरदिशस्तस्मान्मध्येऽग्निꣳ समादधाति॥११॥ स तत एव प्राक् स्तम्बयजुर्हरति। स्तम्बयजुर्हुत्वाथेन्येवाग्रे परिगृह्णात्यथेत्यथेति पूर्वेण परिग्रहेण परिगृह्य लिखति हरति यद्धार्यं भवति स तथैवोत्तरेण परिग्रहेण परिगृह्णात्युत्तरेण परिग्रहेण परिगृह्य प्रतिमृज्याह 'प्रोक्षणीरासादये'त्यासादयन्ति प्रोक्षणीरिध्मं बर्हिरुपसादयन्ति स्रुचः सम्माष्टुर्ध्वाज्येनोदेति स यज्ञोपवीती भूत्वाज्यानि गृह्णाति ॥१२॥ तदाहुः। द्विरुपभृति गृह्णीयाद्द्वौ ह्यत्रानुयाजौ भवत इति तद्वष्टावेव कृत्वऽउपभृति गृह्णीयान्नेद्यज्ञस्य व्विधाया अयानीति तस्मादष्टावेव कृत्वऽउपभृति गृह्णीयादाज्यानि गृहीत्वा स पुनः प्राचीनावीती भूत्वा ॥१३॥ प्रोक्षणीरध्वर्युरादत्ते। स इध्ममेवाग्रे प्रोक्षत्यथ व्वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्पुरस्ताद्ग्रन्थ्यासादयति तत्प्रोक्ष्योपनिनीय विस्रꣳस्य ग्रन्थिं न प्रस्तरं गृह्णाति सकृद् ह्येव परा-

१. षट्कपालान्युपदधातीति. घ. २. पूर्व्वेणेति. घ.
३. परिगृह्येति. घ. ४. बर्हिरिति. घ
५. व्विधायेति. घ. ६. भूत्वा इति. ग. भूत्वा. इति घ,

ञ्चः पितरस्तस्मान्न प्रस्तरं गृह्णाति ॥१४॥ अथ संनहनमनु व्विस्रꣳस्य । अपसलवि त्रिः परिस्तृणन् पर्येति सोऽपसलवि त्रिः परिस्तीर्य यावत्प्रस्तरभाजनं तावत्परिशिनष्ट्यथ पुनः प्रसलवि त्रिः पर्येति यत्पुनः प्रसलवि त्रिः पर्येति तद्यानेवामुंस्त्रयान् पितॄनन्ववागात्तेभ्य एवैतत्पुनरपोदेतीमꣳ स्वं लोकमभि तस्मात्पुनः प्रसलवि त्रिः पर्येति ॥१५॥ स दक्षिणेव परिधीन् परिदधाति । दक्षिणा प्रस्तरꣳस्तृणाति नान्तर्दधाति व्विधृती सकृद्ध्येव पराञ्चः पितरस्तस्मान्नान्तर्दधाति व्विधृती ॥१६॥ स तत्र जुहूमासादयति । अथ पूर्वामुपभृतमथ ध्रुवामथ पुरोडाशमथ धाना अथ मन्थमासाद्य हवीꣳषि संमृशति ॥१७॥ ते सर्व्वऽएव यज्ञोपवीतिनो भूत्वा । इत्थाद्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीत् ॥१८॥ तेनोपाꣳशु चरन्ति । तिरऽइव वै पितरस्तिरऽइवैतद्यदुपाꣳशु तस्मादुपाꣳशु चरन्ति ॥१९॥ परिवृते चरन्ति । तिरऽइव वै पितरस्तिरऽइवैतद्यत्परिवृतं तस्मात्परिवृते चरन्ति ॥२०॥ अथेध्ममभ्यादधदाह । 'अग्नये समिध्यमानायानुब्रूही'ति स एकामेव होता सामिधेनीं त्रिरन्वाह सकृद्ध्येव पराञ्चः पितरस्तस्मादेकाꣳ होता सामिधेनीं त्रिरन्वाह॥२१॥ सोऽन्वाह । "उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि । उशन्नुशत आवह पितॄन्हविषेऽअत्तव"ऽइत्यथा'ग्निमावह सोममावह पितॄन्सोमवत आवह पितॄन् बर्हिषद आवह पितॄनग्निष्वात्तानावह देवाँ२॥ ऽआज्यपां२॥ ऽआवहाग्निꣳ होत्रायावह स्वं महिमानमावहे'त्यावाह्योपविशति॥२२॥अथाश्राव्य न होतारं प्रवृणीते । पितृयज्ञो वाऽअयं नेद्धोतारं पितृषु दधानीति तस्मान्न होतारं प्रवृणीते 'सीद होत'रित्येवाहोपविशति होता होतृषदनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादाय प्रत्यङ्ङुतिक्रामत्यति-

१. दक्षिणैवेति. घ. २. परिदधातीति. घ. ३. व्विधृति इति. ग. घ.
४. भूत्वेति. ग. घ ५. अग्नीदिति. ग. अग्नीदिति. घ,
६. मा. सं. १९. ७०. ७. देवाँ ३ऽ आज्यापां ३ऽ आवहेति. ग. घ.

क्रम्याश्राव्याह 'समिधो यजे'ति सोऽपवर्हिषश्चतुरः प्रयाजान्यजति प्रजा वै बर्हिर्नेत्प्रजाः पितृषु दधानीति तस्मादपवर्हिषश्चतुरः प्रयाजान्यजत्यथाज्यभागाभ्यां चरन्त्याज्यभागाभ्यां चरित्वा ॥२३॥ ते सर्वऽएव प्राचीनावीतिनो भूत्वा। एतैर्वै हविर्भिः प्रचरिष्यन्त ऽइत्थाद्यजमानश्च ब्रह्मा च पुरस्तात्परीतः पश्चादग्नीत्तदुताश्रावयन्त्या३ँ स्वधेत्यस्तु स्वधेति प्रत्याश्रावणँ स्वधा नम ऽइति व्वषट्कारः ॥२४॥ तदुहोवाचासुरिः । आश्रावयेयुरेव प्रत्याश्रावयेयुर्व्वषट्कुर्युर्नेद्यज्ञस्य व्विधाया अयामेति ॥२५॥ अथाह 'पितृभ्यः सोमवद्भ्योऽनुब्रूही'ति । सोमाय वा पितृमते स द्वे पुरोऽनुवाक्येऽअन्वाहैकया वै देवान् प्रच्यावयन्ति द्वाभ्यां पितृन्त्सकृद् ह्येव पराञ्चः पितरस्तस्माद्द्वे पुरोऽनुवाक्येऽअन्वाह ॥२६॥ स उपस्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत्सकृदवदधात्यथोपरिष्टाद्घिराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीतऽएवोपोत्थायाश्राव्याह 'पितृन्त्सोमवतो यजे'ति व्वषट्कृते जुहोति ॥२७॥ अथाह 'पितृभ्यो बर्हिषद्भ्योऽनुब्रूही'ति । स उपस्तृणीत ऽआज्यमथासां धानानामवद्यति स तेनैव सह मन्थस्य तेन सह पुरोडाशस्य तत्सकृदवदधात्यथोपरिष्टाद्घिराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत ऽएवोपोत्थायाश्राव्याह 'पितृन् बर्हिषदो यजे'ति व्वषट्कृते जुहोति ॥२८॥ अथाह 'पितृभ्योऽग्निष्वात्तेभ्योऽनुब्रूही'ति। स उपस्तृणीतऽआज्यमथास्य मन्थस्यावद्यति स तेनैव सह पुरोडाशस्य तेन सह धनानां तत्सकृदवदधात्यथोपरिष्टाद्घिराज्यस्याभिघारयति प्रत्यनक्त्यवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याह 'पितृनग्निष्वात्तान्यजे'ति व्वषट्कृते जुहोति ॥२९॥ अथाहा'ग्नये कव्यवाहनायानुब्रूही'ति। तत्स्विष्टकृते हव्यवाहनो वै देवानां कव्यवाहनः पितृणां तस्मादाहा'ग्नये कव्यवाहनायानु-

१. समिध इति. घ. २. अयामेति० घ. ३. पुरोडाशस्येति. घ.
४. तेनेति. घ. ५. पितृनग्निष्वात्तान्यजेति, ६. व्वषटकृत इति. घ,

ब्रूही'ति ॥३०॥ स ऽउपस्तृणीतऽआज्यम् । अथास्य पुरोडाशस्यावद्यति स तेनैव सह धानानां तेन सह मन्थस्य तत्सकृदवदधात्यथोपरिष्टाद्द्विराज्यस्याभिघारयति न प्रत्यनक्त्यवदानानि नातिक्रामतीत एवोपोत्थायाश्राव्याहा'ग्निं कव्यवाहनं यजे'ति व्वषट्कृते जुहोति ॥३१॥ स यन्नातिक्रामति । इत ऽएवोपोत्थाय जुहोति सकृद्धि ह्येव पराञ्चः पितरोऽथ यत्सकृत्सकृत्सर्वेषाᳬ हविषाᳬ समवद्यति सकृद्धि ह्येव पराञ्चः पितरोऽथ यद्यतिपङ्क्तमवदानान्यवद्यत्यृतवो वै पितर ऋतूनेवैतद्व्यतिपजत्यृतून्त्संदधाति तस्माद्यतिपङ्क्तमवदानान्यवद्यति ॥३२॥ तद्धैके । एतमेव होत्रे मन्थमादधति तᳬ होतोपहूयावैव जिघ्रति तं ब्रह्मणे प्रयच्छति तं ब्रह्मावैव जिघ्रति तमग्नीध्रे प्रयच्छति तमग्नीद्रवैव जिघ्रत्येतन्त्वेवैतत्कुर्वन्ति यथा त्वेवेतरस्य यज्ञस्येडाप्राशित्रᳬ समवद्यन्त्येवमेवैतस्यापि समवद्येयुस्तामुपहूयावैव जिघ्रन्ति न प्राश्नन्ति प्राशितव्यं त्वेव व्वयं मन्यामहऽइति ह स्माहासुरिर्यस्य कस्य चाग्नौ जुह्वतीति ॥३३॥ अथ यतरो दास्यन् भवति । यद्यध्वर्युर्वा यजमानो वा स उदपात्रमादायापसलवि त्रिः परिषिञ्चन् पर्येति स यजमानस्य पितरमवनेजयत्यसावनेनिक्ष्वेत्यसावनेनिक्ष्वेति पितामहमसावनेनिक्ष्वेति प्रपितामहं तद्यथाशिष्यतेऽभिषिञ्चेदेवं तत् ॥३४॥ अथास्य पुरोडाशस्यावदाय । सव्ये पाणौ कुरुते धानानामवदाय सव्ये पाणौ कुरुते मन्थस्यावदाय सव्ये पाणौ कुरुते ॥३५॥ स येमामवान्तरदिशमनु स्रक्तिः । तस्यां यजमानस्य पित्रे ददात्य 'सावेतत्त'ऽइत्यथ येमामवान्तरदिशमनु स्रक्तिस्तस्यां यजमानस्य पितामहाय ददात्य'सावेतत्त'ऽइत्यथ येमामवान्तरदिशमनु स्रक्तिस्तस्यां यजमानस्य प्रपितामहाय ददात्य'सावेतत्त'ऽइत्यथ येमामवान्तरदिशमनु स्रक्तिस्तस्यां निमृष्टेऽ-

१. सकृत्सर्वेषामिति. ग. २. आसुरिर्यस्येति. ग.
३. जुह्वतीति. क. घ. ४. तत् इति. क. घ. ५. स्रक्तिरिति. ग.
६. त्यथये. इति. घ.

"त्र पितरो मादयध्वं यथाभागमावृषायध्व"मिति यथाभागमश्नीतेत्ये-वैतदाह तद्यदेवं पितृभ्यो ददाति तेनो स्वान् पितॄनेतस्माद्यज्ञान्नान्त-रेति ॥३६॥ ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । उदञ्च उपनिष्क्र-म्याहवनीयमुपतिष्ठन्ते देवान्वाऽएषऽउपावर्त्तते यऽआहिताग्निर्भवति यो दर्शपूर्णमासाभ्यां यजतेऽथैतत्पितृयज्ञेनेवाचारिषुस्तदु देवेभ्यो निह्नवते ॥३७॥ ऐन्द्रीभ्यामाहवनीयमुपतिष्ठन्ते । इन्द्रो ह्याहवनीयो-ऽ"क्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥" "सुसंदृशं त्वा वयं मघवन्व-न्दिधीमहि । प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशां २॥ऽअनु योजा न्विन्द्र ते हरी"ऽ इति ॥३८॥ अथ प्रतिपरेत्य गार्हपत्यमुपतिष्ठन्ते । "मनो न्वाह्वामहे नाराशꣳसेन स्तोमेन । पितॄणां च मन्मभिः ॥ आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे ॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहीं"ति पितृय-ज्ञेनेव वाऽएतदचारिषुस्तदु खलु पुनर्जीवानपिपद्यन्ते तस्मादाह जीवं व्रातꣳ सचेमहीति ॥३९॥ अथ यतरो ददाति । स पुनः प्राचीना-वीती भूत्वाभिप्रपद्य जपत्य "मीमदन्त पितरो यथाभागमावृषायिषते"-तियथाभागमाशिषुरित्येवैतदाह ॥४०॥ अथोदपात्रमादाय । पुनः प्रस-लवि त्रिः परिषिञ्चन् पर्येति स यजमानस्य पितरमवनेजयत्य'सावव-नेनिक्ष्वे'त्यसा'ववनेनिक्ष्वे'ति पितामहमसावनेनिक्ष्वेति प्रपितामहं तद्यथा जक्षुषेऽभिषिञ्चेदेवं तत्तद्यत्पुनः प्रसलवि त्रिः परिषिञ्चन् प-र्येति प्रसलवि न इदं कर्मानुसन्तिष्ठाताऽइति तस्मात्पुनः प्रसलवि त्रिः परिषिञ्चन् पर्येति ॥४१॥ अथ नीविमुद्गृह्य नमस्करोति । पितृ-देवत्या वै नीविस्तस्मान्नीविमुद्गृह्य नमस्करोति यज्ञो वै नमो यज्ञि-

१. भूत्वेति. क. घ. २. मा. सं. ३. ५१. ३. मा. सं. ३. ५२.
४. मा. सं. ३. ५३. ५. मा. सं. ३. ५४. ६. मा. सं. ३. ५५.
७. परिषिञ्चन पर्येतीति. क.

यानेवैनानेतत्करोति षट्कृत्वो नमस्करोति षड्वाऽऋतव ऋतवः पितरस्तदृतुष्वेवैतद्यज्ञं प्रतिष्ठापयति तस्मात्षट्कृत्वो नमस्करोति "गृहान्नः पितरो दत्ते"ति गृहाणाꣳह पितर ईशतऽएषोऽएतस्याशीः कर्मणः ॥४२॥ ते सर्वऽएव यज्ञोपवीतिनो भूत्वा । अनुयाजाभ्यां प्रचरिष्यन्त इत्थाद्यजमानश्च ब्रह्मा च पश्चात्परीतः पुरस्तादग्नीदुपविशति होता होतृषदने ॥४३॥ अथाह "ब्रह्मन् प्रस्थास्यामि । समिधमाधायाग्निमग्नीत्संमृड्ढी"ति स्रुचावादाय प्रत्यङ्ङतिक्रामत्यतिक्रम्याश्राव्याह 'देवान्यजे'ति सोऽपबर्हिषौ द्वावनुयाजौ यजति प्रजा वै बर्हिर्नेत्प्रजाः पितृषु दधानीति तस्मादपबर्हिषौ द्वावनुयाजौ यजति ॥४४॥ अथ सादयित्वा स्रुचौ व्यूहति । स्रुचौ व्यूह्य परिधीन्त्समज्य परिधिमभिपद्याश्राव्याह "षिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाये"ति सूक्तवाकꣳहोता प्रतिपद्यते नाध्वर्युः प्रस्तरꣳ समुल्लुम्पतीत्येवोपास्ते यदा होता सूक्तवाकमाह ॥४५॥ अथाग्नीदाहानुप्रहरेति । स न किं चनानुप्रहरति तूष्णीमेवात्मानमुपस्पृशति ॥४६॥ अथाह "संवदस्वति । अगानग्नीदगंच्छावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शंयोर्ब्रूही"त्युपस्पृशत्येव परिधीन्नानुप्रहरत्यथैतद्बर्हिरनुसमस्यति परिधींश्च ॥४७॥ तद्धैके । हविरुच्छिष्टमनुसमस्यन्ति तदु तथा न कुर्याद्धुतोच्छिष्टं वाऽएतन्नेद्धुतोच्छिष्टमग्नौ जुहवामिति तस्मादपो वैवाभ्यवहरेयुः प्राश्नीयुर्वा ॥४८॥

Cf. का. श. १. ६. १; तै. सं. १. ८. ५; तै. ब्रा. १. ६. ८, ९; मै. सं. १.१०.१७.–१९; काठ. सं. ३६.११–१३; शां. ब्रा. ५. ६.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे पञ्चमप्रपाठके द्वितीयं ब्राह्मणम् ॥ (६. १.)

१. माह इति. क. २. संवदस्वेति. इति. घ.

२. ५. ३.

(त्र्यम्बकहविः–साकमेधशेषः)

महाहविषा ह वै देवा व्वृत्रं जघ्नुः । तेनोऽएव व्यजयन्त येयमेषां व्विजितिस्तामथ यानेवैषां तस्मिन्त्संग्रामऽइषव आर्च्छस्तानेतैरेव शल्पान्निरहरन्त तान् व्यवृहन्त यत्त्र्यम्बकैरयजन्त ॥१॥ अथ यदेष एतैर्यजते । तन्नाह न्वेवैतस्य तथा कं चनेपुर्ऋच्छतीति देवा अकुर्वन्निति त्वेवैष एतत्करोति याश्च त्वेवास्य प्रजा जाता याश्चाजातास्ता उभयी रुद्रियात्प्रमुञ्चति ता अस्यानमीवा अकिल्बिषाः प्रजाः प्रजायन्ते तस्माद्वाऽएष एतैर्यजते॥२॥ ते वै रौद्रा भवन्ति । रुद्रस्य हीषुस्तस्माद्रौद्रा भवन्त्येककपाला भवन्त्येकदेवत्याऽअसन्निति तस्मादेककपाला भवन्ति ॥३॥ ते वै प्रतिपुरुषम् । यावन्तो गृह्याः स्युस्तावन्त एकेनातिरिक्ता भवन्ति तत्प्रतिपुरुषमेवैतदेकैकेन या अस्य प्रजा जातास्ता रुद्रियात्प्रमुञ्चत्येकेनातिरिक्ता भवन्ति तद्या एवास्य प्रजा ऽअजातास्ता रुद्रियात्प्रमुञ्चति तस्मादेकेनातिरिक्ता भवन्ति ॥४॥ स जघनेन गार्हपत्यम् । यज्ञोपवीती भूत्वोदङ्ङासीन एतान् गृह्णाति स तत एवोपोत्थायोदङ्तिष्ठन्नवहन्त्युदीच्यौ हपदुपलेऽउपदधात्युत्तरार्धे गार्हपत्यस्य कपालान्युपदधाति तद्यदेतामुत्तरां दिशꣳसचन्तऽएषा ह्येतस्य देवस्य दिक्तस्मादेतामुत्तरां दिशꣳ सचन्ते ॥५॥ ते वा अक्ताः स्युः। अक्तꣳ हि हविस्तऽउ वाऽअनक्ता एव स्युरभिमानुको ह रुद्रः पशून्त्स्याद्यदञ्ज्यात्तस्मादनक्ता एव स्युः ॥६॥ तान्त्सार्धं पाऽत्र्याꣳ समुद्वास्य । अन्वाहार्यपचनादुल्मुकमादायोदङ् परेत्य जुहोत्येषा ह्येतस्य देवस्य दिक् पथि जुहोति पथा हि स देवश्चरति चतुष्पथे जुहोत्येतद्ध वाऽअस्य जान्धितं प्रज्ञातमवसानं यच्चतुष्पथं तस्माच्चतुष्पथे जुहोति ॥७॥ पलाशस्य पलाशेन मध्यमेन जुहोति । ब्रह्म वै पलाशस्य पलाशं ब्रह्मणैवैतज्जुहोति स सर्व्वेषामेवावद्यत्येकस्यैव

१. न्वेवैष इति.क. २. पुरुषमिति. क. ३. तद्यदेव तामिति ग.

नावद्यति य एषोऽतिरिक्तो भवति ॥८॥ स जुहोति । "एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहे"त्यम्बिका ह वै नामास्य स्वसा तयास्यैष सह भागस्तद्यदस्यैष स्त्रिया सह भागस्तस्मात्त्र्यम्बका नाम तद्या अस्य प्रजा जातास्ता रुद्रियात्प्रमुञ्चति ॥९॥ अथ य एष एकोऽतिरिक्तो भवति । तमाखूत्करऽउपकि"रत्येष ते रुद्र भाग आखुस्ते पशुरि"ति तदस्माऽआखुमेव पशूनामनुदिशति तेनोऽइतरान् पशून्न हिनस्ति तद्यदुपकिरति तिरऽइव वै गर्भस्तिरऽइवैतद्यदुपकीर्णं तस्माद्वाऽउपकिरति तद्या एवास्य प्रजा अजातास्ता रुद्रियात्प्रमुञ्चति ॥१०॥ अथ पुनरत्य जपन्ति । "अवं रुद्रमदीमह्यव देवं त्र्यम्बकम् । यथा नो व्यवसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥ "भेषजमसि भेषजं गवेऽश्वाय पुरुषाय भेषजꣳ सुखं मेषाय मेष्या"ऽइत्याशीरेवैषैतस्य कर्मणः ॥११॥ अथापसलवि त्रिः परियन्ति । सव्यानूरूनुपाघ्नाना "स्त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतादि"त्याशीरेवैषैतस्य कर्मण आशिषमेवैतदाशासते तदु ह्येव शमिव यो मृत्योर्मुच्यते नामृतात्तस्मादाह मृत्योर्मुक्षीय मामृतादिति ॥१२॥ तदु हापि कुमार्यः परीयुः । भगस्य भजामहाऽइति या ह वै सा रुद्रस्य स्वसाम्बिका नाम सा ह वै भगस्येष्टे तस्मादु हापि कुमार्यः परीयुर्भगस्य भजामहाऽइति ॥१३॥ तासामुतासां मन्त्रोऽस्ति । "त्र्यम्बकं यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत" इति सा यदित इत्याह ज्ञातिभ्यस्तदाह मामुत इति पतिभ्यस्तदाह पतयो ह्येव स्त्रियै प्रतिष्ठा तस्मादाह मामुत इति ॥१४॥ अथ पुनः प्रसलवि त्रिः परियन्ति । दक्षिणानूरूनुपाघ्नाना एतेनैव मन्त्रेण तद्यत्पुनः प्रसलवि त्रिः परियन्ति प्रसलवि न इदं कर्मानुसंतिष्ठाताऽइति तस्मा-

---

१, २. मा. सं. ३. ५७. ३. मा. सं. ३. ५८. ४. मा. सं. ३. ५९.
५, ६. मा. सं. ३. ६०. ७. शमीवेति. क. ८. एतेनैवेति. ग.

त्पुनः प्रसलवि त्रिः परियन्ति ॥१५॥ अथैतान्यजमानोऽञ्जलौ समोप्य । ऊर्ध्वानुदस्यति यथा गौर्नोदाप्नुयात्तदात्मभ्य एवैतच्छल्पान्निर्मिमते तान्विलिप्सन्त उपस्पृशन्ति भेषजमेवैतत्कुर्वते तस्माद्विलिप्सन्त उपस्पृशन्ति ॥१६॥ तान्द्वयोर्मूतकयोरुपनह्य । व्वेणुयष्ट्यां वा कुपे वोभयत आबध्योदङ् परेत्य यदि व्वृक्षं वा स्थाणुं वा वेणुं वा व्वल्मीकं वा व्विन्देत्तस्मिन्नासज''न्येतत्ते रुद्रावसं तेन परो मूजवतोऽतीहि''त्यवसेन वाऽअध्वानं यन्ति तदेनꣳ सावसमेवान्ववार्जति यत्र यत्रास्य चरणं तदन्वत्र ह वाऽअस्य परो मूजवद्भ्यश्चरणं तस्मादाह तेन परो मूजवतोऽतीहीत्य''वततधन्वा पिनाकावस'' इत्य''हिꣳसन्नः शिवोऽतीहि''त्येवैतदाह ''कृत्तिवासा'' इति निष्वापयत्येवैनमेतत्स्वपन्नु हि न कं चन हिनस्ति तस्मादाह कृत्तिवासा इति ॥१७॥ अथ दक्षिणान् बाहूनन्वावर्तन्ते । ते प्रतीक्षं पुनरायन्ति पुनरेत्याप उपस्पृशन्ति रुद्रियेणैव वाऽएतदचारिषुः शान्तिरापस्तदद्भिः शान्त्या शमयन्ते ॥१८॥ अथ केशश्मश्रूण्वा । समारोह्याग्नीऽउदवसायैव ह्येतेन यजते न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयात्तस्मादुदवस्यति गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽउत्सन्नयज्ञऽइव वाऽएष यच्चातुर्मास्यान्यथैष क्लृप्तः प्रतिष्ठितो यज्ञो यत्पौर्णमासं तत्क्लृप्तेनैवैतद्यज्ञेनान्ततः प्रतितिष्ठति तस्मादुदवस्यति ॥१९॥ (cf. का. श. १. ६. २: मै. सं. १. १०. २०: काठ. सं. ३६. १४: तै. सं १. ८. ६: तै. ब्रा. १. ६. १०. शां ब्रा. ५. ७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे पञ्चमप्रपाठके तृतीयं ब्राह्मणम् ॥ (६. २)

१. स्थाणुं वेति. ग. घ. २. मा. स. ३. ६१. ३. तेनेति नास्ति. ग.
४, ५. मा. सं. ३.६१. ६. शिवोऽतीहीति. ग. घ ७. एतत्स्वपन्निति. ग.
८. इतीति. ग, इति. घ. ९. उदवसायेवेति. घ.

२. ५. ४.

(शुनासीरीयपर्व)

अक्षय्यꣳ ह वै सुकृतं चातुर्मास्ययाजिनो भवति । संव्वत्सरꣳ हि जयति तेनास्याक्षय्यं भवति तं वै त्रेधा विभज्य यजति त्रेधा विभज्य प्रजयति सर्व्वं वै संव्वत्सरः सर्व्वं वाऽअक्षय्यमेतेनो हास्याक्षय्यꣳ सुकृतं भवत्यृतुरु हैवैतद्भूत्वा देवानप्येत्यक्षय्यमु वै देवानामेतेनो हैवास्याक्षय्यꣳ सुकृतं भवत्येतन्नु तद्यस्माच्चातुर्मास्यैर्यजते ॥१॥ अथ यस्माच्छुनासीरीयेण यजेत । या वै देवानाꣳ श्रीरासीत्साकमेधैरीजानानां व्विजिग्यानानां तच्छुनमथ यः संव्वत्सरस्य प्रजितस्य रस आसीत्तत्सीरꣳ सा या चैव देवानाꣳ श्रीरासीत्साकमेधैरीजानानां व्विजिग्यानानां य उ च संवत्सरस्य प्रजितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन् कुरुते तस्माच्छुनासीरीयेण यजते ॥२॥ तस्यावृत् । नोपकिरन्त्युत्तरवेदिं न गृह्णन्ति पृषदाज्यं न मन्थन्त्यग्निं पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजा एकꣳ समिष्टयजुः ॥३॥ अथैतान्येव पञ्च हवीꣳषि भवन्ति । एतैर्व्वै हविर्भिः प्रजापतिः प्रजा असृजतैतैरुभयतो व्वरुणपाशात्प्रजाः प्रामुञ्चदेतैर्व्वै देवा व्वृत्रमघ्नन्नेतैर्व्वेव व्यजयन्त येयमेषां व्विजितिस्तां तथोऽएवैष एतैर्या चैव देवानाꣳ श्रीरासीत्साकमेधैरीजानानां व्विजिग्यानानां य उ च संवत्सरस्य प्रजितस्य रस आसीत्तमेवैतदुभयं परिगृह्यात्मन् कुरुते तस्माद्वाऽएतानि पञ्च हवीꣳषि भवन्ति ॥४॥ अथ शुनासीर्यो द्वादशकपालः पुरोडाशो भवति । स बन्धुः शुनासीर्यस्य यं पूर्वमवोचामꣳ ॥५॥ अथ व्वायव्यं पयो भवति । पयो ह वै प्रजा जाता अभिसञ्जानते व्विजिग्यानं मा प्रजाः श्रियै यशसेऽन्नाद्याया-

---

१. See. आप. श्रौ. ८. १. १. २. व्विजिग्यानानामिति. ग. घ.
३. रस इति घ. ४. उभयमिति. घ.
५. वृत् इति. ग. तस्यावृत् इति घ.
६. उभयमिति. घ. ७. अवोचाम इति ग. घ.

भिसञ्ज्ञानान्ताऽइति तस्मात्पयो भवति ॥६॥ तद्यद्वायव्यं भवति । अयं वै व्वायुर्योऽयं पवतऽएष वाऽइदꣳ सर्व्वं प्रत्याययति यदिदं किं च व्वर्षति व्वृष्टादोषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा तत एतदद्भ्योऽधि पयः सम्भवत्येष हि वाऽएतज्जनयति तस्माद्वायव्यं भवति ॥७॥ अथ सौर्य एककपालः पुरोडाशो भवति । एष वै सूर्यो य एष तपत्येष वाऽइदꣳ सर्वमभिगोपायति साधुना त्वदसाधुना त्वदेष इदꣳ सर्व्वं व्विदधाति साधौ त्वदसाधौ त्वदेष मा व्विजिग्यानं प्रीतः साधुना त्वदभिगोपायत्साधौ त्वद्विदधदिति तस्मात्सौर्य एककपालः पुरोडाशो भवति ॥८॥ तस्याश्वः श्वेतो दक्षिणा । तदेतस्य रूपं क्रियते य एष तपति यद्यश्वꣳ श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तदेतस्य रूपं क्रियते य एष तपति ॥९॥ स यत्रैव साकमेधैर्यजते । तच्छुनासीर्येण यजेत यद्वै त्रिः संवत्सरस्य यजते तेनैव संवत्सरमाप्नोति तस्माद्यदैव कदा चैतेन यजेत ॥१०॥ तद्धैके । रात्रीरापिपयिषन्ति स यदि रात्रीरापिपयिषेद्यददः पुरस्तात्फाल्गुन्यै पौर्णमास्याऽउद्दृष्टं तच्छुनासीर्येण यजेत ॥११॥ अथ दीक्षते । तं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्ययात्पुनः प्रयोगरूप इव ह स यदेनमनीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्ययात्तस्मादेनं नानीजानं पुनः फाल्गुनी पौर्णमास्यभिपर्ययादिति नूत्सृजमानस्य ॥१२॥ अथ पुनः प्रयुञ्ज्ञानस्य । पूर्व्वेद्युः फाल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेताथ प्रातर्व्वैश्वदेवेनाथ पौर्णमासेनैतदु पुनः प्रयुञ्ज्ञानस्य ॥१३॥ अथातः परिवर्त्तनस्यैव । सर्व्वतोमुखो वाऽअसावादित्य एष वाऽइदꣳ सर्व्वं निर्द्धयति यदिदं किं च शुष्यति तेनैष सर्व्वतोमुखस्तेनान्नादः ॥१४॥ सर्व्वतोमुखोऽयमग्निः । यतो ह्येव कुतश्चाग्नावभ्यादधति तत एव प्रदहति तेनैष सर्वतोमुखस्तेनान्नादः ॥१५॥

१. तत्पुनः प्रयोग इति. घ. २. प्रयुञ्ज्ञानस्येति घ, नस्येति ग.
३. असाविति. ग. घ. ४. अग्निरिति. ग. ५. अन्नाद इति. ग. घ.

अथायमन्यतोमुखः पुरुषः । स एतत्सर्वतोमुखो भवति यत्परिवर्त्तयते स एवमेवान्नादो भवति यथैतावेतद्य एवं विद्वान् परिवर्त्तयते तस्माद्वै परिवर्त्तयेत ॥१६॥ तद्दु होवाचासुरिः । किन्नु तत्र मुखस्य यदपि सर्वाण्येव लोमानि व्यपेत यद्वै त्रिः संवत्सरस्य यजते तेनैव सर्वतोमुखस्तेनान्नादस्तस्मान्नाद्रियेत परिवर्तयितुमिति ॥१७॥ (पं. का. श. १. ६. ३ : तै. सं. १. ८. ७ : तै. ब्रा. १. ७. १: शां. ब्रा. ५. ८.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे पञ्चमप्रपाठके चतुर्थं ब्राह्मणम् ॥ (६. ३.)

२. ५. ५.

तद्यदाहुः । साकमेधैर्वै देवा व्वृत्रमघ्नंस्तैर्व्वेव व्यजयन्त येयमेषां विजितिस्तामिति सर्व्वैर्ह त्वेव देवाश्चातुर्मास्यैर्वृत्रमघ्नन्सर्व्वैर्व्वेव व्यजयन्त येयमेषां विजितिस्ताम ॥१॥ ते होचुः । केन राज्ञा केनानीकेन योत्स्याम इति स हाग्निरुवाच मया राज्ञा मयानीकेनेति तेऽग्निना राज्ञाग्निनानीकेन चतुरो मासः प्राजयंस्तान् ब्रह्मणा च त्रय्या च विद्यया पर्यगृह्णन् ॥२॥ ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स ह व्वरुण उवाच मया राज्ञा मयानीकेनेति ते व्वरुणेनैव राज्ञा व्वरुणेनानीकेनापरांश्चतुरो मासः प्राजयंस्तान् ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥३॥ ते होचुः । केनैव राज्ञा केनानीकेन योत्स्याम इति स हेन्द्र उवाच मया राज्ञा मयानीकेनेति तऽइन्द्रेणैव राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्राजयंस्तान् ब्रह्मणा चैव त्रय्या च विद्यया पर्यगृह्णन् ॥४॥ स यद्वैश्वदेवेन यजते । अग्निनैवैतद्राज्ञाग्निनानीकेन चतुरो मासः प्रजयति तत्त्र्येनी शलली भवति लोहः क्षुरः सा या त्र्येनी शलली सा त्रय्यै विद्यायै रूपं

१. मुखस्येति. ग. घ. २. ताम् इति घ. तामिति. क.
३. मयानीकेनेति. घ. ४. अनीकेनेति. घ.

लोहः क्षुरो ब्रह्मणो रूपमग्निर्हि ब्रह्म लोहितऽइव ह्यग्निस्तस्माल्लोहः क्षुरो भवति तेन परिवर्त्तयते तद्ब्रह्मणा चैवैनमेतत्तृष्या च विद्यया परिगृह्णाति ॥५॥ अथ यद्वरुणप्रघासैर्यजते । व्वरुणेनैवैतद्राज्ञा व्वरुणेनानीकेनापरांश्चतुरो मासः प्रजयति तत्र्येनी शलली भवति लोहः क्षुरस्तेन परिवर्त्तयते तद्ब्रह्मणा चैवैनमेतत्तृष्या च विद्यया परिगृह्णाति ॥६॥ अथ यत्साकमेधैर्यजते । इन्द्रेणैवैतद्राज्ञेन्द्रेणानीकेनापरांश्चतुरो मासः प्रजयति तत्र्येनी शलली भवति लोहः क्षुरस्तेन परिवर्त्तयते तद्ब्रह्मणा चैवैनमेतत्तृष्या च विद्यया परिगृह्णाति ॥७॥ स यद्वैश्वदेवेन यजते । अग्निरेव तर्हि भवत्यग्नेरेव सायुज्यꣳ सलोकतां जयत्यथ यद्वरुणप्रघासैर्यजते व्वरुण एव तर्हि भवति व्वरुणस्यैव सायुज्यꣳ सलोकतां जयत्यथ यत्साकमेधैर्यजतऽइन्द्र एव तर्हि भवतीन्द्रस्यैव सायुज्यꣳ सलोकतां जयति ॥८॥ स यस्मिन्हर्त्तावमुं लोकमेति । स एनमृतुः परस्मा ऽऋतवे प्रयच्छति पर उ परस्माऽऋतवे प्रयच्छति स परममेव स्थानं परमां गतिं गच्छति चातुर्मास्ययाजी तदाहुर्न चातुर्मास्ययाजिनमनुविन्दन्ति परमꣳ ह्येव खलु स स्थानं परमां गतिं गच्छतीति ॥९॥ Cf. का. श. १.६.४.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे द्वितीयकाण्डे पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् ॥

इति द्वितीयकाण्डे पञ्चमः प्रपाठकस्समाप्तः ॥

(षष्ठोऽध्यायश्च समाप्तः)

(कण्डिकासंख्या १०४)

इति एकपान्नाम द्वितीयं काण्डं समाप्तम् ॥

(द्वितीयकाण्डकण्डिकासंख्या ५४९)

१. क्षुरस्तेनेति. घ. २. परिगृह्णाति. इति. ग. घ.

अथ माध्यन्दिनीये शतपथब्राह्मणे

अध्वरं नाम तृतीयं काण्डम् ॥

अग्निष्टोमः ॥ (सोमयागः)

॥ प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥

३. १. १.

(शालानिर्माणादि)

ॐ । देवयजनं जोषयन्ते । स यदेव व्वार्षिष्ठꣳ स्यात्तज्जोषयेरन्यदन्यद्भूमेर्नाभिशयीतातो वै देवा दिवमुपोदक्रामन्देवान्वाऽएषऽउपोत्क्रामति यो दीक्षते स सदेवे देवयजने यजते स यद्धान्यद्भूमेरभिशयीतावरतरऽइव हेष्टवा स्यात्तस्माद्यदेव व्वार्षिष्ठꣳ स्यात्तज्जोषयेरन् ॥१॥ तद्वर्ष्म सत्समꣳ स्यात् । समꣳ सदविभ्रꣳशि स्यादविभ्रꣳशि सत्प्राक्प्रवणꣳ स्यात्प्राची हि देवानां दिगथोऽउदक्प्रवणमुदीची हि मनुष्याणां दिग्दक्षिणतः प्रत्युच्छ्रितमिव स्यादेषा वै दिक् पितॄणाꣳ स यद्दक्षिणाप्रवणꣳ स्यात्क्षिप्रे ह यजमानोऽमुं लोकमियात्तथो ह यजमानो ज्योग्जीवति तस्माद्दक्षिणतः प्रत्युच्छ्रितमिव स्यात् ॥२॥ न पुरस्ताद्देवयजनमात्रमतिरिच्येत । द्विषन्तꣳ हास्य तद्भ्रातृव्यमभ्यतिरिच्यते कामꣳ ह दक्षिणतः स्यादेवमुत्तरतऽएतद्धत्वेव समृद्धं देवयजनं यस्य देवयजनमात्रं पश्चात्परिशिष्यते क्षिप्रे हैवैनमुत्तरा देवयज्योपनमतीति नु देवयजनस्य ॥३॥ तदु होवाच याज्ञवल्क्यः । व्वाष्ण्याय देवयजनं जोषयितुमैम तत्सात्ययज्ञोऽब्रवीत्सर्वा वाऽइयं पृथिवी देवी देवयजनं यत्र वाऽअस्यै क्व च यजुषैव परिगृह्य याजयेदिति ॥४॥ ऋत्विजो हैव देवयजनम् । ये ब्राह्म-

१. अब्रवीदिति. घ. २. याजयेदिति. ग.

णाः शुश्रुवाँसोऽनूचाना विद्वाँसो याजयन्ति सैवाह्वलैतन्नेदिष्ठतमामिव मन्यामहऽइति ॥५॥ तच्छालां वा विमितं वा प्राचीनवँशं मिन्वन्ति । प्राची हि देवानां दिक् पुरस्ताद्वै देवाः प्रत्यञ्चो मनुष्यानुपावृत्तास्तस्मात्तेभ्यः प्राङ्तिष्ठञ्जुहोति ॥६॥ तस्मादु ह न प्रतीचीनशिराः शयीत । नेदेवानभिप्रसार्य शयाऽइति या दक्षिणा दिक् सा पितॄणां या प्रतीची सा सर्पाणां यतो देवाऽउच्चक्रमुः सैषा हीना योदीची दिक् सा मनुष्याणां तस्मान्मानुषऽउदीचीनवँशामेव शालां वा विमितं वा मिन्वन्त्युदीची हि मनुष्याणां दिग्दीक्षितस्यैव प्राचीनवँशा नादीक्षितस्य ॥७॥ तां वाऽएतां परिश्रयन्ति । नेदभिवर्षादिति न्वेव व्वर्षा देवान्वाऽएषऽउपावर्त्तते यो दीक्षते स देवतानामेको भवति तिरऽइव वै देवा मनुष्येभ्यस्तिरऽइवैतद्यत्परिश्रितं तस्मात्परिश्रयन्ति ॥८॥ तन्न सर्वऽइवाभिप्रपद्येत । ब्राह्मणो वैव राजन्यो वा व्वैश्यो वा ते हि यज्ञियाः ॥९॥ स वै न सर्व्वेणेव संवदेत । देवान्वाऽएषऽउपावर्त्तते यो दीक्षते स देवतानामेको भवति न वै देवाः सर्व्वेणेव संवदन्ते ब्राह्मणेन वैव राजन्येन वा व्वैश्येन वा ते हि यज्ञियास्तस्माद्यद्येन शूद्रेण संवादो विन्देदेतेषामेवैकं ब्रूयादिममिति विचक्ष्वेमामिति विचक्ष्वेत्येषऽउ तत्र दीक्षितस्योपचारः ॥१०॥ अथारणीपाणी कृत्वा । शालामध्यवस्यति स पूर्व्वार्ध्यꣳ स्थूणाराजमभिपद्य तद्यजुराह "इमगन्म देवयजनं पृथिव्या यत्र देवासोऽअजुषन्त विश्व" ऽइति तदस्य विश्वैश्च देवैर्जुष्टं भवति ये चेम ब्राह्मणा शुश्रुवाँसोऽनूचाना यदहास्य तेऽक्षिभ्यामीक्षन्ते ब्राह्मणाः शुश्रुवाँसस्तदहास्य तेर्जुष्टं भवति ॥११॥ यदाह । यत्र देवासोऽअजुषन्त विश्वऽइति तद-

१. नेदिष्ठतमामिवेति. ग. २. हि. इति. घ. ३. राजन्येनेति ग.घ.
४. उपचार इति. ग. ५. कृत्वा इति. घ. ६. मां. मं. ४ १.
७. शुश्रुवाँस इति घ. ८. देवासो अजुषन्तेति. क. घ.

स्य विश्वेदेवैर्जुष्टं भवत्यृ"क्सामाभ्याꣳ सन्तरन्तो यजुर्भिरि"त्यृक्सामाभ्यां वै यजुर्भिर्यज्ञस्योदृचं गच्छन्ति यज्ञस्योदृचं गच्छानीत्येवैतदाह "रायस्पोषेण समिषा मदेमे"ति भूमा वै रायस्पोषः श्रीर्वै भूमाशिषमेवैतदाशास्ते समिषा मदेमेतीषं मदन्तीति वै तमाहुर्यः श्रियमश्नुते यः परमतां गच्छति तस्मादाह समिषा मदेमेति ॥१२॥ Cf. का. श. ४. १. १; तै. सं. ६. १. १; मै. सं. ३. ६. १; काठ. सं २२. १३. कपिष्ठ ३५. ६.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
तृतीयकाण्डे प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥ (१. १)

३. १. २.

(यजमानदीक्षा)

अपराह्णे दीक्षित । पुरा केशश्मश्रोर्व्वपनाद्यन्कामयेत तदश्नीयाद्यद्वा सम्पद्येत व्रत"ं ह्येवास्यातोऽशनं भवति यद्यु नाशिशिषेदपि कामं नाश्नीयात् ॥१॥ (शतम् ॥१४००॥) अथोत्तरेण शालां परिश्रयन्ति । तदुदकुम्भमुपनिदधाति तन्नापित ऽउपतिष्ठते तत्केशश्मश्रु च व्यपते नखानि च निकृन्ततेऽस्ति वै पुरुषस्यामेध्यं यत्रास्यापो नोपतिष्ठन्ते केशश्मश्रौ च वाऽअस्य नखेषु चापो नोपतिष्ठन्ते तद्यत्केशश्मश्रु च व्यपते नखानि च निकृन्तते मेध्यो भूत्वा दीक्षाऽइति ॥२॥ तद्धैके । सर्वऽएव व्यपन्ते सर्वऽएव मेध्या भूत्वा दीक्षिष्यामहऽइति तदु तथा न कुर्याद्यद्वै केशश्मश्रु च व्यपते नखानि च निकृन्तते तदेव मेध्यो भवति तस्मादु केशश्मश्रु चैव व्यपते नखानि च निकृन्तेत ॥३॥ स वै नखान्येवाग्रे निकृन्तते । दक्षिणस्यैवाग्रे सव्यस्य वाऽअग्रे मानुषेऽथैवं देवत्राङ्गुष्ठयोरेवाग्रे कनिष्ठिकयोर्वा अग्रे मानुषेऽथैवं देवत्रा ॥४॥ स दक्षिणमेवाग्रे गोदानं वितारयति । सव्यं

१. मा. सं ४. १. २. आदितः कण्डिकानां संख्येयम् ।
३. निकृन्तेत इति. ग. ४. देवत्रा इति. ग. ५. व्वितारयतीति. घ.

वाऽअग्रे मानुषऽथैवं देवत्रा ॥५॥ स दक्षिणमेवाग्रे गोदानमभ्युनत्ति । "इमाऽआपः शमु मे सन्तु देवी"रिति स यदाहेमाऽआपः शमु मे सन्तु देवीरिति व्वज्रो वाऽआपो व्वज्रो हि वाऽआपस्तस्माद्येनैता यन्ति निम्नं कुर्वन्ति यत्रोपतिष्ठन्ते निर्दहन्ति तत्तदेतमेवैतद्वज्रꣳ शमयति तथो हैनमेष व्वज्रः शान्तो न हिनस्ति तस्मादाहेमाऽआपः शमु मे सन्तु देवीरिति ॥६॥ अथ दर्भतरुणकमन्तर्दधाति । "ओषधे त्रायस्वे"ति व्वज्रो वै क्षुरस्तथो हैनमेष व्वज्रः क्षुरो न हिनस्त्यथ क्षुरेणाभिनिदधाति "स्वधिते मैनꣳहिꣳसीरि"ति व्वज्रो वै क्षुरस्तथो हैनमेष व्वज्रः क्षुरो न हिनस्ति ॥७॥ प्रच्छिद्योदपात्रे प्रास्यति । तूष्णीमेवोत्तरं गोदानमभ्युनत्ति तूष्णीं दर्भतरुणकमन्तर्दधाति तूष्णीं क्षुरेणाभिनिधाय प्रच्छिद्योदपात्रे प्रास्यति ॥८॥ अथ नापिताय क्षुरं प्रयच्छति । स केशश्मश्रु व्वपति स यदा केशश्मश्रु व्वपति ॥९॥ अथ स्नाति । अमेध्यो वै पुरुषो यदनृतं व्वदति तेन पूतिरन्तरतो मेध्या वाऽआपो मेध्यो भूत्वा दीक्षाऽइति पवित्रं वाऽआपः पवित्रपूता दीक्षाऽइति तस्माद्वै स्नाति ॥१०॥ स स्नाति । "आपोऽअस्मान्मातरः शुन्धयन्त्वि"त्येतद्ध्याह शुन्धयन्त्विति "घृतेन नो घृतप्वः पुनन्त्वि"ति तद्वै सुपूतं यं घृतेनापुनंस्तस्मादाह घृतेन नो घृतप्वः पुनन्त्विति "विश्वꣳ हि रिप्रं प्रवहन्ति देवी"रिति यद्वै विश्वꣳसर्वं तद्यदमेध्यꣳ रिप्रं तत्सर्वꣳ ह्यस्मादमेध्यं प्रवहन्ति तस्मादाह विश्वꣳहि रिप्रं प्रवहन्ति देवीरिति ॥११॥ अथ प्राङ्विवादङ्डुत्क्रामति । "उदिदाभ्यः शुचिरा पूतऽएमी"त्युद्धयाभ्यः शुचिः पूतऽएति ॥१२॥ अथ व्वासः परिधत्ते । सर्वत्वायैव स्वामेवा-

१. देवत्रा इति. ग. २. मा.सं. ४. १. ३. एतमेवैतदिति. घ.
४. देवीरीति इति. घ, देवीरिति. ग. ५. ६. मा. सं ४. १.
७. अन्तर्दधातीति. ग. ८. क्षुरेणेति, घ. ९. १०. ग. मा. सं ४ २.
११. तद्वै सुपूतमिति.क. १२. घृतेन पुनंस्तस्मादिति.ग. १३. मा. सं ४. २.
१४. रिप्रमिति क. घ. १५. देवीरिति.ग.देवीरिति.घ. १६. मा. सं. ४. २.

स्मिन्नेतत्त्वचं दधाति या ह वाऽइयं गोस्त्वक्पुरुषे हैषाग्रऽआस ॥१३॥ ते देवाऽअब्रुवन् । गौर्वाऽइदꣳ सर्वं बिभर्ति हन्त येयं पुरुषे त्वग्गव्येतां[1] दधाम तयैषा व्वर्षन्तं तया हिमं तया घर्मं तितिक्षध्यतऽ इति[2] ॥१४॥ तेऽवच्छाय पुरुषम् । गव्येतां त्वचमदधुस्तयैषा व्वर्षन्तं तया हिमं तया घर्मं तितिक्षते[3] ॥१५॥ अवच्छिन्नो हि वै पुरुषः । तस्मादस्य यत्रैव क्व च कुशो वा यद्वा व्विकृन्तति ततऽएव लोहितमुत्पतति तस्मिन्नेतां त्वचमदधुर्वासऽएव तस्मान्नान्यः पुरुषाद्वासो बिभर्त्येतांꣳह्यस्मिंस्त्वचमदधुस्तस्मादु सुवासाऽएव बुभूषेत्स्वया त्वचा समृध्याऽइति तस्मादप्यश्लीलꣳ सुवाससं दिदृक्षन्ते स्वया हि त्वचा समृद्धो भवति[4] ॥१६॥ नो ह्यन्ते गोर्नग्नः स्यात् । व्वेद ह गौरहमस्य त्वचं बिभर्मीति सा बिभ्यती त्रसति त्वचं मऽआदास्यतऽ इति तस्मादु गावः सुवाससमुपैव निश्रयन्ते ॥१७॥ तस्य वाऽएतस्य व्वाससः । अग्नेः पर्यासो भवति व्वायोरनुच्छादो नीविः पितॄणाꣳ सर्पाणां प्रघातो व्विश्वेषां देवानां तन्तवऽआरोका नक्षत्राणामेवꣳ हि वाऽएतत्सर्व्वे देवाऽअन्वायत्तास्तस्माद्दीक्षितवसनं भवति ॥१८॥ तद्वाऽअहतꣳ स्यात् । अयातयामतायै तद्वै निष्पेष्टवै ब्रूयाद्यदेवास्यात्रामेध्या कृणत्ति वा व्वयति वा तदस्य मेध्यमसदिति यद्युऽअहतꣳ स्यादद्भिरभ्युक्षेन्मेध्यमसदित्यथो यदिदꣳ स्नातवस्यं निहितमपल्पूलनकृतं भवति तेनो ह्यापि दीक्षेत ॥१९॥ तत्परिधत्ते । "दीक्षातपसोस्तनूरसी"त्यदीक्षितस्य वाऽअस्यैषाग्रे तनूर्भवत्यथात्र दीक्षातपसोस्तस्मादाह दीक्षातपसोस्तनूरसीति "तां त्वा शिवाꣳ शग्मां परिदध"ऽइति तां त्वा शिवाꣳ साध्वीं परिदधऽइत्येवैतदाह "भद्रं व्वर्णं पुष्य"न्निति पापं वाऽएषोऽग्रे व्वर्णं पुष्यति यममुमदीक्षितोऽथात्र भद्रं तस्मादाह भद्रं वर्णं पुष्यन्निति[11] ॥२०॥ अथैनꣳ

१. त्वग्गव्येतामिति. घ. २. इति ग. ३. तितिक्षते इति. ग.
४. भवति इति ग. ५. वा इति. ग ६. स्यादिति. घ.
७. निहतमिति. घ. ८-१०. मां. सं. ४.२. ११ पुष्यन्नितीति. ग.

शालां प्रपादयति। स धेन्वै चानडुहश्च नाश्नीयाद्धेन्वनडुहौ वाऽइदꣳ सर्व्वं बिभृतस्ते देवाऽअब्रुन् बन्धेन्वनडुहौ वाऽइदꣳ सर्वं बिभृतो हन्त यदन्येषां व्वयसां व्वीर्यं तद्धेन्वनडुहयोर्दधामेति स यदन्येषां व्वयसां व्वीर्यमासीत्तद्धेन्वनडुहयोरदधुस्तस्माद्धेनुश्चैवानड्वांश्च भूयिष्ठं भुङ्क्तस्तद्धैतत्सर्वाश्यमिव यो धेन्वनडुहयोरश्नीयादन्तगतिरिव तꣳ हाद्भुतमभिजनितोर्जायायै गर्भं निरवधीदिति पापमकदिति पापी कीर्तिस्तस्माद्धेन्वनडुहयोर्नाश्नीयात्तदु होवाच याज्ञवल्क्योऽश्नाम्येवाहमꣳसलं चेद्भवतीति ॥२१॥ Cf. का. श. ४. १. २: तै. सं. ६. १. १: मै. सं. ३. ६. २: काठ. २२. १३ and २३. १. कपिष्ठ. सं. ३५. ७. कौषी. ब्रा. or शां. ब्रा. ७. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे प्रथमप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. १. २.)

३. १. ३.

आग्नावैष्णवे (दक्षिणीये) ष्टिः।

अपः प्रणीय। आग्नावैष्णवमेकादशपकालं पुरोडाशं निर्वपत्यग्निर्वै सर्व्वा देवताऽअग्नौ हि सर्व्वाभ्यो देवताभ्यो जुह्वत्यग्निर्वै यज्ञस्यावराध्यो व्विष्णुः पराध्यस्तत्सर्वाश्चैवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षाऽइति तस्मादाग्नावैष्णव ऽएकादशकपालः पुरोडाशो भवति ॥१॥ तद्धैके। आदित्येभ्यश्चरुं निर्वपन्ति तदस्ति पर्युदितमिवा"ष्टौ पुत्रासोऽअदितेर्ये जातास्तन्वस्परि। देवां२॥ऽउप प्रैत्सप्तभिः परा मार्ताण्डमास्यदि"ति ॥२॥ अष्टौ ह वै पुत्रा ऽअदितेः। यांस्त्वेतद्देवा ऽआदित्या इत्याचक्षते सप्त हैव तेऽविकृतꣳ हाष्टमं जनयां चकार मार्ताण्डꣳ सन्देघो हैवास यावानेवोर्ध्वस्तावांस्तिर्यङ् पुरुषसंमित ऽइत्यु हैक ऽआहुः ॥३॥ तऽउ हैतऽऊचुः। देवा

१. धेन्वै इति. घ. २. गर्भमिति. ग. ३. अनडुहयोर्नेति. ग. घ.
४. निर्वपतीति. घ. ५ ऋ. सं. ८. ३. ७. ६. हैक आहुरिति. क.

आदित्या यदस्मानन्वजनिमा तदमुयेव भूद्धन्तेमं व्विकरवामेति तं व्विचक्रुर्यथायं पुरुषो व्विकृतस्तस्य यानि माᳬसानि संकृत्य संन्यासुस्ततो हस्ती समभवत्तस्मादाहुर्न हस्तिनं प्रतिगृह्णीयात्पुरुषाजानो हि हस्तीति यमु ह तद्विचक्रुः स व्विवस्वानादित्यस्तस्येमाः प्रजाः ॥४॥ स होवाच । राध्नवान्मे स प्रजायां य ऽएतमादित्येभ्यश्चरुं निर्वपादिति राध्नोति हैव य ऽएतमादित्येभ्यश्चरुं निर्वपत्ययं त्वेवाग्नावैष्णवः प्रज्ञातः ॥५॥ तस्य सप्तदश सामिधेन्यो भवन्ति । उपाᳬशु देवते यजति पञ्च प्रयाजा भवन्ति त्रयोऽनुयाजाः संयाजयन्ति पत्नीः सर्वत्वायैव समिष्टयजुरेव न जुहोति नेदिदं दीक्षितवसनं परिधाय पुरा यज्ञस्य सᳬस्थाया ऽअन्तं गच्छानीत्यन्तो हि यज्ञस्य समिष्टयजुः ॥६॥ अथाग्रेण शालां तिष्ठन्नभ्यङ्क्ते । अरुर्वै पुरुषोऽवच्छिन्नोऽनरुरेवैतद्भवति यदभ्यङ्क्ते गवि वै पुरुषस्य त्वग्गोर्वाऽएतन्नवनीतं भवति स्वयैवैनमेतत्त्वचा समर्धयति तस्माद्वाऽअभ्यङ्क्ते ॥७॥ तद्वै नवनीतं भवति । घृतं वै देवानां फाण्टं मनुष्याणामथैतन्नाहैव घृतं नो फाण्टᳬ स्यादेव घृतᳬ स्यात्फाण्टमयातयामतायै तदेनमयातयामैवायातयामानं करोति ॥८॥ तमभ्यनक्ति । शीर्षतोऽग्रऽआ पादाभ्यामनुलोमं "महीनां पयोऽसी"ति मह्य ऽइति ह वाऽएतासामेकं नाम यद्वां तासां वाऽएतत्पयो भवति तस्मादाह महीनां पयोऽसीति "व्वर्चोदा असि व्वर्चो मे देही"ति नात्र तिरोहितमिवास्ति ॥९॥ अथाक्ष्यावानक्ति । अरुर्वै पुरुषस्याक्षि प्रशान्ममेति ह स्माह याज्ञवल्क्यो दुरक्षऽइव हास पयो हैवास्य दृषीका तेऽएवैतदनरुष्करोति यदक्ष्यावानक्ति ॥१०॥ यत्र वै देवाः । असुररक्षसानि जघ्नुस्तच्छुष्णो दानवः प्रत्यङ् पतित्वा मनुष्याणामक्षीणि प्रविवेश सऽएष कनीनकः कुमारकऽइव परिभासते तस्माऽएवैतद्यज्ञमुपप्रयन्त्सर्वतोऽश्मपुरां परि-

१. प्रजा इति. क.　　२. यजुरिति. क. घ.　　३. यदभ्यङ्क्ते इति. ग.
४, ५. मा. सं. ४. ३.　　६. यदक्ष्याविति. ग.　　७. शुष्ण इति. ग.

दधात्यश्मा ह्याञ्जनम् ॥११॥ त्रैककुदं भवति । यत्र वाऽइन्द्रो व्वृत्रमहंस्तस्य यदश्यासीत्तं गिरिं त्रिककुदमकरोत्तद्यत्त्रैककुदं भवति चक्षुष्येवैतच्चक्षुर्दधाति तस्मात्त्रैककुदं भवति यदि त्रैककुदं न विन्देदप्यत्रैककुदमेव स्यात्समानी ह्येवाञ्जनस्य बन्धुता ॥१२॥ शरेषीकयानक्ति । व्वज्रो वै शरो व्विरक्षस्तायै सतूला भवत्यमूलं वाऽइदमुभयतः परिच्छिन्नꣳ रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूलऽउभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तद्यत्सतूला भवति व्विरक्षस्तायै ॥१३॥ स दक्षिणमेवाग्रऽआनक्ति । सव्यं वाऽअग्रे मानुषेऽथैव देवत्रा[1] ॥१४॥ स ऽआनक्ति । "वृत्रस्यासि कनीनक" ऽइति व्वृत्रस्य ह्येष कनीनक[2]श्चक्षुर्दा ऽअसि चक्षुर्मे देही"ति नात्र तिरोहितमिवास्ति ॥१५॥ स दक्षिणꣳ सकृद्यजुषानक्ति । सकृत्तृष्णीमथोत्तरꣳ सकृद्यजुषानक्ति द्विस्तृष्णीं तदुत्तरमेवैतदुत्तरावत्करोति ॥१६॥ तद्यत्पञ्चकृत्व ऽआनक्ति । सम्वत्सरसम्मितो वै यज्ञः पञ्च वाऽऋतवः सम्वत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्चकृत्व ऽआनक्ति ॥१७॥ अथैनं दर्भपवित्रेण पावयति । अमेध्यो वै पुरुषो यदनृतं व्वदति तेन पूतिरन्तरतो मेध्या वै दर्भा मेध्यो भूत्वा दीक्षाऽइति पवित्रं वै दर्भाः पवित्रपूतो दीक्षा इति तस्मादेनं दर्भपवित्रेण पावयति ॥१८॥ तद्धाऽएकꣳस्यात् । एको ह्येवायं पवते तदेतस्यैव रूपेण तस्मादेकꣳ स्यात् ॥१९॥ अथोऽअपि त्रीणि स्युः । एको ह्येवायं पवते सोऽयं पुरुषेऽन्तः प्रविष्टस्त्रेधा विहितः प्राणऽउदानो व्यानऽइति तदेतस्यैवानु मात्रां तस्मात्त्रीणि स्युः ॥२०॥ अथोऽअपि सप्त स्युः । सप्त वाऽइमे शीर्षन् प्राणास्तस्मात्सप्त स्युस्त्रिःसप्तान्येव स्युरेकविꣳशतिरेवैव सम्पत्[5] ॥२१॥ तꣳ सप्तभिः[6] सप्तभिः पावयति । "चित्पतिर्मा पुनात्वि"ति प्रजापतिर्वै चित्पतिः प्रजापतिर्मा

१. देवत्रा इति. क. ख. २, ३. मा. सं. ४. ३. ४. पवित्र इति. ग.
५. सम्पदिति. ग. ६. सप्तभिरिति. घ. ७. मा. सं. ४. ४.

पुनात्वित्येवैतदाह "वाक्पतिर्मा पुना"त्विति प्रजापतिर्वै वाक्पतिः प्रजापतिर्मा पुनात्वित्येवैतदाह "देवो मा सविता पुना"त्विति तद्वै सुपूतं यं देवः सवितापुनात्तस्मादाह देवो मा सविता पुनात्वित्य-"च्छिद्रेण पवित्रेण"ति यो वाऽअयं पवतऽएषोऽच्छिद्रं पवित्रमेतेनैत-दाह "सूर्यस्य रश्मिभि"रित्येते वै पवितारो यत्सूर्यस्य रश्मयस्तस्मा-दाह सूर्यस्य रश्मिभिरिति ॥२२॥ "तस्य ते पवित्रपत"ऽइति । पवि-त्रपतिर्हि भवति पवित्रपूतस्येति पवित्रपूतो हि भवति "यत्कामः पुने तच्छकेय"मिति यज्ञस्योदृचं गच्छानीत्येवैतदाह ॥२३॥ अथा-शिषामारम्भं वाचयति । "आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवासऽआशिषो यज्ञियासो हवामहे"ऽइति तदस्मै स्वाः सतीर्ऋत्विज आशिषऽआशासते ॥२४॥ अथाङ्गुलीर्न्यञ्चति । "स्वा-हा यज्ञं मनस"ऽइति द्वे "स्वाहोरोरन्तरिक्षा"दिति द्वे "स्वाहा द्यावापृथिवीभ्या"मिति द्वे "स्वाहा वातादारभ"ऽइति मुष्टीकरोति न वै यज्ञः प्रत्यक्षमिवारभे यथायं दण्डो वा वासो वा परोक्षं वै देवाः परोक्षं यज्ञः ॥२५॥ स यदाह । स्वाहा यज्ञं मनसऽइति तन्मनसऽआरभते स्वाहोरोरन्तरिक्षादिति तदन्तरिक्षादारभते स्वाहा द्यावापृथिवीभ्यामिति तदाभ्यां द्यावापृथिवीभ्यामारभते ययोरिदꣳ सर्वमधि स्वाहा वातादारभऽइति वातो वै यज्ञस्तद्यज्ञं प्रत्यक्षमा-रभते ॥२६॥ अथ यत्स्वाहा स्वाहेति करोति । यज्ञो वै स्वाहाकारो यज्ञमेवैतदात्मन्धत्तेऽत्रोऽएव वाचं यच्छति वाग्वै यज्ञो यज्ञमेवैत दात्मन्धत्ते ॥२७॥ अथैनꣳशालां प्रपादयति । स जघनेनाहवनीय-मेत्यग्रेण गार्हपत्यꣳ सोऽस्य सञ्चरो भवत्या सुत्यायै तद्यदस्यैष सञ्चरो भवत्या सुत्यायाऽअग्निर्वै योनिर्यज्ञस्य गर्भो दीक्षितोऽन्तरेण वै योनिं गर्भः सञ्चरति स यत्स तत्रैजति त्वत्परि त्वेदावर्तते तस्मा-

१–५. मा. सं. ४. ४. ६. मा. सं. ४. ५. ७. अध्वरे इति ग.

८. मा. सं. ४. ६. ९. यज्ञ इति. ग. १०. त्वदावर्तत इति ग.

दिमे गर्भाऽएजन्ति त्वत्परि त्वदावर्तन्ते तस्मादस्यैष सञ्चरो भवत्या सुत्यायै ॥२८॥ Cf. का. श ४. १. ३: तै. सं. ६. १. १: मै. सं. ३. ६. ३: काठ. सं. २३. १: कपि. सं. ३५. ७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे प्रथमप्रपाठके तृतीयं ब्राह्मणम् ॥

३. १. ४.

सर्वाणि ह वै दीक्षाया यजूꣳष्युद्ग्रभणानि । उद्गृभ्णीते वाऽएषोऽस्माल्लोकाद्देवलोकमभि यो दीक्षतऽएतैरेव तद्यजुर्भिरुद्गृभ्णीते तस्मादाहुः सर्वाणि दीक्षाया यजूꣳष्युद्ग्रभणानीति ततऽएतान्यवान्तरामाचक्षतऽऔद्ग्रभणानीत्याहुतयो ह्येता आहुतिर्हि यज्ञः परोक्षं वै यजुर्जपन्त्यथैष प्रत्यक्षं यज्ञो यदाहुतिस्तदेतेन यज्ञेनोद्गृभ्णीतेऽस्माल्लोकाद्देवलोकमभि ॥१॥ ततो यानि त्रीणि स्रुवेण जुहोति । तान्याधीतयजूꣳषीत्याचक्षते सम्पदऽएव कामाय चतुर्थꣳ हूयतेऽथ यत्पञ्चमꣳ स्रुचा जुहोति तदेव प्रत्यक्षमौद्ग्रभणमनुष्टुभा हि तज्जुहोति त्वाग्ध्यनुष्टुप् त्वाग्घि यज्ञः ॥२॥

(अर्द्धप्रपाठकः ६२)

यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥३॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन् यथायं यज्ञः सम्भृतऽएवं वाऽएष यज्ञꣳ सम्भरति यदेतानि जुहोति ॥४॥ तानि वै पञ्च जुहोति । संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति

१. मभि इति. ग. २. यज्ञ. इति ग. ३. यदेनेनेति. घ.
४. यथायमिति. घ. ५. तं इति. ग.

तस्मात्पश्च जुहोति ॥ ॥ अथातो होमस्यैव । "आकूत्यै प्रयुजेऽग्नये स्वाहे"त्या वाऽअग्रे कुर्वते यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन् कुरुते ॥५॥ "मेधायै मनसेऽग्नये स्वाहे"ति । मेधया वै मनसाभिगच्छति यजेयेति तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन कुरुते ॥७॥ "दीक्षायै तपसेऽग्नये स्वाहे"ति । अन्वेवैतदुच्यते नेत्तु हूयते ॥८॥ "सरस्वत्यै पूष्णेऽग्नये स्वाहे"ति । वाग्वै सरस्वती वाग्यज्ञः पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः पशवः पशवो हि यज्ञस्तद्यदेवात्र यज्ञस्य तदेवैतत्सम्भृत्यात्मन कुरुते ॥९॥ तदाहुः । अनद्धेवैताऽआहुतयो हूयन्तेऽप्रतिष्ठिताऽअदेवकास्तत्र नेन्द्रो न सोमो नाग्निरिति ॥१०॥ आकूत्यै प्रयुजेऽग्नये स्वाहेति । नातऽएकं चनाग्निर्वाऽअद्धेवाग्निः प्रतिष्ठितः स यदग्नौ जुहोति तेनैवैता अद्धेव तेन प्रतिष्ठितास्तस्मादु सर्वास्वेवाग्नये स्वाहेति जुहोति ततऽएतान्याधीतयजूꣳषीत्याचक्षते ॥११॥ आकूत्यै प्रयुजेऽग्नये स्वाहेति । आत्मना वाऽअग्रऽआकुर्वते यजेयेति तमात्मनऽएव प्रयुङ्क्ते यत्तनुते तेऽअस्यैतेऽआत्मन्देवतेऽआधीते भवतऽआकूतिश्च प्रयुक्च ॥१२॥ मेधायै मनसेऽग्नये स्वाहेति । मेधया वै मनसाभिगच्छति यजेयेति तेऽअस्यैतेऽआत्मन्देवतेऽआधीते भवतो मेधा च मनश्च ॥१३॥ सरस्वत्यै पूष्णेऽग्नये स्वाहेति । वाग्वै सरस्वती वाग्यज्ञः सास्यैषात्मन्देवताधीता भवति वाक्पशवो वै पूषा पुष्टिर्वै पूषा पुष्टिः पशवः पशवो हि यज्ञस्तेऽस्यैतऽआत्मन् पशव आधीता भवन्ति तद्यदस्यैताऽआत्मन्देवता आधीता भवन्ति तस्मादाधीतयजूꣳषि नाम ॥१४॥ अथ चतुर्थीं जुहोति । "आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी

१. होमस्यैवेति. ग. २–४. मा. सं. ४. ७. ५. स्वाहेति. ग.
६. अन्वेवैतदिति क. घ. ७. मा. सं. ४. ७. ८. अनद्धेवेति. घ.
९. नाग्निरिति. क. घ. १०. नामेति क. घ. ११. मा. सं. ४. ७.

ऽउरोऽअन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहे''त्येषा ह नेदीयो यज्ञस्यापाᳬं हि कीर्तयत्यापो हि यज्ञो द्यावापृथिवीऽउरोऽअन्तरिक्षेति लोकानाᳬं हि कीर्त्तयति बृहस्पतये हविषा विधेम स्वाहेति ब्रह्म वै बृहस्पतिर्ब्रह्म यज्ञऽएतेनो हैषा नेदीयो यज्ञस्य ॥१५॥ अथ यां पञ्चमीᳬं स्रुचा जुहोति । सा हैव प्रत्यक्षं यज्ञोऽनुष्टुभा हि तां जुहोति वाग्घ्यनुष्टुब्वाग्घि यज्ञः ॥१६॥ अथ यद्ध्रुवायामाज्यं परिशिष्टं भवति । तज्जुह्वामानयति त्रिः स्रुवेणाज्यविलापन्याऽअधि जुह्वां गृह्णाति यत्तृतीयं गृह्णाति तत्स्रुवमभिपूरयति ॥१७॥ स जुहोति । ''विश्वो देवस्य नेतुर्मर्त्तो वुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहे''ति ॥१८॥ सैषा देवताभिः पङ्क्तिर्भवति । विश्वो देवस्येति वैश्वदेवं नेतुरिति सावित्रं मर्त्तो वुरीतेति मैत्रं द्युम्नं वृणीतेति बार्हस्पत्यं द्युम्नᳬं हि बृहस्पतिः पुष्यसऽइति पौष्णᳬं ॥१९॥ सैषा देवताभिः पङ्क्तिर्भवति । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्यैतमेवैतयाप्नोति यद्देवताभिः पङ्क्तिर्भवति ॥२०॥ तां वाऽअनुष्टुभा जुहोति । वाग्वाऽअनुष्टुब्वाग्यज्ञस्तद्यज्ञं प्रत्यक्षमाप्नोति ॥२१॥ तदाहुः एतामेवैकां जुहुयाद्यस्मै कामायेतरा हूयन्तऽएतयैव तं काममाप्नोतीति तां वै यद्येकां जुहुयान्पूर्णां जुहुयात्सर्वं वै पूर्णᳬं सर्वमेवैनयैतदाप्नोत्यथ यत्स्रुवमभिपूरयति स्रुचं तदभिपूरयति तां पूर्णां जुहोत्यन्वेवैतदुच्यते सर्वास्त्वेव हूयन्ते ॥२२॥ तां वाऽअनुष्टुभा जुहोति । सैषानुष्टुप्सत्येकत्रिᳬंशदक्षरा भवति दश पाण्या अङ्गुलयो दश पाद्या दश प्राणाऽआत्मे-

१. यजस्येति क. घ. २. अनुष्टुभा हि तामिति. घ.
३. यजः इति. क. घ. यज्ञ इति. ग. ४. जुह्वामिति. घ. ५. मा. सं. ४. ८.
६. सख्यमिति. क. घ. ७. इषुध्यतीति. ग. घ. ८. द्युम्नमिति. घ.
९. पौष्णᳬं इति. घ, पौष्णᳬं इति. ग. १०. वाग्यज्ञ इति. घ.
११. यत्स्रुवमिति. घ. १२. जुहोतिरिति क. ग. १३. प्राणा इति. घ.

कत्रिꣳशो यस्मिन्नेते प्राणाः प्रतिष्ठिताऽएतावान्वै पुरुषः पुरुषो यज्ञः पुरुषसम्मितो यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैनयैतदाप्नोति यदनुष्टुभकत्रिꣳशदक्षरया जुहोति ॥२३॥ (पं. का. श. ४. १. ४: तै. सं. ६. १. २: मै सं. ३. ६. ४. ५: काठ. सं. २३. २. कपि. ३५. ८.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
तृतीयकाण्डे प्रथमप्रपाठके चतुर्थं ब्राह्मणम् ॥

(तृतीयकाण्डे प्रथमोऽध्यायस्समाप्तः)

३. १. ५.

दक्षिणेनाहवनीयं प्राचीनग्रीवे कृष्णाजिनेऽउपस्तृणाति । तयोरेनमधि दीक्षयति यदि द्वे भवतस्तदनयोर्लोकयो रूपं तदेनमनयोर्लोकयोरधि दीक्षयति ॥१॥ सम्बद्धान्ते भवतः । सम्बद्धान्ताविव हीमौ लोकौ तद्यसमुते पश्चाद्भवतस्तदिमावेव लोकौ मिथुनीकृत्य तयोरेनमधि दीक्षयति ॥२॥ यद्युऽएकं भवति । तदेषां लोकानाꣳ रूपं तदेनमेषु लोकेष्वधि दीक्षयति यानि शुक्लानि तानि दिवो रूपं यानि कृष्णानि तान्यस्यै यदि वेतरथा यान्येव कृष्णानि तानि दिवो रूपं यानि शुक्लानि तान्यस्यै यान्येव बभ्रूणीव हरीणि तान्यन्तरिक्षस्य रूपं तदेनमेषु लोकेष्वधि दीक्षयति ॥३॥ अन्तकमु तर्हि पश्चात्प्रत्यस्येत् । तदिमानेव लोकान्मिथुनीकृत्य तेष्वेनमधि दीक्षयति ॥४॥ अथ जघनेन कृष्णाजिने पश्चात् । प्राङ् जान्वाक्तऽउपविशति स यत्र शुक्लानां च कृष्णानां च सन्धिर्भवति तदेवमभिमृश्य जप"त्यृक्सामयोः शिल्पे स्थ"ऽइति यद्वै प्रतिरूपं तच्छिल्पमृचां च साम्नां च प्रतिरूपे स्थऽइत्येवैतदाह ॥५॥ "ते वामारभ"ऽइति । गर्भो वाऽएष भवति यो दीक्षते स छन्दाꣳसि प्रविशति

१. भवतीति. ग. २, ३. मा. सं. ४. ९.

तस्मान्न्यक्नाङ्गुलिरिव भवति न्यक्नाङ्गुलयऽइव हि गर्भाः ॥६॥ स यदाह । ते वामारभऽइति ते वां प्रविशामीत्येवैतदाह "ते मां पातमास्य यज्ञस्योदृचं"ऽइति ते मा गोपायतमास्य यज्ञस्य सꣳस्थाया इत्येवैतदाह ॥७॥ अथ दक्षिणेन जानुनारोहति । "शर्मासि शर्म मे यच्छे"ति चर्म वाऽएतत्कृष्णस्य तदस्य तन्मानुषꣳ शर्म देवत्रा तस्मादाह शर्मासि शर्म मे यच्छेति "नमस्तेऽअस्तु मा मा हिꣳसी"रिति श्रेयाꣳसं वाऽएषऽउपाधिरोहति यो यज्ञं यज्ञो हि कृष्णाजिनं तस्माऽएवैतद्यज्ञाय निह्नुते तथो हैनमेष यज्ञो न हिनस्ति तस्मादाह नमस्तेऽअस्तु मा मा हिꣳसीरिति ॥८॥ स वै जघनार्धऽइवैवाग्रऽआसीत । अथ यदग्रऽएव मध्यऽउपविशेद्यऽएनं तत्रानुव्याहरेद्दृप्स्यति वा प्र वा पतिष्यतीति तथा हैव स्यात्तस्माज्जघनार्धऽइवैवाग्रऽआसीत ॥९॥ अथ मेखलां परिहरते । अङ्गिरसो ह वै दीक्षितानवल्यमविन्दन्ते नान्यद्धृतादशनमवाकल्पयस्तेऽएतामूर्जमपश्यन्त्समाप्तिं तां मध्यतऽआत्मनऽऊर्जमदधत समाप्तिं तया समाप्नुवंस्तथोऽएवैषऽएतां मध्यतऽआत्मनऽऊर्जं धत्ते समाप्तिं तया समाप्नोति ॥१०॥ सा वै शाणी भवति । मृद्वयसादिति न्वेव शाणी यत्र वै प्रजापतिरजायत गर्भो भूत्वैतस्माद्यज्ञात्तस्य यन्नेदिष्ठमुल्बमासीत्तेशणास्तस्मात्ते पूतयो व्वान्ति यद्वस्य जरायुवासीत्तद्दीक्षितवसनमन्तरं वाऽउल्बं जरायुणो भवति तस्मादेषान्तरा व्वाससो भवति स यथैवातः प्रजापतिरजायत गर्भो भूत्वैतस्माद्यज्ञादेवमेवैषोतो जायते गर्भो भूत्वैतस्माद्यज्ञात् ॥११॥ सा वै त्रिवृद्भवति । त्रिवृद्वयन्नं पशवो ह्यन्नं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रिवृद्भवति ॥१२॥ मुञ्जव-

१. ३, ४. मा. सं. ८. ९. २. दक्षिणेनेति. घ.

३. यदग्र इति क. घ. ६. अनुव्याहरेदिति. ग. घ.

५. मेखलामिति घ. ८. भूत्वैतस्मादिति. घ.

ल्शेनान्वस्ता भवति । व्वज्रो वै शरो व्विरक्षस्तायै स्तुकासर्गꣳ सृष्टा भवति सा यन्प्रसलवि सृष्टा स्याद्यथेदमन्या रज्जवो मानुषी स्याद्यद्वपसलवि सृष्टा स्यात्पितृदेवत्या स्यात्तस्मात्स्तुकासर्गꣳ सृष्टा भवति ॥१३॥ तां परिहरते । "ऊर्गस्याङ्गिरसी"त्यङ्गिरसो ह्येतामूर्जमपश्य"न्नूर्णम्रदाऽऊर्जं मयि धेही"ति नात्र तिरोहितमिवास्ति ॥१४॥ अथ नीविमुद्गृह्णते । "सोमस्य नीविरसी"त्यदीक्षितस्य वाऽअस्यैषापात्रे नीविर्भवत्यथात्र दीक्षितस्य सोमस्य तस्मादाह सोमस्य नीविरसीति ॥१५॥ अथ प्रोर्णुते । गर्भो वाऽएष भवति यो दीक्षते प्रावृता वै गर्भाऽउल्बेनेव जरायुणेव तस्माद्वै प्रोर्णुते ॥१६॥ स प्रोर्णुते । "व्विष्णोः शर्मासि शर्म यजमानस्ये"त्युभयं वाऽएषोऽत्र भवति यो दीक्षते व्विष्णुश्च यजमानश्च यदह दीक्षते तद्विष्णुर्भवति यद्यजते तद्यजमानस्तस्मादाह व्विष्णोः शर्मासि शर्म यजमानस्येति ॥१७॥ अथ कृष्णाविषाणाꣳ सिन्नि वध्नीते । देवाश्च वाऽअसुराश्चोभये प्राजापत्याः प्रजापतेः पितुर्दायमुपेयुर्मनऽएव देवाऽउपायन्वाचमसुरा यज्ञमेव तद्देवाऽउपायन्वाचमसुराऽअमुमेव देवाऽउपायन्निमामसुराः ॥१८॥ ते देवा यज्ञमब्रुवन् । योषा वाऽइयं वागुपमन्त्रयस्व ह्वयिष्यते वै त्वेति स्वयं वा हैवैक्षत योषा वाऽइयं वागुपमन्त्रये ह्वयिष्यते वै मेति तामुपामन्त्रयत सा हास्माऽआरकादिवैवाग्रऽआसूयत्तस्मादु स्त्री पुꣳसोपमन्त्रितारकादिवैवाग्रेऽसूयति स होवाचारकादिव वै मऽआसूयीदिति ॥१९॥ ते होचुः । उपैव भगवो मन्त्रयस्व ह्वयिष्यते वै त्वेति तामुपामन्त्रयत सा हास्मै निपलाशमिवोवाद तस्मादु स्त्री पुꣳसोपमन्त्रिता निपलाशमिवैव व्वदति स होवाच निपलाशमिव वै मेऽवादीदिति ॥२०॥ ते होचुः । उपैव भगवो मन्त्रयस्व ह्वयिष्यते वै त्वेति तामुपामन्त्रयत सा हैनं जुहुवे तस्मादु

१-३, ५. मा. सं. ४. १० ४. रसीति. घ. ६. यजमानस्येति. घ.
७. देवा उपायन्निति घ. ८. सा इति घ. ९. ते होचुरिति. ग.

स्त्री पुमाꣳसꣳ ह्वयतऽएवोत्तमꣳ स होवाचाह्वत वै मेति ॥२१॥ ते देवाऽईक्षांचक्रिरे । योषा वाऽइयं वाग्यदेनं न युवितेहैव मा तिष्ठन्तमभ्येहीति ब्रूहि तां तु नऽआगतां प्रतिप्रब्रूतादिति सा हैनं तदेव तिष्ठन्तमभ्येयाय तस्मादु स्त्री पुमाꣳसꣳ सꣳस्कृते तिष्ठन्तमभ्यैति ताꣳ हैभ्यऽआगतां प्रति प्रोवाचेयं वाऽआगादिति ॥२२॥ तां देवाः । असुरेभ्योऽन्तरायंस्ताꣳस्वीकृत्याग्नावेव परिगृह्य सर्वहुतमजुहवुराहुतिर्हि देवानाꣳ स यामेवामुमनुष्टुभा जुहवुस्तदेवैनां तद्देवाः स्व्यकुर्वत तेऽसुराऽआत्तवचसो हेऽलवो हेऽलवऽइति व्वदन्तः पराबभूवुः ॥२३॥ तत्रैतामपि वाचमूदुः । उपजिज्ञास्याꣳ स म्लेच्छस्तस्मान्न ब्राह्मणो म्लेच्छेदसुर्या हैषा व्वागेवमेवैष द्विषताꣳ सपत्नानामादत्ते व्वाचं तेऽस्यात्तवचसः पराभवन्ति यऽएवमेतद्वेद ॥२४॥ सोऽयं यज्ञो व्वाचमभिदध्यौ । मिथुन्येनया स्यामिति ताꣳ सम्बभूव ॥२५॥ इन्द्रो ह वाऽईक्षाञ्चक्रे । महद्वाऽइतोऽभ्वं जनिष्यते यज्ञस्य च मिथुनाद्वाचश्च यन्मा तन्नाभिभवेदिति सऽइन्द्रऽएव गर्भो भूत्वैतन्मिथुनं प्रविवेश ॥२६॥ स ह सम्वत्सरे जायमानऽईक्षांचक्रे । महावीर्या वाऽइयं योनिर्या मामदीधरत यद्वै मेतो महदेवाभ्वं नानुप्रजायेत यन्मा तन्नाभिभवेदिति ॥२७॥ तां प्रतिपरामृश्यावेष्ट्याच्छिनत् । तां यज्ञस्य शीर्षन् प्रत्यदधाद्यज्ञो हि कृष्णः स यः स यज्ञस्तत्कृष्णाजिनं यो सा योनिः सा कृष्णविषाणाथ यदेनामिन्द्रऽआवेष्ट्याच्छिनत्तस्मादावेष्टितेव स यथैवातऽइन्द्रोऽजायत गर्भो भूत्वैतस्मान्मिथुनादेवमेवैषोऽतो जायते गर्भो भूत्वैतस्मान्मिथुनात् ॥२८॥ तां वाऽउत्तानामिव बध्नाति । उत्तानेव वै योनिर्गर्भं बिभर्त्यथ दक्षिणां भ्रुवमुपर्युपरि ललाटमुपस्पृशती "न्द्रस्य योनिरसी" तीन्द्रस्य

१. ह्वयंत इति. ग. २. मेति. इति. ग. ३. देवा इति. ग.
४. आहुतिर्हि इति. घ. ५. तदेवेनामिति घ. ६. स. इति. घ.
७. वेद इति. ग. ८. ईक्षाञ्चक्र इति. घ. ९. इतोऽभ्वं इति घ.
१०. मिथुनादिति. क. घ. ११. उपर्युपरीति. घ. १२. मा. सं. ४. १०

ह्येषा योनिरतो वा ह्येनां प्रविशन् प्रविशत्यतो वा जायमानो जायते तस्मादाहेन्द्रस्य योनिरसीति ॥२९॥ (शतम् १५००) अथोल्लिखति । "सुसस्याः कृषीस्कृधी"ति यज्ञमेवैतज्जनयति यदा वै सुषमं भवत्यथालं यज्ञाय भवति यदो दुःषमं भवति न तर्ह्यात्मने च नालं भवति तद्यज्ञमेवैतज्जनयति ॥३०॥ अथ न दीक्षितः । काष्ठेन वा नखेन वा कण्डूयेत गर्भो वाऽएष भवति यो दीक्षते यो वै गर्भस्य काष्ठेन वा नखेन वा कण्डूयेदपास्यन्म्रियेत्ततो दीक्षितः पामनो भवितोर्दीक्षितं वाऽअनु रेताꣳसि ततो रेताꣳसि पामनानि जनितोः स्वा वै योनी रेतो न हिनस्त्येषा वाऽएतस्य स्वा योनिर्भवति यत्कृष्णविषाणा तथो हैनमेषा न हिनस्ति तस्माद्दीक्षितः कृष्णविषाणयैव कण्डूयेत नान्येन कृष्णविषाणायाः ॥३१॥ अथास्मै दण्डं प्रयच्छति । व्वज्रो वै दण्डो व्विरक्षस्तायै ॥३२॥ औदुम्बरो भवति । अन्नं वाऽऊर्गुदुम्बरऽऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरो भवति ॥३३॥ मुखसम्मितो भवति । एतावद्वै व्वीर्यꣳ स यावदेव व्वीर्यं तावांस्तद्भवति यन्मुखसम्मितः ॥३४॥ तमुच्छ्रयति । "उच्छ्रयस्व व्वनस्पतऽऊर्ध्वो मा पाह्यꣳहस आस्य यज्ञस्योट्टच"ऽइत्यूर्ध्वो मा गोपायास्य यज्ञस्य सꣳस्थायाऽइत्येवैतदाह ॥३५॥ अत्र हैके । अङ्गुलीश्च न्यञ्चन्ति व्वाचं च यच्छन्त्यतो हि किं च न जपिष्यन् भवतीति व्वदन्तस्तदु तथा न कुर्याद्यथा पराञ्चं धावन्तमनुलिप्सेत तं नानुलभेतैवꣳ ह स यज्ञं नानुलभते तस्मादमुत्रैवाङ्गुलीर्न्यञ्चेदमुत्र व्वाचं यच्छेत् ॥३६॥ अथ यद्दीक्षितः । ऋचं वा यजुर्वा साम वाभिव्याहरत्यभिस्थिरमभिस्थि-

१. विशति. इति घ. २. असीति. ग. ३. आदितः कण्डिकानां संख्येयम्
४. मा. सं. ४. १०. ५. रेताꣳसीति. घ. ६. रेतो इति. घ.
७. भवति. इति. घ. ८. मा. सं. ४. १०.
९. तैत्तिरीयशाखायां मैत्रायणीयशाखायां चात्रैव मुष्टीकरणवाङ्नियमने विहिते । See. तै. सं. ६. १. ४. ३. and मै. . ४. ६. ८. १०. दीक्षितः इति. घ.

रमेवैतद्यज्ञमारभते तस्मादमुत्रैवाङ्गुलीर्न्यचेदमुत्र व्वाचं यच्छेत् ॥३७॥ अथ यद्वाचं यच्छति । व्वाग्वै यज्ञो यज्ञमेवैतदात्मन्धत्तेऽथ यद्वाचं-यमो व्याहरति तस्मादु हैष व्विसृष्टो यज्ञः पराङावर्तते तत्रो व्वैष्णवीमृचं वा यजुर्वा जपेद्यज्ञो वै व्विष्णुस्तद्यज्ञं पुनरारभते तस्यो हैषा प्रायश्चित्तिः ॥३८॥ अथैकऽउद्वदति । दीक्षितोऽयं ब्राह्मणो दीक्षितोऽयं ब्राह्मणऽइति निवेदितमेवैनमेतत्सन्तं देवेभ्यो निवेदयत्ययं महावीर्यो यो यज्ञं प्रापदित्ययं युष्माकैकोऽभूत्तं गोपायतेत्येवैतदाह त्रिष्कृत्वऽआह त्रिवृद्धि यज्ञः ॥३९॥ अथ यद्ब्राह्मणऽइत्याह । अनद्धेव वाऽअस्यातः पुरा जानं भवतीदꣳ ह्याहू रक्षाꣳसि योषितमनुसचन्ते तदुत रक्षाꣳस्येव रेतऽआदधतीत्यथात्राद्धा जायते यो ब्रह्मणो यो यज्ञाज्जायते तस्मादपि राजन्यं वा व्वैश्यं वा ब्राह्मणऽइत्येव ब्रूयाद्ब्राह्मणो हि जायते यो यज्ञाज्जायते तस्मादाहुर्न सवनकृतꣳ हन्यादेनस्वी हैव सवनकृतेति ॥४०॥ Cf. का. श. ४. २. १: तै. सं. ६. १. ३: मै. सं. ३. ६. ६–८; का. सं. २३. २–६: कपि. सं. ३६. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे प्रथमप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. २. १.)

प्रथमप्रपाठकः समाप्तः ॥

कण्डिकासंख्या ॥ १२४ ॥

३. २. १.

व्वाचं यच्छति । स व्वाचंयमऽआस्त आस्तमयात्तद्यद्वाचं यच्छति ॥१॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्येषामियं जितिस्तेहोचुः कथं न इदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं

१. आरभत इति. घ. २. व्वाग्वै इति. घ. ३. धत्ते इति. घ.
४. युष्माकैक इति. घ. ५. आह इति. ग. ६. ब्याहुरिति. घ.

धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरो भवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥२॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृतऽएवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते वाग्वै यज्ञः ॥३॥ तामस्तमिते वाचं विसृजते । संवत्सरो वै प्रजापतिः प्रजापतिर्यज्ञोऽहोरात्रे वै संवत्सरऽएते ह्येनं परिप्लवमाने कुरुतः सोऽहन्नदीक्षिष्ट स रात्रिं प्रापत्स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतदाप्त्वा वाचं विसृजते ॥४॥ तद्धैके । नक्षत्रं दृष्ट्वा वाचं विसर्जयन्त्यत्रानुष्ठ्यास्तमितो भवतीति वदन्तस्तदु तथा न कुर्यात्क ते स्युर्यन्मेघः स्यात्तस्माद्यत्रैवानुष्ठ्यास्तमितं मन्येत तदेव वाचं विसर्जयेत् ॥५॥ अनेनो हैके वाचं विसर्जयन्ति । 'भूर्भुवः स्वरि'ति यज्ञमाप्याययामो यज्ञꣳ संदध्मऽइति वदन्तस्तदु तथा न कुर्यान्न ह स यज्ञमाप्याययति न सन्दधाति यऽएतेन वाचं विसर्जयति ॥६॥ अनेनैव वाचं विसर्जयेत् । "व्रतं कृणुताग्निर्ब्रह्माग्निर्यज्ञो वनस्पतिर्यज्ञिय"ऽइत्येष ह्यस्यात्र यज्ञो भवत्येतद्धविर्यथा पुराग्निहोत्रं तद्यज्ञेनैवैतद्यज्ञꣳ सम्भृत्य यज्ञे यज्ञं प्रतिष्ठापयति यज्ञेन यज्ञꣳ सन्तनोति सन्ततꣳ ह्येवास्यैतद्व्रतं भवत्या सुत्यायै त्रिष्कृत्वऽआह त्रिवृद्धि यज्ञः ॥७॥ अथाग्निमभ्यावृत्य वाचं विसृजते । न ह स यज्ञमाप्याययति न सन्दधाति योऽतोऽन्येन वाचं विसृजते स प्रथमं व्याहरन्सत्यं वाचोऽभिव्याहरति ॥८॥ अग्निर्ब्रह्मेति । अग्निर्ह्येव ब्रह्माग्निर्यज्ञऽइत्यग्निर्ह्येव यज्ञो वनस्पतिर्यज्ञियऽइति वनस्पतयो हि यज्ञिया न हि मनुष्या यजेरन्यद्वनस्पतयो न स्युस्तस्मादाह वनस्पतिर्यज्ञियऽइति ॥९॥ अथास्मै व्रतꣳ श्रपयन्ति । देवान्वाऽ-

१. अयं इति. घ. २. यज्ञः इति. क. घ.

३. अत्र "न पुरा नक्षत्रेभ्यो वाचं विसृजेत्....उदितेषु नक्षत्रेषु व्रतं कृणुतेति वाचं विसृजति" इति तैत्तिरीयसंहितास्थो (तै. सं. ६. १. ३. ४.) भागोऽनुसन्धानयोग्यः । ४. मा. सं. ४. ११.

एष॒ऽउपा॒वर्तते यो दी॒क्षते स॒ देवा॒नामे॒को भवति शृतं वै॒ देवा॒नाᳬं हविर्ना॒शृतं त॒स्माच्छृपयन्ति त॒देष॒ऽएव॒ व्रतयति॒ नाग्नौ॑ जुहोति तद्य॒देष॒ऽएव॒ व्रत॒यति॒ नाग्नौ॑ जुहोति ॥१०॥ यज्ञेन॒ वै॒ देवाः॒ । इमां जि॒तिं जिग्यु॒र्येषामियं जि॒तिस्ते॒ होचुः॒ कथं॒ न इदं॒ मनु॒ष्यै॒रनभ्यारोह्य॒ᳬ स्यादि॒ति ते॒ यज्ञ॒स्य र॒सं धीत्वा य॒था म॒धु मधुकृतो निर्ध॒यये॒युर्विदु॒ह्य यज्ञं यू॒पेन योपयित्वा ति॒रो भवन्न॒थ य॒देने॒नायोपयंस्त॒स्माद्यू॒पो ना॒म ॥११॥ तद्वा ऽऋ॒षीणाम॒नुश्रुतमास । ते॒ यज्ञᳬं स॒मभरन्य॒थायं॒ यज्ञः स॒म्भृत॒ऽएष वा॒ऽअ॒त्र यज्ञो॒ भवति यो॒ दी॒क्षत॒ऽएष॒ ह्येनं तनुत॒ऽएष॒ऽएनं जन॒यति तद्य॒देवा॒त्र यज्ञ॒स्य नि॒र्धीतं यद्वि॒दुग्धं त॒देवैतत्पुन॒राप्याययति य॒देष॒ऽएव॒ व्रत॒यति॒ नाग्नौ॑ जुहोति न हा॒प्याययेद्य॒दग्नौ॑ जुहुयाज्जुहुद॒ हैव म॒न्येत ना॒जुहुत् ॥१२॥ इमे वै॒ प्रा॒णाः । म॒नोजाता मनोयु॒जो॒ द॒क्षक्रतवो व्वा॒गेवाग्निः प्राणोदानौ॑ मित्रावरुणौ॑ च॒क्षुरादित्यः श्रोत्रं वि॒श्वे देवा॒ऽएता॒सु हैवास्यैत॒द्देव॒तासु हुतं॒ भवति ॥१३॥ तद्धै॒के । प्रथमे॒ व्रत॒ऽउभौ॒ व्रीहियवावा॒वपन्त्युभा॒भ्याᳬं र॒साभ्यां य॒देवा॒त्र यज्ञ॒स्य नि॒र्धीतं यद्वि॒दुग्धं तत्पुन॒राप्याययामऽइति व्व॒दन्तो॒ य॒द्यु व॒तदु॒घा न॒ दुहीत य॒स्यैवा॒तः काम॒येत त॒स्य व्रतं॒ कुर्यादेत॒दु ह्येवास्यैता॒ऽउभौ॒ व्रीहियवा॒वन्वा॒रब्धौ॑ भवत॒ऽइति॒ त॒दु त॒था न॒ कुर्यान्न ह स॒ यज्ञमा॒प्याययति न सं॒दधाति य॒ऽ उभौ॒ व्रीहियवा॒वाव॒पति त॒स्मादन्यतर॒मेवा॒वपेद्धविर्वा॒ऽअस्यैता॒ऽउभौ॒ व्रीहियवौ॒ भवतः स य॒देवास्यैतौ॒ हविर्भ॒वतस्त॒देवास्यैता॒वन्वा॒रब्धौ॑ भवतो॒ य॒द्यु व्रतदु॒घा न॒ दुहीत य॒स्यैवा॒तः काम॒येत त॒स्य व्रतं॒ कुर्यात् ॥१४॥ तद्धै॒के । प्रथमे॒ व्रते॒ सर्वौ॑षध॒ᳬ सर्वसुरभ्या॒वपन्ति य॒दि दीक्षितमा॒र्तिर्विन्देद्ये॒नैवा॒तः काम॒येत ते॒न भिषज्येद्य॒था व्रते॒न भिषज्येदि॒ति त॒दु त॒था न॒ कुर्यान्मानुष॒ᳬ ह ते॒ यज्ञे॒ कुर्वन्ति॒ व्यृद्धं वै त॒द्यज्ञ॒स्य य॒न्मानुषं ने॒द्व्यृद्धं

---

१. २. नाग्नौ इति. ग. ३. जुहोतीति. घ. ४. प्राणा इति. क. घ.
५. मनोजाता इति ग. ६. एता इति. घ. ७. व्रते इति. घ.

यज्ञे करवाणीति यदि दीक्षितमार्तिर्विन्देद्येनैवातः कामयेत तेन भिषज्येत्समाभिर्ह्येव पुण्या ॥१५॥ अथास्मै व्रतं प्रयच्छति । अतिनीय मानुषं कालꣳ सायंदुग्धमपररात्रे प्रातर्दुग्धमपराह्णे व्याकृत्याऽएव दैव चैवैतन्मानुषं च व्याकरोति ॥१६॥ अथास्मै व्रतं प्रदास्यन्नपऽउपस्पर्शयति । "दैवीं धियं मनामहे सुमृडीकामभिष्टये । ववर्चोधां यज्ञवाहसꣳ सुतीर्था नोऽअसद्वश"ऽइति मानुषाय वाऽएष पुराशनायावनेनिक्तेऽथात्र दैव्ये धिये तस्मादाह दैवीं धियं मनामहे सुमृडीकामभिष्टये ववर्चोधां यज्ञवाहसꣳसुतीर्था नोऽअसद्वशऽइति स यावत्कियच्च व्रतं व्रतयिष्यन्नपऽउपस्पृशेदेतेनैवोपस्पृशेत् ॥१७॥ अथ व्रतं व्रतयति । "ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहे"ति तद्यथा ववषट्कृतꣳ हुतमेवमस्यैतद्भवति ॥१८॥ अथ व्रतं व्रतयित्वा नाभिमुपस्पृशते । "श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ताऽअस्मभ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृध"ऽइति देवान्वाऽएषऽउपावर्तते यो दीक्षते स देवतानामेको भवत्यनुत्सिक्तं वै देवानांꣳ हविरथैतद्व्रतप्रदो मिथ्या करोति व्रतमुपोत्सिञ्चन्व्रतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ताऽअस्मभ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृधऽइति स यावत्कियच्च व्रतं व्रतयित्वा नाभिमुपस्पृशेदेतेनैवोपस्पृशेत्कस्तद्वेद यद्व्रतप्रदो व्रतमुपोत्सिञ्चेत् ॥१९॥ अथ यत्र मेक्ष्यन् भवति । तत्कृष्णविषाणया लोष्टं वा किञ्चिद्वोपहन्ती "यं ते यज्ञिया तनू"रितीयं वै पृथिवी देवी देवयजनी

१. पुण्या इति. क. घ. २. प्रदास्यन्निति. घ. ३, ४. मा. सं. ४. ११.
५. हुतमिति. क. ६. मा. सं. ४. १२. ७. इति. ग.
८. देवान्वा इति. ग. ९. सिञ्चेत् इति. क. घ. १०. मा. सं. ४. १३.

सा दीक्षितेन नाभिमिह्या तस्याऽएतदुद्गृह्यैव यज्ञियां तनूमथायज्ञियꣳ शरीरमभिमेह "त्यपो मुञ्चामि न प्रजा" मित्युभयं वाऽअतऽएत्यापश्च रेतश्च सऽएतदपऽएव मुञ्चति न प्रजा "मꣳहोमुचः स्वाहाकृता" ऽइत्यꣳहसऽइव ह्येता मुञ्चन्ति यदुदरे गुप्तिं भवति तस्मादाहाꣳहोमुचऽइति "स्वाहाकृताः पृथिवीमाविशते" त्याहुतयो भूत्वा शान्ताः पृथिवीमाविशतेत्येवैतदाह ॥२०॥ अथ पुनर्लोष्टं न्यस्यति । "पृथिव्या सम्भवे" तीयं वै पृथिवी देवी देवयजनी सा दीक्षितेन नाभिमिह्या तस्याऽएतदुद्गृह्यैव यज्ञियां तनूमथायज्ञियꣳ शरीरमभ्यमिक्षत्तामेवास्यामेतत्पुनर्यज्ञियां तनूं दधाति तस्मादाह पृथिव्या सम्भवेति ॥२१॥ अथाग्नये परिदाय स्वपिति । देवान्वाऽएषऽउपावर्तते यो दीक्षते स देवतानामेको भवति न वै देवाः स्वपन्त्यनवरुद्धो वाऽएतस्यास्वप्नो भवत्यग्निर्वै देवानां वृतपतिस्तस्माऽएवैतत्परिदाय स्वपित्य "ग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमही" त्यग्ने त्वं जागृहि वयꣳ स्वप्स्यामऽइत्येवैतदाह "रक्षाणोऽअप्रयुच्छ" न्निति गोपाय नोऽप्रमत्तऽइत्येवैतदाह "प्रबुध्ये नः पुनस्कृधी" ति यथेतः सुप्त्वा स्वस्ति प्रबुध्यामहाऽएवं नः कुर्वित्येवैतदाह ॥२२॥ अथ यत्र सुप्त्वा पुनर्नावद्रास्यन् भवति । तद्वाचयति "पुनर्मनः पुनरायुर्मऽआगन् पुनः प्राणः पुनरात्मा मऽआगन् पुनश्चक्षुः पुनः श्रोत्रं मऽआग" न्निति सर्वे ह वाऽएते स्वपतोऽपक्रामन्ति प्राणऽएव न तैरेवैतत्सुप्त्वा पुनः सङ्गच्छते तस्मादाह पुनर्मनः पुनरायुर्मऽआगन् पुनः प्राणः पुनरात्मा मऽआगन् पुनश्चक्षुः पुनः श्रोत्रं मऽआगन् । "वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्नः पातु दुरितादवद्यादि" ति तद्य-

१-३. मां सं. ४. १३. ४. आहुतयः इति. घ. ५. शान्ता इति. घ.
६. मा. सं. ४. १३. ७. सम्भवेतीयमिति.घ. ८. सम्भवेति इति. घ.
९. अग्निर्वै इति. घ. १०-१२. मा. सं. ४. १४. १३. आह इति. क.घ.
१४, १५. मां. सं. ४. १५.

देवात्र स्वप्नेन वा येन वा मिथ्याकर्म तस्मान्नः सर्वस्मादग्निर्गोपायत्वित्येवैतदाह तस्मादाह व्वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्नः पातु दुरितादवद्यादिति[1] ॥२३॥ अथ यद्दीक्षितः । अव्रत्यं वा व्याहरति क्रुध्यति वा तन्मिथ्याकरोति व्रतं प्रमीणात्यक्रोधो ह्येव दीक्षितस्याग्निर्वै देवानां व्रतपतिस्तमेवैतदुपधावति "त्वमग्ने व्रतपाऽअसि देवऽआ मर्त्येष्वा[3] । त्वं यज्ञेष्वीड्य"ऽइति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्या कृतं भवति न व्रतं प्रमीणाति तस्मादाह त्वमग्ने व्रतपाऽअसि देवऽआ मर्त्येष्वा[5] त्वं यज्ञेष्वीड्यऽइति[6]॥२४॥ अथ यद्दीक्षितायाभिहरन्ति । तस्मिन्वाचयति "रास्वेयत्सोमा भूयो भरे"ति[8] सोमो ह वाऽअस्माऽएतच्युते यद्दीक्षितायाभिहरन्ति स यदाह रास्वेयत्सोमेति रास्व नऽइयत्सोमेत्येवैतदाहा भूयो भरेत्या नो भूयो हरेत्येवैतदाह "देवो नः सविता व्वसोर्दाता व्वस्वदादि"ति तथो हास्माऽएतत्सवितृप्रसूतमेव दानाय भवति ॥२५॥ पुरास्तमयादाह । 'दीक्षित व्वाचं यच्छे'ति तामस्तमिते व्वाचं व्विसृजते पुरोदयादाह दीक्षित व्वाचं यच्छेति तामुदिते व्वाचं व्विसृजते सन्तत्याऽएवाहरेवैतद्रात्र्या सन्तनोत्यह्ना रात्रिम्[9] ॥२६॥ नैनमन्यत्र चरन्तमभ्यस्तमियात् । न स्वपन्तमभ्युदियात्स यदेनमन्यत्र चरन्तमभ्यस्तमियाद्रात्रेरेनं तदन्तरियाद्यत्स्वपन्तमभ्युदियाद्[10]ह्नऽएनं तदन्तरियान्नात्र प्रायश्चित्तिरस्ति प्रतिगुप्यमेवैतस्मात् न पुरावभृथादपोऽभ्यवेयान्नैनमभिवर्षेदनवक्लृप्तꣳ ह तद्यत्पुरावभृथादपोऽभ्यवेयाद्यद्वैनमभिवर्षेदथ परिह्वालं व्वाचं व्वदति न मानुषीं प्रसृतां तद्यत्परिह्वालं व्वाचं व्वदति न मानुषीं प्रसृताम् ॥२७॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं नऽइदं मनुष्यैरनभ्यारोह्यꣳ[11] स्या-

१. अवद्यादिति. क, अवद्यादिति. घ. २. ७, ८. मा. सं. ४. १६.
३, ५. मर्त्येष्वा इति. क. घ. ४. न इति. घ. ६. इति. क, इति. घ.
९. रात्रि इति. क, घ. १०. अभ्युदियादिति. घ. ११. मियमिति. घ.

दिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥२८॥ तद्धाऽऋषीणामनुश्रुतमास । ते यज्ञꣳ समभरन्यथायं यज्ञः सम्भृतऽएवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते व्वाग्वै यज्ञस्तद्यदेवात्र यज्ञस्य निधीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति यत्परिहालं व्वाचं व्वदति न मानुषीं प्रसृतां न हाप्याययेद्यत्प्रसृतां मानुषीं व्वाचं व्वदेत्तस्मात्परिहालं व्वाचं व्वदति न मानुषीं प्रसृताꣳ ॥२९॥ स वै धीक्षते । व्वाचं हि धीक्षते यज्ञाय हि धीक्षते यज्ञो हि व्वाग्धीक्षितो ह वै नामैतद्यद्दीक्षितऽइति ॥३०॥ (१)का. श. ४. २. २: तै. ६. १. ४: मै. सं. ३. ६. ९: कठ. २३. ६. कपि. ३६. ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे
तृतीयकाण्डे द्वितीयप्रपाठके प्रथमं ब्राह्मणम् ॥

३. २. २.

(प्रायणीयेष्टिः)

आदित्यं चरुं प्रायणीयं निर्व्वपति । देवा ह वाऽअस्यां यज्ञं तन्वाना ऽइमां यज्ञादन्तरीयुः सा हैषामियं यज्ञं मोहयाञ्चकार कथं नु मयि यज्ञं तन्वाना मां यज्ञादन्तरीयुरिति तꣳ ह यज्ञं न प्रजज्ञुः ॥१॥ ते होचुः । यन्वस्यामेव यज्ञमतꣳस्महि कथं नु नोऽमुहत्कथं न प्रजानीमऽइति ॥२॥ ते होचुः । अस्यामेव यज्ञं तन्वानाऽइमां यज्ञादन्तरगाम सा न इयमेव यज्ञममूमुहदिमामेवोपधावामेति ॥३॥ ते होचुः । यन्नु त्वय्येव यज्ञमतꣳस्माह कथं नु नोऽमुहत्कथं न प्रजानीमऽइति ॥४॥ सा होवाच । मय्येव यज्ञं तन्वाना मां यज्ञादन्तरगात सा वोऽहमेव यज्ञममूमुहं भागं नु मे कल्पयताथ यज्ञं द्रक्ष्यथाथ प्रज्ञास्यथेति॥५॥तथेति देवाऽअब्रुवन् । तवैव प्रायणीयस्तवो-

१. न इति ग. २. प्रसृताम् इति. घ.

दयनीयऽइति तस्मादेष आदित्यऽएव प्रायणीयो भवत्यादित्यऽउदयनीय इयꣳ ह्येवादितिस्ततो यज्ञमपश्यंस्तमतन्वत ॥६॥ स यदादित्यं चरुं प्रायणीयं निर्व्वपति । यज्ञस्यैव दृष्ट्यै यज्ञं दृष्ट्वा क्रीणानि तं तनवाऽइति तस्मादादित्यं चरुं प्रायणीयं निर्व्वपति तद्वै निरुप्तꣳ हविरासीदनिष्टा देवता ॥७॥ अथैभ्यः पथ्या स्वस्तिः प्रारोचत । तामयजन् व्वाग्वै पथ्या स्वस्तिर्व्वाग्यज्ञस्तद्यज्ञमपश्यंस्तमतन्वत ॥८॥ अथैभ्योऽग्निः प्रारोचत । तमयजन्स यदाग्नेयं यज्ञस्यासीत्तदपश्यन्यद्वै शुष्कं यज्ञस्य तदाग्नेयं तदपश्यंस्तदतन्वत ॥९॥ अथैभ्यः सोमः प्रारोचत । तमयजन्स यत्सौम्यं यज्ञस्यासीत्तदपश्यन्यद्वाऽआर्द्रं यज्ञस्य तत्सौम्यं तदपश्यंस्तदतन्वत ॥१०॥ अथैभ्यः सविता प्रारोचत । तमयजन् पशवो वै सविता पशवो यज्ञस्तद्यज्ञमपश्यंस्तमतन्वताथ यस्यै देवतायै हविर्निरुप्तमासीत्तामयजन् ॥११॥ ता वाऽएताः । पञ्च देवता यजति यो वै स यज्ञो मुग्धऽआसीत्पाङ्क्तो वै सऽआसीत्तमेताभिः पञ्चभिर्देवताभिः प्राजानन् ॥ १२ ॥ ऋतवो मुग्धा आसन् पञ्च । तानेताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥ १३ ॥ दिशो मुग्धाऽआसन् पञ्च । ताऽएताभिरेव पञ्चभिर्देवताभिः प्राजानन् ॥१४॥ उदीचीमेव दिशम् । पथ्यया स्वस्त्या प्राजानंस्तस्माद्त्रोत्तरा हि व्वाग्वदति कुरुपञ्चालत्रा व्वाग्घ्येषा निदानेनोदीचीꣳ ह्येतया दिशं प्राजानन्नुदीची ह्येतस्यै दिक् ॥१५॥ प्राचीमेव दिशम् । अग्निना प्राजानंस्तस्मादग्निं पश्चात्प्राञ्चमुद्धृत्योपासते प्राचीꣳ ह्येतेन दिशं प्राजानन् प्राची ह्येतस्य दिक् ॥१६॥ दक्षिणामेव दिशꣳ । सोमेन प्राजानंस्तस्मात्सोमं क्रीतं दक्षिणा परिवहन्ति तस्मादाहुः प्रितृदेवत्यः सोमऽइति दक्षिणाꣳ ह्येतेन दिशं प्राजानन्दक्षि-

१. देवता इति. घ, देवता इति. ग. ङ. २. सारोचतेति. ङ. ३. आर्द्रमिति. घ.
४. पशव इति. क. ५. एता इति. ग. ङ. ६. पञ्चालवेति. क. ङ.
७, ८. दिक् इति. ग. ङ. ९. आहुः इति ङ. १०. दक्षिणाꣳइति. ङ.

णा[1] ह्येतस्य दिक् ॥१७॥ प्रतीचीमेव दिशꣳ । सवित्रा प्राजानन्नेष वै सविता यऽएष तपति तस्मादेष प्रत्यङ्ङेति प्रतीचीꣳ ह्येतेन दिशं प्राजानन्[2] प्रतीची ह्येतस्य दिक् ॥१८॥ ऊर्ध्वामेव दिशम् । अदित्या प्राजानन्नियं वाऽअदितिस्तस्मादस्यामूर्ध्वाऽओषधयो जायन्तऽऊर्ध्वा वनस्पतय ऊर्ध्वाꣳ ह्येतया दिशं प्राजानन्नूर्ध्वा ह्येतस्यै दिक्[3] ॥१९॥ शिरो वै यज्ञस्यातिथ्यम् । बाहू प्रायणीयोदयनीयावभितो वै शिरो बाहू भवतस्तस्मादभितऽआतिथ्यमेते हविषी भवतः प्रायणीयश्चोदनीयश्च ॥२०॥ तदाहुः । यदेव प्रायणीये क्रियेत तदुदयनीये क्रियेत यदेव प्रायणीयस्य बर्हिर्भवति तदुदयनीयस्य बर्हिर्भवतीति तदपोद्धृत्य निदधाति ताꣳ स्थालीꣳ सक्षामकर्षां प्रमृज्य मेक्षणं निदधाति यऽएव प्रायणीयस्यर्त्विजो भवन्ति तऽउदयनीयस्यर्त्विजो भवन्ति तद्यदेतत्समानं यज्ञे क्रियते तेन बाहू सदृशौ तेन सरूपौ ॥२१॥ तदु तथा न कुर्यात् । कामभेवैतद्बर्हिरनुप्रहरेदेवं मेक्षणं निर्णिज्य स्थालीं निदध्याद्यऽएव प्रायणीयस्यर्त्विजो भवन्ति तऽउदयनीयस्यर्त्विजो भवन्ति यद्यु ते व्विप्रेताः स्युरप्यन्यऽएव स्युः स यद्वै समानीर्देवता यजति समानानि हवीꣳषि भवन्ति तेनैव बाहू सदृशौ तेन सरूपौ ॥२२॥ स वै पञ्च प्रायणीये देवता यजति । पञ्चोदयनीये तस्मात्पञ्चेत्यादङ्गुलयः पञ्चेत्यात्तच्छुंय्वन्तं भवति न पत्नीः संयाजयन्ति पूर्वार्धे वाऽअन्वात्मनो बाहू पूर्वार्धमेवैतद्यज्ञस्याभिसंस्करोति तस्माच्छुंय्वन्तं भवति न पत्नीः संयाजयन्ति ॥२३॥ Cf. का. श. ४. २. ३; तै. सं. ६. १. ५; मै. सं. ३. ७. १; कठ. २३. ८; कपिष्ठ. ३६. ५. ६; शां. ब्रा. ५, १०; ऐ. ब्रा. १, ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. २. ३)

---

१. दक्षिणा इति. ङ. २. प्राजानन्निति. ङ. ३. दिक् इति- ग. ङ.

३. २. ३.

(सोमेतिहासः)

दिवि वै सोमऽआसीत् । अथेह देवास्ते देवाऽअकामयन्ता नः सोमो गच्छेत्तेनागतेन यजेमहीति तऽएते मायेऽअसृजन्त सुपर्णौ च कद्रूं च तद्धिरण्यानां ब्राह्मणे व्याख्यायते सौपर्णीकाद्रवं यथा तदास ॥१॥ तेभ्यो गायत्री सोममच्छापतत् । तस्याऽआहरन्त्यै गन्धर्वो विश्वावसुः पर्यमुष्णात्ते देवाऽअविदुः प्रच्युतो वै परस्तात्सोमोऽथ नो नागच्छति गन्धर्वो वै पर्यमोषिषुरिति ॥२॥ ते होचुः । योषित्कामा वै गन्धर्वा वाचमेवैभ्यः प्रहिणवाम सा नः सह सोमेनागमिष्यतीति तेभ्यो वाचं प्राहिण्वन्त्सनान्त्सह सोमेनागच्छत् ॥३॥ ते गन्धर्वा अन्वागत्याब्रुवन् । सोमो युष्माकं वागेवास्माकमिति तथेति देवा ऽअब्रुवन्निहो चेदागान्मैनामभीषहेव नेष्ट विह्वयामहाऽइति तां व्यह्वयन्त ॥४॥ तस्यै गन्धर्वाः । वेदानेव प्रोचिरऽइति वै वयं विद्मेति वयं विद्मेति ॥५॥ अथ देवाः । वीणामेव सृष्ट्वा वादयन्तो निगायन्तो निषेदुरिति वै ते वयं गास्याम ऽइति त्वा प्रमोदयिष्यामहऽइति सा देवानुपाववर्त सा वै सा तन्मोघमुपाववर्त या स्तुवद्भ्यः शꣳसद्भ्यो नृत्तं गीतमुपाववर्त तस्मादप्येतर्हि मोघसꣳहिता एव योषाऽएवꣳ हि वागुपावर्तत तामु ह्यन्या अनु योषास्तस्माद्य एव नृत्यति यो गायति तस्मिन्नेवैता निमिश्लतमाऽइव ॥६॥ तद्वा ऽएतदुभयं देवेष्वासीत् । सोमश्च वाक्च स यत्सोमं क्रीणात्यागत्याऽएवागतेन यजाऽइत्यनागतेन ह वै स सोमेन यजते योऽक्रीतेन यजते ॥७॥ अथ यद्ध्रुवायामाज्यं परिशिष्टं भवति । तज्जुह्वां चतुष्कृत्वो विगृह्णाति बर्हिषा हिरण्यं प्रबध्यावधाय जुहोति

१. तांद्धरण्यानामिति. घ. २. सहेति घ. ३. सोमेन इति. ग.
४. वेदेति. घ. ५. गन्धर्वा इति. ग. ङ. ६. विह्वेति. ग, ङ, विह्वेति. घ.
७. देवा इति. ग, ङ. ८. सृष्ट्वेति घ. ९. ह्यन्या इति. घ.
१०. एव इति. घ. ११. ह इति. घ. १२. चतुष्कृत्व इति. घ.

कृत्स्नेन पयसा जुहवानीति समानजन्म वै पयश्च हिरण्यं चोभयꣳ ह्यग्निरेतसꣳ ॥८॥ स हिरण्यमवदधाति । "एषा ते शुक्र तनूरेतद्व-र्च"ऽइति व्वर्चो वाऽएतद्यद्धिरण्यं "तया सम्भव भ्राजं गच्छे"ति स यदाह तया सम्भवेति तया सम्पृच्यस्वेत्येवैतदाह भ्राजं गच्छेति सोमो वै भ्राट् सोमं गच्छेत्येवैतदाह ॥९॥ तां यथैवादो देवाः । प्राहिण्वन्त्सोममच्छैवमेवैनामेष ऽएतत्प्रहिणोति सोममच्छ व्वाग्वै सो-मक्रयणी निदानेन तामेतयाहुत्या प्रीणाति प्रीतया सोमं क्रीणानीति ॥१०॥ स जुहोति । "जूरसी"त्येतद्ध वा ऽअस्या ऽएकं नाम य-ज्जूरसीति "धृता मनसे"ति मनसा वाऽइयं व्वाग्धृता मनो वाऽइदं पुरस्ताद्वाचऽइत्थं व्वद मेतद्वादीरित्यलग्लमिव ह वै व्वाग्वदेद्यन्मनो न स्यात्तस्मादाह धृता मनसेति ॥ ११ ॥

(अर्द्धप्रपाठकः)

"जुष्टा व्विष्णव"ऽइति । जुष्टा सोमायेत्येवैतदाह यमच्छेम ऽइति "तस्यास्ते सत्यसवसः प्रसव"ऽइति सत्यप्रसवा न ऽएधि सोमं नोऽच्छेहीत्येवैतदाह "तन्वो यन्त्रमशीय स्वाहे"ति स ह वै तन्वो यन्त्रमश्नुते यो यज्ञस्योहचं गच्छति यज्ञस्योहचं गच्छानीत्ये-वैतदाह ॥१२॥ अथ हिरण्यमपोद्धरति । तन्मनुष्येषु हिरण्यं करोति स यत्सहिरण्यं जुहुयात्परागु हैवैतन्मनुष्येभ्यो हिरण्यं प्रवृञ्ज्यात्तन्न मनुष्येषु हिरण्यमभिगम्येत ॥१३॥ सोऽपोद्धरति । "शुक्रमसि चन्द्रमस्यमृतमसि व्वैश्वदेवमसी"ति कृत्स्नेन पयसा हुत्वा यदेवै-तत्तदाह शुक्रमसीति शुक्रꣳ ह्येतच्चन्द्रमसीति चन्द्रꣳ ह्येतदमृतमसी-त्यमृतꣳ ह्येतद्वैश्वदेवमसीति वैश्वदेवꣳ ह्येतत्प्रमुच्य तूर्णं बर्हि-ष्यपिसृजति सूत्रेण हिरण्यं प्रबध्नीते ॥१४॥ अथापरं चतुर्गृहीतमा-ज्यं गृहीत्वा । अन्वारभस्व यजमानेत्याहापोर्णुवन्ति शालायै द्वारे दक्षि-

१. रेतसꣳ इति. ग. ङ. २. ३. ६-८ मा. सं. ४. १ १. ४. देवा इति. ग. ङ.
५. प्राहिण्वन्निति. घ. ९, १०. १२. मा. सं. ४. १८.
११. गम्येत इति. ग. ङ.

णतः सोमक्रयण्युपतिष्ठते तत्प्रहितामेवैनामेतत्सतीं प्राहैषीद्वाग्वै सोमक्रयणी निदानेन तामेतयाहुत्याप्रैषीत्प्रीतया सोमं [1]क्रीणानीति ॥१५॥ अथोपनिष्क्रम्याभिमन्त्रयते । "चित्तिरसि मनासी"ति चित्तं वाऽइदं मनो व्वागनुवदति "धीरसि दक्षिणे"ति धिया धिया ह्येतया मनुष्या जुज्यूषन्त्यनूक्तेनेव प्रकामोद्येनेव गाथाभिरिव तस्मादाह धीरसीति दक्षिणेति दक्षिणा ह्येषा "क्षत्रियासि यज्ञियासी"ति क्षत्रिया ह्येषा यज्ञिया ह्येषा "दितिरस्युभयतः शीर्ष्णी"ति स यदेनया समानꣳ सद्विपर्यासं व्वदति यदपरं तत्पूर्वं करोति यत्पूर्वं तदपरं तेनोभयतःशीर्ष्णी तस्मादाहादितिरस्युभयतःशीर्ष्णीति ॥१६॥ "सा नः सुप्राची सुप्रतीच्येधी"ति । सुप्राची नऽएधि सोमं नोऽच्छेहीत्येवैतदाह सुप्रतीचीतऽएधि सोमेन नः सह पुनरेहीत्येवैतदाह तस्मादाह सा नः सुप्राची सुप्रतीच्येधीति ॥१७॥ "मित्रस्त्वावपदि बध्नीतामि"ति । व्वरुण्या वाऽएषा यद्रज्जुः सा यद्रज्ज्वाभिहिता स्याद्वरुण्या स्याद्यद्वनभिहिता स्यादयतेव स्यादेतद्वाऽअवरुण्यं यन्मित्रꣳ सा यथा रज्ज्वाभिहिता यतैवमस्यैतद्भवति यदाह मित्रस्त्वा पदि बध्नीतामिति ॥१८॥ "पूषाध्वनस्पात्वि"ति । इयं वै पृथिवी पूषा यस्य वाऽइयमध्वन् गोप्त्री भवति तस्य न काचन ह्वला भवति तस्मादाह पूषाध्वनस्पात्विति ॥१९॥ "इन्द्रायाध्यक्षाये"ति स्वध्यक्षासदित्येवैतदाह यदाहेन्द्रायाध्यक्षाये"त्यनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्य"ऽइति सा यत्ते जन्म तेन नोऽनुमता सोममच्छेहीत्येवैतदाह "सा देवि देवमच्छेही"ति देवी ह्येषा देवमच्छैति यद्वाक्सोमं तस्मादाह सा देवि देवमच्छेहीती"न्द्राय सोममि"तीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय सोममिति "रुद्रस्त्वावर्तय"

१. क्रीणानीति. ग. ङ. २-५. ४. १९. ६. करोतीति. क.
७. सा इति. ग. ८. मा. सं. ४. १९. ९. चीन इति. क.
१०. सं. ४. १९. ११. तद्भवति यदाहेति. ङ १२. मा. सं. ४. १९.
१३. पात्वितीति. ग. ङ. १४. मा. स. ४. १९. १५-१८. मा. सं. ४. २०

त्वित्यप्रणाशायैतदाह रुद्रꣳ हि नाति पशवः "स्वस्ति सोमसखा पुनरेहि"ति स्वस्ति नः सोमेन सह पुनरेहीत्येवैतदाह ॥२०॥ तां यथैवादो देवाः । प्राहिण्वन्सोममच्छ सैनान्सह सोमेनागच्छदेवमेवैनामेषऽएतत्प्रहिणोति सोममच्छ सैनꣳ सह सोमेनागच्छति ॥२१॥ तां यथैवादो देवाः । व्यह्वयन्त गन्धर्वैः सा देवानुपावर्ततैवमेवैनामेतद्यजमानो व्विह्वयते सा यजमानमुपावर्तते तामुदीचीमत्याकुर्वन्त्युदीची हि मनुष्याणां दिक्सोऽएव यजमानस्य तस्मादुदीचीमत्याकुर्व्वन्ति ॥२२॥ Cf. का. श. ४. २. ४; तै. सं. ६. १. ६; मै सं. ३. ७. ३; कठ. २३. १०. कपिष्ठ. ३७. १.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके तृतीयं ब्राह्मणम् ॥ (२, ४)

(द्वितीयोऽध्यायः समाप्तः ॥)

३. २. ४.

(पदहोमः)

सप्त पदान्यनुनिक्रामति । व्वृङ्क्तऽएवैनामेतत्तस्मात्सप्त पदान्यनुनिक्रामति यत्र वै व्वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै तेषां पराध्या शक्करी तामेवैतत्परस्तादर्व्वाचीं व्वृङ्क्ते तस्मात्सप्त पदान्यनुनिक्रामति ॥१॥ स वै व्वाचऽएव रूपेणानुनिक्रामति "व्वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासी"ति व्वस्वी ह्येषादितिर्ह्येषादित्या ह्येषा रुद्रा ह्येषा चन्द्रा ह्येषा "बृहस्पतिष्ट्वा सुम्ने रम्णा"त्विति ब्रह्म वै बृहस्पतिर्बृहस्पतिष्ट्वा साधुनावर्तयत्वित्येवैतदाह "रुद्रो व्वसुभिराचक"ऽइत्यप्रणाशायैतदाह रुद्रꣳ हि नाति पशवः ॥२॥ अथ सप्तमं पदं पर्युपविशन्ति । स हिरण्यं पदे निधाय

१. मा.सं. ४. २० २. ३. देवा इति. ग. ङ. ४. व्वृङ्क्ष इति. घ,
५-७. मा. सं. ४. २१. ८. पशव इति. ग. ङ., पशव इति. घ.

जुहोति न वाऽअनग्नावाहुतिर्हूयतेऽग्निरेतसं वै हिरण्यं तथो हास्यैषाग्निमत्येवाहुतिर्हुता भवति वज्रो वाऽआज्यं वज्रेणैवैतदाज्येन स्पृणुते ताꣳ स्पृत्वा स्वीकुरुते ॥३॥ स जुहोति । "अदित्यास्त्वा मूर्धन्नाजिघर्मी"तीयं वै पृथिव्यदितिरस्यै हि मूर्धन् जुहोति "देवयजने पृथिव्या"ऽइति देवयजने हि पृथिव्यै जुहोती"डायास्पदमसि घृतवत्स्वाहे"ति गौर्वाऽइडा गोर्हि पदे जुहोति घृतवत्स्वाहेति घृतवद्ध्येतदभिहुतं भवति ॥४॥ अथ स्फ्यमादाय परिलिखति । वज्रो वै स्फ्यो वज्रेणैवैतत्परिलिखति त्रिष्कृत्वः परिलिखति त्रिवृतैवैतद्वज्रेण समन्तं परिगृह्णात्यनतिक्रमाय ॥५॥ स परिलिखति । "अस्मे रमस्वे"ति यजमाने रमस्वेत्येवैतदाहाथ समुल्लिख्य पदꣳ स्थाल्याꣳ संवपत्य"स्मे ते बन्धु"रिति यजमाने ते बन्धुरित्येवैतदाह॥६॥ अथापऽउपनिनयति । यत्र वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तद्भिः शान्त्या शमयति तद्भिः संदधाति तस्मादपऽउपनिनयति ॥७॥ अथ यजमानाय पदं प्रयच्छति। "त्वे राय"ऽइति पशवो वै रायस्त्वयि पशवऽइत्येवैतदाह तद्यजमानः प्रतिगृह्णाति "मे राय"ऽइति पशवो वै रायो मयि पशवऽइत्येवैतदाह ॥८॥ अथाध्वर्युरात्मानमुपस्पृशति । "मा व्वयꣳ रायस्पोषेण वियौष्मे"ति तथो हाध्वर्युः पशुभ्यऽआत्मानं नान्तरेति ॥९॥ अथ पत्न्यै पदं प्रतिपराहरन्ति । गृहा वै पत्न्यै प्रतिष्ठा तद्गृहेष्वेवैनामेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मात्पत्न्यै पदं प्रतिपराहरन्ति ॥१०॥ तां नेष्टा व्वाचयति । "तोतो राय"ऽइत्यथैनाꣳ सोमक्रयण्या संख्यापयति व्वृषा वै सोमो योषा पत्न्येष वाऽअत्र सोमो भवति यत्सोमक्रयणी मिथुनमेवैतत्प्रजननं क्रियते तस्मादेनां सोमक्रयण्या संख्यापयति ॥११॥ स संख्यापयति । "समख्ये देव्या धिया सन्दक्षिण-

१–५. मा. सं. ४. २२. ६. यजमाने इति. ग. ७–९, ११. मा. सं. ४. २२.
१०. पदं इति. घ. १२. संख्यापयतीति. ङ. १३. मा. ४. २३.

योरुचक्षसा । मा मऽआयुः प्रमोषीर्माऽअहं तव । वीरं विदेय तव देवि संदृशी''त्याशिषमेवैतदाशास्ते पुत्रो वै वीरः पुत्रं विदेय तव संदृशीत्येवैतदाह ॥१२॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी यत्र वाऽइन्द्राविष्णू त्रेधा सहस्रं व्यैरयतां तदेकात्यरिच्यत तां त्रेधा प्राजनयतां तस्माद्योप्येतर्हि त्रेधा सहस्रं व्याकुर्यादेकैवातिरिच्येत ॥१३॥ सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयण्यथ या रोहिणी सा वार्त्रघ्नी यामिदꣳ राजा सङ्ग्रामं जित्वोदाकुरुतेऽथ या रोहिणी श्येताक्षी सा पितृदेवत्या यामिदं पितृभ्यो घ्नन्ति ॥१४॥ (शतम् १६००) सा या बभ्रुः पिङ्गाक्षी । सा सोमक्रयणी स्याद्यदि बभ्रुं पिङ्गाक्षीं न विन्देदरुणा स्याद्यद्यरुणां न विन्देद्रोहिणी वार्त्रघ्नी स्याद्रोहिण्यै ह त्वेव श्येताक्ष्याऽआशां नेयात् ॥१५॥ सा स्यादप्रवीता । वाग्वाऽएषा निदानेन यत्सोमक्रयण्ययातयाम्नी वाऽइयं वागयातयाम्यप्रवीता तस्मादप्रवीता स्यात्सा स्यादवण्डाकृष्टाकाणाकर्णालक्षितासप्तशफा सा होकरूपैकरूपा हीयं वाक् ॥१६॥ Cf. का. श. ४. ३. १: तै. सं. ६. १. ७, ८: मै. सं. ३. ७. ५, ६: काठ. सं. २४. ३, ४: कपि. ३७. ४, ५.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ३. १.)

३. २. ५.

(सोमोन्मानादि)

पदꣳ समुप्य पाणीऽअवनेनिक्ते । तद्यत्पाणीऽअवनेनिक्ते वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्मात्पाणीऽअवनेनिक्ते ॥१॥ अथास्याꣳ हिरण्यं बध्नीते । द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव

१, २, ४. पिङ्गाक्षी इति. ग. ङ. ३. सा इति. ग. ङ.

५. निदानेन इति. ग. ङ. ६. वाक् इति. ग. ङ.

देवाऽअनृतं मनुष्याऽअग्निरेतसं वै हिरण्यꣳ सत्येनाꣳशुनुपस्पृशानि सत्येन सोमं पराहणानीति तस्माद्वाऽअस्याꣳ हिरण्यं बध्नीते ॥२॥ अथ सम्प्रेष्यति 'सोमोपनहनमाहर सोमपर्याणहनमाहरोष्णीषमाहरे'ति स यदेव शोभनं तत्सोमोपनहनꣳ स्याद्वासो ह्यस्यैतद्भवति शोभनꣳ ह्येतस्य व्वासः स यो हैनꣳ शोभनेनोपचरति शोभते हाथ यऽआह यदेव किं चेति यद्धैव किं च भवति तस्माद्यदेव शोभनं तत्सोमोपनहनꣳ स्याद्यदेव किं च सोमपर्याणहनम् ॥३॥ यद्युष्णीषं व्विन्देत् । उष्णीषः स्याद्यद्युष्णीषं न विन्देत्सोमपर्याणहनस्यैव द्व्यङ्गुलं वा त्र्यङ्गुलं वावकृन्तेदुष्णीषभाजनमध्वर्युर्वा यजमानो वा सोमोपनहनमादत्ते यऽएव कश्च सोमपर्याणहनम् ॥४॥ अथाग्रेण राजानं व्विचिन्वन्ति । तदुदकुम्भऽउपानिहितो भवति तद्ब्राह्मणऽउपास्ते तदभ्यायन्ति प्राञ्चः ॥५॥ तदायत्सु व्वाचयति । "एष ते गायत्रो भागऽइति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूतादेष ते जागतो भाग ऽइति मे सोमाय ब्रूताच्छन्दोनामानाꣳसाम्राज्यं गच्छेति मे सोमाय ब्रूता"दित्येकं वाऽएष क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्दसाꣳ साम्राज्याय घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतदाह छन्दसामेव त्वा राज्याय क्रीणामि छन्दसाꣳ साम्राज्याय न वधायेत्यथेत्य प्राङुपविशति ॥६॥ सोऽभिमृशति । "आस्माकोऽसी"ति स्वऽइव ह्यस्यैतद्भवति यदागतस्तस्मादाहास्माकोऽसीति "शुक्रस्ते ग्रह"ऽइति शुक्रꣳ ह्यस्माद्ग्रहं ग्रहीष्यन् भवति "व्विचितस्त्वा व्विचिन्वन्त्वि"ति सर्वत्वायैतदाह ॥७॥ अत्र हैके । तृणं वा काष्ठं वा व्विस्त्वापास्यन्ति तदु तथा न कुर्यात्क्षत्रं वै सोमो व्विडन्याऽओषधयोऽन्नं वै क्षत्रियस्य विट्

१. शोभनꣳ इति. ग. ङ. २. न इति. ग. ङ. ३. पर्याणहनस्येति.ग.
४. सोमोपनहमिति. ग. ङ. ५. मा. सं. ४. २४. ६. एतदाहेति. ङ.
७. उपविशति इति. ग. ङ. ८, ९, ११. मा. सं. ४. २४. १०. शुक्रꣳ इति. ङ.

स यथा प्रसितमनुहायाच्छिद्य परास्येदेवं तत्तस्माद्भ्येव मृशोद्विचितस्त्वा व्विचिन्वन्ति रति तद्यऽएवास्य विचेतारस्तऽएनं व्विचिन्वन्ति ॥८॥ अथ व्वासः । द्विगुणं वा चतुर्गुणं वा प्राग्दशं वोपस्तृणाति तद्राजानं मिमीते स यद्राजानं मिमीते तस्मान्मात्रा मनुष्येषु मात्रो[1] यो चाप्यन्या मात्रा ॥९॥ सावित्र्या मिमीते । सविता वै देवानां प्रसविता तथो हास्माऽएष सवितृप्रसूतऽएव क्रयाय भवति ॥१०॥ अतिच्छन्दसा मिमीते । एषा वै सर्व्वाणि छन्दाꣳसि यदतिच्छन्दास्तथो हास्यैष सर्वैरेव[2] छन्दोभिर्मितो भवति तस्माद्तिच्छन्दसा मिमीते ॥११॥ स मिमीते । "अभि त्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियं मतिं कविम्[4] । ऊर्ध्वा यस्यामतिर्भाऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्व"रिति ॥१२॥ एतया सर्व्वाभिः । एतया चतसृभिरेतया तिसृभिरेतया द्वाभ्यामेतयैकयैतयैवैकयैतया द्वाभ्यामेतया तिसृभिरेतया चतसृभिरेतया सर्व्वाभिः समस्याञ्जलिनाध्यावपति ॥१३॥ स वाऽउदाचं न्याचं मिमीते । स यदुदाचं न्याचं मिमीतऽइमाऽएवैतदङ्गुलीर्नानाजानाः करोति तस्मादिमा नाना जायन्तेऽथ यत्सह सर्व्वाभिर्मिमीते सꣳ श्लिष्टा ऽइव हैवेमा जायेरंस्तस्माद्वाऽउदाचं न्याचं मिमीते ॥१४॥ यद्वेवोदाचं न्याचं मिमीते । इमाऽएवैतन्नानावीर्याः करोति तस्मादिमा नानावीर्यास्तस्माद्वाऽउदाचं न्याचं मिमीते ॥१५॥ यद्वेवोदाचं न्याचं मिमीते । व्विराजमेवैतदर्व्वाचीं च पराचीं च युनक्ति पराच्यह देवेभ्यो यज्ञं व्यहत्यर्व्वाची मनुष्यानवति तस्माद्वाऽउदाचं न्याचं मिमीते ॥१६॥ अथ यद्दशकृत्वो मिमीते । दशाक्षरा वै व्विराड्वैराजः सोमस्तस्माद्दशकृत्वो मिमीते ॥१७॥ अथ सोमोपनह-

१. पात्रो इति. क. २. सर्वैरेवेति. घ. ३. मा. सं. ४. २५.
४. कविमिति. ग. घ. ५. द्वाभ्यामेतया इति. घ. ६. तस्माद्वा इति. ग.

नस्य । समुत्पार्यान्तानुष्णीषेण विग्रथ्नाति "प्रजाभ्यस्त्वे"ति प्रजाभ्यो ह्येनं क्रीणाति स यदेवेदꣳ शिरश्चाꣳसौ चान्तरोपेनितमिव तदेवास्यैतत्करोति ॥१८॥ अथ मध्येऽङ्गुल्याकाशं करोति । "प्रजास्त्वानुप्राणन्त्वि"ति तमयतीव वाऽएनमेतत्समायच्छन्नप्राणमिव करोति तस्यैतदतऽएव मध्यतः प्राणमुत्सृजति तं ततः प्राणन्तं प्रजाऽअनुप्राणन्ति तस्मादाह प्रजास्त्वानुप्राणन्त्विति तꣳ सोमविक्रयिणे प्रयच्छत्यथातः पणनस्यैव ॥१९॥ Cf. का. श. ४. ३. २: तै. सं. ६. १. ९: मै. सं. ३. ७. ४: काठ. २४. १, २: कपि. ३७. २, ३.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ३. २.)

३. २. ६.

(सोमक्रयः)

स वै राजानं पणते । स यद्राजानं पणते तस्मादिदꣳ सकृत्सर्वं पण्यꣳ सऽआह सोमविक्रयिन् क्रय्यस्ते सोमो राजा३ऽइति क्रय्यऽइत्याह सोमविक्रयी तं वै ते क्रीणानीति क्रीणीहीत्याह सोमविक्रयी कलया ते क्रीणानीति भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूयऽएवातः सोमो राजार्हति महांस्त्वेव गोर्महिमेत्यध्वर्युः ॥१॥ गोर्व्वै प्रतिधुक् । तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्याऽआतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्याऽआमिक्षा तस्यै व्वाजिनꣳ ॥२॥ शफेन ते क्रीणानीति । भूयो वाऽअतः सोमो राजार्हतीत्याह सोमविक्रयी भूयऽएवातः सोमो राजार्हति महांस्त्वेव गोर्महिमेत्यध्वर्युरेतान्येव दश व्वीर्याण्युदाख्यायाह पदा तेऽर्धेन ते गवा ते क्रीणामीति क्रीतः सोमो राजेत्याह सोमविक्रयी व्वयाꣳसि

१, २. मा. सं. ४. २५. ३. पणनस्यैव इति. ग. ४. राजा इति. ग.
५. अध्वर्युरिति. ग. ८. ६. वाजिनं इति. घ. ७. सोमविक्रयीति घ.

प्रब्रूहीति ॥३॥ सऽआह । चन्द्रं ते व्वस्त्रं ते छागा ते धेनुस्ते मिथुनौ ते गावौ तिस्रस्तेऽन्याऽइति स यदर्वाक्पणन्ते परः सम्पादयन्ति तस्मादिदꣳ सकृत्सर्व्वं पण्यमर्वाक्पणन्ते परः सम्पादयन्त्यथ यदध्वर्युरेव गोर्व्वीर्याण्युदाचष्टे न सोमस्य सोमविक्रयी महितो वै सोमो देवो हि सोमोऽथैतदध्वर्युर्गां महयति तस्यै पश्यन्वीर्याणि क्रीणादिति तस्मादध्वर्युरेव गोर्व्वीर्याण्युदाचष्टे न सोमस्य सोमविक्रयी ॥ ४ ॥ अथ यत्पञ्चकृत्वः पणते । संवत्सरसम्मितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्चकृत्वः पणते ॥५॥ अथ हिरण्ये व्वाचयति । "शुक्रं त्वा शुक्रेण क्रीणामी"ति शुक्रꣳ ह्येतच्छुक्रेण क्रीणाति यत्सोमꣳ हिरण्येन "चन्द्रं चन्द्रेणे"ति चन्द्रꣳ ह्येतच्चन्द्रेण क्रीणाति यत्सोमꣳ हिरण्येनाऽऽमृतममृतेनेत्यमृतꣳ ह्येतदमृतेन क्रीणाति यत्सोमꣳ हिरण्येन ॥६॥ अथ सोमविक्रयिणमभिप्रकम्पयति "सग्मं ते गो"रिति यजमानं ते गौरित्येवैतदाह तद्यजमानमभ्याहृत्य न्यस्यत्य"स्मै ते चन्द्राणी"ति सऽआत्मन्येव व्वीर्यं धत्ते शरीरमेव सोमविक्रयी हरते तत्ततः सोमविक्रय्यादत्ते ॥७॥ अथाजायां प्रतीचीनमुख्यां व्वाचयति । "तपसस्तनूरसी"ति तपसो ह वाऽएषा प्रजापतेः सम्भूता यदजा तस्मादाह तपसस्तनूरसीति "प्रजापतेर्व्वर्ण"ऽइति सा यत्त्रिः संवत्सरस्य विजायते तेन प्रजापतेर्व्वर्णः "परमेण पशुना क्रीयस"ऽइति सा यत्त्रिः संवत्सरस्य व्विजायते तेन परमः पशुः "सहस्रपोषं पुषेय"मित्याशिषमेवैतदाशास्ते भूमा वै सहस्रं भूमानं गच्छानीत्येवैतदाह ॥८॥ स वाऽअनेनैवाजां प्रयच्छति । अनेन राजानमादत्तऽआजा ह वै नामैषा यदजैतया ह्यनमन्ततऽआजति तामेतत्परोक्षमजेत्याचक्षते ॥९॥ अथ

१. तिस्रस्ते इति. ग. घ. २. विक्रयी इति. ग. ङ. ३, ४. पणत इति. ग.
५-११. मा. सं. ४. २६. १२. संवत्सरस्येति. घ. १३. तेन इति. ग.
१४, १५. मा. सं. ४. २६. १६. आशास्त इति. घ.

राजानमादत्ते । "मित्रो नऽएहि सुमित्रध"ऽइति शिवो नः शान्त-ऽएहीत्येवैतदाह तं यजमानस्य दक्षिणऽऊरौ प्रत्युह्य व्वासो निद-धाती"न्द्रस्योरुमाविश दक्षिण"मित्येष वाऽअत्रेन्द्रो भवति यद्यज-मानस्तस्मादाहेन्द्रस्योरुमाविश दक्षिणमित्यु"शन्नुशन्तमि"ति प्रियः प्रियमित्येवैतदाह "स्योनः स्योन"मिति शिवः शिवमित्येवैतदाह ॥१०॥ अथ सोमक्रयणाननुदिशति । "स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभ"न्निति धिष्ण्यानां वाऽएते भाजनेनैतानि वै धिष्ण्यानां नामानि तान्येवैभ्य-ऽएतदन्वादिक्षत् ॥११॥ अथात्रापोर्णुते । गर्भो वाऽएष भवति यो दीक्षते पावृता वै गर्भाऽउल्बेनेव जरायुणेव तमत्राजीजनत तस्माद-पोर्णुतऽएष वाऽअत्र गर्भो भवति तस्मात्परिवृतो भवति परिवृताऽइव हि गर्भाऽउल्बेनेव जरायुणेव ॥१२॥ अथ व्वाचयति । "परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भजे"त्यासीनं वाऽएनमेषऽआगच्छति सऽआगतऽउत्तिष्ठति तन्मिथ्या करोति व्वतं प्रमीणाति तस्यो हैषा प्रायश्चित्तिस्तथो हास्यैतन्न मिथ्याकृतं भवति न व्रतं प्रमीणाति तस्मादाह परि माग्ने दुश्चारिताद्बाधस्वा मा सुचरिते भजेति ॥१३॥ अथ राजानमादायोत्तिष्ठति । "उदायुषा स्वायुषोदस्थाममृतां२॥ऽअ-न्वि"त्यमृतं वाऽएषोऽनुत्तिष्ठति यः सोमं क्रीतं तस्मादाहोदायुषा स्वायुषोदस्थाममृतां२॥ऽअन्विति ॥१४॥ अथ राजानमादायारोहण-मभिप्रैति । "प्रति पन्थामपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परि द्विषो वृणक्ति व्विन्दते व्वसु"ति ॥१५॥ देवा ह वै यज्ञं त-न्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयांचक्रुस्तेऽएतद्यजुः स्व-स्त्ययनं ददृशुस्तेऽएतेन यजुषा नाष्ट्रा रक्षाꣳस्यपहत्यैतस्य यजुषो-

१–५. मा. सं. ४. २७. ६, ७. मा. सं. ४. २८.

८. अन्विति इति. ग, अन्विति इति. घ. ९. मा. सं. ४. २९.

१०. त इति. घ. ११. रक्षाꣳसीति. घ.

भयेऽनाष्ट्रे निवाते स्वस्ति समाश्नुवत तथोऽएवैष एतेन यजुषा नाष्ट्रा रक्षाꣳस्यपहत्यैतस्य यजुषोभयेऽनाष्ट्रे निवाते स्वस्ति समश्नुते तस्मादाह प्रति पन्थामपद्महि स्वस्ति गामनेहसम्। येन[1] विश्वाः परि द्विषो वृणक्ति विन्दते वस्विति ॥१६॥ तं वाऽइति हरन्ति। अनसा परिवहन्ति महयन्त्येवैनमेतत्तस्माच्छीर्ष्णा बीजꣳ हरन्त्यनसोदावहन्ति ॥१७॥ अथ यदपामन्ते क्रीणाति। रसो वाऽआपः सरसमेवैतत्क्रीणात्यथ यद्धिरण्यं भवति सशुक्रमेवैतत्क्रीणात्यथ यद्वासो भवति सत्वचसमेवैतत्क्रीणात्यथ यदजा भवति सतपसमेवैतत्क्रीणात्यथ यद्धेनुर्भवति साशिरमेवैतत्क्रीणात्यथ यन्मिथुनौ भवतः समिथुनमेवैतत्क्रीणाति तं वै दशभिरेव क्रीणीयान्नादशभिर्दशाक्षरा वै विराड्वैराजः सोमस्तस्माद्दशभिरेव क्रीणीयान्नादशभिः॥१८॥

Cf. का. श. ४. ३. ३. तै. सं. ६. १. १०. मै. सं. ३. ७. ७; काठ. २४. ५,६: कपि. ३७. ५-७.

इति शुक्लयजुर्वेदीयमाध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे द्वितीयप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ. ३. ३.)

द्वितीयः प्रपाठकः समाप्तः ॥

(कण्डिकासंख्या ॥१२८॥)

३. ३. १.

(क्रीतस्य सोमस्य शकटेन शालायामाहरणम्)

नीडे कृष्णाजिनमास्तृणाति। "अदित्यास्त्वगसी"[3]ति सोऽसावेव बन्धुरथैनमासादयं"न्यदित्यै सदऽआसीदे"तीयं वै पृथिव्यदितिः प्रतिष्ठा तदस्यामेवैनमेतत्प्रतिष्ठायां प्रतिष्ठापयति तस्मादाहादित्यै सद ऽआसीदेति[5] ॥१॥ अथैवमभिपद्य व्वाचयति। "अस्तभ्नाद्द्यां व्वृषभोऽअन्तरिक्ष"मिति[6] देवा ह वै यज्ञं तन्वानास्तेऽसुररक्ष-

१. येन इति. ग. ङ. २. सरसमेव इति. घ. ३, ४. मा. सं. ४. ३०.
५. आसीद इति. ग, ङ., आसीद इ त. घ. ६. मा. सं. ४-३०.

सेभ्य आसङ्गाद्भिभयाञ्चक्रुस्तऽएनमेतज्ज्यायाꣳसमेव व्यधाच्चकुर्यदा-
हास्तभ्नाद्द्यां व्वृषभोऽअन्तरिक्षमिति ॥२॥ "अमिमीत व्वरिमाणं
पृथिव्या" ऽइति । तदेनेनेमांल्लोकानाम्पृणोति तस्य हि न हन्तास्ति
न वधो येनेमे लोका ऽआस्पृतास्तस्मादाहामिमीत व्वरिमाणं पृथि-
व्या ऽइति ॥३॥ "आसीदद्विश्वा भुवनानि सम्रा"डिति । तदेनेनेदꣳ
सर्व्वमास्पृणोति तस्य हि न हन्तास्ति न वधो येनेदꣳ सर्वमास्पृतं
तस्मादाहासीदद्विश्वा भुवनानि सम्राडिति ॥४॥ "विश्वेत्तानि व्वरु-
णस्य व्रतानी"ति । तदस्माऽइदꣳ सर्व्वमनुवर्त्म करोति यदिदं किं
च न कश्चन प्रत्युद्यामिनं तस्मादाह विश्वेत्तानि व्वरुणस्य व्रता-
नीति ॥५॥ अथ सोमपर्याणहनेन पर्याणह्यति । नेदेनं नाष्ट्रा रक्षाꣳसि
प्रमृशानिति गर्भो वा एष भवति तिरऽइव वै गर्भास्तिरऽइवैतद्यत्प-
र्याणद्धं तिरऽइव वै देवा मनुष्येभ्यस्तिरऽइवैतद्यत्पर्याणद्धं तस्माद्वै
पर्याणह्यति ॥६॥ स पर्याणह्यति । "व्वनेषु व्यन्तरिक्षं तताने"ति
व्वनेषु हीदमन्तरिक्षं व्वितनं व्वृक्षाग्रेषु "व्वार्जमर्वत्सु पय ऽउस्रिया-
स्वि"ति व्वीर्यं वै व्वाजाः पुमाꣳसोऽर्व्वन्तः पुꣳस्वेवैतद्वीर्यं दधाति
पय ऽउस्रियास्विति पयो हीदमुस्रियासु हितꣳ "हृत्सु क्रतुं व्वरुणो
व्विक्ष्वग्नि"मिति हृत्सु ह्ययं क्रतुर्मनोजवः प्रविष्टो विक्ष्वग्निमिति
व्विक्षु ह्ययं प्रजास्वग्नि"र्दिवि सूर्यमदधात्सोममद्रा"विति दिवि ह्यसौ
सूर्यो हितः सोममद्राविति गिरिषु हि सोमस्तस्मादाह दिवि सूर्यम-
दधात्सोममद्राविति ॥७॥ अथ यदि द्वे कृष्णाजिने भवतः । तयोर-
न्यतरत्प्रत्यानह्यति प्रतीनाहभाजनं यद्युऽएकं भवति कृष्णाजिनग्रीवा
ऽएवावकृत्य प्रत्यानह्यति प्रतीनाहभाजनꣳ "सूर्यस्य चक्षुरारोहाग्ने-

---

१, २, ४. मा. सं. ४. ३०. ३. न इति. घ. ५. व्रतानीति ग. ङ.
६. इवैतत्पर्याणद्धमिति. ग ७, ८. मा. सं. ४. ३१. ९. मर्वत्सु इति. घ.
१०. पुꣳस्वेति. घ. ११, १३. मा. सं. ४. ३१. १२. विक्ष्वग्निमिति. ग.
१४. सोममद्रावितीति ग. ङ. १५. प्रतिनाह इति भाष्ये १६. मा. सं. ३. ३२.

रक्षणः कनीनकम् । यत्रैतशोभिरीयसे भ्राजमानो विपश्चिते"ति सूर्यमेवैतत्पुरस्तात्करोति सूर्यः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण परिवहन्ति ॥८॥ उद्धते प्रऽउग्ये फलके भवतः । तदन्तरेण तिष्ठन्त्सुब्रह्मण्यः प्राजति श्रेयान्वाऽएषोऽभ्यारोहाद्भवति को ह्येतमर्हत्यभ्यारोढुं तस्मादन्तरेण तिष्ठन् प्राजति ॥९॥ पलाशशाखया प्राजति । यत्र वै गायत्री सोममच्छापतत्तदस्याऽआहरन्त्याऽअपादस्ताभ्यायत्य पर्णं प्रचिच्छेद गायत्र्यै वा सोमस्य वा राज्ञस्तत्पतित्वा पर्णोऽभवत्तस्मात्पर्णो नाम तद्यदेवात्र सोमस्य न्यक्तं तदिहाप्यसदिति तस्मात्पलाशशाखया प्राजति ॥१०॥ अथानड्वाहावाजन्ति । तौ यदि कृष्णौ स्यातामन्यतरो वा कृष्णस्तत्र विद्याद्वर्षिष्यत्यैषमः पर्जन्यो वृष्टिमान् भविष्यतीत्येतदु विज्ञानम् ॥११॥ अथ युनक्ति । "उस्रावेतं धूर्षाहा"वित्युस्रौ हि भवतो धूर्षाहाविति धूर्वाहौ हि भवतो "युज्येथामनश्र"ऽइति युज्येते ह्यनश्रऽइत्यनार्ताविति त"दवीरहणा"वित्यपापकृताविति त"द्ब्रह्मचोदनावि"ति ब्रह्मचोदनौ हि भवतः "स्वस्ति यजमानस्य गृहान् गच्छत"मिति यथैनावन्तरा नाष्ट्रा रक्षाꣳसि न हिꣳस्युरेवमेतदाह ॥१२॥ अथ पश्चात्परिक्रम्य । अपालम्बमभिपद्याह 'सोमाय क्रीतायानुब्रूही'ति सोमाय पर्युह्यमाणायेति वातो यतरथा कामयेत ॥१३॥ अथ व्वाचयति । "भद्रो मेऽसि प्रच्यवस्व भुवस्पत"ऽइति भद्रो ह्यस्यैष भवति तस्मान्नान्यमाद्रियतेऽप्यस्य राजानः सभागाऽआगच्छन्ति पूर्वो राज्ञोऽभिवदति भद्रो हि भवति तस्मादाह भद्रो मेऽसीति प्रच्यवस्व भुवस्पतऽइति भुवनानाꣳह्येष पति "र्विश्वान्यभि धामानी"त्यङ्गानि वै विश्वानि धामान्यङ्गान्येवैतदभ्याह "मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा व्वृका ऽअघायवो विद"न्निति यथैनमन्तरा नाष्ट्रा रक्षाꣳसि न विन्देयुरेवमेतदाह ॥१४॥ "श्येनो भूत्वा परापते"ति । व्वयऽएवैन-

१. पुरस्तादिति. ग. २. सुब्रह्मण्या इति. क. ३. श्रेयान्वा इति. ग.

८–८ मा. सं. ४ ३३. ९–१२. मा. सं. ४. ३४.

मेतद्भूतं प्रपातयति यद्वाऽउग्रं तन्नाष्ट्रा रक्षाᳬसि नान्वयन्त्येतद्वै व्वयसामोजिष्ठं बलिष्ठं यच्छ्येनस्तमेवैतद्भूतं प्रपातयति यदाह श्येनो भूत्वा परापतेति ॥१५॥ अथ शरीरमेवान्वावहन्ति । "यजमानस्य गृहान् गच्छ तन्नौ सᳬस्कृत"मिति नात्र तिरोहितमिवास्ति ॥१६॥ अथ सुब्रह्मण्यामाह्वयति । यथा येभ्यः पक्ष्यन्त्स्यात्तान् ब्रूयादित्यहे वः पक्तास्मीत्येवमेवैतद्देवेभ्यो यज्ञं निवेदयति सुब्रह्मण्यो३ᳬ सुब्रह्मण्यो३मिति ब्रह्म हि देवान् प्रत्यावयति त्रिष्कृत्वऽआह त्रिवृद्धि यज्ञः ॥१७॥ "इन्द्रागच्छे"ति । इन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रागच्छेति "हरिवऽआगच्छ मेधातिथेर्मेष व्वृषणश्वस्य मेने । गौरावस्कन्दिन्नहल्यायै जारे"ति तद्यान्येवास्य चरणानि तैरेवैनमेतत्प्रमुमोदयिषति ॥१८॥ "कौशिक ब्राह्मण गौतम ब्रुवाणे"ति । शश्वद्धैतदारुणिनाधुनोपज्ञातं यद्गौतम ब्रुवाणेति स यदि कामयेत ब्रूयादेतद्यद्यु कामयेतापि नाद्रियेतेत्यहे सुत्यामिति यावदहे सुत्या भवति ॥१९॥ "देवा ब्रह्माण आगच्छते"ति । तद्देवांश्च ब्राह्मणांश्चाहैतैर्ह्यत्रोभयैरर्थो भवति यद्देवैश्च ब्राह्मणैश्च ॥२०॥ अथ प्रतिप्रस्थाता । अग्रेण शालामग्नीषोमीयेण पशुना प्रत्युपतिष्ठतेऽग्नीषोमौ वाऽएतमन्तर्जम्भऽआदधाते यो दीक्षतऽआग्नावैष्णवᳬ ह्यदो दीक्षणीयᳬ हविर्भवति यो वै व्विष्णुः सोमः स हविर्वाऽएष देवानां भवति यो दीक्षते तदेनमन्तर्जम्भऽआदधाते तत्पशुनात्मानं निष्क्रीणीते ॥२१॥ तद्धैके । आहवनीयादुल्मुकमाहरन्त्ययमग्निरयᳬ सोमस्ताभ्याᳬ सह सद्भ्यां निष्क्रेष्यामहऽइति व्व-

१. अन्वावहन्तीति काण्वीयः पाठः । आनयन्तीति तस्याऽर्थः । अयमेव पाठः 'क' पुस्तकेऽपि दृश्यते । ग.घ पुस्तकयोस्तु अन्ववहन्तीति पाठो दृश्यते, भाष्ये च ।

२. मा. सं. ४. ३४. ३. तान् इति घ. ४. पक्तास्मि इति. ग.

५. यज्ञ इति. ग. ङ. ६.८.९. षड्विं. १. १. २. ७. इन्द्रागच्छेति घ, आगच्छेति. ग.

६-९. तै. आ. १. १२. १०. अधुनोप इति. ग. ङ. ११. त्यहे इति. ग, घ, ङ.

१२. ब्राह्मणैरिति घ, ब्राह्मणैरिति. ग. ङ. १३. देवानामिति नाऽस्ति. ग ङ.

दन्तस्तदु तथा न कुर्याद्यत्र वाऽएतौ क्व च तत्सहैव ॥२२॥ स वै द्विरूपो भवति । द्विदेवत्यो हि भवति देवतयोरसमदे कृष्णसारङ्गः स्यादित्याहुरेतद्ध्यनयो रूपतममिवेति यदि कृष्णसारङ्गं न विन्देदथोऽअपि लोहितसारङ्गः स्यात् ॥२३॥ तस्मिन्वाचयति । "नमो मित्रस्य व्वरुणस्य चक्षसे महो देवाय तदृतꣳ सपर्यत। दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शꣳसते"ति नमऽएवास्माऽएतत्करोति मित्रधेयमेवनेनैतत्कुरुते ॥२४॥ अथाध्वर्युरारोहणं व्विमुञ्चति । "व्वरुणस्योत्तम्भनमसी"त्युपस्तम्भनेनोपस्तभ्नाति "व्वरुणस्य स्कम्भसर्जनी स्थ"ऽइति शम्येऽउद्वृहति स यदाह व्वरुणस्य स्कम्भसर्जनी स्थऽइति व्वरुण्यो ह्येषऽएतर्हि भवति यत्सोमः क्रीतः ॥२५॥ अथ चत्वारो राजासन्दीमाददते । द्वौ वाऽअस्मै मानुषाय राज्ञऽआददातेऽअथैतां चत्वारो योऽस्य सकृत्सर्वस्येष्टे ॥२६॥ औदुम्बरी भवति । अन्नं वाऽऊर्गुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्ध्यै तस्मादौदुम्बरी भवति ॥२७॥ नाभिदघ्ना भवति । अत्र वाऽअन्नं प्रतितिष्ठत्यन्नꣳ सोमस्तस्मान्नाभिदघ्ना भवत्यत्रोऽएव रेतसऽआशयो रेतः सोमस्तस्मादत्रदघ्ना भवति ॥२८॥ तामभिमृशति । "व्वरुणस्यऽऋतसदन्यसी"त्यथ कृष्णाजिनमास्तृणाति "व्वरुणस्यऽऋतसदनमसी"त्यथैनमासादयति "व्वरुणस्य ऽऋतसदनमासीदे"ति स यदाह व्वरुणस्यऽऋतसदनमासीदेति व्वरुण्यो ह्येषऽएतर्हि भवति ॥२९॥ अथैनꣳ शालां प्रपादयति । स प्रपादयन्वाचयति "यां ते धामानि हविषा यजन्ति ता ते व्विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्या"निति गृहा वै दुर्या गृहान्नः शिवः शान्तोऽपापकृत्प्रचरेत्येवैतदाह ॥३०॥ अत्र हैके । उदपात्रमुपनिन-

१. सहैव इति. ग. ङ. २. स वै इति. घ. ३. मा. सं. ४. ३५.
४. ५, मा. सं. ४.३६. ६. व्वरुण्यो इति. घ. ७-९. मा. सं. ४. ३६.
१०. मा. सं ४. ३७. ११. यजन्तीति. घ. १२. यज्ञमिति. ग, घ, ङ.

यन्ति यथा राज्ञऽआगतायोदकमाहरेदेवमेतदिति व्वदन्तस्तदु तथा न कुर्यान्मानुषꣳ ह ते[1] यज्ञे कुर्व्वन्ति व्यृद्धं वै तद्यज्ञस्य यन्मानुषं नेद्व्यृद्धं यज्ञे करवाणीति तस्मान्नोपनिनयेत् ॥ ३१ ॥ Cf. का. श. ४. ३. ४; तै. सं. ६. १. ११.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे तृतीयप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ३. ४.)

(तृतीयोऽध्यायः समाप्तः)

३. ३. २.

(आतिथ्येष्टिः)

शिरो वै यज्ञस्यातिथ्यं बाहू प्रायणीयोदयनीयौ । अभितो वै शिरो बाहू भवतस्तस्मादभित आतिथ्यमेते[2] हविषी भवतः प्रायणीयश्चोदयनीयश्च ॥१॥ अथ यस्मादातिथ्यं नाम[3] । अतिथिर्वाऽएष एतस्यागच्छति यत्सोमः क्रीतस्तस्माऽएतद्यथा राज्ञे वा ब्राह्मणाय वा महोक्षं वा महाजं वा पचेत्तदह मानुषꣳ हविर्देवानामेवमस्माऽएतदातिथ्यं करोति ॥२॥ तदाहुः । पूर्वोऽतीत्य गृह्णीयादिति यत्र वाऽअर्हन्तमागतं नापचायन्ति क्रुध्यति वै स तत्र तथा ह्यापचितो भवति ॥३॥ तद्वाऽअन्यतर[4] ऽएव व्विमुक्तः स्यात् । अन्यतरोऽविमुक्तोऽथ गृह्णीयात्स यदन्यतरो व्विमुक्तस्तेनागतो यद्वन्यतरोऽविमुक्तस्तेनापचितः ॥४॥ तदु तथा न कुर्यात् । व्विमुच्यैव प्रपाद्य गृह्णीयाद्यथा वै देवानां चरणं तद्वाऽअनु मनुष्याणां तस्मान्मानुषे यावन्न व्विमुञ्चते नैवास्मै तावदुदकꣳ हरन्ति नापचितिं कुर्व्वन्त्यनागतो हि स तावद्भवत्यथ यदैव व्विमुञ्चतेऽथास्माऽउदकꣳहरन्त्यथापचितिं कुर्व्वन्ति तर्हि हि सऽआगतो

१. ते इति. घ. २. आतिथ्यमेने इति. ग. ङ. ३. नाम इति घ.

४. See तै. सं. ६. २. १. 'विमुक्तोऽन्योनड्वान् भवत्यविमुक्तोऽन्योऽथाऽऽतिथ्यं गृह्णाति । मै. सं. ३. ७. ९. युक्तोऽन्योनड्वान् भवति विमुक्तोऽन्यः ।

भवति तस्माद्विमुच्यैव प्रपाद्य गृह्णीयात् ॥५॥ स वै संत्वरमाणऽइव गृह्णीयात्। तथा हापचितो भवति तत्पत्न्यन्वारभते पर्युह्यमाणं वै यजमानोऽन्वारभतेऽथात्र पत्न्युभयतऽएवैतन्मिथुनेनान्वारभेते यत्र वाऽअर्हन्नागच्छति सर्व्वगृह्याऽइव वै तत्र चेष्टन्ति तथा हापचितो भवति ॥६॥ स वाऽअन्येनैव ततो यजुषा गृह्णीयात्। येनो चान्यानि हवीꣳष्येकं वाऽएष भागं क्रीयमाणोऽभिक्रीयते छन्दसामेव राज्याय छन्दसाꣳ साम्राज्याय तस्य छन्दाꣳस्यभितः साचयानि यथा राज्ञो राजानो राजकृतः सूतग्रामण्य एवमस्य छन्दाꣳस्यभितः साचयानि ॥७॥ न वै तदवकल्पते। यच्छन्दोभ्यऽइति केवलं गृह्णीयाद्यत्र वाऽअर्हते पचन्ति तदभितः साचयोऽन्वाभक्ता भवन्त्यराजानो राजकृतः सूतग्रामण्यस्तस्माद्यत्रैवैतस्यै गृह्णीयात्तदेव छन्दाꣳस्यन्वाभजेत् ॥८॥ स गृह्णाति। "अग्नेस्तनूरसि विष्णवे त्वे"त्यग्निर्व्वै गायत्री तद्गायत्रीमन्वाभजति ॥९॥ "सोमस्य तनूरसि विष्णवे त्वे"ति। क्षत्रं वै सोमः क्षत्रं त्रिष्टुप्त्रिष्टुभमन्वाभजति ॥१०॥ "अतिथेरातिथ्यमसि विष्णवे त्वे"ति। सोऽस्योद्धारो यथा श्रेष्ठस्योद्धारऽएवमस्यैषऽऋते छन्दोभ्यः ॥११॥ "श्येनाय त्वा सोमभृते विष्णवे त्वे"ति। तद्गायत्रीमन्वाभजति सा यद्गायत्री श्येनो भूत्वा दिवः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवैनामेतद्वीर्येण द्वितीयमन्वाभजति ॥१२॥ "अग्नये त्वा रायस्पोषदे विष्णवे त्वे"ति। पशवो वै रायस्पोषः पशवो जगती तज्जगतीमन्वाभजति ॥१३॥ अथ यत्पञ्चकृत्वो गृह्णाति। संवत्सरसम्मितो वै यज्ञः पञ्च वाऽऋतवः संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्चकृत्वो गृह्णास्यथ यद्विष्णवे त्वा विष्णवे त्वेति गृह्णाति विष्णवे हि गृह्णाति यो यज्ञाय गृह्णाति ॥१४॥ नवकपालः पुरोडाशो भवति। शिरो वै यज्ञस्यातिथ्यं नवाक्षरा वै गायत्र्यष्टौ तानि यान्यन्वाह प्रणवो नवमः

१. एतस्मै इति. क. २-६. मा सं. ५ १. ७. रायस्पोषदे इति. घ.

पूर्वोर्धो वै यज्ञस्य गायत्री पूर्वार्धऽएष यज्ञस्य तस्मान्नवकपालः पुरोडाशो भवति ॥१५॥ कार्ष्मर्यमयाः परिधयः । देवा ह वाऽएतं व्वनस्पतिषु राक्षोघ्नं ददृशुर्यत्कार्ष्मर्यꣳ शिरो वै यज्ञस्यातिथ्यं नेच्छिरो यज्ञस्य नाष्ट्रा रक्षाꣳसि हिनसान्निति तस्मात्कार्ष्मर्यमयाः परिधयो भवन्ति ॥१६॥ आश्ववालः प्रस्तरः । यज्ञो ह देवेभ्योऽपचक्राम सोऽश्वो भूत्वा पराङावर्त्त तस्य देवा ऽअनुहाय व्वालानभिपेदुस्तानालुलुपुस्तानालुप्य सार्धꣳ संन्यासुस्ततऽएता ओषधयः समभवन्यदश्ववालाः शिरो वै यज्ञस्यातिथ्यं जघनार्धो व्वालाऽउभयतऽएवैतद्यज्ञं परिगृह्णाति यदाश्ववालः प्रस्तरो भवति ॥१७॥ ऐक्षव्यौ व्विधृती । नेद्वर्हिश्च प्रस्तरश्च संलुभ्यात ऽइत्यथोत्पूयाज्यꣳसर्व्वाण्येव चतुर्गृहीतान्याज्यानि गृह्णाति न ह्यत्रानुयाजा भवन्ति ॥१८॥ आसाद्य हवीꣳष्यग्निं मन्थति । शिरो वै यज्ञस्यातिथ्यं जनयन्ति वाऽएनमेतद्यन्मन्थन्ति शीर्षतो वाऽअग्रे जायमानो जायते शीर्षतऽएवैतदग्रे यज्ञं जनयत्यग्निर्वै सर्वा देवताऽअग्नौ हि सर्वाभ्यो देवताभ्यो जुह्वति शिरो वै यज्ञस्यातिथ्यꣳ शीर्षत ऽएवैतद्यज्ञꣳ सर्वाभिर्देवताभिः समर्धयति तस्मादग्निं मन्थति ॥१९॥ सोऽधिमन्थनꣳ शकलमादत्ते । "अग्नेर्जनित्रमसी"त्यत्र ह्यग्निर्जायते तस्मादाहाग्नेर्जनित्रमसीति ॥२०॥ अथ दर्भतरुणके निदधाति । "व्वृषणौ स्थ"ऽइति तद्यावेवेमौ स्त्रियै साकंजावेतावेवैतौ ॥२१॥ अथाधरारणिं निदधाति "उर्वश्यसी"त्यथोत्तरारण्याज्यविलापनमुपस्पृशत्या"युरसी"ति तामभिनिदधाति "पुरूरवा ऽअसी"त्युर्वशी वाऽअप्सराः पुरूरवाः पतिरथ यत्तस्मान्मिथुनादजायत तदायुरेवमेवैष ऽएतस्मान्मिथुनाद्यज्ञं जनयत्यथाहा'ग्नये मथ्यमानायानुब्रूही'ति ॥२२॥ स मन्थति । "गायत्रेण त्वा छन्दसा मन्थामि । त्रैष्टुभेन त्वा छन्दसा मन्थामि । जागतेन त्वा छन्दसा मन्थामी"ति तं वै छन्दोभिरेव मन्थति छन्दाꣳसि

---

१. मा.सं. ५. २. २. मसीति. ग. ३–१. मा.सं. ५. २.

मथ्यमानायान्वाह छन्दाꣳ स्येवैतद्यज्ञमन्वायातयति यथामुमादित्यꣳ रश्मयो जातायानुब्रूहीत्याह यदा जायते प्रह्रियमाणायेत्यनुप्रहरꣳ ॥२३॥ सोऽनुप्रहरति । "भवतं नः समनसौ सचेतसावरेपसौ । मा यज्ञꣳ हिꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य न"ऽइति शान्तिमेवाभ्यामेतद्वदति यथा नान्योऽन्यꣳ हिꣳस्यातां ॥२४॥ अथ स्रुवेणोपहत्याज्यम् । अग्निमभिजुहोत्य"ग्नावग्निश्चरति प्रविष्टऽऋषीणां पुत्रोऽभिशस्तिपावा । स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहे"त्याहुत्यै वाऽएतमजीजनत तमेतयाहुत्याप्रैषीत्तस्मादेवमभिजुहोति ॥२५॥ तदिडान्तं भवति । नानुयाजान्यजन्ति शिरो वै यज्ञस्यातिथ्यं पूर्वार्धो वै शिरः पूर्वार्धमेवैतद्यज्ञस्याभिसꣳस्करोति स यद्धानुयाजान्यजेद्यथा शीर्षतः पर्याहृत्य पादौ प्रतिदध्यादेवं तत्तस्मादिडान्तं भवति नानुयाजान्यजन्ति ॥२६॥ Cf. का. श. ४. ४. १; तै. सं. ६. २ १; मै. सं. ३. ७. ९; काठ. सं २४. ८; कपि. सं. ३८. १; ऐ. ब्रा. १. १४; शां. ब्रा. ८. १, २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे तृतीयप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ४. १.)

३. ३. ३.

(तानूनप्त्रस्पर्शः)

आतिथ्येन वै देवाऽइष्ट्वा । तान्त्सिमदविन्दत्ते चतुर्धा व्यद्रवन्नन्योऽन्यस्य श्रिया ऽआतिष्ठमानाऽअग्निर्व्वसुभिः सोमो रुद्रैर्व्वरुणऽआदित्यैरिन्द्रो मरुद्भिर्बृहस्पतिर्विश्वैर्देवैरित्यु हैकऽआहुरेते ह त्वेव ते विश्वे देवा ये ते चतुर्धा व्यद्रवंस्तान्विद्रुतानसुररक्षसान्य-

१. जाताय इति. घ. ग. २. प्रहरन्. इति. ग. ३. मा. सं. ५. ३.
४. मा. सं. ५. ४. ५. संस्करोतीति. क. ६. पर्याहृत्य इति. घ.
७. इष्ट्वा इति. ग. ङ. ८. See तै. सं. ६. २. २. १ "बृहस्पतिर्विश्वैर्देवैः"

नुव्यवेयुः ॥१॥ तेऽविदुः । पापीयाᳬसो वै भवामोऽसुररक्षसानि वै नोऽनुव्यवागुर्द्विषद्भ्यो वै रध्यामो हन्त संजानामहाऽएकस्य श्रियै तिष्ठामहाऽइति तऽइन्द्रस्य श्रियाऽअतिष्ठन्त तस्मादाहुरिन्द्रः सर्व्वा देवताऽइन्द्रश्रेष्ठा देवाऽइति ॥२॥ तस्मादु ह न स्वाऽऋतीयेरन् । यऽएषां परस्तरामिव भवति स ऽएनाननुव्यवैति ते प्रियं द्विषतां कुर्वन्ति द्विषद्भ्यो रध्यन्ति तस्मान्नर्त्तीयेरन्स यो हैवं विद्वान्नर्त्तीयतेऽप्रियं द्विषतां करोति न द्विषद्भ्यो रध्यति तस्मान्नर्तीयेत ॥३॥ ते होचुः । हन्तेदं तथा करवामहै यथा नऽइदमाप्रदिवमेवाजर्यमसदिति ॥४॥ (शतम् १७००) ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धᳬ समवददिरे ते होचुरेतेन नः स नानासदेतेन व्विष्वङ् यो नऽएतदतिक्रामादिति कस्योपद्रष्टुरिति तनूनप्तुरेव शाक्करस्येति यो वाऽअयं पवतऽएष तनूनपाच्छाक्करः सोऽयं प्रजानामुपद्रष्टा प्रविष्टस्ताविमौ प्राणोदानौ ॥५॥ तस्मादाहुः । मनो देवा मनुष्यस्याजानन्तीति मनसा संकल्पयति तत्प्राणमुपिपद्यते प्राणो व्वातं व्वातो देवेभ्यऽआचष्टे यथा पुरुषस्य मनः ॥६॥ तस्मादेतदृषिणाभ्यनूक्तम् । मनसा संकल्पयति तद्वातमपिगच्छति व्वातो देवेभ्यऽआचष्टे यथा पुरुष ते मनऽइति ॥७॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धᳬ समवददिरे ते होचुरेतेन नः स नानासदेतेन व्विष्वङ् यो न ऽएतदतिक्रामादिति तद्देवाऽअप्येतर्हि नातिक्रामन्ति के हि स्युर्यदतिक्रामेयुरनृतᳬ हि व्वदेयुरेकᳬ ह वै देवा व्रतं चरन्ति सत्यमेव तस्मादेषां जितमनपजय्यं तस्माद्यशऽएवᳬ ह वाऽअस्य जितमनपजय्यमेवं यशो भवति यऽएवं विद्वान्त्सत्यं व्वदति तदेतत्तानूनप्त्रं निदानेन ॥८॥ ते देवाः । जुष्टास्तनूः प्रियाणि धामा-

१. तेऽविदुरिति. क. २. तऽइन्द्रस्येति. ग. ङ. ३. देवा इति. ग. ङ.
४. प्राणोदानौ इति. ग. ङ. ५. संकल्पयतीति. ग. ६. आचष्टे इति. घ.
७. विष्वङ्यो इति. घ. ८. तद्देवा इति. ग. ९. क्रामन्तीति .

नि सार्धꣳ समवददिरेऽथैतऽआजान्येव गृह्णाना जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवद्यन्ते तस्मादु ह नः सर्वेणेव समभ्यवेयान्नेन्मे जुष्टास्तन्वः प्रियाणि धामानि सार्धꣳ समभ्यवायानिति येनो ह समभ्यवेयान्नास्मै द्रुह्येदिदꣳ ह्याहुर्न सतानूनप्त्रिणे द्रोग्धव्यमिति ॥९॥ अथातो गृह्णात्येव । "आपतये त्वा परिपतये गृह्णामी"ति यो वाऽअयं पवतऽएष आ च पतति परि च पतत्येतस्माऽउ हि गृह्णाति तस्मादाहापतये त्वा परिपतये गृह्णामीति ॥१०॥ "तनूनप्त्रे शाक्वराये"ति । यो वाऽअयं पवतऽएष तनूनप्ता शाक्वरऽएतस्माऽउ हि गृह्णाति तस्मादाह तनूनप्त्रे शाक्वरायेति ॥११॥ "शक्वनऽओजिष्ठाये"ति । एष वै शक्वौजिष्ठऽएतस्माऽउ हि गृह्णाति तस्मादाह शक्वनऽओजिष्ठायेति ॥१२॥ अथातः समवमृशन्त्येव । एतद्ध देवा भूयः समामिरऽइत्थं नः सोऽमुथासद्यो नऽएतदतिक्रामादिति तथोऽएवैतऽएतत्सममन्तऽइत्थं नः सोऽमुथासद्यो नऽएतदतिक्रामादिति ॥१३॥ ते समवमृशन्ति । "अनाधृष्टमस्यनाधृष्यं देवानामोजऽ"इत्यनाधृष्टा हि देवाऽआसन्ननाधृष्याः सह सन्तः समानं वदन्तः समानं दधाना "देवानामोजऽ"इति देवानां वै जुष्टास्तन्वः प्रियाणि धामान्यनभिशस्त्य "भिशस्तिपाऽअनभिशस्तेन्य"मिति सर्वाꣳ हि देवाऽअभिशस्ति तीर्णा "अञ्जसा सत्यमुपगेष"मिति सत्यं वदानि मेदमतिक्रमिषमित्येवैतदाह "स्विते मा धा"ऽइति स्विते हि तद्देवाऽआत्मानमदधत यत्सत्यमवदन्यत्सत्यमकुर्वंस्तस्मादाह स्विते मा धाऽइति ॥१४॥ अथ यास्तद्देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे तदिन्द्रे संन्यदधतैष वाऽइन्द्रो य एष तपति न ह वाऽएषोऽग्रे तताप यथा हैवेदमन्यत्कृष्णमेवꣳ हैवास तेनैवैतद्वीर्येण तपति तस्माद्यदि बहवो दीक्षेरन् गृहपतयऽएव व्रतमभ्युत्सिच्य प्रयच्छेयुः स हि तेषामिन्द्रभाजनं भवति यद्यु दक्षिणावता दीक्षेत

---

१. मिति इति. ग. मिति इति. घ. २-१०. मा. सं. ५. ५. ५. ओजिष्ठायेति. ग.

यजमानायैव व्रतमभ्युत्सिच्य प्रयच्छेयुरिद ँ ह्याहुरिन्द्रो यजमानऽइति ॥१५॥ अथ यास्तद्देवाः । जुष्टास्तनूः प्रियाणि धामानि सार्धँ समवददिरे तत्सार्धꣳ संजग्मे तत्सामाभवत्तस्मादाहुः सत्यꣳ साम देवजꣳ सामेति ॥१६॥ Cf का. श. ४. ४. २.; तै. स. ६. २. २; मै. सं. ३. ७. १०; काठ. सं. २४. ९; कपि. सं. ३८. २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे तृतीयप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ४. २.)

३. ३. ४.

(अवान्तरदीक्षा)

आतिथ्येन वै देवाऽइष्ट्वा । तान्त्समदविन्दत्ते तानूनमैः समशाम्यंस्तऽएतस्य प्रायश्चित्तिमैच्छन्यदन्योन्यं पापमवदन्नाह पुरावभृथात्पुनर्दीक्षामवाकल्पयंस्तऽएतामवान्तरां दीक्षामपश्यन् ॥१॥ तेऽग्निनैव त्वचं व्विपल्याङ्गयन्त । तपो वाऽअग्निस्तपो दीक्षा तदवान्तरां दीक्षामुपायंस्तद्यदवान्तरां दीक्षामुपायंस्तस्मादवान्तरदीक्षा सन्तरामङ्गुलीराञ्चन्त सन्तरां मेखलां पर्यस्तामेवैनामेतत्सतीं पर्यास्यन्त तथोऽएवैष एतद्यदतः प्राचीनमव्रत्यं वा करोत्यव्रत्यं वा व्वदति तस्यैवैतत्प्रायश्चित्तिं कुरुते ॥२॥ सोऽग्निनैव त्वचं व्विपल्यङ्गयते । तपो वाऽअग्निस्तपो दीक्षा तदवान्तरां दीक्षामुपैति संतरामङ्गुलीरचते संतरां मेखलां पर्यस्तामेवैनामेतत्सतीं पर्यस्यते प्रजामु हैव तद्देवाऽउपायन् ॥३॥ तेऽग्निनैव त्वचं व्विपल्याङ्गयन्त । अग्निर्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपायन्त्संतरामङ्गुलीराञ्चन्त संतरां मेखलां तत्प्रजामात्मन्नकुर्वत तथोऽएवैष ऽएतत्प्रजामेवोपैति ॥४॥ सोऽग्निनैव त्वचं व्विपल्यङ्गयते । अग्निर्व्वै मिथुनस्य कर्ता प्रजनयिता तत्प्रजामुपैति संतरामङ्गुलीरचते संतरां मेखलां तत्प्रजामात्मन् कुरुते

१. इति ग, इति. घ. २. तत्सार्धँ इति. घ. ३. कुरुते ग. कुरुते घ.

॥५॥ देवानामु ह स्म दीक्षितानाम् । यः सामिद्धारो वा स्वाध्यायं वा व्विसृजते तꣳ ह स्मेतरस्यैवेतरꣳ रूपेणेतरस्येतरमसुररक्षसानि जिघाꣳसन्ति ते ह पापं व्वदन्तऽउपसमेयुरिति वै मां त्वमचिकीर्षीरिति मा जिघाꣳसीरित्यग्निर्हैव तथा नान्यमुवादाग्निं तथा नान्यः ॥६॥ ते होचुः । अपीत्थं त्वामग्नेऽवादिषू३रिति नैवाहमन्यं न मामन्यऽइति ॥७॥ तेऽविदुः । अयं वै नो व्विरक्षस्तमोऽस्यैव रूपमसाम तेन रक्षाꣳस्यति मोक्ष्यामहे तेन स्वर्गं लोकꣳ समश्नुविष्यामह इति तेऽग्नेरेव रूपमभवंस्तेन रक्षाꣳ स्यत्यमुच्यन्त तेन स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैषऽएतदग्नेरेव रूपं भवति तेन रक्षाꣳस्यतिमुच्यते तेन स्वर्गं लोकꣳसमश्नुते स वै समिधमेवाभ्यादधदवान्तरदीक्षामुपैति ॥८॥ स समिधमभ्यादधाति । "अग्ने व्व्रतपास्त्वे व्व्रतपा"ऽइत्यग्निर्हि देवानां व्रतपतिस्तस्मादाहाग्ने व्रतपास्त्वे व्रतपाऽइति "यां तव तनूरियꣳसा मयि यो मम तनूरेषा सा त्वयि । सह नौ व्व्रतपते व्व्रतानी"ति तदग्निना त्वचं व्विपल्यङ्क्यते-ऽ"नु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पति"रिति तदवान्तरां दीक्षामुपैति संतरामङ्गुलीरचते संतरां मेखलां पर्यस्तामेवैतत्सतीं पर्यस्यते ॥९॥ अथैनमतो मदन्तीभिरुपचरन्ति । तपो वाऽअग्निस्तपो मदन्त्यस्तस्मादेनं मदन्तीभिरुपचरन्ति ॥१०॥ अथ मदन्तीभिरुपस्पृश्य । राजानमाप्याययन्ति तद्यन्मदन्तीरुपस्पृश्य राजानमाप्याययन्ति व्व्रज्रो वाऽआज्यꣳरेतः सोमो नेद्व्रज्रेणाज्येन रेतः सोमꣳ हिनसामेति तस्मान्मदन्तीरुपस्पृश्य राजानमाप्याययन्ति ॥११॥ तदाहुः । यस्माऽएतदाप्यायनं क्रियतऽआतिथ्यꣳ सोमाय तमेवाग्रऽआप्याययेयुरथावान्तरदीक्षामथ तानूनमाणीति तदु तथा न कुर्याद्यज्ञस्य वाऽएवं कर्मात्र वाऽएनान्त्समदविन्दत्ते सꣳशममेव पूर्वमुपायन्नथावान्तरदीक्षामथाप्यायनम् ॥१२॥ तद्यदाप्याययन्ति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोमऽआसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्त-

१. विसृज्यते इति. घ. २—४. मा. सं. ५. ६. ५. कर्मात्र इति. घ

देषोऽशानानामौषधिर्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्ति तां दीक्षोपसद्भिस्तानूनप्त्रैराप्यायनेन सोमं कुर्वन्तीति तथोऽएवैनामेषऽएतद्दीक्षोपसद्भिस्तानूनप्त्रैराप्यायनेन सोमं करोति ॥१३॥ मधु सारघमिति वाऽआहुः । यज्ञो ह वै मधु सारघमथैतऽएव सरघो मधुकृतो यद्दत्विजस्तद्यथा मधु मधुकृतऽआप्याययेयुरेवमेवैतद्यज्ञमाप्याययन्ति ॥१४॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्येषामियं जितिस्ते होचुः कथं नऽइदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम ॥१५॥ तद्वाऽऋषीणामनुश्रुतमास । ते यज्ञꣳसमभरन्यथायं यज्ञस्सम्भृत ऽएवं वाऽएष यज्ञꣳ सम्भरति यो दीक्षते व्वाग्वै यज्ञस्तद्यदेवात्र यज्ञस्य निर्धीतं यद्विदुग्धं तदेवैतत्पुनराप्याययति ॥१६॥ ते वै षड्भूत्वाप्याययन्ति । षड्वाऽऋतवऽऋतवऽएवैतद्भूत्वाप्याययन्ति ॥१७॥ तऽआप्याययन्ति । "अꣳशुरꣳशुष्टे देव सोमाप्यायता"मिति तदस्याꣳशुमꣳशुमेवाप्याययन्ती"न्द्रायैकधनविद"ऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेत्येकधनाविदऽइति शतꣳ शतꣳ ह स्म वाऽएष देवान् प्रत्येकैक ऽएवाꣳशुरेकधनानाप्यायते दश दश "वा तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वे"तीन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तामेवैतदा प्याययत्या त्वमिन्द्राय प्यायस्वेति तदेतस्मिन्नाप्यायनं दधात्या "प्यायया[१]स्मान्त्सखीन्त्सन्या मेधये"ति स यत्सनोति तत्तदाह यत्सन्येत्यथ यदनुब्रूते तदु तदाह यन्मेधयेति "स्वस्ति[२] ते देव सोम सुत्यामशीये" त्येका वाऽएतेषामाशीर्भवत्यृत्विजां च यजमानस्य च यज्ञस्योद्दचं गच्छेमेति यज्ञस्योद्दचं गच्छानीत्येवैतदाह ॥१८॥ अथ प्रस्तरे निह्नुवते । उत्तरतऽउपचारो वै यज्ञोऽथैतद्दक्षिणेनान्वित्याप्याययन्त्यग्निर्व्वै यज्ञस्त-

१. तस्माद्यूप इति. ग. २. षड्भूत्वेति. घ.

३-७. मा. सं. ५. ७. ८. दक्षिणेनेति. क

द्यज्ञं पृष्ठतः कुर्व्वन्ति[1] तन्मिथ्याकुर्वन्ति देवेभ्यऽआवृश्च्यन्ते यज्ञो वै प्रस्तरस्तद्यज्ञं पुनरारभन्ते तस्यो हैषा प्रायश्चित्तिस्तथो[2] हैषामेतन्न मिथ्या कृतं भवति न देवेभ्य ऽआवृश्च्यन्ते तस्मात्प्रस्तरे निह्नुवते ॥१९॥ तदाहुः । अक्ते निन्हुवीरा३ ननक्ता३ऽइत्यनक्ते ह्येव निन्हुवीरन्ननुप्रहरणꣳ ह्येवाक्तस्य ॥२०॥ ते निह्नुवते । "एष्टा रायः प्रेषे भगायऽऋतमृतवादिभ्य"ऽइति सत्यꣳ सत्यवादिभ्य ऽइत्येवैतदाह "नमो द्यावापृथिवीभ्या"मिति तदाभ्यां द्यावापृथिवीभ्यां निह्नुवते ययोरिदꣳ सर्वमधि[5] ॥२१॥ अथा ह समुल्लुप्य प्रस्तरम् । 'अग्नीन्मदन्त्यापा'३ऽइति मदन्तीत्यग्नीदाह ताभिरेहीत्युपर्यग्निमतिहरति[6] स यन्नानुप्रहरत्येतेन ह्यतऽऊर्ध्वान्यहानि प्रचरिष्यन् भवत्यथ यदुपर्युपर्यग्निमतिहरति तदेवास्यानुप्रहृतभाजनं भवति तमग्नीधे प्रयच्छति तमग्नीन्निदधाति ॥२२॥ Cf. का. श. ४. ४. ३; मै. सं. ३. ७. १०; तै. सं. ६. २. २; काठ. सं. २४. ९; कपि. सं. ३८. २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे तृतीयप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ४. ३.)

३. ३. ५.

(उपसदः)

ग्रीवा वै यज्ञस्योपसदः शिरः प्रवर्ग्यः । तस्माद्यदि प्रवर्ग्यवान् भवति प्रवर्ग्येण प्रचर्याथोपसद्भिः प्रचरन्ति तद्ग्रीवाः प्रतिदधाति ॥१॥ तद्याः पूर्वाह्णेऽनुवाक्या भवन्ति । ता अपराह्णे[7] याज्या या याज्यास्ता ऽअनुवाक्यास्तद्व्यतिषजति तस्मादिमानि ग्रीवाणां पर्वाणि व्यतिषक्तानीमान्यस्थीनि ॥२॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुरा ऽएषु लोकेषु पुरश्चक्रिरेऽयस्मयीमेवास्मिंल्लोके रजतामन्तरिक्षे हरिणीं दिवि ॥३॥ तद्वै देवाऽअस्पृण्वत । तऽ

---

१ कुर्वत इति. क. घ. २. तथो इति. घ. ३, ४. मा. सं. ५. ७
५. सर्वमधि इति. ग. ङ. ६. अग्निमतिहरतीति ग. घ. ७. अपराह्णे इति. घ.

एताभिरुपसद्भिरुपासीदंस्तद्यदुपासीदंस्तस्मादुपसदो नाम ते पुरः प्राभिन्दन्निमांल्लोकान् प्राजयंस्तस्मादाहुरुपसदा पुरं जयन्तीति यद्दो-पासते तेनेमां मानुषीं पुरं जयन्ति ॥४॥ एताभिर्व्वै देवा उपसद्भिः। पुरः प्राभिन्दन्निमांल्लोकान् प्राजयंस्तथोऽएवैष ऽएतन्नाहैवास्माऽअ-स्मिंल्लोके कश्चन पुरः कुरुतऽइमानेवैतल्लोकान् प्रभिनत्तीमांल्लोकान् प्रजयति तस्मादुपसद्भिर्यजते ॥५॥ ता वाऽआज्यहविषो भवन्ति। व्वज्रो वाऽआज्यमेतेन वै देवा व्वज्रेणाज्येन पुनः प्राभिन्दन्निमांल्लो-कान् प्राजयंस्तथोऽएवैषऽएतेन व्वज्रेणाज्येनेमांल्लोकान् प्रभिनत्तीमां-ल्लोकान् प्रजयति तस्मादाज्यहविषो भवन्ति ॥६॥ स वाऽअष्टौ कृत्वो जुह्वां गृह्णाति। चतुरुपभृत्यथोऽइतरथाहुश्चतुरेव कृत्वो जुह्वां गृह्णी-यादष्टौ कृत्व उपभृतीति ॥७॥ स वाऽअष्टावेव कृत्वो जुह्वां गृह्णाति। चतुरुपभृति तद्वज्रमभिभारं करोति तेन व्वज्रेणाभिभारेणेमांल्लोकान् प्रभिनत्तीमांल्लोकान् प्रजयति ॥८॥ अग्नीषोमौ वै देवानाꣳ सयुजौ[1]। ताभ्याꣳ सार्धं गृह्णाति व्विष्णव ऽएकाकिनेऽन्यतरमेवाघारमाघार-यति यꣳ स्रुवेण प्रतिक्रामति वाऽउत्तरमाघारमाघार्याभिजित्याऽअ-भिजयानीति तस्मादन्यतरमेवाघारमाघारयति यꣳ स्रुवेण ॥९॥ अ-थाश्राव्य न होतारं प्रवृणीते। 'सीद होत'रित्येवाहोपविशति होता होतृषदनऽउपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादत्ते ॥१०॥ सऽ-आहातिक्रामन्न'ग्नयेऽनुब्रूही'ति। आश्राव्याहा'ग्निं यजे'ति व्वषट्कृते जुहोति॥११॥ अथाह 'सोमायानुब्रूही'ति। आश्राव्याह 'सोमं यजे'ति व्वषट्कृते जुहोति ॥१२॥ अथ यदुपभृत्याज्यं भवति। तत्समानय-मान ऽआह 'व्विष्णवेऽनुब्रूही'त्याश्राव्याह व्विष्णुं यजे'ति व्वषट्कृते जुहोति ॥१३॥ स यत्समानत्र तिष्ठन् जुहोति। न यथेदं प्रचरन्त्संच-रत्यभिजित्या अभिजयानीत्यथ यदेता देवता यजति व्वज्रमेवैतत्सꣳ[2]स्करोत्यग्निमनीकꣳ सोमꣳ शल्पं व्विष्णुं कुलमलꣳ ॥१४॥ संव-

१. सयुजौ इति घ.　　२. संस्करोतीति. क.

त्सरो हि व्वज्रः । अग्निर्व्वाऽअहः सोमो रात्रिरथ यदन्तरेण तद्विष्णुरेतद्वै परिप्लवमानꣳ संवत्सरं करोति ॥१५॥ संवत्सरो व्वज्रः । एतेन वै देवाः संवत्सरेण व्वज्रेण पुरः प्राभिन्दन्निमांल्लोकान् प्राजयंस्तथोऽएवैषऽएतेन संवत्सरेण व्वज्रेणेमांल्लोकान् प्रभिनत्तीमांल्लोकान् प्रजयति तस्मादेता देवता यजति ॥१६॥ स वै तिस्रऽउपसदऽउपेयात् । त्रयो वाऽऋतवः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति द्विरेकया प्रचरति द्विरेकया ॥१७॥ ताः षट् सम्पद्यन्ते । षड्वाऽऋतवः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्स स्करोति ॥१८॥ यद्यु द्वादशोपसदऽउपेयात् । द्वादश वै मासाः संवत्सरस्य संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति द्विरेकया प्रचरति द्विरेकया ॥१९॥ ताश्चतुर्व्विꣳशतिः सम्पद्यन्ते । चतुर्व्विꣳशतिर्व्वै संवत्सरस्यार्धमासाः संवत्सरस्यैवैतद्रूपं क्रियते संवत्सरमेवैतत्सꣳस्करोति ॥२०॥ स यत्सायम्प्रातः प्रचरति । तथा ह्येव सम्पत्सम्पद्यते स यत्पूर्व्वाह्णे प्रचरति तज्जयत्यथ यदपराह्णे प्रचरति सुजितमसदित्यथ यज्जुहोतीदं वै पुरं युध्यन्ति तां जित्वा स्वाꣳ सतीं प्रपद्यन्ते ॥२१॥ स यत्प्रचरति । तद्युध्यत्यथ यत्संतिष्ठते तज्जयत्यथ यज्जुहोति स्वामेवैतत्सतीं प्रपद्यते ॥२२॥ स जुहोति । यया द्विरेकस्याह्नः प्रचरिष्यन् भवति "यां तेऽअग्नेऽयःशया तनूर्व्वर्षिष्ठा गह्वरेष्ठा । उग्रं व्वचोऽअपावधीत्त्वेषं व्वचोऽअपावधीत्स्वाहे"त्येवꣳरूपा हि सासीदयस्मयी हि सासीत् ॥२३॥ अथ जुहोति यया द्विरेकस्याह्नः प्रचरिष्यन् भवति "यां तेऽअग्ने रजःशया तनूर्व्वर्षिष्ठा गह्वरेष्ठा । उग्रं वचोऽअपावधीत्वेषं व्वचोऽअपावधीत्स्वाहे"त्येवꣳरूपा हि सासीद्रजता हि सासीत्॥२४॥अथ जुहोति यया द्विरेकस्याह्नः प्रचरिष्यन् भवति "यां तेऽअग्ने हरिशया तनूर्व्व-

१. परिप्लवमानमिति. घ. २. संवत्सरस्यैतद्रूपं इति. घ.

३-६. संस्करोतीति. क. ७.-९. मा. सं. ५. ८.

र्षिष्ठा गह्वरेष्ठा । उग्रं व्वचो अपावधीत्वेषं व्वचोऽअपावधीत्स्वाहे"-त्येव ँरूपा हि सासीद्धारिणी हि सासीद्यद्यु द्वादशोपसद ऽउपेयाच्च-तुरहमेकया प्रचरेच्चतुरहमेकया ॥२५॥ अथातो व्वतोपसदामेव । परऽउर्वीर्व्वाऽअन्याऽउपसदः परोऽह्नीरन्याः स यासामेकं प्रथमाहं दोग्ध्यथ द्वावथ त्रींस्ताः परऽउर्वीरथ यासां त्रीन् प्रथमाहं दोग्ध्यथ द्वावथैकं ता परोह्नीर्या वै परोह्नीस्ताः परऽउर्व्वीर्याः परऽउर्व्वीस्ताः परोऽह्नीः ॥२६॥ तपसा वै लोकं जयन्ति । तदस्यैतत्परः परऽएव व्वरीयस्तपो भवति परः परः श्रेयाँसं लोकं जयति व्वसीयानु हैवास्मिँल्लोके भवति यऽएवं व्विद्वान् परोह्नीरुपसदऽउपैति तस्मादु परोह्नीरेवोपसद ऽउपेयाद्यद्यु द्वादशोपसदऽउपेयात्त्रींश्चतुरहं दोह-येद्द्वौ चतुरहमेकं चतुरहम् ॥२७॥ (Cf. का. श. ४. ४. ४; तै. सं. ६. २. ३–५; मै. सं. ३. ८. १, २; काठ. सं. २४. १० and २५. १; कपि. सं. ३८. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
तृतीयप्रपाठके पञ्चमं ब्राह्मणम् ॥

तृतीयः प्रपाठकस्समाप्तः ॥

(कण्डिकासंख्या १२१)

(इति चतुर्थोऽध्यायः)

३. ४. १.

(महावेदिनिर्माणम्)

तद्यऽएष पूर्वार्ध्यो व्वर्षिष्ठः स्थूणाराजो भवति । तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमांस्तच्छङ्कुं निहन्ति सोऽन्तःपातः ॥१॥ तस्मान्म-ध्यमाच्छङ्कोः । दक्षिणा पञ्चदश व्विक्रमान् प्रक्रामति तच्छङ्कुं नि-हन्ति सा दक्षिणा श्रोणिः ॥२॥ तस्मान्मध्यमाच्छङ्कोः । उदङ् पञ्च-दश व्विक्रमान् प्रक्रामति तच्छङ्कुं निहन्ति सोत्तरा श्रोणिः ॥३॥

१. चतुरहमिति. क.

तस्मान्मध्यमाच्छङ्कोः । प्राङ् षट्त्रिꣳशतं विक्रमान् प्रक्रामति तच्छङ्कुं निहन्ति स पूर्वार्धः ॥४॥ तस्मान्मध्यमाच्छङ्कोः । दक्षिणा द्वादश विक्रमान् प्रक्रामति तच्छङ्कुं निहन्ति स दक्षिणोऽꣳसः ॥५॥ तस्मान्मध्यमाच्छङ्कोः । उदङ् द्वादश विक्रमान् प्रक्रामति तच्छङ्कुं निहन्ति सऽउत्तरोऽꣳस एषा मात्रा व्वेदेः ॥६॥ अथ यत्त्रिꣳशद्विक्रमा पश्चाद्भवति । त्रिꣳशदक्षरा वै व्विराड्विराजा वै देवाऽअस्मिंल्लोके प्रत्यतिष्ठंस्तथोऽएवैष एतद्विराजैवास्मिंल्लोके प्रतितिष्ठति ॥७॥ अथोऽअपि त्रयस्त्रिꣳशत्स्युः । त्रयस्त्रिꣳशदक्षरा वै व्विराड्विराजैवास्मिंल्लोके प्रतितिष्ठति ॥८॥ अथ यत्षट्त्रिꣳशद्विक्रमा प्राची भवति । षट्त्रिꣳशदक्षरा वै बृहती बृहत्या वै देवाः स्वर्गं लोकꣳ समाश्नुवत तथोऽएवैष एतद्बृहत्यैव स्वर्गं लोकेꣳ समश्नुते सोऽस्य दिव्याहवनीयो भवति ॥९॥ अथ यच्चतुर्व्विꣳशतिविक्रमा पुरस्ताद्भवति । चतुर्व्विꣳशत्यक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्व्वार्धऽएष यज्ञस्य तस्माच्चतुर्विꣳशतिविक्रमा पुरस्ताद्भवत्येषा मात्रा व्वेदेः ॥१०॥ अथ यत्पश्चाद्वरीयसी भवति । पश्चाद्वरीयसी पृथुश्रोणिरिति वै योषां प्रशꣳसन्ति यद्वेव पश्चाद्वरीयसी भवति पश्चादेवैतद्वरीयः प्रजननं करोति तस्मात्पश्चाद्वरीयसः प्रजाननादिमाः प्रजाः प्रजायन्ते ॥११॥ नासिका ह वाऽएषा यज्ञस्य यदुत्तरवेदिः । अथ यदेनामुत्तरां व्वेदेरुपकिरति तस्मादुत्तरवेदिर्नाम ॥१२॥ द्वय्यो ह वाऽइदमग्रे प्रजाऽआसुः । आदित्याश्चैवाङ्गिरसश्च ततोऽङ्गिरसः पूर्व्वे यज्ञꣳसमभरंस्ते यज्ञꣳ सम्भृत्योचुरग्निमिमां नः श्वः सुत्यामादित्येभ्यः प्रब्रूह्यनेन नो यज्ञेन याजयतेति ॥१३॥ ते हादित्याऽऊचुः । उपजानीत यथास्मानेवाङ्गिरसो याजयान्न वयमङ्गिरसऽइति ॥१४॥ ते होचुः । न वाऽअन्येन यज्ञादपक्रमणमस्त्यन्तरामेव सुत्यां ध्रियामहाऽइति ते यज्ञꣳ संजह्रुस्ते यज्ञꣳ सम्भृत्योचुः श्वः सुत्यां वै त्व-

१. पश्चादिति. क. २. प्रशसन्ति. इति क. ग. ३. जयान्न इति ग.

मस्मभ्यमग्ने प्रावोचोऽथ व्वयमद्य सुत्यामेव तुभ्यं प्रब्रूमोऽङ्गिरोभ्यश्च तेषां नस्त्वꣳ होतासीति ॥१५॥ तेऽन्यमेव प्रतिप्रजिघ्युः । अङ्गिरसोऽच्छ ते हाप्यङ्गिरसोऽग्नयेऽन्वागत्य चुक्रुधुरिव कथं नु नो दूतश्चरन्न प्रत्यादृथाऽइति ॥१६॥ स होवाच । अनिन्द्या वै मावृषत सोऽनिन्द्यैर्वृतो नाशकमपक्रमितुमिति तस्मादु हानिन्द्यस्य व्वृतो नापक्रामेत्तऽएतेन सद्यःक्रियाङ्गिरस ऽआदित्यानयाजयन्त्स सद्यःक्रीः ॥१७॥ तेभ्यो व्वाचं दक्षिणामानयन् । तां न प्रत्यगृह्णन्हास्यामहे यदि प्रतिग्रहीष्याम ऽइति तदु तद्यज्ञस्य कर्म न व्यमुच्यत यद्दाक्षिणमासीत् ॥१८॥ अथैभ्यः सूर्यं दक्षिणामानयन् । तं प्रत्यगृह्णंस्तस्मादु ह स्माहुरङ्गिरसो व्वयं वाऽआर्त्विजीनाः स्मो व्वयं दाक्षिणीयाऽअपि वाऽस्माभिरेष प्रतिगृहीतो यऽएष तपतीति तस्मात्सद्यःक्रियोऽश्वः श्वेतो दक्षिणा ॥१९॥ तस्य रुक्मः पुरस्ताद्भवति । तदेतस्य रूपं क्रियते यऽएष तपति यद्यश्वꣳ श्वेतं न विन्देदपि गौरेव श्वेतः स्यात्तस्य रुक्मः पुरस्ताद्भवति तदेतस्य रूपं क्रियते यऽएष तपति ॥२०॥ तेभ्यो ह व्वाक्चुक्रोध। केन मदेष श्रेयान् बन्धुना३केना३ यदेतं प्रत्यग्रहीष्ट न मामिति सा हैभ्योऽपचक्राम सोभयानन्तरेण देवासुरान्त्संयत्तान्त्सिꣳ ह्री भूत्वाददाना चचार तामुपैव देवाऽअमन्त्रयन्तोपासुराऽअग्निरेव देवानां दूत ऽआस सहरक्षाऽइत्यसुररक्षसमसुराणाꣳ ॥२१॥ सा देवानुपावर्त्स्यन्त्युवाच । यद्वऽउपावर्तेय किं मे ततः स्यादिति पूर्वामेव त्वाग्नेराहुतिः प्राप्स्यसीत्यथ हैषा देवानुवाच यां मया कां चाशिषमाशासिष्यध्वे सा वः सर्व्वा समर्धिष्यतऽइति सैवं देवानुपाववर्त ॥२२॥ स यद्धार्यमाणे ऽग्नौ । उत्तरवेदिं व्याघारयति यदेवैनामद्रो देवा ऽअब्रुवन् पूर्व्वा त्वाग्नेराहुतिः प्राप्स्यतीति तदेवैनामेतत्पूर्वामग्नेराहुतिः प्राप्नोति व्वाग्घ्येषा निदानेनाथ यदुत्तरवेदिमुपकिरति यज्ञस्यैव सर्व्वत्वाय व्वाग्घि

१. तुभ्यमिति. ग. २. दक्षिणीया इति ग. घ.
३. यद्यश्वमिति ग. ४. श्वेतः इति ग. घ.

यज्ञो व्वागु ह्येषा ॥२३॥ तां वै युगशम्येन व्विमिमीते । युगेन यत्र हरन्ति शम्यया यतो हरन्ति युगशम्येन वै योग्यं युञ्जन्ति सा यदेवादः सिꣳहो भूत्वा शान्तेवाचरत्तदेवैनामेतद्यज्ञे युनक्ति ॥२४॥ तस्मान्निवृत्तदक्षिणां न प्रतिगृह्णीयात् । सिꣳहो हैनं भूत्वा क्षिणोति नो हा मा कुर्व्वीत सिꣳहो हैवैनं भूत्वा क्षिणोति नो हान्यस्मै दद्याद्यज्ञं तदन्यत्रात्मनः कुर्व्वीत तस्माद्यो ऽस्यापि पापऽइव समानबन्धुः स्यात्तस्माऽएनां दद्यात्स यद्ददाति तदेनꣳ सिꣳहो भूत्वा न क्षिणोति यदु समानबन्धवे ददाति तदु नान्यत्रात्मनः कुरुतऽ एषो निवृत्तदक्षिणाया प्रतिष्ठा ॥२५॥ अथ शम्यां च स्फ्यं चादत्ते । तद्यऽएष पूर्वार्ध्यऽउत्तरार्ध्यः शङ्कुर्भवति तस्मात्प्रत्यङ् प्रक्रामति त्रीन्विक्रमांस्तच्चात्वालं परिलिखति सा चात्वालस्य मात्रा नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येताग्रेणोत्करं तच्चात्वालं परिलिखेत् ॥२६॥ स व्वेद्यन्तात् । उदीचीꣳ शम्यां निदधाति स परिलिखति "तमायनी मे ऽसी"तीमामेवैतदाहास्याꣳहि तम एति ॥२७॥ अथ पुरस्तात् । उदीचीꣳ शम्यां निदधाति स परिलिखति "व्विवृत्तायनी मे ऽसी"तीमामेवैतदाहास्याꣳ हि व्विविदान एति ॥२८॥ अथानुवेद्यन्तम् । प्राचीꣳशम्यां निदधाति स परिलिखत्य"वतान्मा नाथिता"दितीमामेवैतदाह यत्र नाथैतन्मावतादिति ॥२९॥ अथोत्तरतः । प्राचीꣳशम्यां निदधाति स परिलिखत्य"वतान्मा व्यथिता"दितीमामेवैतदाह यत्र व्यथैतन्मावतादिति ॥३०॥ अथ हरति । यत्र हरति तदग्नीदुपसीदति स वाऽअग्नीनामेव नामानि गृह्णन्हरति यान्वाऽअमून्देवा अग्रेऽग्नीन् होत्राय प्रावृणत ते प्राधन्वंस्तऽइमा एव पृथिवीमुपासर्पन्निमामहैव द्वेऽअस्याः परे तेनैवैतन्निदानेन हरति ॥३१॥ स प्रहरति । "व्विदेदग्निर्नभो नामाग्नेऽअङ्गिर ऽआयुना नाम्नेहीति" स यत्प्राधन्वंस्तदायुर्दधाति तत्समीरयति "योऽस्यां पृथिव्यामसी"ति

१. नान्यत्रेति. ग. २. प्रतिष्ठा इति. घ. ३. चात्वालमिति ग.
४, ६. मा. सं. ५. ९. ५, ७. एति. इति. घ, एति. ग. ८–११. मा. सं. ५. ९.

योऽस्यां पृथिव्यामसीति हृत्वा निदधाति "यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वादधऽ"इति यत्तेऽनाधृष्टꣳरक्षोभिर्नाम यज्ञियं तेन त्वादधऽ-इत्येवैतदाहा"नु त्वा देववीतय"ऽइति चतुर्थꣳ हरति देवेभ्यस्त्वा जुष्टाꣳहरामीत्येवैतदाह तां वै चतुःस्रक्तेश्चात्वालाद्धरति चतस्रो वै दिशः सर्वाभ्य ऽएवैनामेतद्दिग्भ्यो हरति ॥३२॥ अथानुव्यूहति । "सिꣳह्यसि सपत्नसाही देवेभ्यः कल्पस्वे"ति सा यदेवादः सिꣳही भूत्वा शान्तेवाचरत्तदेवैनामेतदाह सिꣳह्यसीति सपत्नसाहीति त्वया व्वयꣳ सपत्नान् पापीयसः क्रियास्मेत्येवैतदाह देवेभ्यः कल्पस्वेति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यः कल्पयति ॥३३॥ तां वै युगमात्रीं वा सर्वतः करोति । यजमानस्य वा दश दश पदानि दशाक्षरा वै व्विराड्वाग्वै व्विराड्वाग्यज्ञो मध्ये नाभिकामिव करोति समानत्रासीनो व्याघारयाणीति ॥३४॥ तामद्भिरभ्युक्षति । सा यदेवादः सिꣳही भूत्वा शान्तेवाचरच्छान्तिरापस्तामद्भिः शमयति योषा वाऽउत्तरवेदिस्तामेवैतद्देवेभ्यो हिन्वति तस्मादद्भिरभ्युक्षति ॥३५॥ सोऽभ्युक्षति । "सिꣳह्यसि सपत्नसाही देवेभ्यः शुन्धस्वे"त्यथ सिकताभिरनुविकरत्यलङ्कारो न्वेव सिकता भ्राजन्तऽइव हि सिकता अग्नेर्वाऽएतद्वैश्वानरस्य भस्म यत्सिकताऽअग्निं वाऽअस्यामाधास्यन् भवति तथो हैनामग्निर्न हिनस्ति तस्मात्सिकताभिरनु विकिरति सोऽनुऽविकिरति "सिꣳह्यसि सपत्नसाही देवेभ्य शुम्भस्वे"त्यथैनां छादयति सा छन्नैताꣳरात्रिं व्वसति ॥३६॥ Cf. का. श. ४. ५. १; तै. सं. ६. २. ४–७; मै. सं. ३. ८. ३, ४; कपिष्ठ. सं. ३९. १–५; काठ. सं. २५. ४–६

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे चतुर्थप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ५. १.)

१, २. मा. सं. ५. ९. ३–५. मा. सं. ५. १०.

३. ४. २.

(अग्निप्रणयनादि)

इध्यमभ्यादधाति । उपयमनीरुपकल्पयन्त्याज्यमधिश्रयति स्रुवं च 'स्रुचं च संमार्ष्ट्यथोत्पूयाज्यं पञ्चगृहीतं गृह्णीते यदा प्रदीप्त इध्मो भवति ॥१॥ अथोद्यच्छन्तीध्मम्[2]। उपयच्छन्त्युपयमनीरथाहा'ग्नये प्रहियमाणायानुब्रूहीकस्फ्यया[3]नूदेही'त्यनूदेति प्रतिप्रस्थातैकस्फ्ययैतस्मान्मध्यमाच्छङ्कोर्य एष ब्वेदेर्जघनार्धे भवति तद्यदेवात्रान्तःपातेन गार्हपत्यस्य ब्वेदेर्व्यवच्छिन्नं भवति तदेवैतदनुसन्तनोति ॥२॥ तद्धैके[4]। ओत्तरवेदेरनूदायन्ति तदु तथा न कुर्यादेवैतस्मान्मध्यमाच्छङ्कोरनूदेयात्तऽआयन्त्यागच्छन्त्युत्तरवेदिम्[5] ॥३॥ (शतम् १८००) पोक्षणीरध्वर्युरादत्ते । सपुरस्तादेवाग्रे प्रोक्षत्युदङ् तिष्ठन्नि''न्द्रघोषस्त्वा ब्वसुभिः पुरस्तात्पात्वि''तीन्द्रघोषस्त्वा ब्वसुभिः पुरस्ताद्गोपायत्विव्त्येवैतदाह[7] ॥४॥ अथ पश्चात्प्रोक्षति[8] । ''प्रचेतास्त्वा रुद्रैः पश्चात्पात्वि''ति प्रचेतास्त्वा रुद्रैः पश्चाद्गोपायत्वित्येवैतदाह ॥५॥ अथ दक्षिणतः प्रोक्षति । ''मनोजवास्त्वा पितृभिर्दक्षिणतः पात्वि''ति मनोजवास्त्वा पितृभिर्दक्षिणतो गोपायत्वित्येवैतदाह ॥६॥ अथोत्तरतः प्रोक्षति । ''विश्वकर्मा त्वादित्यैरुत्तरतः पात्वि''ति विश्वकर्मा त्वादित्यैरुत्तरतो गोपायत्वित्येवैतदाह ॥७॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । तद्येऽएते पूर्वे स्रक्ती तयोर्या दक्षिणा तान्यन्तेन बहिर्ब्वेदि निनयती''दमहं तप्तं ब्वार्बहिर्धा यज्ञान्निःसृजामी''ति सा यदेवादः सिंहीं भूत्वाशान्तेवाचरत्तामेवास्याऽएतच्छुचं बहिर्धा यज्ञान्निःसृजति[13] यदि नाभिचरेद्यद्युऽअभिचरेदादिशेदि'दमहं तप्तं ब्वारमुमभिनिःसृजामी'ति तमेतया शुचा ब्विध्यति स शोचन्नेवामुं लोकमेति ॥८॥ स

१ स्रुचं च संमार्ष्ट्यथ इति ग. घ. २. इध्ममिति ग. ङ.

३ ब्रूहीकस्फ्यया इति. ग. ४. तद्धैके इति. ग.

५. वेदिम् इति ग. ७. आह इति. ग. घ. ८. प्रोक्षति. ग.

६, ९-१२ मा. सं. ५. ११. १३. यज्ञान्निस्सृजतीति. ग. घ.

यद्धार्यमाणेऽग्नौ । उत्तरवेदिं व्याघारयति यदेवैनामदो देवाऽअब्रुवन् पूर्वां त्वाग्नेराहुतिः प्राप्स्यतीति तदेवैनामेतत्पूर्वामग्नेराहुतिः प्राप्नोति यद्वेषा देवानब्रवीद्यां मया कां चाशिषमाशासिष्यध्वे सा वः सर्वा समर्धिष्यतऽइति तामेनयात्रर्त्विजो यजमानायाशिषमाशासते सास्मै सर्वा समृध्यते ॥९॥ तद्वा ऽएतदेकं कुर्वन्द्वयं करोति । यदुत्तरवेदिं व्याघारयत्यथ यैषां मध्ये नाभिकेव भवति तस्यै ये पूर्वे स्रक्ती तयोर्या दक्षिणा ॥१०॥ तस्यामाघारयति । "सिꣳह्यसि स्वाहे"त्यथापरयोरुत्तरस्याꣳ "सिꣳह्यस्यादित्यवनिः स्वाहे"त्यथापरयोर्दक्षिणस्याꣳ "सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहे"ति वह्नी वै यजुःष्वाशास्तिद्ब्रह्म च क्षत्रं चाशास्तऽउभे व्वीर्ये ॥११॥ अथ पूर्वयोरुत्तरस्याꣳ । "सिꣳह्यसि सुप्रजावनी रायस्पोषवनिः स्वाहे"ति तत्प्रजामाशास्ते यदाह सुप्रजावनिरिति रायस्पोषवनिरिति भूमा वै रायस्पोषस्तद्भूमानमाशास्ते ॥१२॥ अथ मध्यऽआघारयति । "सिꣳह्यस्यावह देवान् यजमानाय स्वाहे"ति तद्देवान्यजमानायावाहयत्यथ स्रुचमुद्यच्छति "भूतेभ्यस्त्वे"ति प्रजा वै भूतानि प्रजाभ्यस्त्वेत्येवैतदाह ॥१३॥ अथ परिधीन् परिदधाति । "ध्रुवोऽसि पृथिवीं दृꣳहे"ति मध्यमं "ध्रुवोऽक्षिदस्यन्तरिक्षं दृꣳहे"ति दक्षिणम "च्युतक्षिदसि दिवं दृꣳहे"त्युत्तर "मग्नेः पुरीषमसी"ति सम्भारानुपानिवपति तद्यत्सम्भारा भवन्त्यग्नेरेव सर्वत्वाय ॥१४॥ शरीरꣳ हैवास्य पीतुदारु तद्यत्पीतुदारवाः परिधयो भवन्ति शरीरेणैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१५॥ माꣳ सꣳ हैवास्य गुल्गुलु । तद्यद्गुल्गुलु भवति माꣳ सेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१६॥ गन्धो हैवास्य सुगन्धितेजनम् । तद्यत्सुगन्धितेजनं भवति गन्धेनैवैनमेतत्समर्धयति कृत्स्नं करोति ॥१७॥ अथ यद्वृष्णेस्तुका भवति । व्वृष्णेर्ह वै[14] व्वि-

१. प्राप्स्यतीति. ग २–४. मा. स. ५. १२. ५. स्वाहेति ग.
६, ७, ९. मा. सं. ५. १२. ८. स्रुचमिति. ग. घ.
१०–१३. मा. स. ५. १३. १४ वै. इति. घ.

पाणेऽअन्तरेणाग्निरेकाꣳ रात्रिमुवास तद्यदेवात्राग्नेर्यक्तं तदिहाप्यस-दिति तस्माद्वृष्णे स्तुका भवति तस्माद्या शीर्ष्णे नेदिष्ठꣳस्यात्तामा-च्छिद्याहरेद्यद्यु तां न विन्देदपि यामेव कां चाहरेत्तद्यत्परिधयो भव-न्ति गुप्त्या ऽ एवादृरऽइव ह्येनमुत्तरे परिधयऽआगच्छन्ति ॥१८॥

Cf. का. श ४. ५. २: तै. सं. ६. २. ८: मै. सं. ३. ८. ५; काठ. सं. २५. ६: कपि. सं. ३९. ३, ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे चतुर्थप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ५. २.)

३. ४. ३.

(सदोहविर्धाननिर्माणादि)

पुरुषो वै यज्ञः । पुरुषस्तेन यज्ञो यदेनं पुरुषस्तनुतऽएष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥१॥ शिरऽएवास्य हविर्धानम् । व्वैष्णवं देवतयाथ यदस्मिन्त्सोमो भवति हविर्व्वै देवानाꣳ सोमस्तस्माद्धविर्धानं नाम ॥२॥

(*अर्द्धकाण्डम् ॥४३०॥)

मुखमेवास्याहवनीयः । स यदाहवनीये जुहोति यथा मुखऽ-आसिञ्चेदेवं तत् ॥३॥ स्तुप एवास्य यूपः । बाहूऽएवास्याग्नीध्रीयश्च मार्जालीयश्च ॥४॥ उदरमेवास्य सदः । तस्मात्सदसि भक्षयन्ति य-द्धीदं किंचाश्नन्त्युदरऽएवेदꣳ सर्व्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वे देवाऽअसीदंस्तस्मात्सदो नाम तऽउऽएवास्मिन्नेते ब्राह्मणा व्विश्व-गोत्राः सीदन्ति ॥५॥ अथ यावेतौ जघनेनाग्नी । पादावेवास्यैतावेष वै तायमानो यावानेव पुरुषस्तावान्विधीयते तस्मात्पुरुषो यज्ञः ॥६॥ उभयतो द्वारꣳ हविर्धानं भवति । उभयतो द्वारꣳ सदस्तस्मादयं

१. भवति. इति. घ. २. यज्ञ इति. ग. ३. विधीयत इति. घ.

* इयमर्धकाण्डसंख्याऽत्र काण्डे लिखिता । साऽपि क पुस्तक एव ।

४. असीदन इति. ग. ५. यावेतौ इति. ग.

पुरुष आन्तꣳ संतृण्णः प्रणिक्ते हविर्धानेऽउपतिष्ठते ॥७॥ ते समववर्तयन्ति । दक्षिणेनैव दक्षिणमुत्तरेणोत्तरं यद्वर्षीयस्तद्दक्षिणꣳ स्यात् ॥८॥ तयोः समववृत्तयोः । छदिरधि निदधाति यदि छदिर्न विन्देयुश्छदिःसम्मितां वा भित्तिं प्रत्यानह्यन्ति रराभ्यां परिश्रयन्त्युच्छ्रायीभ्यां छदिः पश्चादधि निदधाति छदिःसम्मितां वा भित्तिम् ॥९॥ अथ पुनः प्रपद्य चतुर्गृहीतमाज्यं गृहीत्वा सावित्रं प्रसवाय जुहोति सविता वै देवानां प्रसविता सवितृप्रसूताय यज्ञं तनवामहाऽइति तस्मात्सावित्रं जुहोति ॥१०॥ स जुहोति । "युञ्जते मनऽउत युञ्जते धिय"ऽइति मनसा च वै वाचा च यज्ञं तन्वते स यदाह युञ्जते मनऽइति तन्मनो युनक्त्युत युञ्जते धियऽइति तद्वाचं युनक्ति धियाधिया ह्येतया मनुष्या जुज्यूषन्त्यनूक्तेनेव प्रकामोद्येनेव गाथाभिरिव ताभ्यां युक्ताभ्यां यज्ञं तन्वते ॥११॥ "विप्रा विप्रस्य बृहतो विपश्चित"ऽइति । ये वै ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते विप्रास्तानेवैतदभ्याह बृहतो विपश्चितऽइति यज्ञो वै बृहन्विपश्चिद्यज्ञमेवैतदभ्याह "विप्रा होत्रा दधे वयुनाविदेकऽइदि"ति विप्र हि होत्रा दधते यज्ञं तन्वाना "मही देवस्य सवितुः परिष्टुतिः स्वाहे"ति तत्सावित्रं प्रसवाय जुहोति ॥१२॥

(अर्द्धप्रपाठकः ॥६६॥)

अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । उपनिष्क्रामति दक्षिणया द्वारा पत्नीं निष्क्रामयन्ति स दक्षिणस्य हविर्धानस्य दक्षिणायां व्वर्तन्याꣳ हिरण्यं निधाय जुहाती "दं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳ सुरे स्वाहे"ति सꣳस्रवं पत्न्यै पाणावानयति साक्षस्य सन्तापमुपानक्ति "देवश्रुतौ देवेष्वाघोषते"मिति प्रय-

१. उपतिष्ठत इति. ग. २. वाभितिं इति. ग, वा इति नाऽस्ति. क.
३, ४, ६. मा. सं. ५. १४. ५. तदभ्याह इति ग. घ. ७. इदिति. घ.
८. यज्ञमिति. क. ९. मा. सं. ५. १४. १०. निष्क्रमयन्तीति. क.
११. मा. सं. ५. १५. १२. पदमूइति. ग. १३. मा. सं. ५. १७.

च्छति प्रतिप्रस्थात्रे स्रुचं चाज्यविलापनीं च पर्याणयन्ति पत्नीमुभौ जघनेनाग्नी ॥१३॥ चतुर्गृहीतमाज्यं गृहीत्वा । प्रतिप्रस्थातोत्तरस्य हविर्धानस्य दक्षिणायां व्यर्तन्याᳬं हिरण्यं निधाय जुहोती"रावती धेनुमती हि भूतᳬं सूयवसिनी मनवे दशस्या । व्यस्कभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः स्वाहे"ति सᳬस्रवं पत्न्यै पाणावानयति साक्षस्य सन्तापमुपानक्ति "देवं श्रुतौ देवेष्वा घोषत"मिति तद्यदेवं जुहोति ॥ १४ ॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयांचक्रुः व्वज्रो वाऽआज्यं तऽएतेन व्वज्रेणाज्येन दक्षिणतो नाष्ट्रा रक्षाᳬं स्यवाघ्नं स्तथैषां नियानं नान्ववायंस्तथोऽएवैष ऽएतेन व्वज्रेणाज्येन दक्षिणतो नाष्ट्रा रक्षाᳬंस्यवहन्ति तथास्य नियानं नान्ववयन्ति तद्यद्वैष्णवीभ्यामृग्भ्यां जुहोति वैष्णवᳬं हि हविर्धानम् ॥१५॥ अथ यत्पत्न्यक्षस्य संतापमुपानक्ति । प्रजननमेवैतत्क्रियते यदा वै स्त्रियै च पुᳬसश्च सन्तप्यतेऽथ रेतः सिच्यते तत्ततः प्रजायते परागुपानक्ति पराग्ध्येव रेतः सिच्यतेऽथाह हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूहीति ॥१६॥ अथ व्वाचयति । "प्राची प्रेतमध्वरं कल्पयन्ती"ऽइत्यध्वरो वै यज्ञः प्राची प्रेतं यज्ञं कल्पयन्तीऽइत्येवैतदाहो "र्ध्वं यज्ञं नयतं मा जिह्वरत"मित्यूर्ध्वमिमं यज्ञं देवलोकं नयतमित्येवैतदाह मा जिह्वरतमिति तदेतस्माऽअह्वलामा शास्ते समुद्रहेव प्रवर्तयेयुर्यथा नोत्सर्जेतामसुर्या वाऽएषा व्वाग्याक्षे नेदिहासुर्या वाग्वदादिति यद्युत्सर्जेताम् ॥१७॥ एतद्वाचयेत् । "स्वं गोष्ठमावदतं देवी दुर्ये आयुर्मा निर्वादिष्टं प्रजां मा निर्व्वादिष्टमि"ति तस्यो हैषा प्रायश्चित्तिः ॥१८॥ तदाहुः । उत्तरवेदेः प्रत्यङ् प्रक्रामेत्त्रीन्विक्रमांस्तद्धविर्धाने स्थापयेत्सा हविर्धानयोर्मात्रेति नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत नाहैव सत्रात्यन्तिके नोदूरे तत्स्थापयेत् ॥१९॥

१. मा. सं. ५. १६ २ दशस्या इति ग. ३. मा. सं. ५. १७.
४. यत्पत्न्यक्षस्येति घ. ५ सिच्यते इति ग. ६-८. मा. सं. ५. १७.
९. देवी दुर्ये इति घ. १०. नाम इति. ग. ङ.

तेऽअभिमन्त्रयते[1] । "अत्रे[2] रमेथां व्वर्ष्मन् पृथिव्या"इति व्वर्ष्म ह्येतत्पृथिव्यै भवति दिवि ह्यस्याहवनीयो भवति नभ्यस्थे करोति तद्धि क्षेमस्य रूपम्[3] ॥२०॥ अथोत्तरेण पर्येत्याध्वर्युः । दक्षिणꣳ हविर्धानमुपस्तभ्नाति "व्विष्णोर्नु[4] कं व्वीर्याणि प्रवोचं यः पार्थिवानि व्विममे रजाꣳसि । योऽअस्कभायदुत्तरꣳसधस्थं व्विचक्रमाणस्त्रेधोरुगायो व्विष्णवे त्वे"ति मेथीमुपनिहन्तीतरतस्ततो यदु च मानुषे ॥२१॥ अथ प्रतिप्रस्थाता[5] । उत्तरꣳ हविर्धानमुपस्तभ्नाति "दिवो[6] वा व्विष्णऽउत वा पृथिव्या महो वा व्विष्णऽउरोरन्तरिक्षात् । उभा हि हस्ता व्वसुना पृणस्वाप्रयच्छ दक्षिणादोत सव्याद्विष्णवे त्वे"ति मेथीमुपनिहन्तीतरतस्ततो यदुच मानुषे तद्यद्वैष्णवैर्यजुर्भिरुपचरन्ति वैष्णवꣳ हि हविर्धानम् ॥२२॥ अथ मध्यमं छदिरुपस्पृश्य व्वाचयति । "प्र[7] तद्विष्णुस्तवते व्वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः[8] । यस्योरुषु त्रिषु व्विक्रमणेष्वधिक्षियन्ति भुवनानि व्विश्वे"तीदꣳ हैवास्यैतच्छीर्षकपालं यदिदमुपरिष्टाद्धीव ह्येतत्क्षियन्त्यन्यानि शीर्षकपालानि तस्मादाहाधिक्षियन्तीति ॥२३॥ अथ रराट्यामुपस्पृश्य व्वाचयति । "विष्णो[9] रराटमसी"ति ललाटꣳ हैवास्यैतदथोच्छ्रायाऽउपस्पृश्य व्वाचयति "व्विष्णोः[10] श्नप्त्रे[11] स्थ"ऽइति सक्थे हैवास्यैतेऽअथ यदिदं पश्चाच्छदिर्भवतीदꣳ हैवास्यैतच्छीर्षकपालं यदिदं पश्चात्[12] ॥२४॥ अथ लस्पूजन्या स्पन्द्यया प्रसीव्यति । "व्विष्णोः[13] स्यूरसी"त्यथ ग्रन्थिं करोति "व्विष्णो[14] ध्रुवोऽसी"ति नेद्व्यवपद्याताऽइति तं प्रकृते कर्मन्विष्यति तथोहाध्वर्युं वा यजमानं वा ग्राहो न विन्दति[15] तन्निष्ठितमभिमृशति "व्वैष्णवमसी"[16]-

---

१. मन्त्रयते इति घ. २. मा. सं. ५. १७. ३. रूपमिति. ग.
४. मा. सं. ५. १८. ५. प्रतिप्रस्थता इति. ग, प्रतिप्रस्थाता. घ.
६. मा. सं. ५. १९. ७. मा. सं. ५. २०. ८. गिरिष्ठा इति ग.
९. मा. सं. ५. २१. १०. एतदथो इति घ. १२. पश्चात् इति ग.
११, १३, १४, १६. मा. सं. ५. २१. १५. विन्दतीति घ.

ति व्वैष्णवꣳ हि हविर्धानम् ॥२५॥ Cf. का. श. ४. ५. ३; तै. सं. ६. २. ९; मै. सं. ३. ८. ७; काठ. सं. २५. ८; कपि.सं.४०.१.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे चतुर्थप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ५. ३.)

३. ४. ४.

(उपरवनिर्माणम्)

द्वय वाऽअभ्युपरवाः खायन्ते[1]। शिरो वै यज्ञस्य हविर्धानं तद्यऽइमे शीर्षश्चत्वारः कृपाऽइमावह द्वाविमौ द्वौ तानेवैतत्करोति[2] तस्मादुपरवान् खनति ॥१॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततोऽसुराऽएषु लोकेषु कृत्यां व्वलगान्निचख्नुरुतैवं चिद्देवानभि भवेमेति ॥२॥ तद्वै देवाऽअस्पृण्वत । तऽएतैः कृत्यां व्वलगानुदखनन्यदा वै कृत्यामुत्खनन्त्यथ सालसामोघा भवति तथोऽएषैषऽएतद्यद्यस्माऽअत्र कश्चिद्द्विषन् भ्रातृव्यः कृत्यां व्वलगान्निखनाति तानेवैतदुत्किरति तस्मादुपरवान् खनति स दाक्षिणस्य हविर्धानस्याधोऽधः प्रउगं खनति[3] ॥३॥ सोऽभ्रिमादत्ते । "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसी"ति समानऽएतस्य यजुषो बन्धुर्योपो वाऽएषा यदभ्रिस्तस्मादाह नार्यसीति ॥४॥ तान् प्रादेशमात्रं विना परिलिखति । "इदमहꣳ रक्षसां ग्रीवाऽअपिकृन्तामी"ति व्वज्रो वाऽअभ्रिर्व्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां ग्रीवाऽअपिकृन्तति ॥५॥ तद्यावेतौ पूर्वौ । तयोर्दक्षिणमेवाग्रे परिलिखेदथापरयोरुत्तरमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरम् ॥६॥ अथोऽइतरथाहुः । अपरयोरेवाग्रऽउत्तरं परिलिखेदथ पूर्वयोर्दक्षिणमथापरयोर्दक्षिणमथ पूर्वयोरुत्तरमित्यथोऽअपि समीचऽएव परिलिखेदेतं त्वेवोत्तमं परिलिखेद्यऽएष पूर्वयोरुत्तरो भवति ॥७॥ तां यथा परिलिखितमेव यथापूर्वं खनति । "बृहन्नसि बृहद्रवा"ऽइत्युपस्तौत्येवैना-

१. ख्यायन्त इति. ग. २. तानेवैतत्करोतीति. घ. ३. खनतीति. घ.

४, ५, ७. मा. सं. ५.२२. ६. पूर्वयोरिति घ. ८. इत्यु इति. ग. घ.

नेतन्महयत्येव यदाह बृहन्नसि बृहद्रवाऽइति "बृहतीमिन्द्राय व्वाचं व्वदे"तीन्द्रो वै यज्ञस्य देवता व्वैष्णवꣳ हविर्धानं तत्सेन्द्रं करोति तस्मादाह बृहतीमिन्द्राय व्वाचं व्वदेति ॥८॥ "रक्षोहणं व्वलगहन" मिति । रक्षसाꣳ ह्येते व्वलगानां व्वधाय खायन्ते "व्वैष्णवी"मिति व्वैष्णवी हि हविर्धाने व्वाक् ॥९॥ तान्यथाखातमेवोत्किरति । "इदमहं तं व्वलगमुत्किरामि यं मे निष्ट्योयममात्यो निचखाने"ति निष्ट्यो वा वाऽअमात्यो वा कृत्यां व्वलगान्निखनति तानेवैतदुत्किरति ॥१०॥ "इदमहं तं व्वलगमुत्किरामि । यं मे समानो यमसमानो निचखाने"ति समानो वा वाऽअसमानो वा कृत्यां व्वलगान्निखनति तानेवैतदुत्किरति ॥११॥ "इदमहं तं व्वलगमुत्किरामि । यं मे सबन्धुर्यमसबन्धुर्निचखाने"ति सबन्धुर्व्वा वाऽअसबन्धुर्व्वा कृत्यां व्वलगान्निखनति तानेवैतदुत्किरति ॥१२॥ "इदमहं तं व्वलगमुत्किरामि । यं मे सजातो यमसजातो निचखाने"ति सजातो वा वाऽअसजातो वा कृत्यां व्वलगान्निखनति तानेवैतदुत्किरत्यु "त्कृत्यां किरामी"त्यन्तत ऽउद्वपति तत्कृत्यामुत्किरति ॥१३॥ तान् बाहुमात्रान् खनेत् । अन्तो वाऽएषोऽन्तेनैवैतत्कृत्यां मोहयति तानक्ष्णया सन्तृन्दन्ति यद्यक्ष्णया न शक्नुयादपि समीचस्तस्मादिमे प्राणाः परः सन्तृण्णाः ॥१४॥ तान्यथा खातमेवावमर्शयति । "स्वराडसि सपत्नहा सत्रराडस्यभिमातिहा जनराडसि रक्षोहा सर्व्वराडस्यमित्रहे"त्याशीरेवैषैतस्य कर्मणऽ आशिषमेवैतदाशास्ते ॥१५॥ अथाध्वर्युश्च यजमानश्च सम्मृशेते । पूर्व्वयोर्दक्षिणेऽध्वर्युर्भवत्यपरयोरुत्तरे यजमानः सोध्वर्युः पृच्छति 'यजमान किमत्रे'ति 'भद्र' मित्याह 'तन्नौ सहे'त्युपाꣳश्वध्वर्युः ॥१६॥ अथापरयोर्दक्षिणेऽध्वर्युर्भवति । पूर्व्व-

१. मा सं. ५. २२ २-८. मा. सं. ५. २३. ९. तान् इति. ध.
१०. सन्तृन्दन्तीति. ग. घ. ११. सन्तृण्णा इति. ग.
१२. मा. सं. ५.२४. १३. आशिषमिति. ग. १४. दक्षिणे इति. ग. ध.

योरुत्तरे यजमानः स यजमानः पृच्छ 'त्यध्वर्यो किमत्रे'ति 'भद्र' मित्याह 'तन्म' ऽइति यजमानस्तद्यदेवꣳ संमृशेते प्राणानेवैत-त्तत्सयुजः कुरुतस्तस्मादिमे प्राणाः परः संविद्रेऽथ यत्पृष्टो भद्रमिति प्रत्याह कल्याणमेवैतन्मानुष्यै वाचो वदति तस्मात्पृष्टो भद्र-मिति प्रत्याहाथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मध्यानेवैतत्करोति ॥१७॥ स प्रोक्षति । "रक्षोहणो वो वलगहन"ऽइति रक्षोहणो ह्येते वलगहनो ह्येते "प्रोक्षामि वैष्णवानि"ति वैष्णवा ह्येते ॥१८॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ताऽअवटेष्ववनयति तद्या ऽइमाः प्राणेष्वापस्ता ऽएवैतद्दधाति तस्मादेषु प्राणेष्विमा ऽआपः ॥१९॥ सोऽवनयति "रक्षोहणो वो वलगहनोऽवनयामि वैष्णवा"नित्यथ बर्हीꣳषि प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति तद्यानी-मानि प्राणेषु लोमानि तान्येवैतद्दधाति तस्मादेषु प्राणेष्विमानि लो-मानि ॥२०॥ सोऽवस्तृणाति । "रक्षोहणो वो वलगहनोऽवस्तृ-णामि वैष्णवानि"त्यथ बर्हीꣳषि तनूनीवोपरिष्टात्प्रच्छादयति केशा हैवास्यैते ॥२१॥ अथाधिषवणे फलकेऽउपदधाति । "रक्षोहणौ वां वलगहनाऽउपदधामि वैष्णवी" ऽइति हनू हैवास्यैते ऽअथ पर्यूहति "रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी" ऽइति दृꣳहत्येवैने ऽएतदशिथिले करोति ॥२२॥ अथाधिषवणं परिकृत्तं भवति । सर्व्व-रोहितं जिह्वा हैवास्यैषा तद्यत्सर्व्वरोहितं भवति लोहिनीव हीयं जिह्वा तन्निदधाति "वैष्णवमसी"ति वैष्णवꣳ ह्येतत् ॥२३॥ अथ ग्राव्ण ऽउपावहरति । दन्ता हैवास्य ग्रावाणस्तद्यद्ग्रावभिरभिषुण्वन्ति यथा दद्भिः प्सायादेवं तत्तान्निदधाति "वैष्णवा स्थे"ति वैष्णवा ह्येतऽएतदु यज्ञस्य शिरः संꣳस्कृतम् ॥२४॥ Cf. का.श. ४. ५. ४;

१, २. मा. सं. ५. २५. ३. परिशिष्यन्त इति. ग. ४, ६. तस्मादेषु इति.ग.घ.
५, ७. मा. सं. ५. २५. ८. अस्यैते इति. ग, ते इति. घ.
९ १२. मा. सं. ५ २५. १३. संस्कृतम् इति. क. घ.

तै. सं. ६. २. १०, ११; काठ. सं. २५. ९; कपि. सं. ४०. २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीकाण्डे
चतुर्थप्रपाठके चतुर्थं ब्राह्मणम् ॥

(इति पञ्चमोऽध्यायः)

३. ४. ५.

(सदस्यौदुम्बरीनिखननम्)

उदरमेवास्य सदः । तस्मात्सदसि भक्षयन्ति यद्धीदं किं चा-
इनन्त्युदरऽएवेदꣳ सर्व्वं प्रतितिष्ठत्यथ यदस्मिन्विश्वे देवा ऽअसी-
दंस्तस्मात्सदो नाम तऽउऽएवास्मिन्नेते ब्राह्मणा व्विश्वगोत्राः सीद-
न्त्यैन्द्रं देवतया ॥१॥ तन्मध्यऽऔदुम्बरीं मिनोति । अन्नं वाऽऊर्गु-
दुम्बर ऽउदरमेवास्य सदस्तन्मध्यतोऽन्नाद्यं दधाति तस्मान्मध्य
ऽऔदुम्बरीं मिनोति ॥२॥ अथ य ऽएष मध्यमः शङ्कुर्भवति । व्वेदे-
र्जघनार्धे तस्मात्प्राङ् प्रक्रामति पड्विक्रमान्दक्षिणा सप्तममपक्रामति
सम्पदः कामाय तदवटं परिलिखति ॥३॥ सोऽभ्रिमादत्ते । "देवस्य
त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसी"
ति समान ऽएतस्य यजुषो बन्धुर्यापो वाऽएषा यदभ्रिस्तस्मादाह
नार्यसीति ॥४॥ अथावटं परिलिखति । "इदमहꣳरक्षसां ग्रीवा
ऽअपिकृन्तामी"ति व्वज्रो वाऽअभ्रिर्व्वज्रेणैवैतन्नाष्ट्राणाꣳ रक्षसां
ग्रीवा ऽअपिकृन्तति ॥५॥ अथ खनति । प्राञ्चमुत्करमुत्किरति यज-
मानेन सम्मायौदुम्बरीं परिवासयति तामग्रेण प्राचीं निदधात्येता-
वन्मात्राणि बर्हीꣳष्युपरिष्टादधिनिदधाति ॥६॥ अथ यवमत्यः प्रो-
क्षण्यो भवन्ति । आपो ह वाऽओषधीनाꣳरसस्तस्मादोषधयः केव-
ल्यः खादिता न धिन्वन्त्योषधय ऽउ हापाꣳ रसस्तस्मादापः पीताः
केवल्यो न धिन्वन्ति यदैवोभय्यः सꣳसृष्टा भवन्त्यथैव धिन्वन्ति
तर्हि हि सरसा भवन्ति सरसाभिः प्रोक्षाणीति ॥७॥ देवाश्च वा

१, २. मा. सं. ५. २६.

ऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरे ततो देवेभ्यः सर्व्वा ऽएवौषधय ईयुर्यवा हैवैभ्यो नेयुः ॥८॥ तद्वै देवा ऽअस्पृण्वत । तऽएतैः सर्व्वाः सपत्नानामोषधीरयुवत यदयुवत तस्माद्यवा नाम ॥९॥ ते होचुः । हन्त यः सर्वासामोषधीनाꣳ रसस्तं यवेषु दधामेति स यः सर्व्वासामोषधीनाꣳ रस ऽआसीत्तं यवेष्वदधुस्तस्माद्यत्रान्या ऽओषधयो म्लायन्ति तदेते मोदमाना वर्धन्तऽएवꣳह्येषु रसमदधुस्तथोऽएवैष ऽएतैः सर्व्वाः सपत्नानामोषधीर्युते तस्माद्यवमत्यः प्रोक्षण्यो भवन्ति ॥१०॥ स यवानावपति । "यवोऽसि यवयास्मद्द्वेषो यवयाराती"रिति नात्र तिरोहितमिवास्त्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यामेवैतत्करोति ॥११॥ स प्रोक्षति । "दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वे" तीमानेवैतल्लोकानूर्जा रसेन भाजयत्येषु लोकेषूर्जꣳरसं दधाति ॥१२॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ता ऽअवटेऽवनयति "शुन्धन्तां लोकाः पितृषदना" ऽइति पितृदेवत्यो वै कूपः खातस्तमेवैतन्मेध्यं करोति ॥१३॥ अथ बर्हीꣳषि । प्राचीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति "पितृषदनमसी"ति पितृदेवत्यं वाऽअस्याऽएतद्भवति यन्निखातꣳ सा यथा निखातौषधिषु मिता स्यादेवमेतास्वोषधिषु मिता भवति ॥१४॥ तामुच्छ्रयति । "उद्दिवꣳस्तभानान्तरिक्षं पृण दृꣳहस्व पृथिव्यामि"तीमानेवैतल्लोकानूर्जा रसेन भाजयत्येषु लोकेषूर्जꣳरसं दधाति ॥१५॥ अथ मिनोति । "द्युतानस्त्वा मारुतो मिनोत्वि"ति यो वाऽअयं पवतऽएष द्युतानो मारुतस्तदेनामेतेन मिनोति "मित्रावरुणौ ध्रुवेण धर्मणे"ति प्राणोदानो वै मित्रावरुणौ तदेनां प्राणोदानाभ्यां मिनोति ॥१६॥ अथ पर्यूहति । "ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्यूहामी"ति वह्नी वै यजुःष्वाशीस्तद्ब्रह्म च क्षत्रं चाशास्तऽउभे व्वीर्ये रायस्पो-

---

१. सपत्नानिति. ग. २-५. मा. सं. ५. २६.
६, ८, ९. मा. सं. ५. २७. ७. भाजयत्येषु इति.ग.
१०. दानाभ्यामिति. ग. ११. मा. सं. ५. २७.

षवनीति भूमा [1]वै रायस्पोषस्तद्भूमानमाशास्ते [2] ॥१७॥ अथ पर्यूषति । "[3]ब्रह्म दꣳह क्षत्रं दꣳहायुर्दꣳह प्रजां दꣳह हे"त्याशीरेवैषैतस्य कर्मण ऽआशिषमेवैतदाशास्ते [4]समम्भूमि पर्यूषणं करोति गर्तस्य वाऽउपरिभूम्यथैवं देवत्रा तथा हागर्तमिद्भवति ॥१८॥ अथाप ऽउपनिनयति । यत्र वाऽअस्यै खनन्तः क्रूरीकुर्वन्त्यपघ्नन्ति शान्तिरापस्तदद्भिः शान्त्या शमयति तदद्भिः सन्दधाति तस्मादप ऽउपनिनयति ॥१९॥ अथैवमभिपद्य व्वाचयति । "[5]ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया भूयादि"ति "पशुभिरि"ति वैवं यं कामं कामयते सोऽस्मै कामः समृध्यते ॥२०॥ अथ स्रुवेणोपहत्याज्यम् । व्विष्टपमभि जुहोति "घृतेन द्यावापृथिवी पूर्येथा"मिति तदिमे द्यावापृथिवीऽऊर्जा रसेन भाजयत्यनयोरूर्जꣳरसं दधाति ते रसवत्याऽउपजीवनीयेऽइमाः प्रजाऽउपजीवन्ति ॥२१॥ अथ छदिरधिनिदधाति । "इन्द्रस्य छदिरसी"त्यैन्द्रꣳ हि सदो "व्विश्वजनस्य छाये"ति व्विश्वगोत्रा ह्यस्मिन् ब्राह्मणाऽआसते तदुभयतश्छदिषीऽउपदधात्युत्तरतस्त्रीणि परस्त्रीणि तानि नव भवन्ति त्रिवृद्वै यज्ञो नव वै त्रिवृत्तस्मान्नव भवन्ति ॥२२॥ तदुदीचीनवꣳशꣳ सदो भवति । प्राचीनवꣳशꣳ हविर्धानमेतद्वै देवानां निष्केवल्यं यद्धविर्धानं तस्मात्तत्र नाश्नन्ति न भक्षयन्ति निष्केवल्यꣳ ह्येतद्देवानाꣳ स यो ह तत्राश्नीयाद्वा भक्षयेद्वा मूर्धा हास्य व्विपतेदथैते मिश्रे [10]यदाग्नीध्रं च सदश्च तस्मात्तयोरश्नन्ति तस्माद्भक्षयन्ति मिश्रे ह्येतेऽउदीची वै मनुष्याणां दिक्तस्मादुदीचीनवꣳशꣳ सदो भवति ॥२३॥ तत्परिश्रयन्ति । "[11]परि त्वा गिर्व्वणो गिरऽइष्टा भवन्तु विश्वतः । व्वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टय"ऽइतीन्द्रो वै गिर्वा[12] व्विशो गिरो व्विशै-

---

१. वै इति. ग. २. तद्भूमानमाशास्ते इति. ग. घ. ३ मा. सं. ५. २७.
४. दाशास्ते इति. ग. घ. ५. सम्भूमि इति. घ. ६–९. मा. सं. ५. २८.
१०. यदाग्नीध्रमिति. ग. ११ मा. सं. ५. २९. १२. गिर्व्वा. इति. घ.

वैतत्क्षत्रं परिबृ॒ढ्ँहति तदिदं क्षत्रमुभयतो व्विशा परिबृढम् ॥२४॥ अथ लस्पूजन्या स्पन्यया प्रसीव्यति । "इन्द्रस्य स्यूरसी"त्यथ ग्रन्थि करोती"न्द्रस्य ध्रुवोऽसी"ति नेद्यवपद्याताऽइति तं प्रकृते कर्मन्विष्यति तथो हाध्वर्यु वा यजमानं वा ग्राहो न विन्दति तन्निष्ठितमभिमृशत्यै"न्द्रमसी"त्यैन्द्र्यँ हि सदः ॥२५॥ अथ हविर्धानयोः । जघनार्धँ समन्वीक्ष्योत्तरेणाग्नीध्रं मिनोति तस्यार्धमन्तर्वेदि स्यादर्धं बहिर्व्वेद्यथोऽअपि भूयोऽर्धादन्तर्वेदि स्यात्कनीयो बहिर्वेद्यथोऽअपि सर्व्वमेवान्तर्वेदि स्यात्तन्निष्ठितमभिमृशति "व्वैश्वदेवमसी" ति द्वयेनैतद्वैश्वदेवं यदस्मिन् पूर्वेद्युर्व्विश्वे देवा व्वसतीवरीषूपवसन्ति तेन व्वैश्वदेवम् ॥२६॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयांचक्रुस्तान्दक्षिणतोऽसुररक्षसान्यासेजुस्तान्सदसो जिग्युस्तेषामेतान्विष्ण्यानुद्रापयांचक्रुर्यऽएतेऽन्तः सदसँ ॥२७॥ सर्व्वे ह स्म वाऽएते पुरा ज्वलन्ति । यथायमाहवनीयो यथा गार्हपत्यो यथाग्नीध्रीयस्तद्यतऽएनानुद्रवापयंस्तत ऽएवैतन्न ज्वलन्ति तानाग्नीध्रमभिसँरुरुधुस्तानप्यर्धमाग्नीध्रस्य जिग्युस्ततो व्विश्वे देवाऽअमृतत्वमपाजयंस्तस्माद्वैश्वदेवम् ॥२८॥ तान्देवाः प्रतिसमैन्धत । यथा प्रत्यवस्येत्तस्मादेनान्सवने सवनऽएव प्रतिसमिन्धते तस्माद्यः समृद्धः सऽआग्नीध्रं कुर्याद्यो वै ज्ञातोऽनूचानः स समृद्धस्तस्मादग्नीधे प्रथमाय दक्षिणां नयन्त्यतो हि व्विश्वे देवाऽअमृतत्वमपाजयंस्तस्माद्यं दीक्षितानामवल्यं व्विन्देदाग्नीध्रमेनं नयतेति ब्रूयात्तदनार्तं तं नारि-

१, २, ४, मा. सं. ५. ३०.
३. तं इति नास्ति. ग. घ.
५. मा. सं. ५. ३०.
६. चकुर्य इति. ग. घ.
७. सदसँ ग.
८. पुरा इति. घ.
९. ज्वलन्तीति. ग.
१०. देवमिति.
११. एव इति. ग.

ष्यतीति तद्यदतो व्विश्वेदेवाऽअमृतत्वमपाजयंस्तस्माद्वैश्वदेवम् ॥२९॥

Cf. का. श. ४. ६. १; तै. सं. ६. २. १०; मै. सं. ३. ८. ९.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
चतुर्थप्रपाठके पञ्चमं ब्राह्मणम् ॥(अ. ६. १.)

चतुर्थः प्रपाठकस्समाप्तः ॥
(कण्डिकासंख्या १३२)

३. ५. १.

(धिष्ण्योपवापादि)

ॐ व्विजामानो हैवास्य धिष्ण्याः । इमे समङ्का ये वै समङ्कास्ते व्विजामान एतऽउ हैवास्यैतऽआत्मनः ॥१॥ दिवि वै सोमऽआसीत् । अथेह देवास्ते देवाऽअकामयन्ता नः सोमो गच्छेत्तेनागतेन यजेमहीति तेऽएते माये असृजन्त सुपर्णीं च कद्रूं च व्वागेव सुपर्णीयं कद्रूस्ताभ्याᳬसमदं चक्रुः ॥२॥ ते हऽर्तीयमानेऽऊचतुः । यतरा नौ दवीयः परापश्यादात्मानं नौ सा जयादिति तथेति सा ह कद्रूरुवाच परेक्षस्वेति ॥३॥ सा ह सुपर्ण्युवाच । अस्य सलिलस्य पारेऽश्वः श्वेतस्थाणौ सेवते तमहं पश्यामीति तमेव त्वं पश्यसीति तथेहीत्यथ ह कद्रूरुवाच तस्य व्वालो न्यपञ्जि तममुं व्वातो धूनोति तमहं पश्यामीति ॥४॥ सा यत्सुपर्ण्युवाच । अस्य सलिलस्य पारऽइति व्वेदिर्व्वै सलिलं व्वेदिमेव सा तदुवाचाश्वः श्वेतस्थाणौ सेवतऽइत्यग्निर्व्वाऽअश्वः श्वेतो यूपस्थाणुरथ यत्कद्रूरुवाच तस्य व्वालो न्यपञ्जि तममुं व्वातो धूनोति तमहं पश्यामीति रशना हैव सा ॥५॥ साह सुपर्ण्युवाच । एहीदं पताव व्वेदितुं यतरा नौ जयतीति साह कद्रूरुवाच त्वमेव पत त्वं वै न ऽआख्यास्यसि यतरा नौ जयतीति ॥६॥ सा ह सुपर्णी पपात । तच्च तथैवास यथा कद्रूरुवाच तामागताम-

१. वैश्वदेवम् इति. ग. २. सोमो इति. ग. घ. ३. ते ह इति. ध.
४ अस्येति. ग. ५. तस्येति. ग. ६. तममुमिति. ग.

भ्युवाद त्वमजैषी३रहा३मिति त्वमिति होवाचैतद्व्याख्यानꣳ सौपर्णीकाद्रवमिति ॥७॥ (शतम् ॥१९००॥) सा ह कद्रूरुवाच । आत्मानं वै त्वाजैषं दिव्यसौ सोमस्तं देवेभ्य ऽआहर तेन देवेभ्य आत्मानं निष्क्रीणीष्वेति तथेति सा छन्दाꣳसि ससृजे सा गायत्री दिवः सोममाहरत् ॥८॥ हिरण्मय्योर्ह कुश्योरन्तरवाहित ऽआस । ते ह स्म क्षुरपवी निमेषं निमेषमभिसन्धत्तो दीक्षातपसौ हैव ते ऽआसतुस्तमेते गन्धर्वाः सोमरक्षा जुगुपुरिमे धिष्ण्या इमा होत्राः ॥९॥ तयोरन्यतरां कुशीमाचिच्छेद । तां देवेभ्यः प्रददौ सा दीक्षा तया देवा ऽअदीक्षन्त ॥१०॥ अथ द्वितीयां कुशीमाचिच्छेद । तां देवेभ्यः प्रददौ तत्तपस्तया देवास्तप ऽउपायन्नुपसदस्तपो ह्युपसदः ॥११॥ खदिरेण ह सोममाचखाद । तस्मात् खदिरो यदेनेनाखिदत्तस्मात्खादिरो यूपो भवति खादिरः स्फ्योऽच्छावाकस्य हैनं गोपनायां जहार सोऽच्छावाकोऽहीयत ॥१२॥ तमिन्द्राग्नी ऽअनुसमतनुताम् । प्रजानां प्रजात्यै तस्मादैन्द्राग्नोऽच्छावाकः ॥१३॥ तस्माद्दीक्षिता राजानं गोपायन्ति । नेन्नोऽपहरानिति तस्मात्तत्र सुगुप्तं चिकीर्षेद्यस्य ह गोपनायामपहरन्ति हीयते ह ॥१४॥ तस्माद्ब्रह्मचारिण ऽआचार्यं गोपायन्ति । गृहान् पशून्नेन्नोऽपहरानिति तस्मात्तत्र सुगुप्तं चिकीर्षेद्यस्य ह गोपनायामपहरन्ति हीयते ह तेनैतेन सुपर्णी देवेभ्य ऽआत्मानं निरक्रीणीत तस्मादाहुः पुण्यलोक ऽईजान ऽइति ॥१५॥ ऋणꣳ ह वै पुरुषो जायमान ऽएव । मृत्योरात्मना जायते स यद्यजते यथैव तत्सुपर्णी देवेभ्य ऽआत्मानं निरक्रीणीतैवमेवैष ऽएतन्मृत्योरात्मानं निष्क्रीणीते ॥१६॥ तेन देवा ऽअयजन्त । तमेते गन्धर्वाः सोमरक्षा ऽअन्वाजग्मुस्तेऽन्वागत्याब्रुवन्ननु नो यज्ञऽआभजत माँ नो यज्ञादन्तर्गातास्त्वेव नोऽपि यज्ञे भाग ऽइति ॥१७॥ ते होचुः । किं नस्ततः स्यादिति यथैवास्यामुत्र गोप्तारोऽभूमैवमेवास्यापीह

१. इमे होत्रका इति क्वचित् पाठः । २. तया इति. घ.
३. अच्छावाकः इति. ग. ४. मा इति. ग. ५. मेवास्यापीह. इति. ग.

गोप्तारो भविष्यामऽइति ॥१८॥ तथेति देवा ऽअब्रुवन् । सोमक्रयणा वऽइति तानेभ्य ऽएतत्सोमक्रयणाननुदिशत्यथैनानब्रुवंस्तृतीयसवने वो घृत्याहुतिः प्राप्स्यति न सौम्यापहृतो हि युष्मत्सोमपीथस्तेन सोमाहुतिं नार्हथेति सैनानेषा तृतीयसवनऽ एव घृत्याहुतिः प्राप्नोति न सौम्या यच्छालाकैर्धिष्ण्यान्व्याघारयति ॥१९॥ अथ यदग्नौ होष्यन्ति । तद्वोऽविष्यतीति स यदग्नौ जुह्वति तदेनानवत्यथ यद्वः सोमं बिभ्रत ऽउपर्युपरि चरिष्यन्ति तद्वोऽविष्यतीति स यदेनान्त्सोमं बिभ्रत उपर्युपरि चरन्ति तदेनानवति तस्मादध्वर्युः समया धिष्ण्यान्नातीयादध्वर्युर्हि सोमं बिभर्ति तमेते व्यात्तेन प्रत्यासते स ऽएतेषां व्यात्तमापद्येत तमग्निर्वाभिदहेद्यो वा यं देवः पशूनामीष्टे स वा हैनमभिमन्येत तस्माद्यद्यध्वर्योः शालायामर्थः स्यादुत्तरेणैवाग्नीध्रीयꣳ सञ्चरेत् ॥२०॥ ते वाऽएते । सोमस्यैव गुप्त्यै न्युप्यन्तऽआहवनीयः पुरस्तान्मार्जालीयो दक्षिणत ऽआग्नीध्रीय ऽउत्तरतोऽथ ये सदसि ते पश्चात् ॥२१॥ तेषां वाऽअर्धानुपकिरन्ति । अर्धाननु दिशन्त्येतऽउ हैवैतद्दध्रिरेऽर्धान्न ऽउपकिरन्त्वर्धाननुदिशन्तु तथा यस्माल्लोकादागताः स्मो दिवस्तथा तं लोकं प्रतिप्रज्ञास्यामस्तथा नं जिह्माऽएष्यामऽइति ॥२२॥ स यानुपकिरन्ति । तेनास्मिंल्लोके प्रत्यक्षं भवन्त्यथ याननुदिशन्ति तेनामुष्मिंल्लोके प्रत्यक्षं भवन्ति ॥२३॥ ते वै द्विनामानो भवन्ति । एतऽउ हैवैतद्दध्रिरे न वाऽएभिर्नामभिररात्स्म येषां नः सोममपाहार्षुर्हन्त द्वितीयानि नामानि करवामहाऽइति ते द्वितीयानि नामान्यकुर्वत तैरराध्नुवन्यानपहृतसोमपीथान्त्सतोऽथ यज्ञऽआभजंस्तस्माद्द्विनामानस्तस्माद्ब्राह्मणोऽनृध्यमाने द्वितीयं नाम कुर्वीत राध्नोति हैवं यऽएवं विद्वान्द्वितीयं नाम कुरुते ॥२४॥ स यदग्नौ जुहोति । तद्देवेषु जुहोति तस्माद्देवाः सन्त्य-

१. घृत्याहुतिरिति. ग, घ. २. स इति ग. ३. एते इति. ग.
४. पश्चात् इति. ग. ५. न इति. नाऽस्ति. ग. ६. तेनामुष्मिन् इति. घ.
७. महा इति. घ. ८. हैव य इति. ग. ९. कुरुते इति. ग.

थ यत्सदसि भक्षयन्ति[1] तन्मनुष्येषु जुहोति तस्मान्मनुष्याः सन्त्य-
थ यद्धविर्धानयोर्नाराशꣳसाः सीदन्ति तत्पितृषु जुहोति तस्मात्पि-
तरः सन्ति ॥२५॥ या वै प्रजा यज्ञेऽनन्वाभक्ताः । पराभूता वै ता
ऽएवमेवैतद्याऽइमाः प्रजाऽअपराभूतास्ता यज्ञऽआभजति मनुष्यानु
पशवो देवानु वयाꣳसि स्योषधयो वनस्पतयो यदिदं किंचैवमु
तत्सर्वं यज्ञऽआभक्तं ते ह स्मैतऽउभये देवमनुष्याः पितरः सम्पि-
बन्ते सैषा सम्पा ते ह स्म दृश्यमाना एव पुरा सम्पिबन्तऽउतैतर्ह्यदृ-
श्यमानाः ॥२६॥ C.f. का. श. ४. ६. २; तै. सं. ६. ३. १.; मै.
सं. ३. ८. १०; कठ. सं. २६. १; कपि. सं. ४०. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
पञ्चमप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ६. २.)

३. ५. २.

(वैसर्जनहोमः)

सर्वं वाऽएषोऽभि दीक्षते[2] । यो दीक्षते[3] यज्ञꣳ ह्यभि दीक्षते
यज्ञꣳ ह्येवेदꣳसर्वमनु तं यज्ञꣳ सम्भृत्य यमिममभि दीक्षते सर्व-
मिदं विसृजते ॥१॥ यद्वैसर्जनानि जुहोति । स यदिदꣳ सर्वं
विसृजते तस्माद्वैसर्जनानि नाम तस्माद्योऽपिव्रतः स्यात्सोऽन्वार-
भेत यद्युऽअन्यत्र चरेन्नाद्रियेत यद्वै जुहोति तदेवेदꣳ सर्वं विसृ-
जते ॥२॥ यद्वेव वैसर्जनानि जुहोति । यज्ञो वै विष्णुः स देवे-
भ्यऽइमां विक्रान्तिं विचक्रमे यैषामियं विक्रान्तिरिदमेव प्रथमेन
पदेन पस्पाराथेदमन्तरिक्षं द्वितीयेन दिवमुत्तमेनैताम्वेवैषऽएतस्मै
विष्णुर्यज्ञो विक्रान्तिं विक्रमते यज्जुहोति तस्माद्वैसर्जनानि जु-
होति[4] ॥३॥ सोऽपराह्णे[5] वेदिꣳस्तीर्त्वा । अर्धव्रतं प्रदाय सम्प्रपद्य-

१. भक्षयन्तीति. ग २. दीक्षत इति. ग. ३. दीक्षते इति. ग.
४. जुहोति इति. ग, जुहोति इति. घ. ५. अपराह्णे इति. घ.

तऽइध्ममभ्यादधत्युपयमनीरुपकल्पयन्त्याज्यमधिश्रयति स्रुचः समाष्टर्युपस्थे राजानं यजमानः कुरुतेऽथ सोमक्रयण्यै पदं जघनेन गार्हपत्यं परिकिरति पदा वै प्रतितिष्ठति प्रतिष्ठित्याऽएवं[1] ॥४॥ तद्धैके । चतुर्धा कुर्वन्ति यत्राहवनीयमुद्धरन्ति तासूपयमनीषु चतुर्भागमक्षं चतुर्भागेणोपाञ्जन्त्येतासूपयमनीषु चतुर्भागं जघनेन गार्हपत्यं चतुर्भागं परिकिरति ॥५॥ तदु तथा न कुर्यात् । सार्धमेव परिकिरेज्जघनेन[2] गार्हपत्यमथोत्पूयाज्यं चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पञ्चगृहीतं पृषदाज्यं "ज्योतिरासि[3] विश्वरूपं विश्वेषां देवानाꣳ समिदि"ति वैश्वदेवꣳहि पृषदाज्यं धारयन्ति स्रुचो यदा प्रदीप्तऽइध्मो भवति ॥६॥ अथ जुहोति "त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यऽउरु यन्तासि वरूथꣳस्वाहे"[5]ति तदेतेनैवास्यां पृथिव्यां प्रतिष्ठायां प्रतितिष्ठत्येतेनेमं लोकꣳस्पृणुते[6] ॥७॥ अथाप्तवे द्वितीयामाहुतिं जुहोति । "जुषाणोऽअप्तुराज्यस्य वेतु स्वाहे"त्येषऽउ हैवैतदुवाच रक्षोभ्यो वै बिभेमि यथा मान्तरा नाष्ट्रा रक्षाꣳसि न हिनसन्नेवं मा कनीयाꣳसमेव वधात्कृत्वातिनयत स्तोकमेव स्तोको ह्यप्तुरिति तमेतत्कनीयाꣳसमेव वधात्कृत्वात्यनयन्त्स्तोकमेव स्तोको ह्यप्तू रक्षोभ्यो भीषा तस्मादप्तवे द्वितीयामाहुतिं जुहोति ॥८॥ उद्यच्छन्तीध्मम् । उपयच्छन्त्युपयमनीरथाहा'ग्नये प्रहियमाणायानुब्रूहि सोमाय प्रणीयमानाये'ति वाग्नये प्रहियमाणायानुब्रूहीति त्वेव ब्रूयात् ॥९॥ आददते ग्राव्णः । द्रोणकलशं वायव्यानीध्मं कार्ष्मर्यमयान् परिधीनाश्ववालं प्रस्तरमैक्षव्यौ विधृती[8] तद्बर्हिरुपसन्नद्धं भवति वपाश्रपण्यौ रशनेऽअरणी अधिमन्थनः शकलो वृषणौ तत्समादाय प्राञ्चऽआयन्ति सऽएषऽऊर्ध्वो यज्ञऽएति ॥१०॥ तदायत्सु वाचयति । "अग्ने

१. एव इति. ग.　　२. जघनेनेति. घ.　　३, ४. मा. सं. ५. ३५.
५. वरूथमिति. घ.　　६. स्पृणुते इति. घ.　　७. मा. सं. ५. ३५.
८. प्रस्तरमैक्षव्यौ इति. ग.　　९. विधृती. इति. ग.　　१०. मा. सं. ५. ३६.

नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान्[1] । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं विधेमे"त्यग्निमेवैतत्पुरस्तात्करोत्यग्निः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण हरन्ति तऽआयन्त्यागच्छन्त्याग्नीध्रं तमाग्नीध्रे निदधाति ॥११॥ स निहिते जुहोति । "अयं[2] नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुरऽएतु प्रभिन्दन्[3] । अयं वाजान् जयतु वाजसातावयꣳ शत्रून् जयतु जर्हृषाणः स्वाहे"ति तदेतेनैवैतस्मिन्नन्तरिक्षे प्रतिष्ठायां प्रतितिष्ठत्येतेनैतं लोकꣳ स्पृणुते ॥१२॥ तदेव निदधाति ग्राव्णः । द्रोणकलशं वायव्यान्यथेतरमादायायन्ति तदुत्तरेणाहवनीयमुपसादयन्ति ॥१३॥ प्रोक्षणीरध्वर्युरादत्ते । सऽइध्ममेवाग्रे प्रोक्षत्यथ वेदिमथास्मै बर्हिः प्रयच्छन्ति तत्पुरस्ताद्ग्रन्थ्यासादयति तत्प्रोक्ष्योपनिनीय विस्रꣳस्य ग्रन्थिमाश्ववालः प्रस्तरऽउपसन्नद्धो भवति तं गृह्णाति गृहीत्वा प्रस्तरमेकवृद्बर्हिस्तृणाति स्तीर्त्वा बर्हिः कार्ष्मर्यमयान् परिधीन् परिदधाति परिधाय परिधीन्त्समिधावभ्यादधात्यभ्याधाय समिधौ ॥१४॥ अथ जुहोति । "उरु[4] विष्णो विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहे"ति तदेतेनैवैतस्यां दिवि प्रतिष्ठायां प्रतितिष्ठत्येतेनैतं लोकꣳ स्पृणुते यदेतया जुहोति ॥१५॥ यद्वेव वैष्णव्यर्चा जुहोति । कनीयाꣳसं वाऽएनमेतद्वधात्कृत्वात्यनैषुस्तोकमेव स्तोको ह्यप्तुस्तमेतदभयं प्राप्य यऽएवैष तं करोति यज्ञमेव यज्ञो हि विष्णुस्तस्माद्वैष्णव्यर्चा जुहोति ॥१६॥ अथासाद्य स्रुचः । अपऽउपस्पृश्य राजानं प्रपादयति तद्यदासाद्य स्रुचोऽप उपस्पृश्य राजानं प्रपादयति व्रज्रो वाऽआज्यꣳरेतः सोमो नेद्व्रज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्मादासाद्य स्रुचोऽपऽउपस्पृश्य राजानं प्रपादयति ॥१७॥ स दक्षिणस्य हविर्धानस्य नीडे कृष्णाजिनमास्तृणाति । तदेनमासादयति "देवं[5] सवितरेष ते सोमस्तꣳ रक्ष-

१. विद्वान् इति. ग. २. मा. सं. ५. ३७. ३. प्रभिन्दन् इति ग.घ.
४. मा सं. ५. ३८. ५. तस्मादासाद्येति ग. ६. मा. सं. ५. ३९.

स्व मा त्वा दभ''न्निति तदेनं देवायैव सवित्रे परिददाति गुप्त्यै ॥१८॥ अथानुसृज्योपतिष्ठते। ''एतत्त्वं देव सोम देवो देवां ३ऽ उपागा इदमहं मनुष्यान्त्सह रायस्पोषेणे''त्यग्नीषोमौ वाऽएतमन्तर्जम्भऽआदधाते यो दीक्षतऽआत्मावैष्णवꣳ ह्यदो दीक्षणीयꣳ हविर्भवति यो वै विष्णुः सोमः स हविर्वाऽएष देवानां भवति यो दीक्षते तदेनमन्तर्जम्भऽआदधाते तत्प्रत्यक्षꣳ सोमान्निर्मुच्यते यदाहैतत्त्वं देव सोम देवो देवां ३ ऽ उपागा इदमहं मनुष्यान्त्सह रायस्पोषेणेति भूमा वै रायस्पोषः सह भूम्नेत्येवैतदाह ॥१९॥ अथोपनिष्क्रामति। ''स्वाहा निर्व्वरुणस्य पाशान्मुच्य''ऽइति व्वरुणपाशो वाऽएषोऽन्तर्भवति योऽन्यस्यासंस्तत्प्रत्यक्षं व्वरुणपाशान्निर्मुच्यते यदाह स्वाहा निर्व्वरुणस्य पाशान्मुच्यऽइति ॥२०॥ अथेत्याहवनीये समिधमभ्यादधाति। ''अग्ने व्वतपास्त्वे व्वतपा''ऽइत्यग्निर्हि देवानां व्वतपतिस्तस्मादाहोग्न व्वतपास्त्वे व्वतपाऽइति ''या तव तनूर्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ सा मयि। यथायथं नौ व्वतपते व्वतान्यनु मे दीक्षां दीक्षापतिरमꣳस्तानु तपस्तपस्पति''रिति तत्प्रत्यक्षमग्नेर्निर्मुच्यते स स्वेन सतात्मना यजते तस्मादस्यात्राश्नन्ति मानुषो हि भवति तस्मादस्यात्र नाम गृह्णन्ति मानुषो हि भवत्यथ यत्पुरा नाश्नन्ति यथा हविषोऽहुतस्य नाश्नीयादेवं तत्तस्माद्दिक्षीतस्य नाश्नीयादथात्राङ्गुलीर्व्विसृजते ॥२१॥ Cf. का. श. ४. ६. ३; तै. सं. ६. ३. २; मै. सं. ३. ९. १; कठ. सं. २६. २; कपि. सं. ४०. ६; ऐ. ब्रा. १. २८; शां. ब्रा. ९. १.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे पञ्चमप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ६. ३.)

१. मा. सं. ५. ३९. २, ३. देवां २॥ऽउपागा इति. ग. घ.
४. मा. सं. ५. ३९. ५. मुच्यऽइति इति. ग, मुच्यऽइति इति. घ.
६. अभ्यादधातीति. ग. ७, ८. मा. सं. ५. ४०

३. ५. ३.

(अथाऽग्नीषोमीयपशुयागः)

(तत्र यूपच्छेदनम्)

यूपं व्यक्ष्यन्वैष्णव्यर्चा जुहोति । वैष्णवो हि यूपस्तस्माद्वैष्णव्यर्चा जुहोति ॥१॥ यद्वेव व्वैष्णव्या जुहोति । यज्ञो वै व्विष्णुर्यज्ञेनैवैतद्यूपमच्छैति तस्माद्वैष्णव्यर्चा जुहोति ॥२॥ स यदि स्रुचा जुहोति । चतुर्गृहीतमाज्यं गृहीत्वा जुहोति यद्यु स्रुवेण स्रुवेणैवोपहत्य जुहो"त्युरु व्विष्णो व्विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहे"ति ॥३॥ यदाज्यं परिशिष्टं भवति । तदादत्ते यत्तक्ष्णः शस्त्रं भवति तत्तक्षादत्ते तऽआयन्ति स यं यूपं जोषयन्ते ॥४॥ तमेवमभिमृश्य जपति । पश्चाद्वैव प्राङ् तिष्ठन्नभिमन्त्रयतेऽ"त्यन्यान् ३ऽअगां नान्यान् ३ऽउपागा"मित्यति ह्यन्यानेति नान्यानुपैति तस्मादाहात्यन्यान् ३ऽअगां नान्यान् ३ऽउपागामिति॥५॥ "अव्वाक्त्वा परेभ्योऽविदं परोऽवरेभ्य" ऽइति । अव्वाग्घ्येनं परेभ्यो वृश्चति यऽएतस्मात्पराञ्चो भवन्ति परोऽवरेभ्य इति परो ह्येनमवरेभ्यो वृश्चति यऽएतस्मादव्वाञ्चो भवन्ति तस्मादाहाव्वाक्त्वा परेभ्योऽविदं परोऽवरेभ्य ऽइति ॥६॥ "तं त्वा जुषामहे देव वनस्पते देवयज्याया"ऽइति । तद्यथा बहूनां मध्यात्साधवे कर्मणे जुषेत स रातमनास्तस्मै कर्मणे स्यादेवमेवैनमेतद्बहूनां मध्यात्साधवे कर्मणे जुषते स रातमना व्वृश्चनाय भवति ॥७॥ "देवास्त्वा देवयज्यायै जुषन्ता" मिति । तद्वै समृद्धं यं देवाः साधवे कर्मणे जुषान्तै तस्मादाह देवास्त्वा देवयज्यायै जुषन्तामिति ॥८॥ अथ स्रुवेणोपस्पृशति । "व्विष्णवे त्वे"ति व्वैष्णवो हि यूपो यज्ञो वै व्विष्णुर्यज्ञाय ह्येनं वृश्चति

---

१. जुहोति इति. घ. २. मा. सं. ५. ४१. ३. मा. सं. ५. ४२.

३. त्यन्यां २॥ऽअगां इति. ग. घ. ४-८. मा. सं. ५. ४२.

तस्मादाह विष्णवे त्वेति ॥९॥ अथ दर्भतरुणकमन्तर्दधाति । "ओषधे त्रायस्वे"ति व्वज्रो वै परशुस्तथो हैनमेष व्वज्रः परशुर्न हिनस्त्यथ परशुना प्रहरति "स्वधिते मैनꣳहिꣳसी"रिति व्वज्रो वै परशुस्तथो हैनमेष व्वज्रः परशुर्न हिनस्ति ॥१०॥ स यं प्रथमꣳ शकलमपच्छिनत्ति । तमादत्ते तं वाऽअनक्षस्तम्भं व्वृश्चेदुत ह्येनमनसा व्वहन्ति तथानो न प्रतिबाधते ॥११॥ तं प्राञ्चं पातयेत् । प्राची हि देवानां दिगथोऽउदञ्चमुदीची हि मनुष्याणां दिगथो प्रत्यञ्चं दक्षिणायै त्वेवैनं दिशः परिविबाधिषेतैषा वै दिक् पितॄणां तस्मादेनं दक्षिणायै दिशः परिबिबाधिषेत ॥१२॥ तं प्रच्यवमानमनुमन्त्रयते । "द्यां मा लेखीरन्तरिक्षं मा हिꣳसीः पृथिव्या सम्भवे"ति व्वज्रोवाऽएष भवति यं यूपाय व्वृश्चन्ति तस्माद्वज्रात्प्रच्यवमानादिमे लोकाः सꣳरेजन्ते तदेभ्यऽएवैनमेतल्लोकेभ्यः शमयति तथेमांल्लोकाञ्छान्तो न हिनस्ति ॥१३॥ स यदाह । द्यां मा लेखीरिति दिवं मा हिꣳसीरित्येवैतदाहान्तरिक्षं मा हिꣳसीरिति नात्र तिरोहितमिवास्ति पृथिव्या सम्भवेति पृथिव्या सञ्जानीष्वेत्येवैतदाहा"यꣳ हि त्वा स्वधितिस्तेतिजानः प्रणिनाय महते सौभगाये"त्येषꣳ ह्येनꣳ स्वधितिस्तेजमानः प्रणयति ॥१४॥ अथावृश्चनमभिजुहोति । नेदतो नाष्ट्रा रक्षाꣳस्यनूत्तिष्ठानिति व्वज्रो वाऽआज्यं तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्यवबाधते तथातो नाष्ट्रा रक्षाꣳसि नानूत्तिष्ठन्त्यथो रेतो वाऽआज्यं तद्वनस्पतिष्वेवैतद्रेतो दधाति तस्माद्रेतस ऽआवृश्चनाद्वनस्पतयोऽनु प्रजायन्ते ॥१५॥ स जुहोति । "अतस्त्वं देव व्वनस्पते शतवल्शो व्विरोह सहस्रवल्शा व्वि वयꣳ रुहेमे"ति नात्र तिरोहितमिवास्ति ॥१६॥ तं परिवासयति । स यावन्तमेवाग्रे परिवासयेत्तावान्त्स्यात् ॥१७॥

---

१. त्वेति. ग, त्वेति. घ. २, ३ मा. सं. ५. ४२. ४ उदञ्चमिति. ग.
५, ६. मा. सं. ५. ४३. ७. त्येष इति. घ. ८. वा इति. ग.
९. वनस्पतयो इति. ग. १०. मा. सं. ५. ४३.

(अर्द्धप्रपाठकः ॥६४॥)

पञ्चारत्निं परिवासयेत् । पाङ्क्तो यज्ञः पाङ्क्तः पशुः पञ्चर्तवः संवत्सरस्य तस्मात्पञ्चारत्निं परिवासयेत् ॥१८॥ षडरत्निं परिवासयेत् । षड्वाऽऋतवः संवत्सरस्य संवत्सरो व्वज्रो व्वज्रो यूपस्तस्मात्षडरत्निं परिवासयेत् ॥१९॥ अष्टारत्निं परिवासयेत् । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धऽएष यज्ञस्य तस्मादष्टारत्निं परिवासयेत् ॥२०॥ नवारत्निं परिवासयेत् । त्रिवृद्वै यज्ञो नव वै त्रिवृत्तस्मान्नवारत्निं परिवासयेत् ॥२१॥ एकादशारत्निं परिवासयेत् । एकादशाक्षरा वै त्रिष्टुब्व्वज्रस्त्रिष्टुब्व्वज्रो यूपस्तस्मादेकादशारत्निं परिवासयेत् ॥२२॥ द्वादशारत्निं परिवासयेत् । द्वादश वै मासाः संवत्सरस्य संवत्सरो व्वज्रो व्वज्रो यूपस्तस्माद्द्वादशारत्निं परिवासयेत् ॥२३॥ त्रयोदशारत्निं परिवासयेत् । त्रयोदश वै मासाः संवत्सरस्य संवत्सरो व्वज्रो व्वज्रो यूपस्तस्मात्त्रयोदशारत्निं परिवासयेत् ॥२४॥ पञ्चदशारत्निं परिवासयेत् । पञ्चदशो वै व्वज्रो व्वज्रो यूपस्तस्मात्पञ्चदशारत्निं परिवासयेत् ॥२५॥ सप्तदशारत्निर्व्वाजपेययूपः । अपरिमितऽएव स्यादपरिमितेन वाऽएतेन व्वज्रेण देवाऽअपरिमितमजयंस्तथोऽएवैषऽएतेन व्वज्रेणापरिमितेनैवापरिमितं जयति तस्मादपरिमितऽएव स्यात् ॥२६॥ स वाऽअष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धऽएष यज्ञस्य तस्मादष्टाश्रिर्भवति ॥२७॥ Cf. का. श. ४. ६. ४; तै. सं. ६. ३. ३; मै. सं. ३. ९. २; कठ. सं. २६. ३. ४; कपि. सं. ४१. १, २; ऐ. ब्रा. २. १; शां ब्रा. १०. १.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे पञ्चमप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ६. ४.)

(इति षष्ठोऽध्यायः)

---

१. पञ्चारत्निमिति. ग. २. पञ्चदश इति. घ.

३. ५. ४.

(यूपोच्छ्रयणादि)

अभ्रिमादत्ते । "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे नार्यसी"ति समानऽएतस्य यजुषो बन्धुर्योषो वाऽएषा यदभ्रिस्तस्मादाह नार्यसीति ॥१॥ अथावटं परिलिखति । "इदमहꣳ रक्षसां ग्रीवाऽअपिकृन्तामी"ति व्वज्रो वा अभ्रिर्वज्रेणैवैतन्नाष्ट्राणाꣳरक्षसां ग्रीवाऽअपिकृन्तति ॥२॥ अथ खनति । प्राञ्चमुत्करमुत्किरत्युपरेण सम्मायावटं खनति तदग्रेण प्राञ्चं यूपं निदधात्येतावन्मात्राणि बर्हींष्युपरिष्टादधिनिदधाति तदेवोपरिष्टाद्यूपशकलमधिनिदधाति पुरस्तात्पार्श्वतश्चषालमुपनिदधात्यथ यवमत्यः प्रोक्षण्यो भवन्ति सोऽसावेव बन्धुः ॥३॥ स यवानावपति । "यवोऽसि यवयास्मद्द्वेषो यवयाराती"रिति नात्र तिरोहितमिवास्त्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मेध्यमेवैतत्करोति ॥४॥ स प्रोक्षति । "दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वे"ति व्वज्रो वै यूपऽएषां लोकानामभिगुप्त्याऽएषां त्वा लोकानामभिगुप्त्यै प्रोक्षामीत्येवैतदाह ॥५॥ अथ याः प्रोक्षण्यः परिशिष्यन्ते । ताऽअवटेऽवनयति "शुन्धन्तां लोकाः पितृषदना"ऽइति पितृदेवत्यो वै कूपः खातस्तमेवैतन्मेध्यं करोति ॥६॥ अथ बर्हींषि । प्रादीनाग्राणि चोदीचीनाग्राणि चावस्तृणाति "पितृषदनमसी"ति पितृदेवत्यं वाऽअस्यैतद्भवति यन्निखातꣳ स यथानिखातऽओषधिषु मितः स्यादेवमेतास्वोषधिषु मितो भवति ॥७॥ अथ यूपशकलं प्रास्यति । तेजो ह वाऽएतद्वनस्पतीनां यद्बाह्याशकलस्तस्माद्यदा बाह्याशकलमपतक्ष्णुवन्त्यथ शुष्यन्ति तेजो ह्येषामेतत्तद्यद्यूपशकलं प्रास्यति सतेजसं मिनवानीति तद्यदेषऽएव भवति नान्यऽएष हि यजुष्कृतो मेध्यस्तस्माद्यूपशकलं प्रास्यति ॥८॥ स प्रास्यति । "अग्रेणीरसि स्वाधेशऽउन्नेतृणा"मिति पुरस्ताद्वाऽअस्मादे-

---

१. मा. सं. ६. १. २. नार्यसीति. ग. ३, ५-८. मा. सं. ६. १.
४. यवमत्य इति. घ. ९. मेतास्विति. ध. १०. मा. सं. ६. २.

षोऽपच्छिद्यते तस्मादाहाग्रेणीरसि स्वावेशऽउन्नेतृणामित्ये"[1]तस्य वित्तादधि त्वा स्थास्यती"त्यधि ह्येनं तिष्ठति तस्मादाहैतस्य वित्तादधि त्वा स्थास्यतीति[2] ॥९॥ अथ स्रुवेणोपहत्याज्यम् । अवटमभिजुहोति नेदधस्तान्नाष्ट्रा रक्षाꣳ स्युपोत्तिष्ठानिति व्वज्रो वाऽआज्यं तद्वज्रेणैवैतन्नाष्ट्रा रक्षाꣳस्य[3]ववाधते तथाधस्तान्नाष्ट्रा रक्षाꣳसि नोपोत्तिष्ठन्त्यथ पुरस्तात्परीत्योदङ्ङासीनो यूपमनक्ति सऽआह 'यूपायाज्यमानायानुब्रूही'ति ॥१०॥ सोऽनक्ति । "देवस्त्वा सविता मध्वानक्त्विव"ति सविता वै देवानां प्रसविता यजमानो वाऽएष निदानेन यद्यूपः सर्व्वं वाऽइदं मधु यदिदं किं च तदेनमनेन सर्व्वेण सꣳस्पर्शयति तदस्मै सविता प्रसविता प्रसौति तस्मादाह देवस्त्वा सविता मध्वानक्त्विति ॥११॥ अथ चषालमुभयतः प्रत्यज्य प्रतिमुञ्चति । "सुपिप्पलाभ्यस्त्वौषधीभ्य"ऽइति पिप्पलꣳ हैवास्यैतद्यन्मध्ये संगृहीतमिव भवति तिर्यग्वाऽइदं वृक्षे पिप्पलमाहतꣳ स यदेवेदꣳ सम्बन्धनं चान्तरोपेनितमिव तदेवैतत्करोति तस्मान्मध्ये संगृहीतमिव भवति ॥१२॥ आन्तमग्निष्टामनक्ति । यजमानो वाऽअग्निष्टा रसऽआज्यꣳ रसेनैवैतद्यजमानमनक्ति तस्मादान्तमग्निष्टामनक्त्यथ परिव्ययणं प्रति समन्तं परिमृशत्यथाहो'ऽच्छीयमाणायानुब्रूही'ति ॥१३॥ सऽउच्छ्रयति । "द्यामग्रेणास्पृक्षऽआन्तरिक्षं मध्येनाप्राः पृथिवीमुपरेणादृꣳही"रिति व्वज्रो वै यूपऽएषां लोकानामभिजित्यै तेन व्वज्रेणेमांल्लोकान्त्स्पृणुतऽएभ्यो[8] लोकेभ्यः सपत्नान्निर्भजति[9] ॥१४॥ अथ मिनोति । "या[10] ते धामान्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा ऽअयासः । अत्राह तदुरुगायस्य व्विष्णोः परमं पदमवभारि भूरी"त्येतया त्रिष्टुभा मिनोति व्वज्रस्त्रिष्टुब्वज्रो यूपस्तस्मात्त्रिष्टुभा मिनोति ॥१५॥ सम्प्रत्यग्निमग्निष्टां मिनोति । यज-

---

१. मा. सं ६. २. २. स्थास्यतीति. ग. ३. स्यपबाधत इति. घ.
४, ६. मा. सं. ६. २. ५. मुभयतः इति. घ. ७. मा. सं. ६. २.
८. एभ्यो इति. घ. ९. निर्भजतीति. घ. १०. मा. सं. ६. ३.

मानो वाऽअग्निष्टाग्निरु वै यज्ञः स यदग्नेरग्निष्टाᳬ ह्वलयेद्ध्वलेद्ध यज्ञाद्यजमानस्तस्मात्सम्प्रत्यग्निमग्निष्टां मिनोत्यथ पर्यूहत्यथ पर्यूषत्यथाप ऽउपनिनयति ॥१६॥ अथैवमभिपद्य व्वाचयति । "व्विष्णोः कर्माणि पश्यत यतो व्वतानि पस्पशे । इन्द्रस्य युज्यः सखे"ति व्वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियद्विष्णोर्व्विजितं पश्यतेत्येवैतदाह यदाह व्विष्णोः कर्माणि पश्यत यतो व्वतानि पस्पशे । इन्द्रस्य युज्यः सखेतीन्द्रो वै यज्ञस्य देवता व्वैष्णवो यूपस्त ᳬसन्द्रं करोति तस्मादाहेन्द्रस्य युज्यः सखेति ॥१७॥ अथ चषालमुदीक्षते । "तद्विष्णोः परमं पदᳬ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततमि"ति व्वज्रं वाऽएष प्राहार्षीद्यो यूपमुदशिश्रियत्तां व्विष्णोर्व्विजितं पश्येतेत्येवैतदाह यदाह तद्विष्णोः परमं पदᳬसदा पश्यन्ति सूरयः । दिवीव चक्षुराततमिति ॥१८॥ अथ परिव्ययति । अनग्नतायै न्वेव परिव्ययति तस्मादत्रैव परिव्ययत्यत्रैव हीदं व्वासो भवत्यन्नाद्यमेवास्मिन्नेतद्दधात्यत्रैव हीदमन्नं प्रतितिष्ठति तस्मादत्रैव परिव्ययति ॥१९॥ त्रिवृता परिव्ययति । त्रिवृद्धयन्नं पशवो ह्यन्नं पिता माता यज्जायते तत्तृतीयं तस्मात्त्रिवृता परिव्ययति ॥२०॥ स परिव्ययति । "परिवीरसि परित्वा देवीर्विशो व्ययन्तां परीमं यजमानᳬ रायो मनुष्याणा"मिति तद्यजमानायाशिषमाशास्ते यदाह परीमं यजमानᳬ रायो मनुष्याणामिति ॥२१॥ अथ यूपशकलमवगूहति "दिवः सूनुरसी"ति प्रजा हैवास्यैषा तस्माद्यदि यूपैकादशिनी स्यात्स्वᳬ स्वमेवावगूहेदविपर्यासं तस्य हैषा मुग्धानुव्रता प्रजा जायतेऽथ यो विपर्यासमवगूहति न स्वᳬ स्वं तस्य हैषा मुग्धाननुव्रता प्रजा जायते तस्मादु स्वᳬ स्वमेवावगूहेदविपर्यासᳬ ॥२२॥ स्वर्गस्यो

१. सम्प्रतीति. घ. २. मा. सं. ६. ४. ३. युज्य इति. क.
४. सखेतीति, ग, सखेतीति. घ. ५. मा. सं. ६. ५.
६. मितीति. ग, मितीति. घ. ७. अनग्नतायै इति. ग.
८, १०. मा. सं. ६. ६. ९. दैवीर्विशो इति. घ.

हैष लोकस्य समारोहणः क्रियते । यद्यूपशकल ऽइयꣳ रशना रशनायै यूपशकलो यूपशकलाच्चषालं चषालात्स्वर्गं लोकꣳ समश्नुते ॥२३॥ अथ यस्मात्स्वरुर्नाम । एतस्माद्वाऽएषोऽपच्छिद्यते तस्यैतत् स्वमेवारुर्भवति तस्मात्स्वरुर्नाम ॥२४॥ तस्य यन्निखातम् । तेन पितृलोकं जयत्यथ यदूर्ध्वं निखातादा रशनायै तेन मनुष्यलोकं जयत्यथ यदूर्ध्वꣳ रशनायाऽआ चषालात्तेन देवलोकं जयत्यथ यदूर्ध्वं चषालाद्द्व्यङ्गुलं वा त्र्यङ्गुलं वा साध्याऽइति देवास्तेन तेषां लोकं जयति सलोको ह वै साध्यैर्देवैर्भवति यऽएवमेतद्वेद ॥२५॥ तं वै पूर्वार्धे मिनोति । व्वज्रो वै यूपो व्वज्रो दण्डः पूर्वार्धं वै दण्डस्याभिपद्य प्रहरति पूर्वार्धऽएष यज्ञस्य तस्मात्पूर्वार्धे मिनोति॥२६॥ यज्ञेन वै देवाः । इमां जितिं जिग्युर्यैषामियं जितिस्ते होचुः कथं न ऽइदं मनुष्यैरनभ्यारोह्यꣳ स्यादिति ते यज्ञस्य रसं धीत्वा यथा मधु मधुकृतो निर्धयेयुर्विदुह्य यज्ञं यूपेन योपयित्वा तिरोऽभवन्नथ यदेनेनायोपयंस्तस्माद्यूपो नाम पुरस्ताद्वै प्रज्ञा पुरस्तान्मनोजवस्तस्मात्पूर्वार्धे मिनोति ॥२७॥ स वाऽअष्टाश्रिर्भवति । अष्टाक्षरा वै गायत्री[2] पूर्वार्धो वै यज्ञस्य गायत्री पूर्वार्धऽएष यज्ञस्य तस्मादष्टाश्रिर्भवति ॥२८॥ तꣳह स्मैतं देवाऽअनुप्रहरन्ति । यथेदमप्येतर्ह्येकेऽनुप्रहरन्तीति देवाऽअकुर्व्वन्निति ततो रक्षाꣳसि यज्ञमनूदपिबन्त ॥२९॥ ते देवाऽअध्वर्युमब्रुवन् । यूपशकलमेव जुहुधि तदहैष स्वगाकृतो भविष्यति तथो रक्षाꣳसि यज्ञं नानूत्पास्यन्तेऽयं वै व्वज्रऽउद्यतऽइति ॥३०॥ सोऽध्वर्युः । यूपशकलमेवाजुहोत्तदहैष स्वगाकृतऽआसीत्तथो रक्षाꣳसि यज्ञं नानूदपिबन्तायं वै व्वज्रऽउद्यतऽइति ॥३१॥ तथोऽएवैष एतत् । यूपशकलमेव जुहोति तदहैष स्वगाकृतो भवति तथो रक्षाꣳसि यज्ञं नानूत्पिबन्तेऽयं वै व्वज्रऽउद्यतऽइति स जुहोति

१. एष इति. ग. २. गायत्री इति. ग. ३. एतर्ह्येके इति. घ.
४. तदाहैष इति. घ. ५. नानूदपिबन्तेति. घ.

दिवं ते धूमो गच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहेति ॥३२॥
Cf. का. श. ४. ७. १; तै सं. ६. ३. ४; मै. सं. ३. ९. ३; कपि. सं ४१. ३; काठ. सं. २६. ५.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
पञ्चमप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ७. १.)

३. ५. ५.
(यूपैकादशिनी)

यावती वै व्वेदिस्तावती पृथिवी । व्वज्रा वै यूपास्तदिमामेवैतत्पृथिवीमेतैर्वज्रैस्स्तृणुतेऽस्यै सपत्नान्निर्भजति तस्माद्यूपैकादशिनी भवति द्वादशऽउपशयो भवति व्वितष्टस्तं दक्षिणतऽउपनिदधाति तद्द्वादशऽउपशयो भवति ॥१॥ (शतम् २००० ॥) देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयांचक्रुस्तद्यऽएतऽउच्छ्रिता यथेषुरस्ता तया वै स्तृणुते वा न वा स्तृणुते यथा दण्डः प्रहृतस्तेन वै[1] स्तृणुते वा न वा स्तृणुतेऽथ यऽएष द्वादशऽउपशयो भवति यथेषुरायतानस्ता यथोद्यतमप्रहृतमेवमेष व्वज्रऽउद्यतो दक्षिणतो नाष्ट्राणाꣳ रक्षसामपहत्यै तस्माद्द्वादशऽउपशयो भवति ॥२॥ तं निदधाति[2] । "एष[3] ते पृथिव्यां लोकऽआरण्यस्ते[4] पशु"रिति पशुश्च वै यूपश्च तदस्माऽआरण्यमेव पशूनामनुदिशति तेनोऽएष पशुमान् भवति तद्द्वयं यूपैकादशिन्यै संमयनमाहुः[5] श्वःसुत्यायै ह न्वेवैके संमिन्वन्ति प्रकुर्व्वतायै[6] चैव श्वःसुत्यायै यूपं मिन्वन्तीत्यु च ॥३॥ तदु तथा न[7] कुर्यात् । अग्निष्टमेवोच्छ्रयेदिदं वै यूपमुच्छ्रित्याध्वर्युरा परिव्ययणान्नान्वर्जत्यपरिवीता वाऽएतऽएताꣳ रात्रिं व्वसन्ति सा न्वेव परिचक्षा पशवे वै यूपमुच्छ्रयन्ति प्रातर्वै पशूनालभन्ते तस्मादु

१. वै स्तृणुते इति. ग. २. निदधातीति घ ३. मा. सं. ६. ६.
४. आरण्यस्ते इति. ग. घ. ५. संमयनमिति. ग. ६. प्रकुव्वतायै इति.ग.घ.
७. न इति. ग. ८. अग्निष्टमिति. घ.

प्रातरेवोच्छ्रयेत् ॥४॥ स यऽउत्तरोऽग्निष्ठात्स्यात्[1]। तमेवाग्रऽउच्छ्रयेदथ दक्षिणमथोत्तरं दक्षिणार्ध्यमुत्तमं तथोदीची भवति ॥५॥ अथोऽइतरथाहुः। दक्षिणमेवाग्रेऽग्निष्ठादुच्छ्रयेदथोत्तरमथ दक्षिणमुत्तरार्ध्यमुत्तमं तथो हास्योदगेव[2] कर्मानुसन्तिष्ठतऽइति ॥६॥ स यो व्वर्षिष्ठः स दक्षिणार्ध्यः स्यात्। अथ हूसीयानथ हूसीयानुत्तरार्ध्यो हूसिष्ठस्तथोदीची भवति ॥७॥ अथ पत्नीभ्यः पत्नीयूपमुच्छ्रयन्ति। सर्वत्वाय न्वेव पत्नी यूपऽउच्छ्रीयते तत्त्वाष्ट्रं[3] पशुमालभते त्वष्टा वै सिक्तꣳ रेतो व्विकरोति तदेपऽएवैतत्सिक्तꣳ रेतो व्विकरोति मुष्करो भवत्येष वै प्रजनयिता यन्मुष्करस्तस्मान्मुष्करो भवति तं न सꣳस्थापयेत्पर्यग्निकृतमेवोत्सृजेत्स यत्सꣳस्थापयेत्प्रजायै हान्तमियात्तत्प्रजामुत्सृजति तस्मान्न सꣳस्थापयेत्पर्यग्निकृतमेवोत्सृजेत् ॥८॥

Cf. का. श. ४. ७. २, तै. सं. ६. ६. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ७. २.)

३. ५. ६.

(पशूपाकरणादि)

पशुश्च वै यूपश्च। न वाऽऋते यूपात्पशुमालभन्ते कदा चन तद्यत्तथा न ह वाऽएतस्माऽ अग्रे पशवश्चक्षमिरे यदन्नमभविष्यन्यथेदमन्नं भूता[4] यथा हैवायं द्विपात्पुरुषऽउच्छ्रितऽएवꣳ हैव द्विपादऽउच्छ्रिताश्चेरुः ॥१॥ ततो देवाऽएतं व्वज्रं ददृशुः[5]। यद्यूपं तमुच्छिश्रियुस्तस्माद्भीषा प्रावलीयन्त ततश्चतुष्पादाऽअभवंस्ततोऽन्नमभवन्यथेदमन्नं भूताऽएतस्मै हि वाऽएतेऽतिष्ठन्त तस्माद्यूपऽएव पशुमालभन्ते नर्ते यूपात्कदाचन ॥२॥ अथोपाकृत्य पशुम्। अग्निं मथित्वा नियुनक्ति

---

१. स्यात् इति. ग. २. उदगेवेति. ग. ३. त्वाष्ट्रमिति. घ.
४. भूतं इति. ग. ५. ददृशुरिति. घ. ६. यूप इति. घ.

तद्यत्तथा न ह वाऽएतस्माऽअग्रे पशवश्चक्षमिरे यद्धविरभविष्यन्यथैनानिदꣳ हविर्भूतानग्नौ जुह्वति तान्देवा ऽउपनिरुरुधुस्तऽउपनिरुद्धा नोपावेयुः ॥३॥ ते होचुः । न वाऽइमेऽस्य यामं विदुर्यदग्नौ हविर्जुह्वति नैतां प्रतिष्ठामुपरुध्यैव पशूनग्निं मथित्वाग्नावग्निं जुहवाम ते वेदिष्यन्त्येष वै किल हविषो यामऽएषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैष्यन्ति ततो रातमनसऽआलम्भाय भविष्यन्तीति ॥४॥ तऽउपरुध्यैव पशून् । अग्निं मथित्वाग्नावग्निमजुहवुस्तेऽविदुरेष वै किल हविषो यामऽएषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवायंस्ततो रातमनसऽआलम्भायाभवन् ॥५॥ तथोऽएवैषऽएतत् । उपरुध्यैव पशुमग्निं मथित्वाग्नावग्निं जुहोति स वेदैष वै किल हविषो यामऽएषा प्रतिष्ठाग्नौ वै किल हविर्जुह्वतीति ततोऽभ्यवैति ततो रातमनाऽआलम्भाय भवति तस्मादुपाकृत्य पशुमग्निं मथित्वा नियुनक्ति ॥६॥ तदाहुः । नोपाकुर्यान्नाग्निं मन्थेद्रशनामेवादायाञ्जसोपपरेत्याभिधाय नियुञ्ज्यादिति तदु तथा न कुर्याद्यथाधर्म्मं तिरश्चथा चिकीर्षेदेवं तत्तस्मादेतदेवानुपरीयात् ॥७॥ अथ तृणमादायोपाकरोति । द्वितीयवान्निरुणधाऽइति द्वितीयवान्हि वीर्यवान् ॥ ॥८॥ स तृणमादत्ते । "उपावीरसी"त्युप हि द्वितीयोऽवति तस्मादाहोपावीरसी"त्युप देवान्दैवीर्विशः प्रागु"रिति दैव्यो वाऽएता विशो यत्पशवोऽस्थिषत देवेभ्यऽइत्येवैतदाह यदाहोप देवान्दैवीर्विशः प्रागुरिति ॥९॥ "उशिजो वान्हितमा"निति । विद्वाꣳसा हि देवास्तस्मादाहोशिजो वान्हितमानिति ॥१०॥ "देव त्वष्टर्वसु रमे"ति । त्वष्टा वै पशूनामीष्टे पशवो वसु तानेतद्देवाऽअतिष्ठमानांस्त्वष्टारमब्रुवन्नुपनिमदेति यदाह देव त्वष्टर्वसु रमेति ॥११॥

१. तान् इति. घ. २. उप इति. घ. ३. एवैष इति. घ.

४, ५. मा. सं. ६. ७ ६. देवान्दैवीरिति. घ. ७, ८. मा. सं. ६. ७.

"हव्या[1] ते स्वदन्ता"मिति । यदा वाऽएतऽएतस्माऽअध्रियन्त यद्ध-विरभविष्यंस्तस्मादाह हव्या ते स्वदन्तामिति ॥१२॥ "रेवती[2] रमध्व"मिति । रेवन्तो हि पशवस्तस्मादाह रेवती रमध्वमिति "बृहस्पते[3] धारया व्वसूनी"ति ब्रह्म वै बृहस्पतिः पशवो व्वसु तानेतद्देवाऽअतिष्ठमानान् ब्रह्मणैव परस्तात्पर्यदधुस्तन्नात्यायंस्तथोऽएवैनानेषऽएतद्ब्रह्मणैव परस्तात्परिदधाति तन्नातियन्ति तस्मादाह बृहस्पते धारया व्वसूनीति पाशं कृत्वा प्रतिमुञ्चत्यथातो नियोजनस्यैवं[5] ॥१३॥

Cf. का. श. ४. ७. ३; तै. सं. ६. ३. ५. ६; मै. सं. ३. ९. ४, ५; कठ. २६. ६; कपि. सं. ४१. ४; ऐ. ब्रा. २. २; शां. ब्रा. १०.२.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीकाण्डे
पञ्चमप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ. ७. ३.)

पञ्चमः प्रपाठकस्समाप्तः ॥
(कण्डिकासंख्या १२७)

३. ६. १.

पाशं कृत्वा प्रतिमुञ्चति । "ऋतस्य[6] त्वा देवहविः पाशेन प्रतिमुञ्चामी"ति व्वरुण्या वाऽएषा यद्रज्जुस्तदेनमेतदृतस्यैव पाशेन प्रतिमुञ्चति तथो हैनमेषा व्वरुण्या रज्जुर्न हिनस्ति ॥१॥ "धर्षा[8] मानुष"ऽइति । न वाऽएतमग्रे मनुष्योऽ धृष्णोत्स यदैवत्तस्य पाशेनैतद्देवहविः प्रतिमुञ्चत्यथैनं मनुष्यो धृष्णोति तस्मादाह धर्षा मानुषऽइति ॥२॥ अथ नियुनक्ति । "देवस्य[10] त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नीषोमाभ्यां जुष्टं नियुनज्मी[11]"ति तद्यथैवादो दैवतायै हविर्गृह्णन्नादिशत्येवमेवैतद्देवताभ्यामादिशत्यथ प्रोक्षत्येको वै प्रोक्षणस्य बन्धुर्मध्यमेवैतत्करोति ॥३॥ स प्रोक्षति ।

---

१ मा. सं. ६. ७. २, ३. मा. सं. ६. ८ ४. एतदिति. ग.
५. नियोजनस्यैव इति. ग. घ. ६, ७. मा. सं. ६. ८. ८. यदेव इति. ग. घ.
९. इति. घ. ग. १०. मा. सं. ६, ९. ११ नियुनज्मीति. घ.

"अद्भ्यस्त्वौषधीभ्य"ऽइति तद्यतऽएव सम्भवति ततऽएवैतन्मेध्यं करोतीदꣳहि यदा व्वर्षत्यथौषधयो जायन्तऽओषधीर्जग्ध्वापः पीत्वा ततऽएष रसः सम्भवति रसाद्रेतो रेतसः पशवस्तद्यतऽएव सम्भवति यतश्च जायते ततऽएवैतन्मेध्यं करोति ॥४॥ "अनु त्वा माता मन्यतामनु पिते"ति । स हि मातुश्चाधि पितुश्च जायते तद्यतऽएव जायते ततऽएवैतन्मेध्यं करोत्य"नु भ्राता सगर्भ्यो ऽनुसखा सयूथ्य"ऽइति स यत्ते जन्म तेन त्वानुमतमारभऽइत्येवैतदाहा"ग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामी"ति तद्याभ्यां देवताभ्यामारभते ताभ्यां मेध्यं करोति ॥५॥ अथोपगृह्णाति । "अपां पेरुरसी"ति तदेनमन्तरतो मेध्यं करोत्यथाधस्तादुपोक्षत्या"पो देवीः स्वदन्तु स्वात्तं चित्सद्देवहवि"रिति तदेनꣳसर्व्वतो मेध्यं करोति ॥६॥ अथाहा'ग्नये समिध्यमानायानुब्रूही'ति । स ऽउत्तरमाघारमाघार्यासꣳस्पर्शयन्त्स्रुचौ पर्येत्य जुह्वा पशुꣳसमनक्ति शिरो वै यज्ञस्योत्तरऽआघार ऽएष वाऽ अत्र यज्ञो भवति यत्पशुस्तद्यज्ञऽ एवैतच्छिरः प्रतिदधाति तस्माज्जुह्वा पशुꣳसमनक्ति ॥७॥ स ललाटे समनक्ति । "सं ते प्राणो व्वातेन गच्छता"मिति "समङ्गानि यजत्रै"रित्यꣳसयोः "सं यज्ञपतिराशिषे"ति श्रोण्योः स यस्मै कामाय पशुमालभन्ते तत्प्राप्नुहीत्येवैतदाह ॥८॥ इदं वै पशोः संज्ञप्यमानस्य । प्राणो व्वातमपिपद्यते तत्प्राप्नुहि यत्ते प्राणो व्वातमपिपद्याताऽइत्येवैतदाह समङ्गानि यजत्रैरित्यङ्गैर्व्वाऽअस्य यजन्ते तत्प्राप्नुहि यत्तेऽङ्गैर्यजान्ताऽइत्येवैतदाह सं यज्ञपतिराशिषेति यजमानाय वाऽएतेनाशिषमाशासते तत्प्राप्नुहि यत्त्वया यजमानायाशिषमाशासान्ताऽइत्येवैतदाह सादयति स्रुचावथ प्रवरायाश्रावयति सोऽसावेव बन्धुः ॥९॥ अथ द्वितीयमाश्रावयति । द्वौ ह्यत्र होतारौ भवतः स मैत्रावरुणायाहैवा-

१, ३–५. मा. सं. ६. ९. २. इदꣳहि इति. ग. ध.
६–१०. मा. सं. ६. १०. ११. वै इति. ग.

श्रावयति यजमानं त्वेव प्रवृणीतेऽग्निर्हि दैवीनां व्विशां पुरऽएते'त्यग्निर्हि देवतानां मुखं तस्मादाहाग्निर्हि दैवीनां व्विशां पुरऽएतेत्य'यं यजमानो मनुष्याणामि'ति तथ्हि सोऽन्वर्धो भवति यस्मिन्नर्धे यजते तस्मादाहायं यजमानो मनुष्याणामिति तयोरस्थूरि गार्हपत्यं दीदयच्छतथ्हिमा द्वायूऽइति तयोरनार्तानि गार्हपत्यानि शतं व्वर्षाणि सन्त्विवत्येवैतदाह ॥१०॥ राधाथ्सीत्सम्पृञ्चानावसम्पृञ्चानौ तन्वऽइति । राधाथ्स्येव सम्पृञ्चाथां मापि तनूरित्येवैतदाह तौ ह यत्तनूरपि सम्पृञ्चीयातां प्राग्निर्यजमानं दहेत्स यदग्नौ जुहोति तदेषोऽग्नये प्रयच्छत्यथ याभेवात्रर्त्विजो यजमानायाशिषमाशासते तामस्मै सर्व्वामग्निः समर्धयति तद्राधाᳬस्येव सम्पृञ्चाते नापि तनूस्तस्मादाह राधाᳬसीत्सम्पृञ्चानावसम्पृञ्चानौ तन्वऽइति ॥११॥ Cf. का. श. ४. ७. ४; तै. सं. ६. ३. ६, ७., मै सं. ३. ९. ६; कठ. सं. २६. ८; कपि. सं. ४१. ६, ७.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
षष्ठप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ७. ४.)
(सप्तमोऽध्यायस्समाप्तः ॥)

३. ६. २.

तद्यत्रैतत्प्रवृतो होता होतृषदन ऽउपविशति । तदुपविश्य प्रसौति प्रसूतोऽध्वर्युः स्रुचावादत्ते ॥१॥ अथाप्रीभिश्चरन्ति । तद्यदाप्रीभिश्चरन्ति सर्व्वेणेव वाऽएष मनसा सर्व्वेणेवात्मना यज्ञᳬ सम्भरति सं च जिहीर्षति यो दीक्षते तस्य रिरिचानऽइवात्मा भवति तमेताभिराप्रीभिराप्याययन्ति तद्यदाप्याययन्ति तस्मादाप्रियो नाम तस्मादाप्रीभिश्चरन्ति ॥२॥ ते वाऽएतऽएकादश प्रयाजा भवन्ति । दश वाऽइमे पुरुषे प्राणाऽआत्मैकादशो यस्मिन्नेते प्राणाः प्रतिष्ठिता-

१. भवतीति. ग, घ. २. यामेव इति. घ. ३. तामस्यै इति. ग.
४. तस्मादिति. ग. ५. आदत्ते इति. क.

ऽएतावान्वै पुरुषस्तदस्य सर्व्वमात्मानमाप्यायन्ति तस्मादेकादश प्रयाजा भवन्ति ॥३॥ सऽआश्राव्याह । 'समिधः प्रेष्ये'ति प्रेष्य प्रेष्येति चतुर्थे चतुर्थे प्रयाजे समानयमानो दशभिः प्रयाजैश्चरति दश प्रयाजानिष्ट्वाह 'शासमाहरे'त्यसिं वै शासऽइत्याचक्षते ॥४॥ अथ यूपशकलमादत्ते । तावग्रे जुह्वा अक्त्वा पशोर्ललाटमुपस्पृशति "घृतेनाक्तौ पशूंस्त्रायेथा"मिति व्वज्रो वै यूपशकलो व्वज्रः शासो व्वज्रऽआज्यं तमेवैतत्कृत्स्नं व्वज्रꣳ सम्भृत्य तमस्याभिगोप्तारं करोति नेदेनं नाष्ट्रा रक्षाꣳसि हिनसन्निति पुनर्यूपशकलमवगूहत्येषा ते प्रज्ञाताश्चिरास्त्वित्याह शासं प्रयच्छन्त्सादयति स्रुचौ ॥५॥ अथाह 'पर्यग्नयेऽनुब्रूहीति । उल्मुकमादायाग्नीत्पर्यग्निं करोति तद्यत्पर्यग्निं करोत्यच्छिद्रमेवैनमेतदग्निना परिगृह्णाति नेदेनं नाष्ट्रा रक्षाꣳसि प्रमृशानित्याग्निर्हि रक्षसामपहन्ता तस्मात्पर्यग्निं करोति तद्यत्रैनꣳ श्रपयन्ति तदभिपरिहरति ॥६॥ तदाहुः । पुनरेतदुल्मुकꣳ हरेदथात्रान्यमेवाग्निं निर्मथ्य तस्मिन्नेनꣳ श्रपयेयुराहवनीयो वाऽएष न वाऽएष तस्मै यदस्मिन्नश्रृतꣳ श्रपयेयुस्तस्मै वाऽएष यदस्मिञ्छृतं जुहुयुरिति ॥७॥ तदु तथा न कुर्यात् । यथा वै ग्रसितमेवमस्यैतद्भवति यदेनेन पर्यग्निं करोति स यथा ग्रसितमनुहायाच्छिद्य तदन्यस्मै प्रयच्छेदेवं तत्तस्मादेतस्यैवोल्मुकस्याङ्गारान्निमृद्य तस्मिन्नेनं श्रपयेयुः ॥८॥ अथोल्मुकमादायाग्नीत्पुरस्तात्प्रतिपद्यते । अग्निमेवैतत्पुरस्तात्करोत्यग्निः पुरस्तान्नाष्ट्रा रक्षाꣳस्यपघ्नन्नेत्यथाभयेनानाष्ट्रेण पशुं नयन्ति तं व्वपाश्रपणीभ्यां प्रतिप्रस्थातान्वारभते प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमानः ॥९॥ तदाहुः । नैष यजमानेनान्वारभ्यो मृत्यवे ह्येतं नयन्ति तस्मान्नान्वारभेतेति तदन्वेवारभेत न वाऽएतं मृत्यवे नयन्ति यं यज्ञाय नयन्ति

१. पुरुषस्तदिति. ग. २. प्रेष्येति. ग. ३. आचक्षते इति. क.
४. मा. सं. ६. ११. ५. अनुब्रूहीति. ग. ६. यथाइति. ग.
७. एतत्पुरस्तादिति. घ. ८. रक्षाꣳसीति. ग. ९. तदाहुरिति. ग. घ.
१०. नयन्ति इति. ग. १०. मृत्यवे इति. ग. घ.

तस्माद्न्वेवारभेत यज्ञादु हैवात्मानमन्तरियाद्यन्नान्वारभेत तस्माद्न्वेवारभेत तत्परोक्षमन्वारब्धं भवति व्वपाश्रपणीभ्यां प्रतिप्रस्थाता प्रतिप्रस्थातारमध्वर्युरध्वर्युं यजमानऽएतदु परोक्षमन्वारब्धं भवति ॥ ॥१०॥ अथ स्तीर्णायै व्वेदेः । द्वे तृणेऽअध्वर्युरादत्ते सऽआश्राव्याहो'पप्रेष्य होतर्हव्या देवेभ्य'ऽइत्येतदु व्वैश्वदेवं पशौ ॥११॥ अथ व्वाचयति । "रेवति यजमान"इति व्वाग्वै रेवती सा यद्वाग्वदु व्वदति तेन व्वाग्रेवती "प्रियं धाऽआविशे"त्यनार्तिमाविशेत्येवैतदाहो"रोरन्तरिक्षात्सजूर्देवेन व्वातेने"त्यन्तरिक्षं वाऽअनु रक्षश्चरत्यमूलमुभयतः परिच्छिन्नं यथायं पुरुषोऽमूलऽउभयतः परिच्छिन्नोऽन्तरिक्षमनुचरति तद्वातेनैनꣳ संव्विदानान्तरिक्षाद्रोपायेत्येवैतदाह यदाहोरोरन्तरिक्षात्सजूर्देवेन व्वातेनेति ॥१२॥ "अस्य हविषस्तमना यजे"ति । व्वाचमेवैतदाहानार्तस्यास्य हविषऽआत्मना यजेति "समस्य तन्वा भवे"ति व्वाचमेवैतदाहानार्तस्यास्य हविषस्तन्वा सम्भवति ॥१३॥ तद्यत्रैनं व्विशसन्ति । तत्पुरस्तात्तृणमुपास्यति "व्वर्षो व्वर्षीयसि यज्ञे यज्ञपतिं धा"ऽइति वर्हिरेवास्मा एतत्तृणात्यस्कन्नꣳ हविरसदिति तद्यदेवास्यात्र विशस्यमानस्य किञ्चित्स्कन्दति तदेतस्मिन् प्रतितिष्ठति तथा नामुया भवति ॥१४॥ अथ पुनरेत्याहवनीयमभ्यावृत्यासते । नेदस्य संज्ञप्यमानस्याध्यक्षा ऽअसामेति तस्य न कूटेन प्रघ्नन्ति मानुषꣳ हि तन्नोऽएव पश्चात्कर्ण पितृदेवत्यꣳ हि तदपिगृह्य वैव मुखं तप्तयन्ति व्वेष्कं वा कुर्व्वन्ति तन्नाह जहि मारयेति मानुषꣳ हि तत्संज्ञपयान्वगन्निति ताद्धि देवत्रा स यदाहान्वगन्नित्येतर्हि ह्येष देवाननुगच्छति तस्मादाहान्वगन्निति ॥१५॥ तद्यत्रैनं निविध्यन्ति । तत्पुरा संज्ञपनाज्जुहोति "स्वाहा देवेभ्य" इत्यथ यदा प्राह संज्ञप्तः पशुरित्यथ जुहोति "देवेभ्यः स्वाहे"ति पुरस्तात्स्वाहाकृतयो वाऽ-

१. स्तीर्णायै व्वेदेः इति. घ. २. होतर्हव्या इति घ. ३. पशौ इति. ग.
४-९. मा. सं. ६. ११. १०. नामुया इति. घ. ११, १२. मा. सं. ६. ११.

अन्ये देवा ऽउपरिष्टात्स्वाहाकृतयोऽन्ये तानेवैतत्प्रीणाति तऽएनमुभये देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ते वाऽएते परिपशव्येऽइत्याहुती स यदि कामयेत जुहुयादेते यद्यु कामयेतापि नाद्रियेत ॥१६॥ Cf. का. श. ४. ८. १; तै. सं. ६. ३. ८; मै. सं. ३. ९. ७, ८; काठ. सं. २६. ९; कपि. सं. ४१. ७.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे षष्ठप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ८. १.)

३. ६. ३.

(अग्नीषोमीयवपायागः)

यदा प्राह संज्ञप्तः पशुरिति[1]। अथाध्वर्युराह 'नेष्टः पत्नीमुदानये'त्युदानयति नेष्टा पत्नीं पान्नेजनं बिभ्रतीम् ॥१॥ तां व्वाचयति । "नमस्तऽआतानो"ति यज्ञो वाऽआतानो यज्ञꣳ हि तन्वते तेन यज्ञऽआतानो जघनार्धो वाऽएष यज्ञस्य यत्पत्नी तामेतत्प्राचीं यज्ञं प्रसादयिष्यन् भवति तस्माऽएवैतद्यज्ञाय निह्नुते तथो हैनामेष यज्ञो न हिनस्ति तस्मादाह नमस्तऽआतानेति ॥२॥ "अनर्व्वा प्रेहि"ति । असपत्नेन प्रेहीत्येवैतदाह "घृतस्य कुल्याऽउपऽऋतस्य पथ्याऽअन्वि"ति साधूपेत्येवैतदाह "देवीरापः शुद्धा व्वोद्व्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा व्वयं परिवेष्टारो भूयास्मे"त्यपऽएवैतत्पावयति ॥३॥ अथ पशोः प्राणानद्भिः एत्न्युपस्पृशति । तद्यदद्भिः प्राणानुपस्पृशति जीवं वै देवानाꣳ हविरमृतममृतानामथैतत्पशुं घ्नन्ति यत्संज्ञपयन्ति यद्विशासत्यापो वै प्राणास्तदस्मिन्नेतान् प्राणान्दधाति तथैतज्जीवमेव देवानाꣳ हविर्भवत्यमृतममृतानाम् ॥४॥ अथ यत्पत्न्युपस्पृशति । योषा वै पत्नी योषायै वाऽइमाः प्रजाः प्रजायन्ते तदेनमेतस्यै योषायै प्रजनयति तस्मात्पत्न्युपस्पृशति ॥५॥ सोपस्पृशति । "व्वाचं ते शु-

१. पशुरितीति. ग. घ. २, ४, ५. मा. सं. ६. १२. ३. एवैतदिति. घ. ६. मा. सं. ६. १३. ७. मा. सं. ६. १४.

न्धामी"ति मुखं "प्राणं ते शुन्धामी"ति नासिके "चक्षुस्ते शुन्धामी"त्यक्ष्यौ "श्रोत्रं ते शुन्धामी"ति कर्णौ "नाभिं ते शुन्धामी"ति योऽयमनिरुक्तः प्राणो "मेढ्रं ते शुन्धामी"ति वा "पायुं ते शुन्धामी"ति योऽयं पश्चात्प्राणस्तत्प्राणान्दधाति तत्समीरयत्यथ सꣳहृत्य पद"श्चरित्रांस्ते शुन्धामी"ति पद्भिर्व्वै प्रतितिष्ठति प्रतिष्ठित्याऽएव तदेनं प्रतिष्ठापयति ॥६॥ अथ याऽआपः परिशिष्यन्ते । अर्धा वा यावत्यो वा ताभिरेनं यजमानश्च शीर्षतोऽग्रेऽनुषिञ्चतस्तत्प्राणांश्चैवास्मिंस्तत्तौ धत्तस्तच्चैनमतः समीरयतः ॥७॥ तद्यत्क्रूरीकुर्व्वन्ति । यदास्थापयन्ति शान्तिरापस्तदद्भिः शान्त्या शमयतस्तदद्भिः संधत्तः ॥८॥ तावनुषिञ्चतः । "मनस्तऽआप्यायतां व्वाक्तऽआप्यायतां प्राणस्तऽआप्यायतां चक्षुस्तऽआप्यायताꣳ श्रोत्रं तऽआप्यायता"मिति तत्प्राणान्धत्तस्तत्समीरयतो "यत्ते क्रूरं यदास्थितं तत्तऽआप्यायतां निष्ट्यायता"मिति ॥९॥ तद्यत्क्रूरीकुर्व्वन्ति । यदास्थापयन्ति शान्तिरापस्तदद्भिः शान्त्या शमयतस्तदद्भिः संधत्त"स्तत्ते शुध्यत्वि"ति तन्मेध्यं कुरुतः "शमहोभ्य" ऽइति जघनेन पशुं निनयतः ॥१०॥ तद्यत्क्रूरीकुर्व्वन्ति । यदास्थापयन्ति नेदेतदन्वशान्तान्यहोरात्राण्यसन्निति तस्माच्छमहोभ्यऽइति जघनेन पशुं निनयतः ॥११॥ अथोत्तानं पशुं पर्यस्यन्ति । स तृणमन्तर्दधात्यो"षधे त्रायस्वे"ति व्वज्रो वाऽअसिस्तथो हैनमेष व्वज्रोऽसिर्न हिनस्त्यथासिनाभिनिदधाति "स्वधिते मैनꣳहिꣳसी"रिति व्वज्रो वाऽअसिस्तथो हैनमेष व्वज्रोऽसिर्न हिनस्ति ॥१२॥ सा या प्रज्ञाताश्रिः । तयाभिनिदधाति सा हि यज्ञुष्कृता मेध्या तद्यदग्रं तृणस्य तत्सव्ये पाणौ कुरुतेऽथ यद्बुध्नं तद्दक्षिणेनादत्ते ॥१३॥ स यत्राच्छ्यति । यत

१-७, ९. मा. सं. ६. १४. ८. प्राणस्तदिति. घ.

१०-१३. मा. सं. ६. १५. १४. निनयतः इति.घ.

१५. अथोत्तानं इति. घ. १६, १७. मा. सं. ६. १५. १८. हिनस्तीति. घ.

एतल्लोहितमुत्पतति तदुभयतोऽनक्ति "रक्षसां भागोऽसी"ति रक्षसाᳬ ह्येष[2] भागो यदसृक् ॥१४॥ तदुपास्याभितिष्ठति । "इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳरक्षोऽवबाधऽइदमहᳬरक्षोऽधमं तमो नयामी"ति तद्यज्ञेनैवैतन्नाष्ट्रा रक्षाᳬस्यवबाधते तद्यदमूलमुभयतः परिच्छिन्नं भवत्यमूलं वाऽइदमुभयतः परिच्छिन्नᳬ रक्षोऽन्तरिक्षमनुचरति यथायं पुरुषोऽमूलऽउभयतः परिच्छिन्नोन्तरिक्षमनुचरति तस्मादमूलमुभयतः परिच्छिन्नं भवति ॥१५॥ अथ व्वपामुत्खिदन्ति । तया व्वपाश्रपण्यौ प्रोर्णौति "घृतेन द्यावापृथिवी प्रोर्णुवाथा"मिति तदिमे द्यावापृथिवीऽऊर्ज्जा रसेन भाजयत्यनयोरूर्ज्जᳬरसं दधाति ते रसवत्याऽउपजीवनीयेऽइमाः प्रजाऽउपजीवन्ति ॥१६॥ कार्ष्मर्यमय्यौ व्वपाश्रपण्यौ भवतः । यत्र वै देवाऽअग्रे पशुमालेभिरे तदुदीचः कृष्यमाणस्यावाङ्मेधः पपात सऽएष व्वनस्पतिरजायत तद्यत्कृष्यमाणस्यावाङुपतत्तस्मात्कार्ष्मर्यस्तेनैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्कार्ष्मर्यमय्यौ व्वपाश्रपण्यौ भवतः ॥१७॥ तां परिवासयति । तां पशुश्रपणे प्रतपति तथो हास्यात्रापि शृता भवति पुनरुल्मुकमग्नीदादत्ते ते जघनेन चात्वालं यन्ति तऽआयन्त्यागच्छन्त्याहवनीयᳬ सऽएतत्तृणमध्वर्युराहवनीये प्रास्यति "व्वायो व्वेस्तोकाना"मिति स्तोकानाᳬ हैषा[7] समित् ॥१८॥ अथोत्तरतस्तिष्ठन्वपां प्रतपति । अत्येष्यन्वाऽएषोऽग्निर्भवति दक्षिणतः परीत्य श्रपयिष्यंस्तस्माऽएवैतन्निह्नुते तथो हैनमेषाऽतियन्तमग्निर्न हिनस्ति तस्मादुत्तरतस्तिष्ठन्वपां प्रतपति ॥१९॥ तामन्तरेण यूपं चाग्निं च हरन्ति । तद्यत्समया न हरन्ति येनान्यानि हविᳬषि हरन्ति नेदशृतया समया यज्ञं प्रसजामेति यदु बाह्येन न हरन्त्यग्रेण यूपं बहिर्धा हꣳ यज्ञात्कुर्युस्तस्मादन्तरेण यूपं चाग्निं च हरन्ति दक्षिणतः परीत्य प्रतिप्रस्थाता[8] श्रपयति ॥२०॥ अथ स्रुवेणोपहत्याज्यम् ।

१, ३, ४. मा. सं. ६. १६. २. ह्येष इति. घ. ५. आहवनीयᳬइति. घ.
६. मा. सं. ६. १६. ७. ह इति नाऽस्ति. ग. ८. प्रस्थाता इति. ग.

अध्वर्युर्व्वपामभिजुहो"त्यग्निराज्यस्य व्वेतु स्वाहे"ति तथो हास्यैते स्तोकाः शृताः स्वाहाकृताऽआहुतयो भूत्वाग्निं प्राप्नुवन्ति ॥२१॥ अथाह 'स्तोकेभ्योऽनुब्रूही'ति । सऽआग्नेयी स्तोकेभ्योऽन्वाह तद्यदाग्नेयी स्तोकेभ्योऽन्वाहेतः प्रदाना वै व्वृष्टिरितो ह्यग्निर्व्वृष्टिं व्वनुते सऽएतैस्स्तोकैरेतान्स्तोकान्वनुते तऽएते स्तोका व्वर्षन्ति तस्मादाग्नेयी स्तोकेभ्योऽन्वाह यदा शृता भवति ॥२२॥ अथाह प्रतिप्रस्थाता शृता प्रचरेति । स्रुचावादायाध्वर्युरतिक्रम्याश्राव्याह 'स्वाहाकृतिभ्यः प्रेष्ये'ति व्वषट्कृते जुहोति ॥२३॥ हुत्वा व्वपामेवाग्रेऽभिघारयति । अथ पृषदाज्यं तदु ह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्ति प्राणः पृषदाज्यमिति व्वदन्तस्तदु ह याज्ञवल्क्यं चरकाध्वर्युरनुव्याजहारैवं कुर्व्वन्तं प्राणं वाऽअयमन्तरगादध्वर्युः प्राण ऽएनꣳ हास्यतीति ॥२४॥ स ह स्म बाहूऽअन्ववेक्ष्याह । इमौ पलितौ बाहू क्व स्विद्ब्राह्मणस्य व्वचो बभूवेति न तदाद्रियेतोत्तमो वाऽएष प्रयाजो भवतीदं वै हविर्यज्ञ ऽउत्तमे प्रयाजे ध्रुवामेवाग्रेऽभिघारयति तस्यै हि प्रथमावाज्यभागौ होष्यन् भवति व्वपां वाऽअत्र प्रथमाꣳ होष्यन् भवति तस्माद्व्वपामेवाग्रेऽभिघारयेदथ पृषदाज्यमथ यत्पशुं नाभिघारयति नेदशृतमभिघारयाणीत्येतदेवास्य सर्व्वः पशुरभिघारितो भवति यद्व्वपामभिघारयति तस्माद्व्वपामेवाग्रेऽभिघारयेदथ पृषदाज्यम् ॥२५॥ अथाज्यमुपस्तृणीते । अथ हिरण्यशकलमवदधात्यथ व्वपामवद्यन्नाहा'ग्नीषोमाभ्यां छागस्य व्वपायै मेदसोऽनुब्रूही'त्यथ हिरण्यशकलमवदधात्यथोपरिष्टाद्धिराज्यस्याभिघारयति ॥२६॥ तद्यद्धिरण्यशकलावभितो भवतः । घ्नन्ति वाऽएतत्पशुं यदग्नौ जुह्वत्य-

१ मा. सं. ६. १६.

२. Sco तै. सं. ६. ३. ९. ६. प्राणापानौ वा एतत्पशूनां यत्पृषदाज्यं, आत्मा वपा, पृषदाज्यमभिघार्य वपामभिघारयति आत्मन्नेव पशूनां प्राणापानौ दधाति, also मै. सं. ३. १०. १.

३. वा इति. घ.

४. नाभिघारयतीति. ग. ५. भवत इति. घ. ६. घ्नन्ति इति. ग.

मृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति तथातऽउदेति तथा सञ्जीवति तस्माद्धिरण्यशकलावभितो भवतऽआश्राव्याहा'ग्नीषोमाभ्यां छागस्य व्वपां मेदः प्रेष्ये'ति न प्रस्थितमित्याह प्रसुते प्रस्थितमिति व्वषट्कृते जुहोति ॥२७॥ हुत्वा व्वपाᳬ समीच्यौ । व्वपाश्रपण्यौ कृत्वानुप्रास्यति "स्वाहाकृतेऽऊर्ध्वनभसं मारुतं गच्छत" मिति नेदिमेऽअमुया सतो याभ्यां व्वपामशिश्रपामेति ॥२८॥ तद्यद्वपया चरन्ति । यस्यै वै देवतायै पशुमालभन्ते तामेवैतद्देवतामेतेन मेधेन प्रीणाति सैषा देवतैतेन मेधेन प्रीता शान्तोत्तराणि हवीᳬषि श्रप्यमाणान्युपरमति तस्माद्वपया चरन्ति ॥२९॥

(अर्द्धप्रपाठकः ५६)

अथ चात्वाले मार्जयन्ते । क्रूरी वाऽएतत्कुर्व्वन्ति यत्संज्ञपयन्ति यद्विशासति शान्तिरापस्तदद्भिः शान्त्या शमयन्ते तदद्भिः सन्दधते तस्माच्चात्वाले मार्जयन्ते ॥३०॥ Cf. का. श. ४. ८. २; तै. सं. ६. ३. ९; मै. सं. ३. १०. १.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
षष्ठप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ८. २.)

३. ६. ४.

(पशुपुरोडाशयागः)

यद्देवत्यः पशुर्भवति । तद्देवत्यं पुरोडाशमनुनिर्व्वपति तद्यत्पुरोडाशमनुनिर्व्वपति सर्व्वेषां वाऽएष पशूनां मेधो यद्व्रीहियवौ तेनैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्पुरोडाशमनुनिर्व्वपति ॥१॥ अथ यद्वपया प्रचर्य । एतेन पुरोडाशेन प्रचरति मध्यतो वाऽइमां व्वपामुत्खिदन्ति मध्यतऽएवैनमेतेन मेधेन समर्द्धयति कृत्स्नं करोति तस्माद्वपया प्रचर्यैतेन पुरोडाशेन प्रचरत्येष न्वेवैतस्य बन्धु-

१. मा. सं. ६. १६. २. ऊर्ध्व इति. घ. ३. वै. इति. घ.
४ विशासति इति. ग. ५. सर्वेषामिति. घ. ६. प्रचरति इति. ग.

यत्र क चैष पशुं पुरोडाशोऽनुनिरुप्यते[1] ॥२॥ अथ पशुं व्विशास्ति । त्रिः प्रच्यावयतात् त्रिः प्रच्युतस्य हृदयमुत्तमं कुरुतादिति त्रिवृद्धि यज्ञः[2] ॥३॥ अथ शमितारꣳ सꣳशास्ति । यत्त्वा पृच्छाच्छृतꣳहविः शमिता ३ रिति शृतमित्येव ब्रूतान्न शृतं भगवो न शृतꣳहीति ॥४॥ अथ जुह्वा पृषदाज्यस्योपहत्य । अध्वर्युरुपनिष्क्रम्य पृच्छति शृतꣳ हविः शमिता३रिति शृतमित्याह तद्देवानामित्युपाꣳ श्वध्वर्युः[3] ॥५॥ तद्यत्पृच्छति । शृतं वै देवानाꣳ हविर्नाशृतꣳशमिता वै तद्वेद यदि शृतं वा भवत्यशृतं वा ॥६॥ तद्यत्पृच्छति । शृतेन प्रचराणीति तद्यद्यशृतं भवति शृतमेव देवानाꣳ हविर्भवति शृतं यजमानस्यानेनाऽअध्वर्युर्भवति शमितरि तदेनो भवति त्रिष्कृत्वः पृच्छति त्रिवृद्धि यज्ञोऽथ यदाह तद्देवानामिति तद्धि देवानां यच्छृतं तस्मादाह तद्देवानामिति ॥७॥ स हृदयमेवाग्रेऽभिघारयति । आत्मा वै मनो हृदयं प्राणः पृषदाज्यमात्मन्येवैतन्मनसि प्राणं दधाति तथैतज्जीवमेव देवानाꣳ हविर्भवत्यमृतममृतानाꣳ[7] ॥८॥ सोऽभिघारयति । "सं ते मनो मनसा सं प्राणः प्राणेन गच्छता"मिति न स्वाहाकरोति न ह्येषाहुतिरुद्वासयन्ति पशुम् ॥९॥ तं जघनेन चात्वालमन्तरेण यूपं चाग्निं च हरन्ति । तद्यत्समया न हरन्ति येनान्यानि हवीꣳषि हरन्ति शृतꣳ सन्तं नेदङ्गशो व्विकृत्तेन क्रूरीकृतेन[10] समया यज्ञं प्रसजामेति यदु बाह्येन न हरन्त्यग्रेण यूपं बहिर्धा ह यज्ञात्कुर्युस्तस्मादन्तरेण यूपं चाग्निं च हरन्ति दक्षिणतो निधाय प्रतिप्रस्थातावद्यति प्लक्षशाखाऽउत्तरवर्हिर्भवन्ति ताऽअध्यवद्यति तद्यत्प्लक्षशाखा उत्तरबर्हिर्भवन्ति[11] ॥१०॥ यत्र[12] वै देवा अग्रे पशुमालेभिरे । तं त्वष्टा शीर्षतोऽग्रेऽभ्युवामोतैवं चिन्नालभेरन्निति त्वष्टुर्हि पशवः स एष शीर्षन्

१. निरुप्यते इति. घ.ग. २. यज्ञ इति. ग,घ. ३. अध्वर्युरिति. ग.
४. भवतीति. घ. ५. हृदयमेव इति.ग.घ. ६. हृदयमिति.-घ.
७. अमृतानाम् इति. घ. ८. मा. सं. ६. १८. ९. प्राण इति. घ.
१०. क्रूरीकृतेनेति. घ. ११. भवन्ति इति. ग. १२ यत्र इति ग.

मस्तिष्कोऽनूक्यश्च मज्जा तस्मात्स व्वान्तऽइव त्वष्टा ह्येतमभ्यवमत्तस्मात्तं नाश्नीयात्त्वष्टुर्ह्येतदभिवान्तम् ॥११॥ तस्यावाङ् मेधः पपात । सऽएष व्वनस्पतिरजायत तं देवाः प्रापश्यंस्तस्मात्प्रख्यः प्रख्यो ह वै नामैतद्यत्प्लक्षऽइति तेनैवैनमेतन्मेधेन समर्धयति कृत्स्नं करोति तस्मात्प्लक्षशाखाऽउत्तरवर्हिर्भवन्ति ॥१२॥ अथाज्यमुपस्तृणीते । जुह्वां चोपभृति च व्वसाहोमहवन्याᳬ समवत्तधान्यामथ हिरण्यशकलाववदधाति जुह्वां चोपभृति च ॥१३॥ अथ मनोतायै हविषोऽनुवाचऽआह । तद्यन्मनोतायै हविषोऽनुवाचऽआह सर्व्वा ह वै देवताः पशुमालभ्यमानमुपसङ्गच्छन्ते मम नाम ग्रहीष्यति मम नाम ग्रहीष्यतीति सर्व्वासाᳬहि देवतानाᳬ हविः पशुस्तासाᳬ सर्व्वासां देवतानां पशौ मनाᳬस्योतानि भवन्ति तान्येवैतत्प्रीणाति तथो हामोघाय देवतानां मनाᳬस्युपसङ्गतानि भवन्ति तस्मान्मनोतायै हविषोऽनुवाचऽआह ॥१४॥ स हृदयस्यैवाग्रेऽवद्यति । तद्यन्मध्यतः सतो हृदयस्याग्रेऽवद्यति प्राणो वै हृदयमतो ह्ययमूर्ध्वः प्राणः संचरति प्राणो वै पशुर्यावद्ध्येव प्राणेन प्राणिति तावत्पशुरथ यदास्मात्प्राणोऽपक्रामति दार्व्वेव तर्हि भूतोऽनर्थ्यः शेते ॥१५॥ हृदयमु वै पशुः । तदस्यात्मनऽएवाग्रेऽवद्यति तस्माद्यदिदं किञ्चिदवदानᳬहीयेत न तदाद्रियेत सर्वस्य हैवास्य तत्पशोरवत्तं भवति यद्धृदयस्याग्रेऽवद्यति तस्मान्मध्यतः सतो हृदयस्यैवाग्रेऽवद्यत्यथ यथापूर्वम् ॥१६॥ अथ जिह्वायै । साहीयं पूर्वार्धात्प्रतिष्ठत्यथ व्वक्षसस्तद्धि ततोऽथैकचरस्य दोष्णोऽथ पार्श्वयोरथ तनिम्नोऽथ व्वृक्कयोः ॥१७॥ गुदं त्रेधा करोति । स्थविमोपयड्भ्यो मध्यं जुह्वां द्वेधा कृत्वावद्यत्यणिम त्र्यङ्गेष्वथैकचरायै श्रोणेरेतावन्नु जुह्वामवद्यति ॥१८॥ अथोपभृति । त्र्यङ्गस्य दीष्णो गुदं द्वेधा कृत्वावद्यति त्र्यङ्गायै

१. यदि किञ्चिदिति ग. घ. २. पूर्वमिति. ग. ३. सा इति. ग. ४. वक्षस इति. घ.
५. त्र्यङ्गेष्वथेति. घ. ६. अवद्यतीति ग. ७. त्र्यङ्गस्येति. घ

श्रोणेरथ हिरण्यशकलाववदधात्यथोपरिष्टादाज्यस्याभिघारयति ॥१९॥ अथ व्वसाहोमं गृह्णाति । "रेडसी"ति लेलयेव हि यूस्तस्मादाह रेडसीत्य"ग्निष्ट्वा श्रीणा"त्वित्यग्निर्ह्येतच्छ्रपयति तस्मादाहाग्निष्ट्वा श्रीणात्वित्या"पस्त्वा समरिण"न्नित्यापो ह्येतमङ्गेभ्यो रसꣳसम्भरन्ति तस्मादाहापस्त्वा समरिणन्निति ॥२०॥ "व्वातस्य त्वा ध्राज्या"ऽइति । अन्तरिक्षं वाऽअयमनुपवते योऽयं पवतेऽन्तरिक्षाय वै गृह्णाति तस्मादाह व्वातस्य त्वा ध्राज्याऽइति ॥२१॥ "पूष्णो रꣳ ह्या"ऽइति । एष वै पूष्णो रꣳ हिरेतस्माऽउ हि गृह्णाति तस्मादाह पूष्णो रꣳ ह्याऽइति ॥२२॥ "ऊष्मणो व्यथिष"दिति । एष वाऽऊष्मैतस्माऽउ हि गृह्णाति तस्मादाहोष्मणो व्यथिषदित्यथोपरिष्टाद्धिराज्यस्याभिघारयति ॥२३॥ (शतम् २१००) अथ पार्श्वेन वासिना वा प्रयौति "प्रयुतं द्वेष"इति तन्नाष्ट्राऽएवैतद्रक्षाꣳस्यतोऽपहन्ति ॥२४॥ अथ यद्युष्परिशिष्यते । तत्समवत्तधान्यामानयति तद्धृदयं प्रास्यति जिह्वां व्वक्षस्तनिम मतस्ने व्वनिष्टुमथोपरिष्टाद्धिराज्यस्याभिघारयति ॥२५॥ तद्यद्धिरण्यशकलावभितो भवतः । घ्नन्ति वाऽएतत्पशुं यदग्नौ जुह्वत्यमृतमायुर्हिरण्यं तदमृतऽआयुषि प्रतितिष्ठति तथातऽउदेति तथा संजीवति तस्माद्धिरण्यशकलावभितो भवतः ॥२६॥ अथ यदक्षणयावद्यति । सव्यस्य च दोष्णो दक्षिणायाश्च श्रोणेर्दक्षिणस्य च दोष्णः सव्यायाश्च श्रोणेस्तस्मादयं पशुरक्षणया पदो हरत्यथ यत्सम्यगवद्येत्समीचो हैवायं पशुः पदो हरेत्तस्मादक्षणयावद्यत्यथ यन्न शीर्ष्णोऽवद्यति नाꣳ सयोर्नानूकस्य नापरसक्थयोः ॥२७॥ असुरा ह वाऽअग्रे पशुमालभिरे । तद्देवा भीषा नोपावेयुस्तान्हेयं पृथिव्युवाच मैतदा दद्वमहं वाऽएतस्याध्यक्षा

१-३. मा सं. ६. १८. ४. समरिणन्नितीति. ५.
५-७, ९. मा. सं. ६. १८. ८. ऊष्मणो इति. घ.
१०. व्वक्षस्तनिमेति. घ. ११ घ्नन्ति इति. घ. १२. भवत इति. क. ग.

भविष्यामि यथा यथैतऽएतेन चरिष्यन्तीति ॥२८॥ सा होवाच । अन्यतरामेवाहुतिमहौषुरन्यतरां पर्यशिषन्निति स यां पर्यशिश्रंषंस्तानीमान्यवदानानि ततो देवाः स्विष्टकृते त्र्यङ्गाण्यपाभजंस्तस्मात्त्र्यङ्गाण्यथासुरा ऽअवाद्यञ्छीर्ष्णो ँसयोरनूकस्यापरसक्थयोस्तस्मात्तेषां नावद्येद्यन्वेव त्वष्टानूकमभ्यवमत्तस्मादनूकस्य नावद्येदथाहा'ग्नीषोमाभ्यां छागस्य हविषोऽनुब्रूही'त्याश्राव्याहा'ग्नीषोमाभ्यां छागस्य हविः प्रेष्ये'ति न प्रस्थितमित्याह प्रसुते प्रस्थितमिति ॥२९॥ अन्तरेणार्धर्चौ याज्यायै व्वसाहोमं जुहोति । इतो वाऽअयमूर्ध्वो मेधऽउत्थितो यमस्याऽइमँ रसं प्रजाऽउपजीवन्त्यर्वाचीनं दिवो रसो वै व्वसाहोमो रसो मेधो रसेनैवैतद्रसं तीव्रीकरोति तस्मादयँ रसोऽद्यमानो न क्षीयते ॥३०॥ तद्यदन्तरेण । अर्धर्चौ याज्यायै व्वसाहोमं जुहोतीयं वाऽअर्धर्चोऽसौ द्यौरर्धर्चोऽन्तरा वै द्यावापृथिवी ऽअन्तरिक्षमन्तरिक्षाय वै जुहोति तस्मादन्तरेणार्धर्चौ याज्यायै व्वसाहोमं जुहोति ॥३१॥ स जुहोति । "घृतं घृतपावानः पिबत व्वसां व्वसापावानः पिबतान्तरिक्षस्य हविरासि स्वाहे'त्येतेन व्वैश्वदेवेन यजुषा जुहोति व्वैश्वदेवं वाऽअन्तरिक्षं तद्यदेनेनेमाः प्रजाः प्राणत्यश्चोदनत्यश्चान्तरिक्षमनुचरन्ति तेन व्वैश्वदेवं व्वषट्कृते जुहोति यानि जुह्वामघदानानि भवन्ति ॥३२॥ अथ जुह्वा पृषदाज्यस्योपघ्नन्नाह । 'व्वनस्पतयेऽनुब्रूही'त्याश्राव्याह 'व्वनस्पतये प्रेष्ये'ति व्वषट्कृते जुहोति तद्यद्वनस्पतये जुहोत्येतमेवैतद्वज्रं यूपं भागिनं करोति सोमो वै व्वनस्पतिः पशुमेवैतत्सोमं करोति तद्यदन्तरेणोभेऽआहुती जुहोति तथोभयं व्याप्नोति तस्मादन्तरेणोभेऽआहुती जुहोति ॥३३॥ अथ यान्युपभृत्यवदानानि भवन्ति । तानि समानयमानऽआहा'ग्नये स्विष्टकृतेऽनुब्रूही'त्याश्राव्याहा'ग्नये स्विष्टकृते प्रेष्ये'ति व्वषट्कृते जुहोति ॥३४॥ अथ यद्वसाहोमस्य प-

१. प्रस्थितमिति. घ. २. मा. सं. ६. १९. ३ घृतं घृत इति. घ.
४. वैश्वदेवेनेति नाऽस्ति. ग. ५. वा इति. घ. ६. उदानत्यः इति घ.

रिशिष्यते । तेन दिशो व्याघारयति "दिशः प्रदिशऽआदिशो व्वि-दिशऽउद्दिशो दिग्भ्यः स्वाहे"ति रसो वै व्वसाहोमः सर्वास्वेवैत-द्दिक्षु रसं दधाति तस्मादयं दिशि दिशि रसोऽभिगम्यते ॥३५॥ अथ पशुꣳसंमृशति । एतर्हि संमर्शनस्य कालोऽथ यत्पुरा संमृशति यऽइमऽ उपतिष्ठन्ते ते व्विमथिष्यन्त ऽइति शङ्कमानो यद्यु व्विमा-थान्न शङ्केतात्रैव संमृशेत् ॥३६॥ "ऐन्द्रः प्राणः । अङ्गेऽअङ्गे निदी-ध्यदैन्द्रऽउदानोऽ अङ्गेऽअङ्गे निधीत" ऽइति यदङ्गशो व्विकृत्तो भवति तत्प्राणोदानाभ्याꣳसन्दधाति "देव त्वष्टर्भूरि ते सꣳ समेतु सलक्ष्मा यद्विषुरूपं भवाती"ति कृत्स्नवृतमेवैतत्करोति "देवत्रा य-न्तमवसे सखायोऽनु त्वा माता पितरो मदन्त्वि"ति यद्यत्रैनमहौ-षीत्तदेनं कृत्स्नं कृत्वानुसमस्यति सोऽस्य कृत्स्नोऽमुष्मिंल्लोकऽआत्मा भवति ॥३७॥ Cf. का. श. ४. ८. ३. तै. स. ६. ३. १०, ११; मै. सं. ३ १०. २-४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
षष्ठप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ८. ३.)

३. ६. ५.

त्रीणि ह वै पशोरेकादशानि । एकादश प्रयाजाऽएकादशानुया-जाऽएकादशोपयजो दश पाण्या ऽअङ्गुलयो दश पाद्या दश प्राणाः प्राण ऽउदानो व्यान ऽइत्येतावान्वै पुरुषो यः परार्ध्यः पशूनां यꣳ सर्वेऽनु पशवः ॥१॥ तदाहुः । किं तद्यज्ञे क्रियते येन प्राणः सर्वे-भ्योऽङ्गेभ्यः शिवऽइति ॥२॥ यदेव गुदं त्रेधा करोति । प्राणो वै गुदः सोऽयं प्राङ्ततस्तमयं प्राणो ऽनुसंचरति ॥३॥ स यदेव गुदं त्रेधा करोति । तृतीयमुपयड्भ्यस्तृतीयं जुह्वां तृतीयमुपभृति तेन प्राणः

१. मा. सं. ६. १९. २, ४, ५. मा. सं. ६. २०. ३. प्राण इति. ग.
६. एकादशानि इति. ग. ७. प्रयाजा इति. घ. ८. उपभृतीति. घ.

सर्वेभ्योऽङ्गेभ्यः शिवः ॥४॥ स ह त्वेव पशुमालभेत । यऽएनं मेधमुपनयेद्यदि कृशः स्याद्यदुदर्यस्य मेदसः परिशिष्येत तद्गुदे न्यृषेत्प्राणो वै गुदः सोऽयं प्राङ्गाततस्तमयं प्राणोऽनुसंचरति प्राणो वै पशुर्यावद्धयेव प्राणेन प्राणिति तावत्पशुरथ यदास्मात्प्राणोऽपक्रामति दार्वेव तर्हि भूतोऽनर्थ्यः शेते ॥५॥ गुदो वै पशुः[1] । मेदो वै मेधस्तदेनं मेधमुपनयति यद्युऽअ॑सलो भवति स्वयमुपेतऽएव तर्हि मेधं भवति ॥६॥ अथ पृषदाज्यं गृह्णाति । द्वयं वाऽइद॑सर्पिश्चैव दधि च द्वन्द्वं वै मिथुनं प्रजननं मिथुनमेवैतत्प्रजननं क्रियते ॥७॥ तेनानुयाजेषु चरति । पशवो वाऽअनुयाजाः पयः पृषदाज्यं तत्पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं प्राणो हि पृषदाज्यमन्न॑ हि पृषदाज्यमन्न॑ हि प्राणः[2] ॥८॥ तेन पुरस्तातदनुयाजेषु चरति[3] । स योऽयं पुरस्तात्प्राणस्तमेवैतद्दधाति तेन पश्चादुपयजति स योऽयं पश्चात्प्राणस्तमेवैतद्दधाति ताविमाऽउभयतः प्राणौ[4] हि तौ यश्चायमुपरिष्टाद्यश्चाधस्तात् ॥९॥ तद्वाऽएतदेको द्वाभ्यां व्यषट्करोति । अध्वर्यवे च यश्चैषऽउपयजत्यथ यद्यसन्तमुपयजति तस्मादुपयजो नामाथ यदुपयजति प्रैवैतज्जनयति पश्चाद्ध्युपयजति पश्चाद्धि योषायै प्रजाः प्रजायन्ते ॥१०॥ सऽउपयजति[5] । "समुद्रं[6] गच्छ स्वाहे"त्यापो वै समुद्रऽआपो रेतो रेतऽएवैतत्सिञ्चति ॥११॥ "अन्तरिक्षं[7] गच्छ स्वाहे"ति । अन्तरिक्षं वाऽअनुप्रजाः प्रजायन्तेऽन्तरिक्षमेवैतदनु प्रजनयति ॥ ॥१२॥ "देवं॑[8] सवितारं गच्छ स्वाहे"ति सविता वै देवानां प्रसविता सवितृप्रसूतऽएवैतत्प्रजनयति ॥१३॥ "मित्रावरुणौ[9] गच्छ स्वाहे"ति । प्राणोदानौ वै मित्रावरुणौ प्राणोदानावेवैतत्प्रजासु दधाति ॥ ॥१४॥ "अहोरात्रे[10] गच्छ स्वाहे"ति । अहोरात्रे वाऽअनु प्रजाः प्रजायन्तेऽहोरात्रेऽएवैतदनुप्रजनयति ॥१५॥ "छन्दांसि[11] गच्छ स्वाहे"ति । सप्त वै छन्दांसि सप्त ग्राम्याः पशवः सप्तारण्यास्तानेवैतदुभ-

---

१. पशुरिति. ग. २. प्राणः इति. ग. ३. चरति इति. घ.
४. प्राणौ इति. घ. ५. यजति इति. ग.घ ६–११. मा. सं. ६. २१.

यान् प्रजनयति ॥१६॥ "द्यावापृथिवी गच्छ स्वाहे"ति। प्रजापतिर्व्वै प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां पर्यगृह्णात्ता इमा द्यावापृथिवीभ्यां परिगृहीतास्तथोऽएवैषऽएतत्प्रजाः सृष्ट्वा ता द्यावापृथिवीभ्यां परिगृह्णाति ॥१७॥ अथात्युपयजति। स यन्नात्युपयजेद्यावत्यो हैवाग्रे प्रजाः सृष्टास्तावत्यो हैव स्युर्न प्रजायेरन्नथ यदत्युपयजति प्रैवैतज्जनयति तस्मादिमाः प्रजाः पुनरभ्यावर्त्त प्रजायन्ते ॥१८॥ Cf. का. श. ४. ८. ४; तै. सं. ६. ४. १; मै. सं. ३. १०. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
षष्ठप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ८. ४.)

षष्ठः प्रपाठकस्समाप्तः ॥
(कण्डिकासंख्या ११२)

३. ७. १.

सोऽस्युपजयति। "यज्ञं गच्छ स्वाहे"त्यापो वै यज्ञऽआपो रेतो रेतऽएवैतत्सिञ्चति ॥१॥ "सोमं गच्छ स्वाहे"ति। रेतो वै सोमो रेतऽएवैतत्सिञ्चति ॥२॥ दिव्यं नभो गच्छ स्वाहेति। आपो वै दिव्यं नभऽआपो रेतो रेतऽएवैतत्सिञ्चति ॥३॥ "अग्निं व्वैश्वानरं गच्छ स्वाहे"ति। इयं वै पृथिव्यग्निर्वैश्वानरः सेयं प्रतिष्ठेमामेवैतत्प्रतिष्ठामभिप्रजनयति ॥४॥ अथ मुखं व्विमृष्टे। मनो मे हार्द्दि यच्छेति तथो हैवोपयष्टात्मानं नानुप्रवृणक्ति ॥५॥ अथ जाघन्या पत्नीः संयाजयन्ति। जघनार्धो वै जाघनी जघनार्धाद्वै योषायै प्रजाः प्रजायन्ते तत्प्रैव तज्जनयति यज्जाघन्या पत्नीः संयाजयन्ति ॥६॥ अन्तरतो देवानां पत्नीभ्योऽवद्यति। अन्तरतो वै योषायै प्रजाः प्रजायन्तेऽउपरिष्टादग्नये गृहपतयऽउपरिष्टाद्वै व्वृषा योषामधिद्रवति ॥७॥ अथ हृदयशूलेना-

१. मा. सं. ६ २१. २. अथ इति. ग, घ. ३. प्रजायन्ते इति. ग.
४. स्वाहेति. घ. ५. व्वैश्वानरमिति. घ.

वभृथं यन्ति । पशोर्हि वाऽआलभ्यमानस्य हृदयꣳशुक्समभ्यवैति हृदयाद्धृदयशूलमथ यच्छृतस्य परितृन्दन्ति तदलञ्जुषं तस्मादु परितृद्यैव शूलाकुर्यात्तान्निःप्रच्युते पशौ हृदयं प्रवृह्योत्तमं प्रत्यवदधाति ॥८॥ अथ हृदयशूलं प्रयच्छति । तन्न पृथिव्यां परास्येन्नाप्सु स यत्पृथिव्यां परास्येदोषधीश्च वनस्पतींश्चैषा शुक्प्रविशेद्यदप्सु परास्येदपऽएषा शुक्प्रविशेत्तस्मान्न पृथिव्यां नाप्सु ॥९॥ अपऽएवाभ्यवेत्य । यत्र शुष्कस्य चार्द्रस्य च सन्धिः स्यात्तदुपगूहेद्यद्युऽअभ्यवायनाय ग्लायेदग्रेण यूपमुदपात्रं निनीय यत्र शुष्कस्य चार्द्रस्य च सन्धिर्भवति तदुपगूहति "मापो मौषधीर्हिꣳसी"रिति तथा नापो नौषधीर्हिनस्ति "धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च । यदाहुरघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्चे"ति तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुण्यात्प्रमुञ्चति ॥१०॥ अथाभिमन्त्रयते । "सुमित्रिया न ऽआपऽओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म"ऽइति यत्र वाऽएतेन प्रचरन्त्याषश्च ह वाऽअस्मात्तावदोषधयश्चापक्रम्येव तिष्ठन्ति तदु ताभिर्मित्रधेयं कुरुते तथो हैनं ताः पुनः प्रविशन्त्येषो तत्र प्रायश्चित्तिः क्रियते स वै नाग्नीषोमीयस्य पशोः करोति नाग्नेयस्य वशायाऽएवानूबन्ध्यायै तार्ह्यहि सर्वोऽनु यज्ञः संतिष्ठतऽएतदु हास्याग्नीषोमीयस्य च पशोराग्नेयस्य च हृदयशूलेन चरितं भवति यद्वशायाश्चरन्ति ॥११॥ Cf. का. श. ४. ८. ४; तै. सं. ६. ४. १; मै. सं. ३. १०. ७.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे
सप्तमप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ८. ५.)
(इत्यष्टमोऽध्यायः)

१. तदलं जुषं इति. घ. २. नाप्सु इति. ग.
३. डुपगूहेदिति. घ. ४-५, ७. मा.सं.६.२२. ६. वरुण इति. घ.

३. ७. २.

(पश्वेकादशिनी)

प्रजापतिर्वै प्रजाः ससृजानो रिरिचानऽइवामन्यत । तस्मात्पराच्यः प्रजाऽआसुर्नास्य प्रजाः श्रियेऽन्नाद्याय तस्थिरे ॥१॥ सऽपेक्षतारिष्यहम् । यस्माऽउ कामायासृक्षि न मे स कामः समार्धि पराच्यो मत्प्रजाऽअभूवन्न मे प्रजाः श्रियेऽन्नाद्यायास्थिषतेति ॥२॥ सऽपेक्षत प्रजापतिः । कथं नु पुनरात्मानमाप्याययेयोप मा प्रजाः समावर्तेरंस्तिष्ठेरन्मे प्रजाः श्रियेऽन्नाद्यायेति ॥३॥ सोऽर्चञ्छ्राम्यंश्चचार प्रजाकामः । सऽएतामेकादशिनीपमश्यत्सऽएकादशिन्येष्ट्वा प्रजापतिः पुनरात्मानमाप्याययतोपैनं प्रजाः समावर्त्तन्तातिष्ठन्तास्य प्रजाः श्रियेऽन्नाद्याय स व्वसीयानेवेष्ट्वाभवत् ॥४॥ तस्मै कमेकादशिन्या यजेत । एवꣳ हैव प्रजया पशुभिराप्यायतऽउपैनं प्रजाः समावर्तन्ते तिष्ठन्तेऽस्य प्रजाः श्रियेऽन्नाद्याय स व्वसीयानेवेष्ट्वा भवत्येतस्मै कमेकादशिन्या यजते ॥५॥ सऽआग्नेयं प्रथमं पशुमालभते । अग्निर्व्वै देवतानां मुखं प्रजनयिता स प्रजापतिः सऽउऽएव यजमानस्तस्मादाग्नेयो भवति ॥६॥ अथ सारस्वतम् । व्वाग्वै सरस्वती व्वाचैव तत्प्रजापतिः पुनरात्मानमाप्याययत व्वागेनमुपसमावर्तत व्वाचमनुकामात्मनोऽकुरुत व्वाचोऽएवैषऽएतदाप्यायते व्वागेनमुपसमावर्त्तते व्वाचमनुकामात्मनः कुरुते ॥७॥ अथ सौम्यम् । अन्नं वै सोमोऽन्नेनैव तत्प्रजापतिः पुनरात्मानमाप्याययतान्नमेनमुपसमावर्ततान्नमनुकमात्मनोऽकुरुतान्नेनोऽ एवैष ऽएतदाप्यायतेऽन्नमेनमुपसमावर्त्तते ऽन्नमनुकमात्मनः कुरुते ॥८॥ तद्यत्सारस्वतमनु भवति । व्वाग्वै सरस्वत्यन्नꣳ सोमस्तस्माद्यो व्वाचा प्रसाम्यन्नादो हैव भवति ॥९॥ अथ पौष्णम् । पशवो वै पूषा पशुभिरेव तत्प्रजापतिः पुनरात्मानमाप्याययत पशव ऽएनमुपसमावर्त्तन्त पशूननुका-

१. अस्मा इति. ग, घ. २. सारस्वतमिति. ग. ३. सौम्यमिति. ग.

नात्मनोऽकुरुत पशुभिर्वैवैषऽएतदात्यायते पशवऽएनमुपसमावर्त्तन्ते पशूननुकानात्मनः कुरुते ॥१०॥ अथ बार्हस्पत्यम्[1] । ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैतत्प्रजापतिः पुनरात्मानमाप्याययत ब्रह्मैनमुपसमावर्त्तत ब्रह्मानुकमात्मनोऽकुरुत ब्रह्मणोऽएवैषऽएतदाप्यायते ब्रह्मैनमुपसमावर्त्तते ब्रह्मानुकमात्मनः कुरुते ॥११॥ तद्यत्पौष्णमनु भवति । पशवो वै पूषा ब्रह्म बृहस्पतिस्तस्माद्ब्राह्मणः पशूनभिधृष्णुतमः पुराहिता ह्यस्य भवन्ति मुखऽआहितास्तस्मादुत सर्व्वं दत्त्वाजिनवासी चरति ॥१२॥ अथ वैश्वदेवꣳ[2] । सर्व्वं वै विश्वे देवाः सर्व्वेणैव तत्प्रजापतिः पुनरात्मानमाप्याययत सर्व्वमेनमुपसमावर्त्तत सर्व्वमनुकमात्मनोऽकुरुत सर्वेणोऽएवैषऽएतदाप्यायते सर्व्वमेनमुपसमावर्तते सर्व्वमनुकमात्मनः कुरुते ॥१३॥ तद्यद्बार्हस्पत्यमनुभवति । ब्रह्म वै बृहस्पतिः सर्व्वमिदं विश्वे देवाऽअस्यैवैत्सर्व्वस्य ब्रह्म मुखं करोति तस्मादस्य सर्व्वस्य ब्राह्मणो मुखम् ॥१४॥ अथैन्द्रम्[4] । इन्द्रियं वै वीर्यमिन्द्र ऽइन्द्रियेणैव तद्वीर्येण प्रजापतिः पुनरात्मानमाप्याययतेन्द्रियमेनं वीर्यमुदसमावर्ततेन्द्रियं वीर्यमनुकमात्मनोऽकुरुतेन्द्रियेणोऽएवैषऽएतद्वीर्येणाप्यायतऽइन्द्रियमेनं वीर्यमुपसमावर्ततऽइन्द्रियं वीर्यमनुकमात्मनः कुरुते ॥१५॥ तद्यद्वैश्वदेवमनुभवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवाऽअन्नाद्यमेवास्माऽएतत्पुरस्तात्करोति ॥१६॥ अथ मारुतम्[3] । विशो वै मरुतो भूमो वै विड्भूम्नैव तत्प्रजापतिः पुनरात्मानमाप्याययत भूमैनमुपसमावर्तत भूमानमनुकमात्मनोऽकुरुत भूम्नोऽएवैष एतदाप्यायते भूमैनमुपसमावर्तते भूमानमनुकमात्मनः कुरुते ॥१७॥ तद्यदैन्द्रमनु भवति । क्षत्रं वाऽइन्द्रो विशो विश्वे देवा विशा वै मरुतो विशोवैतत्क्षत्रं परिबृꣳहति तदिदं क्षत्रमुभयतो विशा परिबृढम् ॥१८॥ अथैन्द्राग्नम्[4] । तेजो वाऽअग्निरिन्द्रियं वीर्यमिन्द्रऽउभाभ्यामेव तद्वीर्याभ्यां प्रजाप-

---

१. बार्हस्त्यमिति. ग. घ.
२. वैश्वदेवꣳइति ग.
३. मारुतमिति. ग.
४. ऐन्द्राग्नं इति. ग.

तिः पुनरात्मानमाप्यायतोभेऽएनं व्वीर्येऽउपसमावर्तेतामुभे व्वीर्येऽअनुकेऽआत्मनोऽकुरुतोभाभ्याम्वेवैषऽएतद्वीर्याभ्यामाप्यायतऽउभेऽएनं व्वीर्येऽउपसमावर्तेतेऽउभे व्वीर्येऽअनुकेऽआत्मनः कुरुते ॥१९॥ अथ सावित्रꣳ । सविता वै देवानां प्रसविता तथो हास्माऽएवे सवितृप्रसूताऽएव सर्व्वे कामाः समृध्यन्ते ॥२०॥ अथ व्वारुणमन्ततऽआलभते । तदेनꣳ सर्व्वस्माद्वरुणपाशात्सर्व्वस्माद्वरुण्यात्प्रमुञ्चति ॥२१॥ तस्माद्यदि यूपैकादशिनी स्यात् । आग्नेयमेवाग्निष्टे नियुञ्ज्यादथेतरां व्युपनयेयुर्यथापूर्व्वम् ॥२२॥ यद्यु पश्वेकादशिनी स्यात् । आग्नेयमेव यूपऽआलभेरन्नथेतरान्यथापूर्व्वम् ॥२३॥ तान्यत्रोदीचो नयन्ति । आग्नेयमेव प्रथमं नयन्त्यथेतरान्यथापूर्वम् ॥२४॥ तान्यत्र निषिध्यन्ति । आग्नेयमेव प्रथमं दक्षिणार्ध्यं निविध्यन्त्यथेतरानुदीचोऽतिनीय यथापूर्वम् ॥२५॥ तेषां यत्र व्वपाभिः प्रचरन्ति । आग्नेयस्यैव प्रथमस्य व्वपया प्रचरन्त्यथेतरेषां यथापूर्वम् ॥२६॥ तैर्यत्र प्रचरन्ति । आग्नेयेनैव प्रथमेन प्रचरन्त्यथेतरैर्यथापूर्वम् ॥२७॥ (Cf. का. श. ४. ९. १; तै. सं. ६. ६. ५.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे सप्तमप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ९. १.)

३. ७. ३.

(वसतीवरीग्रहणम्)

यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तेनैवैतद्रसेनापः स्यन्दन्ते तमेवैतद्रसꣳ स्यन्दमानं मन्यन्ते ॥१॥ स यद्वसतीवरीरच्छेति । तमेवैतद्रसमाहृत्य यज्ञे दधाति रसवन्तं यज्ञं करोति तस्माद्वसतीवरीरच्छैति ॥२॥ ता वै सर्व्वेषु सवनेषु व्विभजति । सर्व्वेष्वेवैतत्सवनेषु रसं दधाति सर्व्वाणि सवनानि रसवन्ति करोति तस्मात्सर्वेषु सवनेषु व्विभजति ॥३॥ ता वै स्यन्दमानानां

१. आत्मानमिति. घ. २. आत्मन इति. घ. ३. व्विभजन्ति इति. घ.

गृह्णीयात् । ऐद्धि स यज्ञस्य रसस्तस्मात्स्यन्दमानानां[1] गृह्णीयात् ॥४॥ गोपीथाय वाऽएता गृह्यन्ते । सर्व्वं वाऽइदमन्यदिलयति यदिदं किं चापि योऽयं पवतेऽथैताऽएव नेलयन्ति तस्मात्स्यन्दमानानां गृह्णीयात् ॥५॥ दिवा गृह्णीयात् । पश्यन्यज्ञस्य रसं गृह्णीनीति तस्माद्दिवा गृह्णीयादेतस्मै वै गृह्णाति यऽएष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्माद्दिवा गृह्णीयाद्दिवेव वाऽएष तस्माद्धेव दिवा गृह्णीयात् ॥६॥ एतद्ध वै विश्वे देवाः । यजमानस्य गृहानागच्छन्ति स यः पुरादित्यस्यास्तमयाद्व्वसतीवरीर्गृह्णाति[2] यथा श्रेयस्यागमिष्यत्यावसथेनोपक्लृप्तेनोपासीतैवं तत्तऽएतद्धविः प्राविशन्ति तऽएतासु व्वसतीवरीषूपवसन्ति स उपवसथः ॥७॥ स यस्यागृहीता अभ्यस्तमियात्[3] । तत्र प्रायश्चित्तिः क्रियते यदि पुरेजानः स्यान्निनाह्याद्गृह्णीयाद्दिवा हि तस्य ताः पुरा गृहीता भवन्ति यद्युऽअनीजानः स्याद्यऽएनमीजान उपावसितो वा पर्यवसितो वा स्यात्तस्य निनाह्याद्गृह्णीयाद्दिवा हि तस्य ताः पुरा गृहीता भवन्ति ॥८॥ यद्युऽएतदुभयं न विन्देत्[4] । उलूकुषीमेवादायोपपरेयात्तामुपर्युपरि धारयन् गृह्णीयाद्धिरण्यं वोपर्युपरि धारयन् गृह्णीयात्तदेतस्य रूपं क्रियते यऽएष तपति ॥९॥ अथातो गृह्णात्येव । "हविष्मतीरिमाऽआप"[6]ऽइति यज्ञस्य ह्यासु रसः प्राविशत्तस्मादाह हविष्मतीरिमाऽआपऽइति "हविष्मां२ऽआविवासती"[7]ति हविष्मान् ह्येना यजमानऽआविवासति तस्मादाह हविष्मां२ऽआविवासतीति ॥१०॥ "हविष्मान्देवोऽअध्वर"[8]ऽइति । अध्वरो वै यज्ञस्तद्यस्मै यज्ञाय गृह्णाति तद्धविष्मन्तं करोति तस्मादाह हविष्मान्देवोऽअध्वरऽइति ॥११॥ "हविष्मां२ऽअस्तु सूर्य"[9]इति । एतस्मै वै

---

१. स्यन्दमानानामिति. घ. २. व्वसतीवरीष्विति. घ. ३ यात् इति. ग.
४. विन्देत इति. घ. ५. उलूकुषीमेवेति. घ. ६. मा. सं. ६. २३.
७ हविष्मतीरिति. ग. घ. ८. रिमा इति. ग. घ. ९-११ मा. सं. ६. २३.

गृह्णाति यऽएष तपति विश्वेभ्यो ह्येना देवेभ्यो गृह्णाति रश्मयो ह्यस्य विश्वे देवास्तस्मादाह हविष्मां २॥ ऽअस्तु सूर्यऽइति ॥१२॥ ताऽआहृत्य जघनेन गार्हपत्यꣳ सादयति । "अग्नेर्व्वोऽपन्नगृहस्य सदसि सादयामी"त्यग्नेर्व्वोऽनार्तगृहस्य सदसि सादयामीत्येवैतदाहाथ यदाग्नीषोमीयः पशुः सन्तिष्ठतेऽथ परिहरति व्युत्क्रामतेत्याहाग्रेण हविर्धाने यजमानऽआस्ते ता आदत्ते ॥१३॥ स दक्षिणेन निष्क्रामति । ता दक्षिणायाꣳ श्रोणौ सादयती"न्द्राग्न्योर्भागधेयी स्थे"ति विश्वेभ्यो ह्येना देवेभ्यो गृह्णातीन्द्राग्नी हि विश्वे देवास्ताः पुनराहृत्याग्रेण पत्नीꣳ सादयति स जघनेन पत्नीं पर्येत्य ताऽआदत्ते ॥१४॥ सऽउत्तरेण निष्क्रामति । ताऽउत्तरायाꣳ श्रोणौ सादयति "मित्रावरुणयोर्भागधेयी स्थेति नैवꣳ सादयेदतिरिक्तमेतन्नैवꣳ सम्पत्सम्पद्यतऽइन्द्राग्न्योर्भागधेयी स्थेत्येव ब्रूयात्तदेवानतिरिक्तं तथा सम्पत्सम्पद्यते ॥१५॥ गुप्त्यै वाऽएताः परिह्रियन्ते । अग्निः पुरस्तादथैताः समन्तं पल्यङ्ग्यन्ते नाष्ट्रा रक्षाꣳस्यपघ्नत्यस्ताऽआग्नीध्रे सादयति "विश्वेषां देवानां भागधेयी स्थे"ति तदासु विश्वान्देवान्त्संवेशयत्येते वै व्वसतां व्वरं तस्माद्वसतीवर्यो नाम व्वसताꣳ ह वै व्वरं भवति यऽएवमेतद्वेद ॥१६॥ तानि वाऽएतानि । सप्त यजूꣳषि भवन्ति चतुर्भिर्गृह्णात्येकेन जघनेन गार्हपत्यꣳ सादयत्येकेन परिहरत्येकेनाग्नीध्रे तानि सप्त यत्र वै व्वाचः प्रजातानि छन्दाꣳसि सप्तपदा वै तेषां परार्ध्या शक्यैतामभिसम्पदं तस्मात्सप्त यजूꣳषि भवन्ति ॥१७॥ Cf. का. श. ४. ९. २; तै. सं. ६. ४. २; मै. सं. ४. ५. १, २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे सप्तमप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ९. २.)

१ हविष्माँ ३ ऽइति. घ. एवमेव पूर्वत्राऽपि । २-५. मा. सं. ६. २४.

३. ७. ४.

(सोमोपावहरणम् , सवनीयहविर्निर्वापः, प्रचरणीहोमश्च)

तान्त्सम्प्रबोधयन्ति । तेऽपऽउपस्पृश्याग्नीद्ध्रमुपसमायन्ति तऽआज्यानि गृह्णते गृहीत्वाज्यान्यायन्त्यासाद्याज्यानि ॥१॥ अथ राजानमुपावहरति । इयं वै प्रतिष्ठा जनूरासां प्रजानामिमामेवैतत्प्रतिष्ठामभ्युपावहरति तमस्यै तनुते तमस्यै जनयति ॥२॥

(अर्द्धप्रपाठकः)

अन्तरेणेषेऽउपावहरति । यज्ञो वाऽअनस्तन्न्वेव यज्ञान्न बहिर्द्धा करोति ग्रावसु सम्मुखेष्वधिनिदधाति क्षत्रं वै सोमो विशो ग्रावाणः क्षत्रमेवैतद्विश्यध्यूहति तद्यत्सम्मुखा भवन्ति विशमेवैतत्सम्मुखां क्षत्रियमभ्यविवादिनीं करोति तस्मात्संमुखा भवन्ति ॥३॥ सऽउपावहरति । "हृदे त्वा मनसे त्वे"ति यजमानस्यैतत्कामायाह हृदयेन हि मनसा यजमानस्तं कामं कामयते यत्काम्या यजते तस्मादाह हृदे त्वा मनसे त्वेति ॥४॥ "दिवे त्वा सूर्याय त्वे"ति । देवलोकाय त्वेत्येवैतदाह यदाह दिवे त्वेति सूर्याय त्वेति देवेभ्यस्त्वेत्येवैतदाहो"र्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छे"त्यध्वरो वै यज्ञऽऊर्ध्वमिमं यज्ञं दिवि देवेषु धेहीत्येवैतदाह ॥५॥ "सोमं राजन्विश्वास्त्वं प्रजाऽउपावरोहे"ति । तदेनमासां प्रजानामाधिपत्याय राज्यायोपावहरति ॥६॥ अथानुसृज्योपतिष्ठते । "विश्वास्त्वां प्रजाऽउपावरोह न्ति"त्ययथायथमिव वाऽएतत्करोति यदाह विश्वास्त्वं प्रजाऽउपावरोहेति क्षत्रं वै सोमस्तत्पापवस्यसङ्करोति तद्भेदमनु पापवस्यसं क्रियतेऽथात्र यथायथं करोति यथापूर्वं यदाह विश्वास्त्वां प्रजाऽउपावरोहन्त्विति तदेनमाभिः प्रजाभिः प्रत्यवरोहयति तस्मादु क्षत्रियमायन्तमिमाः प्रजा विशः प्रत्यवरोहन्ति तमधस्तादुपासतऽउपसन्नो होता प्रातरनुवाकमनुवक्ष्यन् भवति ॥७॥ अथ स-

१. बोधयन्ति इति ग. २. स्तन्न्वेवेति. घ. ३-५. मा. सं. ६. २५.
६,७. मा. सं.६.२६. ८. वक्ष्यन् भवतीति.ग.

मिधमभ्यादधदाह । 'देवेभ्यः प्रातर्यावभ्योऽनुब्रूही'ति छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यनुयाजा 'देवेभ्यः प्रेष्य' 'देवान्यजे'ति वाऽअनुयाजैश्चरन्ति ॥८॥ तदु हैकऽआहुः 'देवेभ्योऽनुब्रूही'ति तदु तथा न ब्रूयाच्छन्दाꣳसि वै देवाः प्रातर्यावाणश्छन्दाꣳस्यनुयाजा देवेभ्यः प्रेष्य देवान्यजेति वाऽअनुयाजैश्चरन्ति तस्मादु ब्रूयाद्देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीत्येव ॥९॥ अथ यत्समिधमभ्यादधाति । छन्दाꣳस्येवैतत्समिन्द्धेऽथ यद्धोता प्रातरनुवाकमन्वाह छन्दाꣳस्येवैतत्पुनराप्याययत्ययातयामानि करोति यातयामानि वै देवैश्छन्दाꣳसि छन्दोभिर्हि देवाः स्वर्गं लोकꣳ समाश्नुवत न वाऽअत्र स्तुवते न शꣳसन्ति तच्छन्दाꣳस्येवैतत्पुनराप्याययत्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते तस्माद्धोता प्रातरनुवाकमन्वाह ॥१०॥ तदाहुः । कः प्रातरनुवाकस्य प्रतिगरऽइति जाग्रद्वैवाध्वर्युरुपासीत स यन्निमिषति स हैवास्य प्रतिगरस्तदु तथा न कुर्याद्यदि निद्रायादपि कामꣳ स्वप्यात्स यत्र होता प्रातरनुवाकं परिदधाति तत्प्रचरणीति स्रुग्भवति तस्यां चतुर्गृहीतमाज्यं गृहीत्वा जुहोति ॥११॥ यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तमदः पूर्व्वेद्युर्व्वसतीवरीभिराहरत्यथ योऽत्र यज्ञस्य रसः परिशिष्टस्तमेवैतदच्छैति ॥१२॥ यद्वेवैतामाहुतिं जुहोति । एतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्द्धे याभ्यऽउ चैवैतां देवताभ्यऽआहुतिं जुहोति ताऽएवैतत्प्रीणाति ताऽअस्मै तृप्ताः प्रीताऽएतं यज्ञस्य रसꣳ सन्नमन्ति ॥१३॥ (शतम् २२००) स जुहोति । "शृणोत्वग्निः समिधा हवं म"ऽइति शृणोतु मऽइदमग्निरनु मे जानात्वित्येवैतदाह "शृण्वन्त्वापो धिषणाश्च देवी"रिति शृण्वन्तु मऽइदमापोऽनु मे जानन्त्वित्येवैतदाह "श्रोता ग्रावाणो विदुषो न यज्ञ"मिति शृण्वन्तु मऽइदं ग्रावाणोऽनु मे जानन्त्वित्येवैतदाह विदुषो न यज्ञमिति विद्वाꣳसो हि ग्रावाणः "शृणोतु देवः सविता हवं मे स्वाहे"ति

१. त्येव इति. घ. २-४,६. मा.सं. २. ६. ५. विदुषो इति घ.

शृणोतु मऽइदं[1] देवः सवितानु मे जानात्वित्येवैतदाह सविता वै देवानां प्रसविता तत्सवितृप्रसूतऽएवैतद्यज्ञस्य रसमच्छैति ॥१४॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा[2] । उदङ् प्रयन्नाहापऽइष्य होतरित्यपऽइच्छ होतरित्येवैतदाह तद्यदतो होतान्वाहैतमेवैतद्यज्ञस्य रसमभिप्रस्तृणीते तमारुन्द्धऽएतानु चैवैतदनुतिष्ठते नेदेनानन्तरा नाष्ट्रा रक्षाᳬसि हिनसन्निति ॥१५॥ अथ सम्प्रेष्यति । 'मैत्रावरुणस्य चमसाध्वर्यवेहि नेष्टः पत्नीरुदानयैकधानिनऽएताग्नीच्चात्वाले व्वसतीवरीभिः प्रत्युपतिष्ठासै होतृचमसेन चे'ति सम्प्रैषऽएवैषः ॥ ॥१६॥ तऽउदञ्चो निष्क्रामन्ति । जघनेन चात्वालमग्रेणाग्नीध्रᳬ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ते वै सह पत्नीभिर्यन्ति तद्यत्सह पत्नीभिर्यन्ति ॥१७॥ यत्र वै यज्ञस्य शिरोऽच्छिद्यत । तस्य रसो द्रुत्वापः प्रविवेश तमेते गन्धर्व्वाः सोमरक्षा जुगुपः ॥१८॥ ते ह देवाऽऊचुः । इयमु न्वेवेह नाष्ट्रा यदिमे गन्धर्व्वाः कथं न्विममभयेऽनाष्ट्रे यज्ञस्य रसमाहरेमेति ॥१९॥ ते होचुः । योषित्कामा वै गन्धर्व्वाः सहैव[3] पत्नीभिरयाम ते पत्नीष्वेव गन्धर्व्वा गर्द्धिष्यन्त्यथैतमभयेऽनाष्ट्रे यज्ञस्य रसमाहरिष्यामऽइति ॥२०॥ ते सह पत्नीभिरीयुः । ते पत्नीष्वेव गन्धर्व्वा जगृधुरथैतमभयेऽनाष्ट्रे यज्ञस्य रसमाजहुः ॥२१॥ तथोऽएवैषऽएतत् । सहैव पत्नीभिरेति ते पत्नीष्वेव गन्धर्व्वा गृध्यन्त्यथैतमभयेऽनाष्ट्रे यज्ञस्य रसमाहरति[5] ॥२२॥ सोऽपोऽभिजुहोति । एताᳬ ह वाऽआहुतिᳬ हुतामेष यज्ञस्य रस ऽउपसमैति तां प्रत्युत्तिष्ठति तमेवैतदाविष्कृत्य गृह्णाति ॥२३॥ यद्वेवैतामाहुतिं जुहोति । एतमेवैतद्यस्य रसमभिप्रस्तृणीते तमारुन्द्धे तमपो याचति याभ्यऽउ चैवैतां देवताभ्यऽआहुतिं जुहोति ताऽएवैतत्प्रीणाति ताऽअस्मै तृप्ताः प्रीताऽएतं यज्ञस्य रसᳬ सन्नम-

---

१. इदं इति. घ. २. गृहीत्वा इति घ, गृहीत्वा इति. ग.

३. सह पत्नीभिरिति. ग. ४. गन्धर्वा इति. ग. ५. हरति इति. ग.

न्ति ॥२४॥ स जुहोति । "देवीरापोऽअपान्नपा"दिति देव्यो ह्यापस्त-स्मादाह देवीरापोऽअपान्नपादिति "यो वऽऊर्मिर्हविष्य"ऽइति यो वऽऊर्मिर्यज्ञिय इत्येवैतदाहे "न्द्रियावान्मदिन्तम"ऽइति व्वीर्यवानित्येवैतदाह यदाहेन्द्रियावानिति मदिन्तम ऽइति स्वादिष्ठऽइत्येवैतदाह "तं देवेभ्यो देवत्रा दत्ते" त्येतदेनाऽअयाचिष्ट यदाह तं देवेभ्यो देवत्रा दत्तेति "शुक्रपेभ्य"ऽइति सत्यं वै शुक्रꣳ सत्यपेभ्यऽइत्येवैतदाह "येषां भागः स्थ स्वाहे"ति तेषामु ह्येष भागः॥२५॥ अथ मैत्रावरुणचमसेनैतामाहुतिमपप्लावयति । "कार्षिरसी"ति यथा वाऽअङ्गारोऽग्निना प्लातः स्यादेवमेषाहुतिरेतया देवतया प्लाता भवति राजानं वाऽएताभिरद्भिरुपस्रक्ष्यन् भवति याऽएता मैत्रावरुणचमसे व्वज्रो वाऽआज्यꣳ रेतः सोमो नेद्वज्रेणाज्येन रेतः सोमꣳ हिनसानीति तस्माद्वाऽअपप्लावयति ॥२६॥ अथ गृह्णाति । "समुद्रस्य त्वाक्षित्याऽउन्नयामी"त्यापो वै समुद्रोऽप्स्वेवैतदक्षितिं दधाति तस्मादाप ऽएतावति भोगे भुज्यमाने न क्षीयन्ते तदन्वेकधनानुन्नयन्ति तदनु पात्रेजनान् ॥२७॥ तद्यन्मैत्रावरुणचमसेन गृह्णाति । यत्र वै देवेभ्यो यज्ञोऽपाक्रामत्तमेतद्देवाः प्रैषैरेव प्रैषमैच्छन् पुरोरुग्भिः प्रारोचयन्निविद्भिर्न्यवेदयंस्तस्मान्मैत्रावरुणचमसेन गृह्णाति ॥२८॥ तऽआयन्ति । प्रत्युपतिष्ठतेऽग्नीच्चात्वाले व्वसतीवरीभिश्च होतृचमसेन च सऽउपर्युपरि चात्वालꣳ सꣳस्पर्शयति व्वसतीवरीश्च मैत्रावरुणचमसं च "समापोऽअद्भिरग्मत समोषधीभिरोषधी"रिति यश्चासौ पूर्व्वेद्युराहृतो यज्ञस्य रसो यश्चाद्याहृतस्तमेवैतदुभयꣳ सꣳसृजति ॥२९॥ तद्धैके । एव मैत्रावरुणचमसे व्वसतीवरीर्नयन्त्या मैत्रावरुणचमसाद्वसतीवरीषु यश्चासौ पूर्व्वेद्युराहृतो यज्ञस्य रसो यश्चाद्याहृतस्तमेवैतदुभयꣳ सꣳसृजाम ऽइति व्वदन्तस्तदु तथा न कु-

१-६. मा. सं. ६. २५. ७. मा. सं. ६. २८.
८ तस्माद्वा इति. घ. ९,१०. मा. सं. ६. २८.
११. See तै. सं. ६. ४. ३. ४.

र्यद्यद्वाऽआधवनीये समवनयति तदेवैष ऽउभयो यज्ञस्य रसः सꣳसृज्यतेऽथ होतृचमसे व्वसतीवरीर्गृह्णाति निग्राभ्याभ्यस्तद्यदुपर्युपरि चात्वालꣳ सꣳ स्पर्शयत्यतो वै देवा दिवमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥३०॥ तऽआयन्ति । तꣳ होता पृच्छत्यध्वर्योऽवेरपा३ ऽइत्यविदो ऽपा३ ऽइत्येवैतदाह तं प्रत्याहोतेव नश्नमुरित्यविदमथो मेऽनꣳसतेत्येवैतदाह ॥३१॥ स यद्यग्निष्टोमः स्यात् । यदि प्रचरण्याꣳ सꣳस्रवः[1] परिशिष्टोऽलꣳ होमाय स्यात्तं जुहुयाद्यद्यु नालꣳ होमाय स्यादपरं चतुर्गृहीतमाज्यं गृहीत्वा जुहोति "यमग्ने पृत्सु मर्त्यमवा व्वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः स्वाहे"त्याग्नेय्या जुहोत्यग्निर्व्वाऽअग्निष्टोमस्तदग्नावग्निष्टोमं प्रतिष्ठापयति मर्त्तवत्या पुरुषसंमितो वाऽअग्निष्टोम ऽएवं जुहुयाद्यद्यग्निष्टोमः स्यात् ॥३२॥ यद्युक्थ्यः स्यात्[2] । मध्यमं परिधिमुपस्पृशेत्त्रयः परिधयस्त्रीण्युक्थान्येतैरु हि तर्हि यज्ञः प्रतितिष्ठति यद्युऽअतिरात्रो वा षोडशी वा स्यान्नैव जुहुयान्न मध्यमं परिधिमुपस्पृशेत्समुद्यैव तूष्णीमेत्य प्रपद्येत तद्यथायथं यज्ञक्रतून्व्यावर्त्तयति ॥ ३३ ॥ अयुङ्गा अयुङ्गाऽएकधना भवन्ति । त्रयो वा पञ्च वा पञ्च वा सप्त वा सप्त वा नव वा नव वैकादश वैकादश वा त्रयोदश वा त्रयोदश[3] वा पञ्चदश वा द्वन्द्वमह मिथुनं प्रजननमथ यऽएष एकोऽतिरिच्यते स यजमानस्य श्रियमभ्यतिरिच्यते स वाऽएषाꣳ सधनं यो यजमानस्य श्रियमभ्यतिरिच्यते तद्यदेषाꣳ सधनं[4] तस्मादेकधना नाम ॥३४॥ Cf. का. श. ४. ९. ३; तै. सं. ६. ४. ३; मै. सं ४. ५. २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे सप्तमप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ९. ३.)

१. मा. सं. ६. २९.
२. स्यात् इति. घ.
३. त्रयोदश इति नाऽस्ति. ग.
४. सधनं इति. घ.

३. ७. ५.

(प्रातस्सवनम् , सोमाभिषवः)

अथाधिषवणे पर्युपविशन्ति । अथास्याꣳ हिरण्यं बध्नीते द्वयं वाऽइदं न तृतीयमस्ति सत्यं चैवानृतं च सत्यमेव देवाऽ अनृतं मनुष्या ऽअग्निरेतसं वै हिरण्यꣳ सत्येनाꣳशूनुपस्पृशानि सत्येन सोमं पराहणानीति तस्माद्वा ऽअस्याꣳ हिरण्यं बध्नीते[1] ॥१॥ अथ ग्रावाणमादत्ते । ते वाऽएतेऽइममया ग्रावाणो भवन्ति देवो वै सोमो दिवि हि सोमो व्वृत्रो वै सोम ऽआसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तच्छरीरेणैवैनमेतत्समर्द्धयति कृत्स्नं[2] करोति तस्मादश्ममया भवन्ति घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथात ऽउदेति तथा संजीवति तस्मादश्ममया ग्रावाणो भवन्ति ॥२॥ तमादत्ते । "देवस्य[3] त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामादद[4] रावासी[5]"ति सविता वै देवानां प्रसविता तत्सवितृप्रसूतऽएवैनमेतदादत्तेऽश्विनोर्बाहुभ्यामित्यश्विनावध्वर्यू तत्तयोरेव बाहुभ्यामादत्ते[6] न स्वाभ्यां पूष्णो हस्ताभ्यामिति पूषा भागदुघस्तत्तस्यैव हस्ताभ्यामादत्ते[7] न स्वाभ्यां व्वज्रो वाऽएष तस्य न मनुष्यो भर्ता तमेताभिर्देवताभिरादत्ते ॥३॥ आददे रावासीति । यदा वाऽएनमेतेनाभिषुण्वन्त्यथाहुतिर्भवति यदाहुतिं जुहोत्यथ दक्षिणा ददात्येतद्ध्येष द्वयꣳ रासतऽआहुतीश्च दक्षिणाश्च तस्मादाह रावासीति ॥४॥ "गभीरमिममध्वरं कृधी"ति । अध्वरो वै यज्ञो महान्तमिमं यज्ञं कृधीत्येवैतदाहे"न्द्रायं सुषुतम"मितीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्रायेति सुषुतममिति सुसुततमम[8]मित्येवैतदाहो"त्तमेन[9] पविने"त्येष वाऽउत्तमः पवित्रयत्सोमस्तस्मादाहोत्तमेन पविने"त्यूर्ज्जस्वन्तं[10] मधु[11]-

---

१. बध्नीते इति. घ. २. कृत्स्नमिति. घ. ३. मा.सं. ६. ३०.
४,५. मादत्ते इति.ग,घ. ६, ७. मा. सं. ६. ३०. ८. सुसुतमिति. ग.
९,१०. मा. सं. ६. ३०. ११. स्वन्तं इति. घ.

मन्तं पयस्वन्त"मिति रसवन्तमित्येवैतदाह यदाहोर्जस्वन्तं मधुमन्तं पयस्वन्तमिति ॥५॥ अथ वाचं यच्छति देवा ह वै यज्ञं तन्वानास्तेऽसुररक्षसेभ्य ऽआसङ्गाद्बिभयांचक्रुस्ते होचुरुपाꣳशु यजाम वाचं यच्छामेति तऽउपाꣳश्वयजन् वाचमयच्छन् ॥६॥ अथ निग्राभ्या ऽआहरति। तास्वेनं वाचयति "निग्राभ्या स्थ देवश्रुतस्तर्प्पयत मा। मनो मे तर्प्पयत वाचं मे तर्प्पयत प्राणं मे तर्प्पयत चक्षुर्मे तर्प्पयत श्रोत्रं मे तर्प्पयतात्मानं मे तर्प्पयत प्रजां मे तर्प्पयत पशून् मे तर्प्पयत गणान् मे तर्प्पयत गणा मे मा वितृषन्निति रसो वाऽआपस्तास्वेवैतामाशिषमाशास्ते सर्वं च मऽआत्मानं तर्प्पयत प्रजां मे तर्प्पयत पशून् मे तर्प्पयत गणान् मे तर्प्पयत गणा मे मा वितृषन्निति स यऽएष उपाꣳशु सवनः स विवस्वानादित्यो निदानेन सोऽस्यैष व्यानः ॥७॥ तमभिमिमीते। घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथातऽउदेति तथा सञ्जीवति यद्वेव मिमीते तस्मान्मात्रा मनुष्येषु मात्रो यो चाप्यन्या मात्रा ॥८॥ स मिमीते। "इन्द्राय त्वा वसुमते रुद्रवत"ऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय त्वेति वसुमते रुद्रवतऽइति तदिन्द्रमेवानु वसूंश्च रुद्रांश्चाभजती"न्द्राय त्वादित्यवत"ऽइति तदिन्द्रमेवान्वादित्यानाभजती"न्द्राय त्वाभिमातिघ्न"ऽइति सपत्नो वाऽअभिमातिरिन्द्राय त्वा सपत्नघ्न ऽइत्येवैतदाह सोस्योद्धारो यथा श्रेष्ठस्योद्धार ऽएवमस्यैषऽऋते देवेभ्यः ॥९॥ "श्येनाय त्वा सोमभृत"ऽइति। तद्गायत्र्यै मिमीतेऽ"ग्नये त्वा रायस्पोषद"ऽइत्यग्निर्वै गायत्री तद्गायत्र्यै मिमीते स यद्गायत्री श्येनो भूत्वा दिवः सोममाहरत्तेन सा श्येनः सोमभृत्तेनैवास्या ऽएतद्वीर्येण द्वितीयं मिमीते ॥१०॥ अथ यत्पञ्चकृत्वो मिमीते। संवत्सरसंमितो वै यज्ञः पञ्च वाऽऋतवः

१. मा. सं.६. ३०. २. मा. सं ६. ३१. ३. तर्पयतेति. घ.
४. सवनः. इति. घ. ५. व्यान इति. ग. ६. घ्नन्तीति. घ.
७. पात्रो इति क. ८.–१२. मा. सं. ६. ३२ १३. इति. घ.
१४. गायत्री इति. घ. १५. द्वितीयꣳ इति. घ. १६. संवत्सर इति. घ.

संवत्सरस्य तं पञ्चभिराप्नोति तस्मात्पञ्च कृत्वो मिमीते ॥११॥ तमभिमृशति । "यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे । तेनास्मै यजमानायोरु राये कृध्यधि दात्रे व्वोच" ऽइति यत्र वाऽएषोऽग्रे देवानाꣳ हविर्बभूव तद्धेक्षांचक्रे मैव सर्वेणेवात्मना देवानाꣳ हविर्भूवमिति स ऽएतास्तिस्रस्तनूरेषु लोकेषु व्विन्यधत्त ॥१२॥ तद्वै देवाऽ अस्पृण्वत । तेऽस्यैतेनैवैतास्तनूराप्नुवन्त्सं कृत्स्नऽएव देवानाꣳ हविरभवत्तथोऽएवास्यैष ऽएतेनैवैतास्तनूराप्नोति स कृत्स्न ऽएव देवानाꣳ हविर्भवति तस्मादेवमभिमृशति ॥१३॥ अथ निग्राभ्याभिरुपसृजति । आपो ह वै व्वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते तस्मादेनाः स्यन्दमाना न किं चन प्रतिधारयते ता ह स्वमेव व्वशं चेरुः कस्मै नु व्वयं तिष्ठेमहि याभिरस्माभिर्वृत्रो हतऽइति सर्व्वं वाऽइदमिन्द्राय तस्थानमास यदिदं किञ्चापि योऽयं पवते ॥१४॥ स ऽइन्द्रोऽब्रवीत् । सर्व्वं वै मऽइदं तस्थानं यदिदं किं च तिष्ठध्वमेव मऽइति ता होचुः किं नस्ततः स्यादिति प्रथममक्षऽएव वः सोमस्य राज्ञऽइति तथेति ताऽअस्माऽअतिष्ठन्त तास्तस्थानाऽउरसि न्यगृह्णीत तद्यदेना उरसि न्यगृह्णीत तस्मान्निग्राभ्या नाम तथैवैना एतद्यजमानऽउरसि निगृह्णीते स ऽआसामेष प्रथममक्षः सोमस्य राज्ञो यन्निग्राभ्याभिरुपसृजति ॥१५॥ सऽउपसृजति । "श्वात्रा स्थ वृत्रतुर"ऽइति शिवा ह्यापस्तस्मादाह श्वात्रा स्थेति व्वृत्रतुर इति व्वृत्रꣳ ह्येताऽअघ्नन् "राधो गूर्त्ताऽअमृतस्य पत्नी"रित्यमृता ह्यापस्ता देवीर्हैवत्रेमं यज्ञं नयतेति नात्र तिरोहितमिवास्त्यु "पहूताः सोमस्य पिबते"ति तदुपहूताऽएव प्रथममक्षꣳ सोमस्य राज्ञो भक्षयन्ति ॥१६॥ अथ प्रहरिष्यन् । यं द्विष्यात्तं मनसा ध्यायेदमुष्माऽअहं प्रहरामि न तुभ्यमिति यो न्वेवेमं मानुषं ब्राह्मणꣳ हन्ति तं

---

१. पञ्चभिः इति. ग. २. मा. स. ६. ३३. ३. तद्धेक्षाञ्चक्रे इति. घ.
४. स इति. घ. ५. धारयतीति. ग. ६. चापि. इति. क.
७. किं इति घ. ८. एता इति. ग. ९-११. मा. सं ६.३४

न्वेव परिचक्षतेऽथ किं य एतं देवो हि सोमो घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तमेतेन घ्नन्ति तथा तऽउदेति तथा सञ्जीवति तथानेनस्यं भवति यद्यु न द्विष्यादपि तृणमेव मनसा ध्यायेत्तथोऽअनेनस्यं भवति ॥१७॥ स प्रहरति । "मा भेर्मा संविक्था"ऽइति मा त्वं भैषीर्मा संविक्थाऽअमुष्माऽअहं प्रहरामि न तुभ्यमित्येवैतदाहो-"र्जं धत्स्वे"ति रसं धत्स्वेत्येवैतदाह "धिषणे व्वीड्वी सती व्वीडयेथामूर्जं दधाथा"मितीमेऽएवैतत्फलकेऽआहुरित्युं हैकऽआहुः किं नु तत्र योऽप्येते फलके भिन्द्यादिमेह वै द्यावापृथिवीऽएतस्माद्वज्राद्यद्यतात्सꣳरेजेते तदाभ्यामेवैनमेतद्द्यावापृथिवीभ्याꣳ शमयति तथेमे शान्तो न हिन"स्त्यूर्जं दधाथा"मिति रसं दधाथामित्येवैतदाह "पाप्मा हतो न सोम"ऽइति तदस्य सर्व्वं पाप्मानꣳहन्ति ॥१८॥ स वै त्रिरभिषुणोति । त्रिः सम्भरति चतुर्निग्राभमुपैति तद्दश दशाक्षरा वै व्विराड्वैराजः सोमस्तस्माद्दश कृत्वः सम्पादयति ॥१९॥ अथ यन्निग्राभमुपैति । यत्र वाऽएषोऽग्रे देवानाꣳ हविर्बभूव तद्धेमा दिशोऽभिदध्यावाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पृशेयेति तमेतद्देवाऽआभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना समस्पर्शयन्यन्निग्राभमुपायंस्तथोऽएवैनमेषऽएतदाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयति यन्निग्राभमुपैति ॥२०॥ सऽउपैति । "प्राग्पागुदगधराक्सर्व्वतस्त्वा दिशऽआधावन्त्वि"ति तदेनमाभिर्दिग्भिर्मिथुनेन प्रियेण धाम्ना सꣳस्पर्शयत्य"म्बे निष्पर समरीर्विदा"मिति योषा वाऽअम्बा योषा दिशस्तस्मादाहाम्बे निष्परेति समरीर्व्विदामिति प्रजा वाऽअरीः सम्प्रजा जानतामित्येवैतदाह तस्माद्याऽअपि व्विदूरमिव प्रजा भवन्ति समेव ता जानते तस्मादाह समरीर्व्विदामिति ॥२१॥ अथ यस्मात्सोमो नाम । यत्र वाऽएषोऽग्रे देवानाꣳ हविर्बभूव तद्धेक्षांचक्रे मैव सर्व्वेणेवात्मना देवानाꣳ हविर्भूवामिति तस्य या जु-

१-३. मा. सं. ६. ३५. ४. रित्यु इति. घ. ५-८. मा. ६. ३६.

घृतमा तनूरास तामपनिदधे तद्वै देवा अस्पृण्वत ते होचुरुपैवैतां प्रवृहस्व सहैव न ऽएतया हविरेधीति तां दूरऽइवोपप्रावृहत स्वा वै मऽएषेति तस्मात्सोमो नाम ॥२२॥ अथ यस्माद्यज्ञो नाम । घ्नन्ति वाऽएनमेतद्यदभिषुण्वन्ति तद्यदेनं तन्वते तदेनं जनयन्ति स तायमानो जायते स यन् जायते[1] तस्माद्यज्ञो ह वै नामैतद्यद्यज्ञऽइति ॥२३॥ तत्रैतामपि व्वाचमुवाद । "त्वमङ्ग[2] प्रशꣳसिषो देवः शविष्ठ मर्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते व्वच"ऽइति मर्त्यो हैवैतद्भवन्नुवाच त्वमेवेतो जनयितासि[3] नान्यस्त्वदिति ॥२४॥ अथ निग्राभ्याभ्यो ग्रहान्विगृह्णते । आपो ह वै व्वृत्रं जघ्नुस्तेनैवैतद्वीर्येणापः स्यन्दन्ते स्यन्दमानानां वै व्वसतीवरीर्गृह्णाति व्वसतीवरीभ्यो निग्राभ्या निग्राभ्याभ्यो ग्रहान्विगृह्णते तेनैवैतद्वीर्येण ग्रहान्विगृह्णते होतृचमसाद्योषा वाऽऋग्घोता योषायै वाऽइमाः प्रजाः प्रजायन्ते तदेनमेतस्यै योषायाऽऋचो होतुः प्रजनयति तस्माद्धोतृचमसात्[4] ॥२५॥ Cf. का. श. ४. ९. ४. तै. सं. ६. ४. ४., मै. सं. ४. ६. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे तृतीयकाण्डे सप्तमप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ९. ४.)

सप्तम. प्रपाठकस्समाप्तः ॥

(कण्डिकासंख्या ११४)

(इति नवमोऽध्यायः)

इति अध्वरं नाम तृतीयं काण्डं समाप्तम् ॥ ३ ॥

(तृतीयकाण्डकाण्डिकासंख्या ८५९)

१. जायते इति. घ. २. मा. सं. ६. ३७. ३. तासि इति. घ. ४. चमसादिति. क.

॥ श्रीः ॥

अथ माध्यन्दिनशाखीये शतपथब्राह्मणे

ग्रहनामकं चतुर्थं काण्डम्* ॥

अग्निष्टोमः ॥ (सोमयागः)

प्रथमप्रपाठके प्रथमं ब्राह्मणम् ।

४. १. १.

(उपांशुग्रहः, क्षुल्लकाभिषवश्च)

॥ ॐ ॥ प्राणो ह वाऽअस्योपाꣳशुः । व्यानऽउपाꣳशुसवनऽउदानऽएवान्तर्यामः ॥१॥ अथ यस्मादुपाꣳशुर्नाम । अꣳशुर्वै नाम ग्रहः स प्रजापतिस्तस्यैष प्राणस्तद्यदस्यैष प्राणस्तस्मादुपाꣳशुर्नाम ॥२॥ तं बहिष्पवित्राद्गृह्णाति । पराञ्चमेवास्मिन्नेतत्प्राणं दधाति सोऽस्यायं पराङेव प्राणो निरर्दति तमꣳशुभिः पावयति पूतोऽसदिति षड्भिः पावयति षड्वाऽऋतवऽऋतुभिरेवैनमेतत्पावयति ॥३॥ तदाहुः । यदꣳशुभिरुपाꣳशुं पुनाति सर्वे सोमाः पवित्रपूताऽअथ केनास्याꣳशवः पूता भवन्तीति ॥४॥ तानुपनिवपति । "यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहे"ऽति तदस्य स्वाहाकारेणैवाꣳशवः पूता भवन्ति सर्वे वाऽएष ग्रहः सर्वेषाꣳ हि सवनानाꣳ रूपम् ॥५॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयांचक्रुस्ते होचुः सꣳस्थापयाम यज्ञं यदि नोऽसुररक्षसान्यासजेयुः सꣳस्थितऽएव नो यज्ञः स्यादिति ॥६॥ ते प्रातः

---

* काण्वशतपथे पञ्चमतया परिगणितमिदं काण्डम् । १. अन्तर्यामः इति च.

२. मा. सं. ७. २. मन्त्रोऽयं वाजसनेयिसंहितायामत्रैव पठितः तैत्तिरीयसंहितायां तूपानुवाक्यकाण्डे पठितः (तै. सं. ३. ३. ३. २.)

सवनऽएव । सर्व्वं यज्ञꣳ समस्थापयन्नेतस्मिन्नेव ग्रहे यजुष्टः प्रथमे स्तोत्रे सामतः प्रथमे शस्त्रऽऋक्तस्तेन सꣳस्थितेनैवातऽऊर्ध्वं यज्ञेनाचरन्त्सऽएषोऽप्येतर्हि तथैव यज्ञः सन्तिष्ठतऽएतस्मिन्नेव ग्रहे यजुष्टः प्रथमे स्तोत्रे सामतः प्रथमे शस्त्रऽऋक्तस्तेन सꣳस्थितेनैवातऽऊर्ध्वं यज्ञेन चरति ॥७॥ स वाऽअष्टौ कृत्वोऽभिषुणोति । अष्टाक्षरा वै[1] गायत्री गायत्रं प्रातस्सवनं प्रातस्सवनमेवैतत्क्रियते ॥८॥ स गृह्णाति "व्वाचस्पतये[2] पवस्वे"ति प्राणो वै व्वाचस्पतिः प्राणऽएष ग्रहस्तस्मादाह व्वाचस्पतये पवस्वेति "व्वृष्णो[3]ऽअꣳशुभ्यां गभस्तिपूत"ऽइति सोमाꣳशुभ्याꣳ ह्येनं पावयति तस्मादाह व्वृष्णोऽअꣳशुभ्यामिति गभस्तिपूतऽइति पाणी वै गभस्ती पाणिभ्याꣳ ह्येनं पावयति ॥९॥ अथैकादश कृत्वोऽभिषुणोति । एकादशाक्षरा वै त्रिष्टुप्त्रैष्टुभं माध्यन्दिनꣳ सवनं[4] माध्यन्दिनमेवैतत्सवनं[5] क्रियते ॥१०॥ स गृह्णाति । "देवो देवेभ्यः पवस्वे"ति देवो ह्येष देवेभ्यः पवते "येषां भागोऽसी"ति तेषामु ह्येष भागः ॥११॥ अथ द्वादश कृत्वोऽभिषुणोति । द्वादशाक्षरा वै जगती जागतं तृतीयसवनं तृतीयसवनमेवैतत्क्रियते ॥१२॥ स गृह्णाति । "मधुमतीर्न्नऽइषस्कृधी"ति रसमेवास्मिन्नेतद्दधाति स्वदयत्येवैनमेतद्देवेभ्यस्तस्मादेष हृतो न पूयत्यथ यज्जुहोति सꣳस्थापयत्येवैनमेतत् ॥१३॥ अष्टावष्टौ कृत्वः । ब्रह्मवर्च्चसकामस्याभिषुणुयादित्याहुरष्टाक्षरा वै गायत्री ब्रह्म गायत्री ब्रह्मवर्च्चसी हैव भवति ॥१४॥ तच्चतुर्व्विꣳशतिं कृत्वोऽभिषुतं भवति । चतुर्व्विꣳशतिर्व्वै संवत्सरस्यार्द्धमासाः संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्सꣳस्थापयति ॥१५॥ पञ्च[6] पञ्च कृत्वः । पशुकामस्याभिषुणुयादित्या-

---

१. वै इति. ग. २. मा. सं. ७. १.

३. मा. सं. ७. १. व्वृष्णो इति क, व्वृष्णो इति च. ४. सवनमिति. ग. च.

५. सवनं इति ग. च. ६, ७. मा. सं. ७. १. ८. मा. सं. ७. २. ९. पञ्च इति. ग.

हुः पाङ्क्ताः पशवः पशून्हैवावरुन्द्धे पञ्च वाऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः स यावानेव यज्ञो यावत्यस्य मात्रा तावन्तमेवैतत्सꣳस्थापयति सोऽएषा मीमाꣳसैवेतरं त्वेव क्रियते ॥१६॥ तं गृहीत्वा परिमार्ष्टि । नेद्भ्यवश्चोतदिति तं न सादयति प्राणो ह्यस्यैष तस्मादयमसन्नः प्राणः सञ्चरति यदीत्त्वभिचरेदथैनꣳ सादयेद "मुष्य त्वा प्राणꣳ सादयामी"ति तथाह तस्मिन्न पुनरस्ति यन्नानुसृजति तेनोऽअध्वर्युश्च यजमानश्च ज्योग्जीवतः ॥१७॥ अथोऽअप्येवैनं दध्यात् । "अमुष्य त्वा प्राणमपिदधामी"ति तथाह तस्मिन्न पुनरस्ति यं न सादयति तेनो प्राणान्न लोभयति ॥१८॥ स वाऽअन्तरेव सन्त्स्वाहेति करोति । देवा ह वै बिभयां चक्रुर्यद्वै नः पुरैवास्य ग्रहस्य होमादसुररक्षसानीमं ग्रहं न हन्युरिति तमन्तरेव सन्तः स्वाहाकारेणाजुहवुस्तꣳ हुतमेव सन्तमग्नावजुहवुस्तथोऽएवैनमेषऽएतदन्तरेव सन्त्स्वाहाकारेण जुहोति तꣳ हुतमेव सन्तमग्नौ जुहोति ॥१९॥ अथोपनिष्क्रामति । "उर्व्वन्तरिक्षमन्वेमी"त्यन्तरिक्षं वाऽअनु रक्षश्चरत्यमूलमुभयतः परिच्छिन्नं यथायं पुरुषोऽमूलऽउभयतः परिच्छिन्नोऽन्तरिक्षमनुचरत्येतद्वै यजुर्ब्रह्म रक्षोहा सऽएतेन ब्रह्मणान्तरिक्षमभयमनाष्टं कुरुते ॥२०॥ अथ व्वरं वृणीते । बलवद्ध वै देवाऽएतस्य ग्रहस्य होमं प्रेप्सन्ति तेऽस्माऽएतं व्वरꣳ समर्द्धयन्ति क्षिप्रे न इमं ग्रहं जुहवदिति तस्माद्द्वरं व्वृणीते ॥२१॥ स जुहोति । "स्वांकृतोऽसी"ति प्राणो वाऽअस्यैष ग्रहः स स्वयमेव कृतः स्वयं जातस्तस्मादाह स्वांकृतोऽसीति "विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य"ऽइति सर्व्वाभ्यो ह्येष प्रजाभ्यः स्वयं जातो "मनस्त्वाष्ट्रि"ति प्रजापतिर्व्वै मनः प्रजापतिष्ट्वाश्नुतामित्येवैतदाह "स्वाहा त्वा सुभव सूर्यायै"ति तद्वरꣳ

१. पशून्हैवावरुन्धे इति. ग. २. जीवतः इति. च. ३. न इति. ग.
४. मा. सं. ७. २. ५. कुरुते इति. ग. ६-९. मा. सं. ७. ३

स्वाहाकारं करोति परां देवताम् ॥२२॥ अमुष्मिन्वाऽएतमहौषीत् । यऽएष तपति सर्व्वं वाऽएष तदेनꣳ सर्व्वस्यैव पराध्यं करोत्यथ यदवरां देवतां कुर्यात्परꣳ स्वाहाकारꣳ स्यादु हैवामुष्मादादित्यात्परं तस्मादवरꣳ स्वाहाकारं करोति परां देवताम् ॥२३॥ अथ हुत्वोर्ध्वं ग्रहमुन्मार्ष्टि । पराञ्चमेवास्मिन्नेतत्प्राणं दधात्यथोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमार्ष्टि पराञ्चमेवास्मिन्नेतत्प्राणं दधाति "देवेभ्यस्त्वा मरीचिपेभ्य"ऽइति ॥२४॥ अमुष्मिन्वाऽएतं मण्डलेऽहौषीत् । यऽएष तपति तस्य ये रश्मयस्ते देवा मरीचिपास्तानेवैतत्प्रीणाति तऽएनं देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥२५॥ तस्य वाऽएतस्य ग्रहस्य । नानुवाक्यास्ति न याज्या तं मन्त्रेण जुहोत्येतेनो हास्यैषोऽनुवाक्यवान् भवत्येतेन याज्यवानथ यद्यभिचरेद्योस्याꣳशुराश्लिष्टः स्याद्वाह्वोर्व्वोरसि वा व्वाससि वा तं जुहुया "द्देवाꣳशो यस्मै त्वेडे तत्सत्यमुपरिप्रुता भङ्गेन हतोऽसौ फडि"ति यथा ह वै हन्यमानानामपधावेदेवमेषोऽभिषूयमाणानाꣳ स्कन्दति तथा ह तस्य नैव धावन्नापधावत्परिशिष्यते यस्माऽएवं करोति तꣳ सादयति "प्राणाय त्वे"ति प्राणो ह्यस्यैषः ॥२६॥ दक्षिणार्द्धे हैके सादयन्ति । एताꣳ ह्येष दिशमनु संचरतीति तदु तथा न कुर्यादुत्तरार्द्धऽएवैनꣳ सादयेन्नो ह्येतस्याऽआहुतेः का चन परास्ति तꣳ सादयति प्राणाय त्वेति प्राणो ह्यस्यैषः ॥२७॥ अथोपाꣳशुसवनमादत्ते । तं न दशाभिर्न पवित्रेणोपस्पृशति यथा ह्यद्भिः प्रणिक्तमेवं तद्यद्यꣳशुराश्लिष्टः स्यात्पाणिनैव प्रध्वꣳस्योदञ्चमुपनिपादयेद् "व्यानाय त्वे"ति व्यानो ह्यस्यैषः ॥२८॥ Cf. का. श. ५. १. १; तै. सं. ६. ४. ५; मै. सं. ४. ५. ५; काठ. सं. २६. १०. कपि. सं. ४१. ९; and ४२. १, २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे ग्रहाख्ये चतुर्थकाण्डे प्रथमप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ.१.१)

१. कारꣳकरोति इति. ग. २. मा. सं ७. ३. ३. भवति इति. ग.
४, ५. मा. सं. ७. ३. ६. एषः इति क. ७. मा. सं. ७. ३.

४. १. २.

(अन्तर्यामग्रहः)

प्राणो ह वाऽअस्योपाꣳशुः । व्यान ऽउपाꣳशुसवन ऽउदान ऽएवान्तर्यामः[1] ॥१॥ अथ यस्मादन्तर्यामो नाम । यो वै प्राणः स ऽउदानः स व्यानस्तमेवास्मिन्नेतत्पराञ्चं प्राणं दधाति यदुपाꣳशुं गृह्णाति[2] तमेवास्मिन्नेतत्प्रत्यञ्चमुदानं दधाति यदन्तर्यामं गृह्णाति सोऽस्यायमुदानोऽन्तरात्मन्यतस्तद्यदस्यैषोऽन्तरात्मन्यतो यद्वैनेनेमाः प्रजायतास्तस्मादन्तर्यामो नाम ॥२॥ तमन्तः पवित्राद्गृह्णाति । प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति सोऽस्यायमुदानोऽन्तरात्मन् हि तऽएतेनो हास्याप्युपाꣳशुरन्तः पवित्राद्गृहीतो भवति समानꣳह्येतद्यदुपाꣳशवन्तर्यामौ प्राणोदानौ ह्येतेनो हैवास्यैषोऽपीतरेषु ग्रहेष्वनाक्षिद्भवति ॥३॥ अथ यस्मात्सोमं पवित्रेण पावयति । यत्र वै सोमः स्वं पुरोहितं बृहस्पतिं जिज्यौ तस्मै पुनर्ददौ तेन सꣳशशाम तस्मिन् पुनर्ददुष्यासैवातिशिष्टमेनो यदीन्नूनं ब्रह्मज्यानायाभिदध्यौ ॥४॥ तं देवाः पवित्रेणापावयन् । स मेध्यः पूतो देवानाꣳ हविरभवत्तथोऽएवैनमेषऽएतत्पवित्रेण पावयति स मेध्यः पूतो देवानाꣳ हविर्भवति ॥५॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । इयं वाऽअदितिस्तस्याऽअदः प्रायणीयꣳ हविरसावादित्यश्चरुस्तद्वैतत्पुरेव सुत्यायै सा हेयं देवेषु सुत्यायामपि त्वमीषेऽस्त्वेव मेऽपि प्रसुते भागऽइति ॥६॥ ते ह देवाऽऊचुः । व्यादिष्टोऽयं देवताभ्यो यज्ञस्त्वयैव ग्रहा गृह्यन्तां देवताभ्यो हूयन्तामिति तथेति सोऽस्याऽएष प्रसुते भागः ॥७॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । इयं वाऽउपयामऽइयं वाऽइदमन्नाद्यमुपयच्छति पशुभ्यो[3] मनुष्येभ्यो वनस्पतिभ्यऽइतो वाऽऊर्ध्वा देवा दिवि हि देवाः ॥८॥ तद्यदुपयामेन ग्रहा गृह्यन्ते । अनयैव तद्गृह्यन्तेऽथ यद्योनौ सादयतीयं वाऽअस्य सर्वस्य योनिरस्यै वाऽइमाः प्रजाः

---

१. अन्तर्यामः इति. च. २. गृह्णाति इति. ग. ३. पशुभ्यो इति. ग.

प्रजाताः ॥९॥ तं वाऽएतꣳ । रेतो भूतꣳ सोममृत्विजो बिभ्रति यद्वाऽअयोनौ रेतः सिच्यते प्र वै तन्मीयतेऽथ यद्योनौ सादयत्यस्यामेव तत्सादयति ॥१०॥ प्राणोदानौ ह वाऽअस्यैतौ ग्रहौ । तयोरुदितेऽन्यतरं जुहोत्यनुदितेऽन्यतरं प्राणोदानयोर्व्याकृत्यै प्राणोदानावेवैतद्व्याकरोति तस्मादेतौ समानावेव सन्तौ नानेवाचक्षते प्राणऽइति चोदानऽइति च ॥११॥ अहोरात्रे ह वाऽअस्यैतौ ग्रहौ । तयोरुदितेऽन्यतरं जुहोत्यनुदितेऽन्यतरमहोरात्रयोर्व्याकृत्याऽअहोरात्रऽएवैतद्व्याकरोति ॥१२॥ अहः सन्तमुपाꣳशुम् । तꣳरात्रौ जुहोत्यहरेवैतद्रात्रौ दधाति तस्मादपि सुतमिश्रायामुपैव किञ्चित्ख्यायते ॥१३॥ रात्रिꣳ सन्तमन्तर्यामम् । तमुदिते जुहोति रात्रिमेवैतदहं दधाति तेनो हासावादित्यऽउद्यन्नेवेमाः प्रजा न प्रदहति तेनेमाः प्रजास्त्राताः ॥१४॥ अथातो गृह्णात्येव । "उपयामगृहीतोऽसी"त्युक्तऽउपयामस्य बन्धुर"न्तर्यच्छ मघवन् पाहि सोम"मितीन्द्रो वै मघवानिन्द्रो यज्ञस्य नेता तस्मादाह मघवन्निति पाहि सोममिति गोपाय सोममित्येवैतदाहो "रुष्यं रायऽएषो यजस्वे"ति पशवो वै रायो गोपाय पशूनित्येवैतदाहेषो यजस्वेति प्रजा वाऽइषस्ताऽएवैतद्यायजूकाः करोति ताऽइमाः प्रजा यजमानाऽअर्चन्त्यः श्राम्यन्त्यश्चरन्ति ॥१५॥ "अन्तस्ते द्यावापृथिवी दधामि । अन्तर्दधाम्युर्वन्तरिक्षं सजूर्देवैभिरवरैः परैश्चे"ति तदेनं व्वैश्वदेवं करोति तद्यदेनेनेमाः प्रजाः प्राणत्यश्चोदनत्यश्चान्तरिक्षमनुचरन्ति तेन व्वैश्वदेवोऽऽ"न्तर्यामे मघवन्मादयस्वे"तीन्द्रो वै मघवानिन्द्रो यज्ञस्य नेता तस्मादाह मघवन्नित्यथ यदन्तरिति गृह्णात्यन्तस्त्वात्मन्दधऽइत्येवैतदाह ॥१६॥ तं गृहीत्वा परिमार्ष्टि । नेद्व्यवश्चोतदिति तं न सादयत्युदानो ह्यस्यैष तस्मादयमसन्न उदानः सञ्चरति यदीत्त्वभिचरेद-

१. उद्यन्नेव इति ग. २. प्रदहति इति. ग. ३. प्रजाः इति. ग.
४. ५, ६. मा. सं. ७. ४. ७. पाहि इति. च. ८, ९. मा. सं. ७.५.

थैनꣳ सादयेदमुख्य त्वोदानꣳ सादयामीति ॥१७॥ स यद्युपाꣳशुꣳ सादयेत् । अथैनꣳ सादयेद्यद्युपाꣳशुं न सादयेन्नैनꣳ सादयेद्यद्युपाꣳशुमपिदध्यादप्येनं दध्याद्यद्युपाꣳशुं नापिदध्यान्नैनमपिदध्याद्यथोपाꣳशोः कर्म तथैतस्य समानꣳ ह्येतद्यदुपाꣳ श्वन्तर्यामौ प्राणोदानौ हि ॥१८॥ ताऽउ ह चरकाः । नानैव मन्त्राभ्यां जुह्वति प्राणोदानौ वाऽअस्यैतौ नानावीर्यौ प्राणोदानौ कुर्मऽइति व्वदन्तस्तदु तथा न कुर्यान्मोहयन्ति ह ते यजमानस्य प्राणोदानावपीहाऽएनं तूष्णीं जुहुयात् ॥१९॥ स यद्वाऽउपाꣳशुं मन्त्रेण जुहोति । तदेवास्यैषोऽपि मन्त्रेण हुतो भवति किमु तत्तूष्णीं जुहुयात्समानꣳ ह्येतद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ हि ॥२०॥ स येनैवोपाꣳशुं मन्त्रेण जुहोति । तेनैवैतं मन्त्रेण जुहोति "स्वांकृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याये"त्युक्तो यजुषो बन्धुः ॥२१॥ अथ हुत्वावाञ्चं ग्रहमवमार्ष्टि । इदं वाऽउपाꣳशुꣳ हुत्वोर्ध्वमुन्माष्टर्यथात्रावाञ्चमवमार्ष्टि प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति ॥२२॥ अथ नीचा पाणिना । मध्यमे परिधौ प्रत्यगुपमार्ष्टीदं वाऽउपाꣳशुꣳ हुत्वोत्तानेन पाणिना मध्यमे परिधौ प्रागुपमाष्टर्यथात्र नीचा पाणिना मध्यमे परिधौ प्रत्यगुपमार्ष्टि प्रत्यञ्चमेवास्मिन्नेतदुदानं दधाति "देवेभ्यस्त्वा मरीचिपेभ्य"ऽइति सोऽसावेव बन्धुः ॥२३॥ तं प्रत्याक्रम्य सादयति । "उदानाय त्वे"त्युदानो ह्यस्यैष तानि वै सꣳस्पृष्टानि सादयति प्राणोदानानेवैतत्सꣳस्पर्शयति प्राणोदानान्सन्दधाति ॥२४॥ तानि वाऽअनिङ्ग्यमानानि शेरे । आ तृतीयसवनात्तस्मादिमे मनुष्याः स्वपन्ति तानि पुनस्तृतीयसवने

१. तैत्तिरीयसंहितायां मैत्रायणीयकाठकसंहितयोश्चाऽनयोः पृथगेव होममन्त्रावुक्तौ See तै. सं. १. ४. २. ३, मै. सं. १. ३. ४, and काठ. सं. ४. १.

२. वा इति. च. ३. मा. सं. ७. ६.

४. दधाति इति.च. ५, ६. मा. सं. ७.६. ७. प्राणोदानावेवेति. ग.

प्रयुज्यन्ते तस्मादिमे मनुष्याः सुप्त्वा प्रबुध्यन्ते तेऽनिशिताश्चराचरा यज्ञस्यैवैतद्विधामनु वयऽइव ह वै यज्ञो व्विधीयते तस्योपाꣳश्वन्तर्यामावेव पक्षावात्मोपाꣳशुसवनः ॥२५॥ तानि वाऽअनिङ्ग्यमानानि शेरे । आ तृतीयसवनात्तायते यज्ञऽएति वै तद्यत्तायते तस्मादिमानि व्वयाꣳसि व्विगृह्य पक्षावनायुवानानि पतन्ति तानि पुनस्तृतीयसवने प्रयुज्यन्ते तस्मादिमानि व्वयाꣳसि समासं पक्षावायुवानानि पतन्ति यज्ञस्यैवैतद्विधामनु ॥२६॥ (शतम् २३०० ॥) इयꣳ ह वाऽउपाꣳशुः । प्राणो ह्युपाꣳशुरिमाꣳ ह्येव प्राणन्नभिप्राणित्यसावेवान्तर्यामऽउदानो ह्यन्तर्यामोऽमुꣳ ह्येव लोकमुदनन्नभ्युदनित्यन्तरिक्षमेवोपाꣳशुसवनो व्यानो ह्युपाꣳशुसवनोऽन्तरिक्षꣳ ह्येव व्यनन्नभिव्यनिति ॥२७॥ Cf. का. श. ५. १. २; तै. सं. ६. ४.६; मै. सं. ४.५.६; काठ. सं. २७. १, २. कपि. ४१.९. and ४२.२;

इति माध्यन्दिनशाखीये शतपथब्राह्मणे ग्रहाख्ये चतुर्थकाण्डे प्रथमप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. १. २.)

४. १. ३.

(ऐन्द्रवायवग्रहः)

व्वाग्घ वाऽअस्यैन्द्रवायवः । एतन्व्वध्यात्मामिन्द्रो ह यत्र व्वृत्राय व्वज्रं प्रजहार सोऽबलीयान्मन्यमानो नास्तृषीतीव बिभ्यन्निलयांचक्रे तदेवापि देवाऽअपन्यलयन्त ॥१॥ ते ह देवाऽऊचुः । न वै हतं व्वृत्रं व्विद्म न जीवꣳ हन्त नऽएको व्वेत्तु यदि हतो वा व्वृत्रो जीवति वेति ॥२॥ ते वायुमब्रुवन् । अयं वै व्वायुर्योऽयं पवते व्वायो त्वमिदं व्विद्धि यदि हतो वा व्वृत्रो जीवति वा त्वं वै नऽआशिष्ठोऽसि यदि जीविष्यति त्वमेव क्षिप्रं पुनरागमिष्यसीति ॥३॥ स होवाच । किं मे ततः स्यादिति प्रथमवषट्कारऽएव ते सोमस्य राज्ञऽइति तथेत्येयाय व्वायुरेद्धतं व्वृत्रꣳ स होवाच हतो व्वृत्रो यद्धते कुर्यात तत्कुरुतेति ॥४॥ ते देवाऽअभ्यसृज्यन्त । यथा व्विर्त्ति व्वे-

त्स्यमानाऽएषᳬ स यमेकोऽलभत सऽएकदेवत्योऽभवद्यं द्वौ स द्विदेवत्यो यं बहवः स बहुदेवत्यस्तद्यदेनं पात्रैर्व्यगृह्णत तस्माद्ग्रहा नाम ॥५॥ सऽएषामापूयत् । सऽएनाञ्छुक्तः पूतिरभिववौ स नालमाहुत्याऽआस नालं भक्षाय ॥६॥ ते देवा व्वायुमब्रुवन् । व्वायविमं नो व्विवाहीमं नः स्वदयेति स होवाच किं मे ततः स्यादिति त्वयैवैतानि पात्राण्याचक्षीरन्निति तथेति होवाच यूयं तु मे सच्युपवातेति ॥७॥ तस्य देवाः । यावन्मात्रमिव गन्धस्यापजघ्नुस्तं पशुष्वदधुः स ऽएष पशुषु कुणपगन्धस्तस्मात्कुणपगन्धान्नापिगृह्णीत सोमस्य हैष राज्ञो गन्धः ॥८॥ नोऽएव निष्ठीवेत्[1] । तस्माद्यद्यप्यासक्त ऽइव मन्येताभिवातं परीयाच्छीर्व्वै सोमः पाप्मा यक्ष्मः स यथा श्रेयस्यायति पापीयान् प्रत्यवरोहेदेवᳬ हास्माद्यक्ष्मः प्रत्यवरोहति ॥९॥ अथेतरं व्वायुर्व्यवात् । तदस्वदयत्ततोऽलमाहुत्याऽआसालं भक्षाय[2] तस्मादेतानि नानादेवत्यानि सन्ति[3] व्वायव्यानीत्याचक्षते सोऽस्यैष प्रथमवषट्कारश्च सोमस्य राज्ञ ऽएतान्युऽएनेन पात्राण्याचक्षते ॥१०॥ इन्द्रो ह वाऽईक्षाञ्चक्रे । व्वायुर्व्वै नोऽस्य यज्ञस्य भूयिष्ठभाग्यस्य प्रथमवषट्कारश्च सोमस्य राज्ञऽएतान्युऽएनेन पात्राण्याचक्षते हन्तास्मिन्नपित्वमिच्छाऽइति ॥११॥ स होवाच । व्वायवा मास्मिन् ग्रहे भजेति किं ततः स्यादिति निरुक्तमेव व्वाग्वदेदिति निरुक्तं चेद्वाग्वदेदा त्वा भजामीति तत ऽएष ऐन्द्रवायवो ग्रहोऽभवद्वायव्यो हैव ततः पुरा ॥१२॥ स ऽइन्द्रोऽब्रवीत् । अर्द्धं मेऽस्य ग्रहस्येति तुरीयमेव तऽइति व्वायुरर्द्धमेव मऽइतीन्द्रस्तुरीयमेव तऽइति व्वायुः ॥१३॥

(अर्द्धप्रपाठकः ६८)

तौ प्रजापतिं प्रतिप्रश्नमेयतुः । स प्रजापतिर्ग्रहं द्वेधा चकार स होवाचेदं व्वायोरित्यथ पुनरर्द्धं द्वेधा चकार स होवाचेदं व्वायोरितीदं तवेतीन्द्रं तुरीयमेव भाजयाञ्चकार यद्वै चतुर्थं तत्तुरीयं

१. निष्ठीवेदिति. च. २. भक्षाय इति. च. ३. सन्ति इति. ग.

तत ऽएषऽऐन्द्रतुरीयो ग्रहोऽभवत् ॥१४॥ तस्य वाऽएतस्य ग्रहस्य । द्वे पुरोरुचौ व्वायव्यैव पूर्व्वैन्द्रवायव्युत्तरा द्वेऽअनुवाक्ये व्वायव्यैव पूर्व्वैन्द्रवायव्युत्तरा द्वौ प्रैषौ व्वायव्यऽएव पूर्व्वऽऐन्द्रवायवऽउत्तरो द्वे याज्ये व्वायव्यैव पूर्व्वैन्द्रवायव्युत्तरैवमेनं तुरीयं तुरीयमेव भाजयाञ्चकार ॥१५॥ स होवाच । तुरीयं तुरीयं चेन्मामबीभजुस्तुरीयमेव तर्हि व्वाङ्निरुक्तं व्वादिष्यतीति तदेतत्तुरीयं व्वाचो निरुक्तं यन्मनुष्या व्वदन्त्यथैतत्तुरीयं व्वाचोऽनिरुक्तं यत्पशवो व्वदन्त्यथैतत्तुरीयं व्वाचोऽनिरुक्तं षड्याᳬसि व्वदन्त्यथैतत्तुरीयं व्वाचोऽनिरुक्तं यदिदं क्षुद्रᳬसरीसृपं व्वदति ॥ १६ ॥ तस्मादेतदृषिणाभ्यनूक्तम् । "चत्वारि व्वाक्परिमिता पदानि तानि व्विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं व्वाचो मनुष्या व्वदन्ती"ति ॥१७॥ अथातो गृह्णात्येव । "आ वायो भूष शुचिपाऽउप नः सहस्रं ते नियुतो व्विश्ववार । उपो तेऽअन्धो मद्यमयामि यस्य देव दधिषे पूर्व्वपेयं व्वायवे त्वे"ति ॥१८॥ अथापगृह्य पुनरानयति । "इन्द्र वायू ऽइमे सुताऽउप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि उपयामगृहीतोऽसि व्वायवऽइन्द्रवायुभ्यां त्वैष ते योनिः सजोषोभ्यां त्वे"ति सादयति स यदाह सजोषोभ्यां त्वेति यो वै व्वायुः सऽइन्द्रो य ऽइन्द्रः स व्वायुस्तस्मादाहैष ते योनिः सजोषोभ्यां त्वेति ॥१९॥ Cf. का. श. ५. १. ३; तै. सं. ६. ४. ७; मै. सं. ४. ५. ८; काठ. सं. २७. ३., कपि ४२. ३.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे ग्रहाख्ये चतुर्थकाण्डे प्रथमप्रपाठके तृतीयं ब्राह्मणम्॥ (अ. १. ३.)

१. ऋ. सं. २. ३. २२. and तै. आ. १०. १२. २. २. गृह्णात्येव इति. ग.
३. मा. सं. ७. ७. ४. त्वेति इति. च. ५. मा. सं ७. ८.

४. १. ४.

(मैत्रावरुणग्रहः)

क्रतूदक्षौ ह वाऽअस्य मित्रावरुणौ । एतन्न्वध्यात्मꣳ स यदेव मनसा कामयतऽइदं मे स्यादिदं कुर्व्वीयेति सऽएव क्रतुरथ यदस्मै तत्समृध्यते स दक्षो मित्रऽएव क्रतुर्व्वरुणो दक्षो ब्रह्मैव मित्रः क्षत्रं व्वरुणोऽभिगन्तैव ब्रह्म कर्त्ता क्षत्रियः ॥१॥ ते हैतेऽअग्रे नानेवासतुः । ब्रह्म च क्षत्रं च ततः शशाकैव ब्रह्म मित्रऽऋते क्षत्राद्वरुणात्स्थातुम् ॥२॥ नक्षत्रं व्वरुणः । ऋते ब्रह्मणो मित्राद्यद्ध किं च व्वरुणः कर्म चक्रेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत्समानृधे ॥३॥ स क्षत्रं व्वरुणः । ब्रह्म मित्रमुपमन्त्रयांचक्रऽउपमावर्त्तस्व सꣳ सृजावहै पुरस्त्वा करवै त्वत्प्रसूतः कर्म करवाऽइति तथेति तौ समसृजेतां ततऽएष मैत्रावरुणो ग्रहोऽभवत् ॥४॥ सोऽएव पुरोधा । तस्मान्न ब्राह्मणः सर्व्वस्येव क्षत्रियस्य पुरोधां कामयेत सꣳ ह्येतौ सृजेते सुकृतं च दुष्कृतं च नोऽएव क्षत्रियः सर्व्वमिव ब्राह्मणं पुरोदधीत सꣳ ह्येवैतौ सृजेते सुकृतं च दुष्कृतं[1] च स[2] यत्ततो व्वरुणः कर्म चक्रे प्रसूतं ब्रह्मणा मित्रेण सꣳहैवास्मै तदानृधे ॥५॥ तत्तदवक्लृप्तमेव । यद्ब्राह्मणोराजन्यः स्याद्यद्यु राजानं लभेत समृद्धं तदेतद्ध त्वेवानवक्लृप्तं यत्क्षत्रियोब्राह्मणो भवति यद्ध किं च कर्म्म कुरुतेऽप्रसूतं ब्रह्मणा मित्रेण न हैवास्मै तत्समृध्यते तस्मादु क्षत्रियेण कर्म करिष्यमाणेनोपसर्त्तव्य ऽएव ब्राह्मणः सꣳ हैवास्मै तद्ब्रह्मप्रसूतं कर्म्मर्ध्यते ॥६॥ अथातो गृह्णात्येव । "अयं[3] वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतꣳ हवम् । उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वे"ति ॥७॥ तं पयसा श्रीणाति । तद्यत्पयसा श्रीणाति व्वृत्रो वै सोम ऽआसीत्तं यत्र देवाऽअघ्नंस्तं मित्रमब्रुवंस्त्वमपि हꣳसीति स न चकमे सर्व्वस्य वाऽअहं मित्रमस्मि न मित्रꣳ सन्नमित्रो भाविष्यामीति तं वै त्वा

---

१. दुष्कृतं इति. क. २. स इति. ग. ३. मा. सं. ७. ९.

यज्ञादन्तरेष्यामऽइत्यहमपि हन्मीति होवाच तस्मात्पशवोऽपाक्रामन्मि-त्रꣳ सन्नमित्रोऽभूदिति स पशुभिर्व्यार्ध्यते तमेतद्देवाः पशुभिः समार्द्धयन्यत्पयसा श्रीणंस्तथोऽएवैनमेषऽएतत्पशुभिः समर्द्धयति यत्पयसा श्रीणाति ॥८॥ तदाहुः । शश्वद्ध नैव चकमे हन्तुमिति तद्यदेवात्र पयस्तन्मित्रस्य सोमऽएव व्वरुणस्य तस्मात्पयसा श्रीणाति ॥९॥ स श्रीणाति । "रायो व्वयꣳ ससवाꣳसो मदेम हव्येन देवा यवसेन गावः । तां धेनुं मित्रावरुणा यवं नो व्विश्वाहा धत्तमनपस्फुरन्तीमेष ते योनिर्ऋतायुभ्यां त्वे"ति सादयति स यदाहर्तायुभ्यां त्वेति ब्रह्म वाऽऋतं ब्रह्म हि मित्रो ब्रह्मो ह्यृतं व्वरुणऽएवायुः संवत्सरो हि व्वरुणः संवत्सरऽआयुस्तस्मादाहैष ते योनिर्ऋतायुभ्यां त्वेति ॥१०॥ Cf. का. श. ५. १. ४; तै. सं. ६. ४. ८; मै. सं. ४. ५. ८; काठ. सं २७. ४: कपि. ४२. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे ग्रहाख्ये चतुर्थकाण्डे प्रथमप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. १. ४.)

४. १. ५.

(आश्विनग्रहः)

श्रोत्रꣳह वाऽअस्याश्विनः । तस्मात्सर्व्वतः परिहारं भक्षयति सर्व्वतो ह्यनेन श्रोत्रेण शृणोति यत्र वै भृगवो वाङ्गिरसो वा स्वर्गं लोकꣳ समाश्नुवत तच्च्यवनो वा भार्गवश्च्यवनो वाङ्गिरसस्तदेव जीर्णिः कृत्यारूपो जहे ॥१॥ शर्यातो ह वाऽइदं मानवो ग्रामेण चचार । स तदेव प्रतिवेशो निविविशे तस्य कुमाराः क्रीडन्तऽइमं जीर्णिं कृत्यारूपमनर्थ्यं मन्यमाना लोष्टैर्व्विपिपिषुः ॥२॥ स शर्यातेभ्यश्चुक्रोध । तेभ्योऽसंज्ञां चकार पितैव पुत्रेण युयुधे भ्राता भ्रात्रा ॥३॥ शर्यातो ह वाऽईक्षांचक्रे । यत्किमकरं तस्मादिदमापदीति स

---

१. मित्रꣳइति. ग. २. पयासा इति ग. ३. मा. सं. ७. १०

४. उपाख्यानमिदं महाभारते वनपर्वणि १२२-१२५. द्रष्टव्यम् । See तां. ब्रा. also. १४. ६. १०. पृ. १११. चौखम्बा संस्करणे

गोपालांश्चाविपालांश्च सꣳ ह्वयितवाऽउवाच ॥४॥ स होवाच । को वोऽद्येह किंचिदद्राक्षीदिति ते होचुः पुरुषऽएवायं जीर्णिः कृत्यारूपः शेते तमनर्थ्यं मन्यमानाः कुमारा लोष्टैर्व्यपिक्षन्निति स ष्विदाञ्चकार स वै च्यवनऽइति ॥५॥ स रथं य्युक्त्वा । सुकन्याꣳशार्यातीमुपाधाय प्रसिष्यन्द सऽआजगाम यत्रर्षिरास तत् ॥६॥ स होवाच । ऋषे नमस्ते यन्नावेदिषं तेनाहिꣳसिषमियꣳसुकन्या तया तेऽपह्नुवे सञ्जानीतां मे ग्रामऽइति तस्य ह ततऽएव ग्रामः सञ्जज्ञे स ह ततऽएव शर्यातो मानवऽउद्युयुजे नेदपरꣳ हिनसानीति॥७॥ अश्विनौ ह वाऽइदं भिषज्यन्तौ चेरतुः । तौ सुकन्यामुपेयतुस्तस्यां मिथुनमीषाते तन्न जज्ञौ ॥८॥ तौ होचतुः । सुकन्ये कमिमं जीर्णिं कृत्यारूपमुपशेषऽ आवामनुप्रेहीति सा होवाच य्यस्मै मां पितादान्नैवाहं तं जीवन्तꣳ हास्यामीति तद्धायमृषिराजज्ञौ ॥९॥ स होवाच । सुकन्ये किं त्वैतदवोचतामिति तस्माऽएतद्व्याचचक्षे स ह व्याख्यातऽउवाच य्यदि तत्पुनर्ब्रुवतः सा त्वं ब्रूतान्न वै सुसर्व्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथऽइति तौ य्यदि त्वाऽब्रवतः केनावमसर्व्वौ स्वः केनासमृद्धाविति सा त्वं ब्रूतात्पतिं नु मे पुनर्य्युवाणं कुरुतमथ वां व्वक्ष्यामीति तां पुनरुपेयतुस्ताꣳ हैतदेवोचतुः ॥१०॥ सा होवाच । न वै सुसर्व्वाविव स्थो न सुसमृद्धाविवाथ मे पतिं निन्दथऽइति तौ होचतुः केनावमसर्व्वौ स्वः केनासमृद्धाविति सा होवाच पतिं नु मे पुनर्युवाणं कुरुतमथ वां व्वक्ष्यामीति ॥११॥ तौ होचतुः । एतꣳ ह्रदमभ्यवहर स य्येन व्वयसा कमिष्यते तेनोदैष्यतीति तꣳह्रदमभ्यवजहार स य्येन व्वयसा चकमे तेनोदेयाय[1] ॥१२॥ तौ होचतुः । सुकन्ये केनावमसर्व्वौ स्वः केनासमृद्धाविति तौ हर्षिरेव प्रत्युवाच कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते[2] ते वां यज्ञादन्तर्यन्ति तेनासर्व्वौ स्थस्तेनासमृद्धाविति तौ ह ततऽएवाश्विनौ प्रेयतुस्तावा-

---

१. उदेयातेय इति. ग. २. तन्वते इति. ग.

जग्मतुर्देवान्यज्ञं तन्वानान्त्स्तुते बहिष्पवमाने ॥१३॥ तौ होचतुः । उप नौ ह्वयध्वमिति ते ह देवाऽऊचुर्न वामुपह्वयिष्यामहे बहुमनुष्येषु सꣳसृष्टमचारिष्टं भिषज्यन्ताविति ॥१४॥ तौ होचतुः । व्विशीर्ण्णा वै यज्ञे न यजध्वऽइति कथं व्विशीर्ण्णेत्युप नु नौ ह्वयध्वमथ वो व्वक्ष्यावऽइति तथेति ताऽउपाह्वयन्त ताभ्यामेतमाश्विनं ग्रहमगृह्णंस्तावध्वर्य्यू यज्ञस्याभवतां तावेतद्यज्ञस्य शिरःप्रत्यधत्तां तददस्तद्दिवाकीर्त्यानां ब्राह्मणे व्याख्यायते य्यथा तद्यज्ञस्य शिरः प्रतिदधतुस्तस्मादेष स्तुते बहिष्पवमाने ग्रहो गृह्यते स्तुते हि बहिष्पवमानऽआगच्छताम् ॥१५॥ तौ होचतुः । मुख्यौ वाऽआवां यज्ञस्य स्वो य्यावध्वर्य्यूऽइह नाविमं पुरस्ताद्ग्रहं पर्य्याहरताभिद्विदेवत्यानिति ताभ्यामेतं पुरस्ताद्ग्रहं पर्य्याजहुरभिद्विदेवत्यांस्तस्मादेष दशमो ग्रहो गृह्यते तृतीयऽएव व्वषट्क्रियतेऽथ य्यदाश्विनाविमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदꣳ सर्व्वमाप्नुवातां पुष्करस्रजावित्यग्निरेवास्यै पुष्करमादित्योऽमुष्यै ॥१६॥ अथातो गृह्णात्येव । "या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् । उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते य्योनिर्म्माध्वीभ्यां त्वे"ति सादयति तं वै मधुमत्यच्चा गृह्णाति माध्वीभ्यां त्वेति सादयति तद्यन्मधुमत्यच्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१७॥ दध्यङ् ह वाऽआभ्यामाथर्व्वणः । मधु नाम ब्राह्मणमुवाच तदेनयोः प्रियं धाम तदेवैनयोरेतेनोपगच्छति तस्मान्मधुमत्यच्चा गृह्णाति माध्वीभ्यां त्वेति सादयति ॥१८॥ तानि वाऽएतानि । श्लक्ष्णानि पात्राणि भवन्ति रास्नावमैन्द्रवायवपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमजकावं मैत्रावरुणपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमौष्ट्रमाश्विनपात्रं तत्तस्य द्वितीयꣳ रूपं तेन तद्द्विदेवत्यमथ य्यदाश्विनाविति मुख्यौ

---

१. मा. सं. ७. ११. २. अश्विना इति. ग. ३. माथर्वण इति. ग.
४. एतेनोप इति. ग. ५. See. आप.श्रौ.१२.१.११. ६,७. देवत्यमिति. ग.

वाऽअश्विनावौष्टमिव वाऽइदं मुखं तस्मादौष्टमाश्विनपात्रं भवति ॥१९॥ Cf. का. श. ५. १. ५; तै. सं. ६. ४. ९; मै. सं. ४. ६. १; काठ. सं. २७. ५; कपि. सं. ४२. ५.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे प्रथमप्रपाठके पञ्चमं ब्राह्मणम् ॥

(प्रथमोऽध्यायस्समाप्तः)

४. १. ६.

(शुक्रामन्थिग्रहौ)

चक्षुषी ह वाऽअस्य शुक्रामन्थिनौ । तद्वाऽएषऽएव शुक्रो य्यऽएष तपति तद्यदेषऽएतत्तपति[1] तेनैष शुक्रश्चन्द्रमाऽएव मन्थी ॥१॥ तꣳ सक्तुभिः श्रीणाति । तदेनं मन्थं करोति तेनोऽएष मन्थ्येतौ ह वाऽआसां प्रजानां चक्षुषी स य्यद्धैतौ नोदियातां न हैवेह स्वौ च न पाणी निर्ज्ञानीयुः ॥२॥ तयोरत्तैवान्यतरः । आद्योऽन्यतरोऽत्तैव शुक्रऽआद्यो मन्थी ॥३॥ तयोरत्तैवान्यतरमनु । आद्योऽन्यतरमन्वत्तैव शुक्रमन्वाद्यो मन्थिनमनु तौ वाऽअन्यस्मै गृह्येतेऽअन्यस्मै हूयेते शण्डामर्कावित्यसुररक्षसे ताभ्यां गृह्येते देवताभ्यो हूयेते तद्यत्तथा ॥४॥ यत्र वै देवाः । असुररक्षसान्यपजघ्निरे तदेतावेव न शेकुरपहन्तुं यद्ध स्म देवाः किं च कर्म कुर्वते तद्ध स्म मोहयित्वा क्षिप्रऽएव पुनरपद्रवतः ॥५॥ ते ह देवाऽऊचुः[2] । उपजानीत य्यथेमावपहनामहा ऽइति ते होचुर्ग्रहावेवाभ्यां गृह्णाम तावभ्यवैष्यतस्तौ स्वीकृत्यापहनिष्यामहऽइति ताभ्यां ग्रहौ जगृहुस्तावभ्यवैतां तौ स्वीकृत्यापाघ्नत तस्माच्छण्डामर्काभ्यामिति गृह्येते देवताभ्यो हूयेते ॥६॥ अपि होवाच याज्ञवल्क्यः[3] । नो स्विद्देवताभ्य एव गृह्णीयामा३ ब्विजितरूपमिव हीदमिति तद्वै स तन्मीमाꣳसामेव चक्रे नेत्तु चकार ॥७॥ इ-

१. एतत्तपतीति. च. २ ऊचुः इति. च. ३. याज्ञवल्क्य इति ग.

मामु हैके शुक्रस्य पुरोरुचं कुर्व्वन्ति । "अयं व्वेनश्चोदयत्पृश्निगर्भा ज्योतिर्ज्जरायू रजसो व्विमान"ऽइति तदेतस्य रूपं कुर्म्मो य्यऽएष तपतीति यदाह ज्योतिर्ज्जरायुरिति ॥८॥ इमां त्वेव शुक्रस्य पुरोरुचं कुर्यात् । "तं प्रत्नथा पूर्व्वथा व्विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ स्वर्व्विदमि"त्यत्ता ह्येतमन्वत्ता हि ज्येष्ठस्तस्मादाह ज्येष्ठतातिं बर्हिषदꣳस्वर्व्विदं "प्रतीचीनं व्वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु व्वर्द्धसे । उपयामगृहीतोऽसि शण्डाय त्वैष ते य्योनिर्व्वीरतां पाही"ति सादयत्यत्ता ह्येतमन्वत्ता हि व्वीरस्तस्मादाहैष ते य्योनिर्व्वीरतां पाहीति दक्षिणार्द्धे सादयत्येताꣳह्येष दिशमनु संचरति ॥९॥ अथ मन्थिनं गृह्णाति । "अयं व्वेनश्चोदयत्पृश्निगर्भा ज्योतिर्ज्जरायू रजसो व्विमाने । इममपाꣳ सङ्गमे सूर्यस्य शिशुं न व्विप्रा मतिभी रिहन्ति । उपयामगृहीतोऽसि मर्क्काय त्वे"ति ॥१०॥ तꣳ सक्तुभिः श्रीणाति । तद्यत्सक्तुभिः श्रीणाति व्वरुणो ह वै सोमस्य राज्ञोऽभीवाक्षि प्रतिपिपेष तदश्वयत्ततोऽश्वः समभवत्तद्यच्छ्वयथात्समभवत्तस्मादश्वो नाम तस्याश्रु प्रास्कन्दत्ततो यवः समभवत्तस्मादाहुर्व्वरुण्यो य्यवऽइति तद्यदेवास्यात्र चक्षुषोऽमीयत तेनैवैनमेतत्समर्द्धयति कृत्स्नं करोति तस्मात्सक्तुभिः श्रीणाति ॥११॥ स श्रीणाति । "मनो न येषु हवनेषु तिग्मं व्विपः शच्या व्वनुथो द्रवन्ता । आ यः शर्षाभिस्तुविनृम्णोऽअस्या श्रीणीता दिशं गभस्तावेष ते य्योनिः प्रजाः पाही"ति सादयत्याद्यो ह्येतमन्वाद्या हीमाः प्रजा व्विशस्तस्मादाहैष ते य्योनिः

१. See आप. श्रौ. सू. १२. १४. १३, १५. 'अयं वेनश्चोदयदि'ति शुक्रं गृहीत्वा 'तं प्रत्नथे'ति मन्थिनं गृहीत्वा इति । तैत्तिरीयमैत्रायणीयकठशाखासु प्रथमतः 'अयं वेनः' अनन्तरं 'तं प्रत्नथा' इत्येव क्रम आदृतः । See तै. सं. १. ४. ८. ९., मै. सं. १. ३. १०, ११; कठ. सं. ४. ३. काण्वमाध्यन्दिन 'हितयोस्तु तद्वैपरीत्येन पाठः See. का. सं. १. ७. ७. २, ४. मा. सं. ७. १२.

३. मन्वत्ता इति च. ५. संचरति इति च. ६. मा. सं, ७. १६.

७. श्रीणाति. इति. च. ८. मा. सं. ७. १७. ९. द्रवन्ता इति. च.

प्रजाः पाहीति ॥१२॥ द्वौ प्रोक्षितौ यूपशकलौ भवतः । द्वावप्रोक्षितौ प्रोक्षितं चैवाध्वर्युरादत्तेऽप्रोक्षितं चैवमेव प्रतिप्रस्थाता प्रोक्षितं चैवादत्तेऽप्रोक्षितं च शुक्रमेवाध्वर्युरादत्ते मन्थिनं प्रतिप्रस्थाता ॥१३॥ सोऽध्वर्युः । अप्रोक्षितेन यूपशकलेनापमार्ष्ट्यर्य"पमृष्टः शण्ड"ऽइत्येवमेव प्रतिप्रस्थाता"पमृष्टो मर्क्क"ऽइति तदादादानावेवासुररक्षसेऽअपहतो "देवास्त्वा शुक्रपाः प्रणयन्त्वि"त्येवाध्वर्युर्निष्क्रामति "देवास्त्वा मन्थिपाः प्रणयन्त्वि"ति प्रतिप्रस्थाता तदेनौ देवताभ्यऽएष प्रणयतः ॥१४॥ तौ जघनेनाहवनीयमरत्नी संधत्तः । ता उत्तरवेदौ सादयतो दक्षिणायामेव श्रोणावध्वर्युः सादयत्युत्तरायां प्रतिप्रस्थातानानुसृजन्तावेवा"नाधृष्टासी"ति तद्रक्षोभिरेवैतदुत्तरवेदिमनाधृष्टां कुरुतो व्विपर्येष्यन्तौ वाऽएतावग्निं भवतोऽत्येष्यन्तौ तस्माऽएवैतन्निह्नुवाते तथो हैनौ व्विपरियन्तावग्निर्न हिनस्ति ॥१५॥ सोऽध्वर्युः पर्येति । "सुवीरो व्वीरान् प्रजनयन् परीही"त्यत्ता ह्येतमन्वत्ता हि व्वीरस्तस्मादाह सुवीरो व्वीरान् प्रजनयन् परीही"त्यभिरायस्पोषेण व्यजमानमि"ति तद्यजमानायाशिषमाशास्ते व्यदाहाभिरायस्पोषेण यजमानमिति ॥१६॥ अथ प्रतिप्रस्थाता पर्य्येति । "सुप्रजाः प्रजाः प्रजनयन् परीही"त्याद्यो ह्येतमन्वाद्या हीमाः प्रजा व्विशस्तस्मादाह सुप्रजाः प्रजाः प्रजनयन् परीहीत्य"भि रायस्पोषेण व्यजमान"मिति तद्यजमानायाशिषमाशास्ते यदाहाभिरायस्पोषेण यजमानमिति ॥१७॥ तावपिधाय निष्क्रामतः । तिर ऽएवैनावेतत्कुरुतस्तस्मादिमौ सूर्य्याचन्द्रमसौ प्राञ्चौ यन्तौ न कश्चन पश्यति तौ पुरस्त त्परीत्यापोर्णुतः पुरस्तात्तिष्ठन्तौ जुहुत ऽआविरेवैनावेतत्कुरुतस्तस्मादिमौ सूर्य्याचन्द्रमसौ प्रत्यञ्चौ यन्तौ सर्व्वऽएव पश्यति त-

१,३. मा. सं. ७. १२. २,४. मा. सं. ७. १७. ५. मा. सं. ७. १२, १७.
६. तद्रक्षोभिरिति. ग. च. ७,८. मा. सं. ७. १३. ९. मा. सं. ७. १८.
१०. परीहो इति. ग. च. ११. मा. सं. ७. १८. १२. कश्चन इति च.

स्मात्पुराग्रेतः सिच्यमानं न कश्चन पश्यति तदु पश्चात्प्रजायमानꣳ सर्व्व ऽएव पश्यति ॥१८॥ तौ जघनेन य्यूपमरत्नी संधत्तः । य्यद्यग्निर्न्नोद्बाधेत य्यद्युऽअग्निरुद्बाधेताप्यग्रेणैव य्यूपमरत्नी संदध्याताꣳ "संञ्जग्मानो दिवा पृथिव्या शुक्रः शुक्रशोचिषे"त्येवाध्वर्य्युः "संञ्जग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषे"ति प्रतिप्रस्थाता चक्षुषोरेवैतेऽआरमणे कुरुतश्चक्षुषीऽएवैतत्संधत्तस्तस्मादिमे ऽअभितोऽस्थिनी चक्षुषी सꣳहिते ॥१९॥ सोऽध्वर्य्युः । अप्रोक्षितं य्यूपशकलं निरस्यति "निरस्तः शण्ड"ऽइत्येवमेव प्रतिप्रस्थाता "निरस्तो मर्क"ऽइति तत्पुराहुतिभ्योऽसुररक्षसे ऽअपहतः ॥२०॥ अथाध्वर्युः । प्रोक्षितं य्यूपशकलमाहवनीये प्रास्यति "शुक्रस्याधिष्ठानमसी"त्येवमेव प्रतिप्रस्थाता "मन्थिनोऽधिष्ठानमसी"ति चक्षुषोरेवैते समिधौ चक्षुषाऽएवैतत्समिन्द्धे तस्मादिमे समिद्धे चक्षुषी ॥२१॥ तत्र जपति । "अच्छिन्नस्य ते देव सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्यामे"त्याशीरेवैषैतस्य कर्मणऽआशिषमेवैतदाशास्ते ॥२२॥ अथाश्राव्याह । "प्रातः प्रातः सवस्य शुक्रवतो मधुश्चुत ऽइन्द्राय सोमान् प्रस्थितान् प्रेष्ये"ति व्वषट्कृते ऽध्वर्य्युर्जुहोति तदनु प्रतिप्रस्थाता तदनु चमसाध्वर्यवः ॥२३॥ तौ वै पुरस्तात्तिष्ठन्तौ जुहुतः । चक्षुषी वाऽएतौ तत्पुरस्तादेवैतच्चक्षुषी धत्तस्तस्मादिमे पुरस्ताच्चक्षुषी ॥२४॥ अभितो य्यूपं तिष्ठन्तौ जुहुतः । य्यथा वै नासिकैवं य्यूपस्तस्मादिमेऽअभितो नासिका चक्षुषी ॥२५॥ तौ वै व्वषट्कृतौ सन्तौ मन्त्रेण हूयेते । एतेनो हैतौ तदुदश्नुवाते य्यदेनौ सर्व्वꣳ सवनमनुहूयते य्यद्वेवैतौ सर्व्वꣳ सवनमनुहूयतऽएतौ वै प्रजापतेः प्रत्यक्षतमां चक्षुषी ह्येतौ सत्यं वै चक्षुः सत्यꣳ हि प्रजापतिस्तस्मादे-

१. मा. सं. ७. १३. २. मा. सं. ७. १८. ३. मा. सं. ७. १३.
४. मा. सं. ७. १८. ५. अपहतः इति. ग. ६. मा. सं. ७. १३.
७. मा. सं. ७. १८. ८. जपति इति. च. ९. मा. सं. ७. १४.

नौ सर्व्वꣳ सवनमनुहूयते ॥२६॥ स जुहोति । "सा प्रथमा संस्कृतिर्व्विश्ववारा स प्रथमो व्वरुणो मित्रोऽअग्निः । स प्रथमो बृहस्पतिश्चिकित्वांस्तस्माऽइन्द्राय सुतमाजुहोत स्वाहे"ति ॥२७॥ स य्यज्जुहोति सा प्रथमा स प्रथम ऽइति शश्वद्ध वै रेतः सिक्तस्य चक्षुषीऽएव प्रथमे सम्भवतस्तस्माज्जुहोति सा प्रथमा स प्रथमऽइति ॥२८॥ अथ सम्प्रेष्यति । *"प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणां प्र यजमानस्य प्रयन्तु सदस्यानाꣳ होत्राणां ऽचमसाध्वर्यव उपावर्तध्वꣳ शुक्रस्याभ्युन्नयध्वमि"ति सम्प्रैषऽएवैष पर्य्येत्य प्रतिप्रस्थाताध्वर्योः पात्रे सꣳस्रवमवनयत्यत्रऽएवैतदाद्यं बलिꣳ हारयति तमध्वर्य्युर्होतृचमसेऽवनयति भक्षाय व्वषट्कर्तुर्हि भक्षः प्राणो वै व्वषट्कारः सोऽस्मादेतद्व्वषट्कुर्व्वतः पराङिवाभूत्प्राणो वै भक्षस्तत्प्राणं पुनरात्मन्धत्ते ॥२९॥ अथ यदेते प्रतीची पात्रे न हरन्ति । हरन्त्यन्यान् ग्रहांश्चक्षुषी ह्येते सꣳस्रवमेव होतृचमसेऽवनयति ॥३०॥ अथ होत्राणां चमसानभ्युन्नयन्ति । हुतोच्छिष्टा वाऽएते सꣳस्रवा भवन्ति नालमाहुत्यै तानेवैतत्पुनराप्याययन्ति तथालमाहुत्यै भवन्ति तस्माद्धोत्राणां चमसानभ्युन्नयन्ति ॥३१॥ अथ होत्राः संयाजयन्ति । होत्रा ह वै युक्ता देवेभ्यो य्यज्ञं व्वहन्ति ताऽएवैतत्संतर्पयन्ति तृप्ताः प्रीता देवेभ्यो य्यज्ञं व्वहानिति तस्माद्धोत्राः संयाजयन्ति ॥३२॥ स प्रथमायां वा होत्रायाम् । इष्टायामुत्तमायां वानुमन्त्रयते "तृम्पन्तु होत्रा मध्वो य्याः स्विष्टा य्याः सुप्रीताः सुहुता य्यत्स्वाहे"ति होत्राणामेवैषा तृप्तिरथेत्य प्रत्यङ्ङुपविश "त्य याडग्नीद्रि"त्यग्नीद्ध्र्यत्र यजतामुत्तमः संयजति तस्मादाहायाडग्नीदिति ॥३३॥ Cf. का.

---

१. मा. सं. ७. १४, १५.

* मन्त्रोऽयं न मन्त्रकाण्डे पठितः अतो–वेदान्तरीयः प्रतिभाति ।

२. इति. ग, इति. क. ३. धत्ते इति च. ४. ग्रहान् इति. ग.

५. अवनयति इति. च. ६. न यन्ति इति. च. ७. प्रीता इति. ग.

८, ९. मा. सं. ७ १५.

श. ५. २. १; तै. सं. ६. ४. १०. मै. सं. ४. ६. ३., काठ २७. ७. ८.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे प्रथमप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ. २. १.)

प्रथमः प्रपाठकस्समाप्तः ॥

(काण्डिकासंख्या १३६)

४. २. १.

(आग्रयणग्रहः)

आत्मा ह वाऽअस्याग्रयणः । सा ऽस्यैष सर्व्वमेव सर्वꣳह्ययमात्मा तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णाति सर्व्वं वाऽइयꣳसर्व्वमेष ग्रहस्तस्मादनया गृह्णाति ॥१॥ पूर्ण्णं गृह्णाति । सर्व्वं वै पूर्ण्णꣳसर्व्वमेष ग्रहस्तस्मात्पूर्ण्णं गृह्णाति ॥२॥ विश्वेभ्यो देवेभ्यो गृह्णाति । सर्व्वं वै विश्वे देवाः सर्व्वमेष ग्रहस्तस्माद्विश्वेभ्यो देवेभ्यो गृह्णाति ॥३॥ सर्व्वेषु सवनेषु गृह्णाति । सर्व्वं वै सवनानि सर्व्वमेष ग्रहस्तस्मात्सर्व्वेषु सवनेषु गृह्णाति ॥४॥ स य्यदि राजोपदस्येत् । तमत ऽएव तन्वीरन्नतः प्रभावयेयुरात्मा वा ऽआग्रयणऽआत्मनो वाऽइमानि सर्व्वाण्यङ्गानि प्रभवन्त्येतस्मादन्ततो हारियोजनं ग्रहं गृह्णाति तदात्मन्येवास्यां प्रतिष्ठायामन्ततो यज्ञः प्रतितिष्ठति[1] ॥५॥ अथ य्यस्मादाग्रयणो नाम । यां वाऽअमूं ग्रावाणमाददानो व्वाचं य्यच्छत्यत्र वै साग्रेऽवदत्तद्यत्सात्राग्रेऽवदत्तस्मादाग्रयणो नाम ॥६॥ रक्षोभ्यो वै तां भीषा व्वाचमयच्छन् । षड्वाऽअतः प्राचो ग्रहान् गृह्णात्यथैष सप्तमः षड्वाऽऋतवः संवत्सरस्य सर्व्वं वै संवत्सरः ॥७॥ तां देवाः । सर्व्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्राग्रे व्वाचमवदंस्तथोऽएवैष ऽएताꣳसर्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्राग्रे व्वाचं व्वदति॥८॥ अथातो गृह्णात्येव । "ये देवासो[3] दिव्येकादश स्थ पृथि-

१. तिष्ठति इति. च. २. मा. सं. ७. १९, २०. ३. देवास इति. ग.

व्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् । उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयण" ऽइति व्वाचमेवैतदयातयाम्नीं करोति तस्मादनया समानꣳसद्विपर्यासं व्वदत्यजामितायै जामि ह कुर्याद्यदाग्रयणोऽस्याग्रयणोऽसीति गृह्णीयात्तस्मादाहाग्रयणोऽसि स्वाग्रयण ऽइति ॥९॥ "पाहि यज्ञं पाहि यज्ञपति"मिति । व्वाचमेवैतदुत्सृष्टामाह गोपाय यज्ञमिति पाहि यज्ञपतिमिति व्वाचमेवैतदुत्सृष्टामाह गोपाय यजमानमिति य्यजमानो हि यज्ञपति "व्विष्णुस्त्वामिन्द्रियेण पातु व्विष्णुं त्वं पाही"ति व्वाचमेवैतदुत्सृष्टामाह यज्ञो वै व्विष्णुर्यज्ञस्त्वां व्वीर्येण गोपायत्विति व्विष्णुं त्वं पाहीति व्वाचमेवैतदुत्सृष्टामाह यज्ञं त्वं गोपाये"त्यभि सवनानि पाही"ति तदेतं ग्रहमाह सर्व्वाणि होप सवनानि प्रति ॥१०॥ अथ दशापवित्रमुपगृह्य हिङ्करोति । सा हैषा व्वागनुद्यमाना तताम तस्यां देवा व्वाचि तान्तायाꣳहिङ्कारेणैव प्राणमदधुः प्राणो वै हिङ्कारः प्राणो हि वै हिङ्कारस्तस्मादपिगृह्य नासिके न हिङ्कर्तुꣳ शक्नोति सैतेन प्राणेन समजिहीत य्यदा वै तान्तः प्राणं लभतेऽथ स संजिहीते तथोऽएवैषऽएतद्वाचि तान्तायाꣳ हिङ्कारेणैव प्राणं दधाति सैतेन प्राणेन सञ्जिहीते त्रिष्कृत्वो हिङ्करोति त्रिवृद्धि य्यज्ञः ॥११॥ अथाह "सोमः पवत"ऽइति । स यामेवामुं भीषासुररक्षसेभ्यो न निरब्रुवंस्तामेवैतत्सर्व्वस्मिन्विजितेऽभयेऽनाष्ट्रेऽत्र निराह तामाविष्करोति तस्मादाह सोमः पवतऽ इति ॥१२॥ "अस्मै ब्रह्मणेऽस्मै क्षत्राये"ति । तद्ब्रह्मणे च क्षत्राय चाहा"स्मै सुन्वते य्यजमानाय पवत"ऽइति तद्यजमानायाह॥१३॥तदाहुः । एतावदेवोक्त्वा सादयेदेतावद्वा ऽइदꣳ सर्व्वं य्यावद्ब्रह्म क्षत्रं व्विडिन्द्राग्नी वाऽइदꣳ सर्व्वं तस्मादेतावदेवोक्त्वा सादयेदिति ॥१४॥ तदु ब्रूयादेव भूयः । "इषꣳऽऊर्ज्जे पवत"

१-३. मा. सं. ७. २०. ४. प्रति इति. क, प्रति इति. च. ५. प्राणो इति. ग.
६-९. मा. सं. ७. २१.

ऽइति व्वृष्ट्यै तदाह यदाहेषऽइत्यूर्ज्जऽइति यो व्वृष्टादूर्ग्रसो जायते तस्मै तदाहा "द्भ्यऽओषधीभ्यः पवत"ऽइति तदद्भ्यश्चौषधिभ्यश्चाह "द्यावापृथिवीभ्यां पवत"ऽइति तदाभ्यां द्यावापृथिवीभ्यामाह यययोरिदꣳ सर्व्वमधि "सुभूताय पवत"ऽइति साधवे पवतेऽइत्येवैतदाह ॥१५॥ तदु हैकऽआहुः । * ब्रह्मवर्च्चसाय पवतऽइति तदु तथा न ब्रूयाद्यद्वाऽआहास्मै ब्रह्मणऽइति तदेव ब्रह्मवर्च्चसायाह "व्विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्व्विश्वेभ्यस्त्वा देवेभ्य"ऽइति सादयति व्विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति तं वै मध्ये सादयत्यात्मा ह्यस्यैष मध्यऽइव ह्ययमात्मा दक्षिणोक्थ्यस्थाली भवत्युत्तरादित्यस्थाली ॥१६॥ Cf. का. श. ५. २. २; तै. सं. ६. ४. ११; मै. सं. ४. ६. ४; कठ. २७. ९.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
द्वितीयप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. २. २.)

४. २. २.

(उक्थ्यग्रहः)

अयꣳ ह वाऽअस्यैषोऽनिरुक्तऽआत्मा यदुक्थ्यः । सोऽस्यैषऽआत्मैवात्मा ह्ययमनिरुक्तः प्राणः सोऽस्यैषऽआयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भवति स्थाल्या ह्येनं गृह्णात्यजरा हीयममृताजरꣳ ह्यमृतमायुस्तस्मादनया गृह्णाति ॥१॥ तं वै पूर्णं गृह्णाति । सर्व्वं वै तद्यत्पूर्णꣳ सर्व्वं तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥२॥ (शतम् २४००) तस्यासावेव ध्रुवऽआयुः । आत्मैवास्यैतेन सꣳहितः पर्वाणि सन्ततानि तद्वाऽअगृहीतऽएवैतस्मादच्छावाकायोत्तमो ग्रहो भवति ॥३॥ अथ राजानमुपावहरति । तृतीयं व्वसतीवरीणामवन-

१–४. मा. सं. ७. २१.

* See. आप. श्रौ. १२. १५. ८. "सोमः पवते सोमः पवते सोमः पवते सुभूताय पवते ब्रह्मवर्चसाय पवतेऽस्मै ब्रह्मणे पवते" इत्यादि ।

५. स्थाली इति. ग. ६. यदुक्थ्य इति. ग. ७. भवति इति. च.

यति तत्पूर्व्वं समैति प्रथममहोत्तरस्य सवनस्य करोत्युत्तमं पूर्व्वस्य स यदुत्तरस्य सवनस्य तत्पूर्व्वं करोति यत्पूर्व्वस्य तदुत्तमं तद्व्यतिषजति तस्मादिमानि पूर्व्वाणि व्यतिषक्तानीदमित्थमतिहानमिदमित्थम् ॥४॥ एवमेव माध्यन्दिने सवने[1] । अगृहीतऽएवैतस्मादच्छावाकायोत्तमो ग्रहो[2] भवत्यथ तृतीयं व्वसतीवरीणामवनयति तत्पूर्व्वं समैति प्रथममहोत्तरस्य सवनस्य करोत्युत्तमं पूर्व्वस्य स यदुत्तरस्य सवनस्य तत्पूर्व्वं करोति यत्पूर्व्वस्य तदुत्तमं तद्व्यतिषजति तस्मादिमानि पूर्व्वाणि व्यतिषक्तानीदमित्थमतिहानमिदमित्थं तद्यदस्यैतेनात्मा सँहितस्तेनास्यैषऽआयुः ॥५॥ सैषा कामदुघैवेन्द्रस्योद्धारः । त्रिभ्यऽएवैनं प्रातःसवनऽउक्थेभ्यो व्विगृह्णाति त्रिभ्यो माध्यन्दिने सवने तत्षट्कृत्वः षड्वाऽऋतवऽऋतवो वाऽइमान्त्सर्व्वान् कामान् पचन्त्येतेनो हैषा कामदुघैवेन्द्रस्योद्धारः ॥६॥ तं वाऽअपुरोरुक्कं गृह्णाति । उक्थँ हि पुरोरुगृग्घि पुरोरुगृग्घ्युक्थँ साम ग्रहोऽथ य्यदन्यज्जपति तद्यजुस्ता हैताऽअभ्यर्द्धऽएवाग्रऽऋग्भ्यऽआसुरभ्यर्द्धो य्यजुर्भ्योऽभ्यर्द्धः सामभ्यः ॥७॥ ते देवाऽअब्रुवन् । हन्तेमा य्यजुष्षु दधाम तथेयं बहुलतरेव व्विद्या भविष्यतीति ता यजुष्ष्वदधुस्ततऽएषा बहुलतरेव व्विद्याभवत् ॥८॥ तं य्यदपुरोरुक्कं गृह्णाति । उक्थँ हि पुरोरुगृग्घि पुरोरुगृग्घ्युक्थँ स यदेवैनमुक्थेभ्यो व्विगृह्णाति तेनो हास्यैष पुरोरुङ्मान् भवति तस्मादपुरोरुक्कं गृह्णाति ॥९॥ अथातो गृह्णात्येव । "उपयामगृहीतोऽसीन्द्राय त्वा बृहद्व्रते व्वयस्वत"ऽइतीन्द्रो वै यज्ञस्य देवता तस्मादाहेन्द्राय त्वेति बृहद्व्रते व्वयस्वतऽइति व्वीर्यवतऽइत्येवैतदाह यदाह बृहद्व्रते व्वयस्वतऽइत्यु"क्थाभ्यं गृह्णामी"त्युक्थेभ्यो ह्येनं गृह्णाति "यत्तऽइन्द्र बृहद्व्रय"ऽइति यत्तऽइन्द्र व्वीर्यमित्येवैतदाह "तस्मै त्वा व्विष्णवे त्वे"ति

१. सवने इति. ग. २. अगृहीत इति. क.

३. अच्छावाक इति. ग. ४-६. मा. सं. ७. २२.

यज्ञस्य ह्येनमायुषे गृह्णाति तस्मादाह तस्मै त्वा विष्णवे त्वे"त्येष ते योनिरुक्थेभ्यस्त्वे"ति सादयत्युक्थेभ्यो ह्येनं गृह्णाति ॥१०॥ तं विगृह्णाति । "देवेभ्यस्त्वा देवाव्यं यज्ञस्यायुषे गृह्णामी" ति प्रशासनꣳ स कुर्याद्यऽएवं कुर्याद्यथादेवतं त्वेव विगृह्णीयात् ॥११॥ "मित्रावरुणाभ्यां त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामी"त्येव मैत्रावरुणाय मैत्रावरुणीषु हि तस्मै स्तुवते मैत्रावरुणीरनुशꣳसति मैत्रावरुण्या यजति ॥१२॥ "इन्द्राय त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामी"त्येव ब्राह्मणाच्छꣳसिनऽऐन्द्रीषु हि तस्मै स्तुवतऽऐन्द्रीरनुशꣳसत्यैन्द्र्या यजति ॥१३॥ "इन्द्राग्निभ्यां त्वा । देवाव्यं यज्ञस्यायुषे गृह्णामी"त्येवाच्छावाकायैन्द्राग्नीषु हि तस्मै स्तुवतऽऐन्द्राग्नीरनुशꣳसत्यैन्द्राग्न्या यजतीन्द्राय त्वेन्द्राय त्वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ सवनम् ॥१४॥ तदु ह चरकाध्वर्यवो विगृह्णन्ति । "उपयामगृहीतोऽसि देवेभ्यस्त्वा देवाव्यमुक्थेभ्यऽउक्थाव्यं मित्रावरुणाभ्यां जुष्टं गृह्णाम्येष ते योनिर्मित्रावरुणाभ्यां त्वे"ति सादयति पुनर्हविरसीति स्थालीमभिमृशति ॥१५॥ "उपयामगृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्यऽउक्थाव्यमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वे"ति सादयति पुनर्हविरसीति स्थालीमभिमृशति ॥१६॥ "उपयामगृहीतोऽसि । देवेभ्यस्त्वा देवाव्यमुक्थेभ्यऽउक्थाव्यमिन्द्राग्निभ्यां जुष्टं गृह्णाम्येष ते योनिरिन्द्राग्निभ्यां त्वे"ति सादयति नात्र पुनर्हविरसीति स्थालीमभिमृशतीन्द्राय त्वेन्द्राय त्वेत्येव माध्यन्दिने सवनऽऐन्द्रꣳ हि माध्यन्दिनꣳ सवनं द्विर्ह पुनर्हविरसीति स्थालीमभिमृशति तूष्णीं तृतीयं निदधाति ॥१७॥ तं वै नोपयामेन गृह्णीयात् । न योनौ सादयेदग्रे ह्येवैष ऽउपयामेन गृहीतो भवत्यग्रे

१, २ मा. सं. ७. २२. "देवेभ्यस्त्वा देवाव्यं गृह्णामि यज्ञस्यायुषे गृह्णामि"ति मुद्रितसंहितापाठः ३,५,७. मा. सं. ७. २३. ४. यजतीति. क.

६. ब्राह्मणा इति. क. ८. Sec. आप. श्रौ. १२. २८. ११-२९. ८.

९. त्वेन्द्रायेति नाऽस्ति. ग.

य्योनौ सन्नोऽजामितायै जामि ह कुर्याद्यदेनमत्राप्युपयामेन गृह्णी-
याद्यद्योनौ सादयेदथ य्यत्पुनर्हविरसीति स्थालीमभिमृशति पुनर्ह्यस्यै
ग्रहं ग्रहीष्यन् भवति न तदाद्रियेत तूष्णीमेव निदध्यात् ॥१८॥
Cf. का. श. ५. २. ३; तै. सं. ६. ५. १; मै. सं. ३.६.५; कठ२७. १०.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
द्वितीयप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. २. ३.)

४. २. ३.
(ध्रुवग्रहः)

अयँ[1] ह वाऽअस्यैष प्राणः । योऽयं पुरस्तात्स वै व्वैश्वानर
ऽएवाथ योऽयं पश्चात्स ध्रुवस्तौ ह स्मैतौ द्वावेवाग्रे ग्रहौ गृह्णन्ति
ध्रुववैश्वानरावेति तयोरयमप्येतर्ह्यन्यतरऽएव गृह्यते ध्रुव ऽएव स
य्यदि तं चरकेभ्यो वा य्यतो वानुब्रुवीत य्यजमानस्य तं चमसेऽवन-
येदथैतमेव होतृचमसे ॥१॥ य्यद्वाऽअस्यावाचीनं नाभेः । तदस्यैष-
ऽआत्मनः[2] सोऽस्यैषऽआयुरेव तस्मादनया गृह्णात्यस्यै हि स्थाली भ-
वति स्थाल्या ह्येनं गृह्णात्यजरा हीयममृताजरँ ह्यमृतमायुस्तस्माद-
नया गृह्णाति ॥२॥ तं वै पूर्णं गृह्णाति । सर्व्वं वै तद्यत्पूर्णँ सर्व्वं
तद्यदायुस्तस्मात्पूर्णं गृह्णाति ॥३॥ व्वैश्वानराय गृह्णाति । संवत्सरो
वै व्वैश्वानरः संवत्सरऽआयुस्तस्माद्वैश्वानराय गृह्णाति ॥४॥ स
प्रातःसवने गृहीतः । ऐतस्मात्कालादुपशेते तदेनꣳ सर्व्वाणि सव-
नान्यतिनयति ॥ ॥५॥ तं न स्तूयमानेऽवनयेत् । न ह संवत्सरं य्य-
जमानोऽतिजीवेद्यत्स्तूयमानेऽवनयेत् ॥६॥ तँ शस्यमानेऽवनयति ।
तदेनं द्वादशँ स्तोत्रमतिनयति तथा परम्परमायुः समश्नुते तथो
ह यजमानो ज्योग्जीवति तस्माद्ब्राह्मणोऽग्निष्टोमसत्स्यादैतस्य
होमान्न सर्प्पेन्न प्रस्रावयेत तथा सर्व्वमायुः समश्नुतऽआयुर्व्वाऽअ-
स्यैष तथा सर्व्वमायुरेति ॥७॥ यद्वाऽअस्यावाचीनं नाभेः । तदस्यैष-

१. अयँ इति. च. २. आत्मनः इति. ङ.

ऽआत्मनः स यत्पुरैतस्य होमात्सर्प्पेद्वा प्र वा स्रावयेत ध्रुवꣳ हावमेहेन्नेद्ध्रुवमवमेहानीति तस्माद्वाऽअग्निष्टोमसद्भवति तद्वै तद्यजमानऽएव य्यजमानस्य ह्येष तदात्मनः ॥८॥ स वाऽअग्निष्टोमसद्भवति । य्यशो वै सोमस्तस्माद्यश्च सोमे लभते यश्च नोभावेवागच्छतो य्यशऽएवैतद्दूष्टुमागच्छन्ति तद्वाऽएतद्यशो ब्राह्मणाः सम्प्रसृप्यात्मन्दधते य्यद्भक्षयन्ति स ह य्यशऽएव भवति यऽएवं व्विद्वान् भक्षयति॥९॥ ते वाऽएते । सर्प्पन्तऽएवाग्निष्टोमसद्येतद्यशः संनिधाय सर्प्पन्ति ते पराञ्चो य्यशसो भवन्ति तदेष परिगृह्यैव पुनरात्मन्यशो धत्ते तेषाꣳहैषऽएव यशस्वितमो भूत्वा प्रैति य्यऽएवं व्विद्वानग्निष्टोमसद्भवति ॥१०॥ देवाश्च वाऽअसुराश्च । उभये प्राजापत्याः पस्पृधिरऽएतस्मिन्यज्ञे प्रजापतौ पितरि संवत्सरेऽस्माकमयं भविष्यत्यस्माकमयं भविष्यतीति ॥११॥ ततो देवाः । अर्च्चन्तः श्राम्यन्तश्चेरुस्तऽएतदग्निष्टोमसद्यं ददृशुस्तऽएतेनाग्निष्टोमसद्येन सर्व्वं य्यज्ञꣳ समवृञ्जतान्तरायन्नसुरान् यज्ञात्तथोऽएवैषऽएतेनाग्निष्टोमसद्येन सर्व्वं य्यज्ञꣳ संव्वृङ्क्तेऽन्तरेति सपत्नान्यज्ञात्तस्माद्वाऽअग्निष्टोमसद्भवति ॥१२॥ तं गृहीत्वोत्तरे हविर्द्धाने सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीत्यपकीर्ण्णे वाऽइतरान् ग्रहान्त्सादयत्यथैतं व्युह्य न तृणं चनान्तर्द्धाय ॥१३॥ यद्वाऽअस्योर्द्ध्वं नाभेः । तदस्यैतऽआत्मनऽउपरीव वै तद्यदूर्द्ध्वं नाभेरुपरीवैतद्यदुपकीर्ण्णं तस्मादुपकीर्ण्णे सादयत्यथैतं व्युह्य न तृणं चनान्तर्द्धाय ॥१४॥ य्यद्वाऽअस्यावाचीनं नाभेः । तदस्यैषऽआत्मनोऽधऽइव वैतद्यदवाचीनं नाभेरधऽइवैतद्यद्व्युह्य न तृणं चनान्तर्द्धाय तस्मादेतं व्युह्य न तृणं चनान्तर्द्धाय सादयति ॥१५॥ एष वै प्रजापतिः। य्यऽएष य्यज्ञस्तायते य्यस्मादिमाः प्रजाःप्रजाता एतस्वेवाप्येतर्ह्यनु प्रजायन्ते स य्यानुपकीर्ण्णे सादयति तस्माद्यास्तानुनु प्रजाः प्रजायन्ते ताऽअन्येनात्मनोऽस्यां प्रतितिष्ठन्ति याँ वै शफैः प्रतितिष्ठन्ति ताऽ-

१. पुरैतस्य इति. ङ. २. त इति. ग. ३. या इति. ग.

अन्येनात्मनोऽस्यां प्रतितिष्ठन्त्यथ यदेतं व्युह्य न तृणं चनान्तर्द्धाय सादयति तस्माद्याऽएतमनु प्रजाः प्रजायन्ते ताऽआत्मनैवास्यां प्रतितिष्ठन्ति मनुष्याश्च श्वापदाश्च॥१६॥तद्धाऽएतत् । अस्याऽएवान्यदुत्तरं करोति यदुपकिरति स यानुपकीर्णे सादयति तस्माद्यास्तानु प्रजाः प्रजायन्ते ताऽअन्येनैवात्मनोऽस्यां प्रतितिष्ठन्ति शफैः ॥१७॥ तद्धाऽएतत् । आहवनीये जुह्वति पुरोडाशं धानाः करम्भं दध्यामिक्षामिति तद्यथामुखऽआसिञ्चेदेवं तदथैषऽएकरूपऽउपशेतऽआपऽइवैव तस्माद्यदनेन मुखेन नानारूपमशनमश्नात्यथैतेन प्राणेनैकरूपमेव प्रस्रावयतेऽपऽइवैवाथ यस्माद्ध्रुवो नाम॥१८॥ देवा ह वै यज्ञं तन्वानाः । तेऽसुररक्षसेभ्यऽआसङ्गाद्बिभयांचक्रुस्तान्दक्षिणतोऽसुररक्षसान्यासेजुस्तेषामेतान्दक्षिणान् ग्रहानुज्जघ्नुरप्येतद्दक्षिणꣳ हविर्द्धानमुज्जघ्नुरथैतमेव न शेकुरुद्धन्तुं तदुत्तरमेव हविर्द्धानं दक्षिणꣳहविर्द्धानमदꣳहत्तद्यदेतं न शेकुरुद्धन्तुं तस्माद्ध्रुवो नाम ॥१९॥ तं वै गोपायन्ति । शिरो वाऽएषऽएतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्याऽएष शिरः श्रीर्वै शिरः श्रीर्ह वै शिरस्तस्माद्योऽर्द्धस्य श्रेष्ठो भवत्यसावमुष्यार्द्धस्य शिरऽइत्याहुः श्रेष्ठो ह व्यथेत यदेष व्यथेत यजमानो वै श्रेष्ठो नेद्यजमानो व्यथाताऽइति तस्माद्वै गोपायन्ति ॥२०॥ व्वत्सो वाऽएषः । एतस्यै गायत्र्यै यज्ञो वै गायत्री द्वादश स्तोत्राणि द्वादश शस्त्राणि तच्चतुर्विꣳशतिश्चतुर्विꣳशत्यक्षरा वै गायत्री तस्याऽएष व्वत्सस्तं यद्गोपायन्ति गोपायन्ति वाऽइमान्वत्सान्दोहाय यदिदं पयो दुहऽएवमियं गायत्री यजमानाय सर्व्वान् कामान्दोहाताऽइति तस्माद्वै गोपायन्ति ॥२१॥ अथ यदध्वर्युश्च प्रतिप्रस्थाता च । निश्च क्रामतः प्र च पद्येते

१. तृणं इति. ग. २. प्रतितिष्ठन्तीति. ग.
३. देवाः इति. ग. ४. हविर्धानमिति. ग. ५. इत्याहुः इति ङ.
६. व्यथेत इति. ग. ७. व्यथाता इति. ग. ८. गोपायन्ति इति. च.

त्यथा बद्धवत्सोपाचरेदेवमेतं ग्रहमुपाचरतस्तमवनयति गायत्रीमेवैतत्प्रस्रावयति प्रत्तेयं गायत्री यजमानाय सर्व्वान् कामान्दोहाताऽइति तस्माद्वाऽअवनयति ॥२२॥ सोऽवनयति । "ध्रुवं ध्रुवेण मनसा वाचा सोममवनयामीति गृह्णामी"ति वा "था नऽइन्द्र ऽइद्विशोऽसपत्नाः समनसस्करदिति यथा न ऽइन्द्र इमाः प्रजा विशः श्रियै यशसेऽन्नाद्यायासपत्नाः समनसः करवदित्येवैतदाह ॥ २३ ॥ अथातो गृह्णात्येव । "मूर्द्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृतऽआ जातमग्निम् । कविꣳ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः । उपयामगृहीतोऽसि ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तमऽएष ते योनिर्व्वैश्वानराय त्वे"ति सादयति व्युह्य न तृणं चनान्तर्द्धाय वैश्वानराय ह्येनं गृह्णाति ॥२४॥ Cf. का. श. ५. २. ४; तै. सं. ६. ५. २; मै. सं. ४. ६. ६; कठ. २८. १. कपि. ४४. १.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
द्वितीयप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. २. ४.)

४. २. ४.

(विप्रुषां होमः)

ग्रहान् गृहीत्वा । उपनिष्क्रम्य विप्रुषाꣳ होमं जुहोति तद्यद्विप्रुषाꣳ होमं जुहोति यथा ऽएवास्यात्र विप्रुषः स्कन्दन्ति ताऽएवैतदाहवनीये स्वगाकरोत्याहवनीयो ह्याहुतीनां प्रतिष्ठा तस्माद्विप्रुषाꣳ होमं जुहोति ॥१॥ स जुहोति । "यस्ते द्रप्सः स्कन्दति यस्तेऽअꣳशु"रिति यो वै स्तोकः स्कन्दति स द्रप्सस्तत्तमाह यस्तेऽअꣳशुरिति तदꣳशुमाह "ग्रावच्युतो धिषणयोरुपस्थादि"ति ग्रावणा हि च्युतोऽधिषवणाभ्याꣳस्कन्दत्य "ध्वर्य्योर्व्वा परि वा यः पवित्रादि"त्यध्व-

१, २. मा. सं. ७. २५. ३. मा. सं. ७. २४. ४. मग्निं इति. ग.
५. देवाः इति. ग. ६. मा. सं. ७. २५. ७. विप्रुषाꣳ इति. ग.
८-१०. मा. सं. ७. २६. ९ बाहुच्युत इति तैत्तिरीयपाठः ।

र्योर्व्वा हि पाणिभ्याᳬस्कन्दति पवित्राद्वा "तं ते जुहोमि मनसा व्वषट्कृतᳬस्वाहे"ति तद्यथा व्वषट्कृतᳬहुतमेवमस्यैतद्भवति ॥२॥ अथ स्तीर्ण्यायै व्वेदेः । द्वे तृणेऽअध्वर्य्युरादत्ते तावध्वर्यू प्रथमौ प्रतिपद्येते प्राणोदानौ य्यज्ञस्याथ प्रस्तोता व्वागेव यज्ञस्याथोद्गातात्मैव प्रजापतिर्यज्ञस्याथ प्रतिहर्त्ता भिषग्वा व्यानो वा ॥३॥ तान्वाऽएतान् । पञ्चर्त्विजो य्यजमानोऽन्वारभतऽएतावान्वै सर्वो य्यज्ञो य्यावन्त ऽएते पञ्चर्त्विजो भवन्ति पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतद्यजमानोऽन्वारभते ॥४॥ अथान्यतरत्तृणम्। चात्वालमभिप्रास्यति"देवानामुत्क्रमणमसी"ति यत्र वै देवा य्यज्ञेन स्वर्गं लोकᳬ समाश्नुवत तऽएतस्माच्चात्वालादूर्ध्वाः स्वर्गं लोकमुपोदक्रामंस्तद्यजमानमेवैतत्स्वर्ग्यं पन्थानमनुसंख्यापयति ॥५॥ अथान्यतरत्तृणम् । पुरस्तादुद्गातृणामुपास्यति तूष्णीमेव स्तोमो वाऽएष प्रजापतिर्य्यदुद्गातारः स ऽइदᳬ सर्व्वं य्युतऽइदᳬ सर्व्वᳬ सम्भवति तस्माऽएवैतत्तृणमपिदधाति तथो हाध्वर्य्यु न युते नैनᳬ सम्भवत्यथ य्यदा जपन्ति जपन्ति ह्यत्रोद्गातारः ॥६॥ अथ स्तोत्रमुपाकरोति । सोमः पवतऽइति स वै परागेव स्तोत्रमुपाकरोति पराञ्चः स्तुवते देवान्वाऽएतानि स्तोत्राण्यभ्युपावृत्तानि य्यत्पवमानाः पराञ्चो ह्येतैर्देवाः स्वर्गं लोकᳬसमाश्नुवत तस्मात्परागेव स्तोत्रमुपाकरोति पराञ्चः स्तुवते ॥७॥ उपावर्त्तध्वमिति वाऽअन्यानि स्तोत्राणि । अभ्यावर्त्ते धुर्य्यै स्तुवतऽइमा वै प्रजा ऽएतानि स्तोत्राण्यभ्युपावृत्तास्तस्मादिमाः प्रजाः पुनरभ्यावर्त्ते प्रजायन्ते ॥८॥ अथ यदत्र बहिष्पवमानेन स्तुवते । अत्र ह वाऽअसावग्रऽआदित्य ऽआस तमृतवः परिगृह्यैवातऽऊर्द्ध्वाः स्वर्गं लोकमुपोदक्रामन्त्स एष ऽऋतुषु प्रतिष्ठितस्तपति तथोऽएवैतदृत्विजो य्यजमानं परिगृह्यैवात ऽऊर्ध्वाः स्वर्गं लोकमुपोत्क्रामन्ति तस्मादत्र बहिष्पवमानेन स्तुवते ॥९॥ नौर्ह वाऽ-

१. मा. सं. ७. २६. २. भवति इति. च. ३. एतान् इति. ग.
४. अन्वारभते इति. ग. ५. मा. सं. ७. २६.
६. पयति इति. च. ७. प्रजायन्ते इति. ग. ८. स्तुवते इति. ग.

एषा स्वर्ग्या । यद्बहिष्पवमानं तस्याऽऋत्विजऽएव स्फ्याश्चारित्राश्च स्वर्गस्य लोकस्य सम्पारणास्तस्याऽएकऽएव मज्जयिता यऽएव निन्द्यः स यथा पूर्णामभ्यारुह्य मज्जयेदेवꣳ हैनाꣳ स मज्जयति तद्वै सर्वऽएव यज्ञो नौः स्वर्ग्या तस्मादु सर्वस्मादेव यज्ञान्निन्द्यं परिबिबाधिषेत ॥१०॥ अथ स्तुतऽएतां वाचं वदति । "अग्नीदग्नीन्विहर बर्हिः स्तृणीहि पुरोडाशां२॥ऽअलङ्कुरु पशुनेही"ति विहरत्यग्नीदग्नीन्त्समिन्द्धऽएवैनानेतत्स्तृणाति बर्हिस्तीर्णे बर्हिषि समिद्धे देवेभ्यो जुहवानीति पुरोडाशां२॥ऽअलंकुर्वीति पुरोडाशैर्हि प्रचारिष्यन् भवति पशुनेहीति पशुꣳ ह्युपाकरिष्यन् भवति ॥११॥ अथ पुनः प्रपद्य । आश्विनं ग्रहं गृह्णात्याश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति परिवीय यूपं पशुमुपाकरोति रसमेवास्मिन्नेतद्दधाति ॥१२॥

(अर्धप्रपाठकः ७०)

स प्रातःसवनऽआलब्धः । आ तृतीयसवनाच्छृप्यमाणऽउपशेते सर्वस्मिन्नेवैतद्यज्ञे रसं दधाति सर्वं यज्ञꣳ रसेन प्रसजति ॥१३॥ तस्मादाग्नेयमग्निष्टोमऽआलभेत । तद्धि सलोम यदाग्नेयमग्निष्टोमऽआलभेत यद्युक्थ्यः स्यादैन्द्राग्नं द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि यदि षोडशी स्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोडशी यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत वाग्वै सरस्वती योषा वै वाग्योषा रात्रिस्तद्यथायथं यज्ञक्रतून् व्यावर्त्तयति ॥१४॥ अथ सवनीयैः पुरोडाशैः प्रचरति । देवो वै सोमो दिवि हि सोमो वृत्रो वै सोमऽआसीत्तस्यैतच्छरीरं यद्गिरयो यदश्मानस्तदेषोशानानामौषधिर्ज्जायतऽइति ह स्माह श्वेतकेतुरौद्दालकिस्तामेतदाहृत्याभिषुण्वन्तीति ॥१५॥ स यत्पशुमालभते । रसमेवास्मिन्नेतद्दधात्यथ यत्सवनीयैः पुरोडाशैः प्रचरति मेधमेवास्मिन्नेतद्दधाति तथो हास्यैष

१ वदति इति. च. २, ३. पुरोडाशाँ इति. च. नाऽयं प्रैषस्संहितागतः ।
४. आश्विनं. इति. च, ५. आलभेत इति. ग. ६. व्यावर्तयति इति. ग.

सोमऽएव भवति॥१६॥सर्व्वऽऐन्द्रा भवन्ति । इन्द्रो वै य्यज्ञस्य देवता तस्मात्सर्व्वऽऐन्द्रा भवन्ति ॥१७॥ अथ य्यत्पुरोडाशः । धानाः करम्भो दध्यामिक्षेति भवति या य्यज्ञस्य देवतास्ताः सुप्रीता असन्निति ॥१८॥ इदं वाऽअपूपमशित्वा कामयते । धानाः खादेयं करम्भमश्नीयां दध्यश्नीयामामिक्षामश्नीयामिति ते सर्व्वे कामा या य्यज्ञस्य देवतास्ताः सुप्रीताऽअसन्नित्यथ य्यदेषा प्रातःसवनऽएव मैत्रावरुणी पयस्यावक्लृप्ता भवति नेतरयोः सवनयोः ॥१९॥ गायत्री वै प्रातःसवनं व्वहति। त्रिष्टुम्माध्यन्दिनꣳसवनं जगती तृतीयसवनं तद्वाऽअनेकाकिन्येव त्रिष्टुम्माध्यन्दिनꣳ सवनं व्वहति गायत्र्या च बृहत्या चानेकाकिनी जगती तृतीयसवनं गायत्र्योष्णिहककुब्भ्यामनुष्टुभा ॥२०॥ गायत्र्येवैकाकिनी प्रातःसवनं व्वहति । सैताभ्यां पङ्क्तिभ्याꣳ स्तोत्रपङ्क्त्या च हविष्पङ्क्त्या च चत्वार्य्याज्यानि वहिष्पवमानं पञ्चमं पञ्चपदा[1] पङ्क्तिः सैतया स्तोत्रपङ्क्त्यानेकाकिनी गायत्री प्रातःसवनं व्वहति[2] ॥२१॥ इन्द्रस्य पुरोडाशः । हर्य्योर्द्धानाः पूष्णः करम्भः सरस्वत्यै दधि मित्रावरुणयोः पयस्या पञ्चपदा पङ्क्तिः सैतया हविष्पङ्क्त्यानेकाकिनी गायत्री प्रातःसवनं व्वहत्येतस्याऽएव पङ्क्तेः सम्पदः कामाय प्रातःसवनऽएवैषा मैत्रावरुणी पयस्यावक्लृप्ता भवति नेतरयोः सवनयोः ॥२२॥ Cf. का. श. ५. ३. १.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
द्वितीयप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. २. ५.)
(द्वितीयोऽध्यायस्समाप्तः)

४. २. ५.

(ऋतुग्रहैन्द्राग्नवैश्वदेवग्रहाः)

भक्षयित्वा समुपहूताः स्मऽइत्युक्त्वोत्तिष्ठति । पुरोडाशबृगल

---

१. पञ्चपरा इति. च. २. वहति. इति. ग.

मादाय तद्यत्रैतदुपसन्नोऽच्छावाकोऽन्वाह तदस्मै पुरोडाशबृगलं पाणावादधदाहा 'च्छावाक व्वदस्व य्यत्ते व्वाद्य'मित्यहीयत वाऽअच्छावाकः ॥१॥ तमिन्द्राग्नीऽअनुसमतनुताम् । प्रजानां प्रजात्यै तस्मादैन्द्राग्नोऽच्छावाकः स ऽएतेन च हविषा य्यदस्माऽएतत्पुरोडाशबृगलं पाणावादधात्येतेन चार्षेयेण य्यदेतदन्वाह तेनानुसमश्नुते ॥२॥ स वै सन्नेऽच्छावाके । ऋतुग्रहैश्चरति तद्यत्सन्नेऽच्छावाकऽऋतुग्रहैश्चरति मिथुनं वा अच्छावाकऽऐन्द्राग्नो ह्यच्छावाको द्वौ हीन्द्राग्नी द्वन्द्वꣳ हि मिथुनं प्रजननꣳ सऽएतस्मान्मिथुनात्प्रजननादृतून्त्संवत्सरं प्रजनयति ॥३॥ य्यद्वेव सन्नेऽच्छावाके । ऋतुग्रहैश्चरति सर्व्वं वाऽऋतवः संवत्सरः सर्वमेवैतत्प्रजनयति तस्मात्सन्नेऽच्छावाकऽऋतुग्रहैश्चरति[1] ॥४॥ तान्वै द्वादश गृह्णीयात् । द्वादश वै मासाः संवत्सरस्य तस्माद्द्वादश गृह्णीयादथोऽअपि त्रयोदश गृह्णीयादस्ति त्रयोदशो मासऽइति द्वादश त्वेव गृह्णीयादेषैव सम्पत् ॥५॥ द्रोणकलशाद्गृह्णाति । प्रजापतिर्व्वै द्रोणकलशः सऽएतस्मात्प्रजापतेर्ऋतून्त्संवत्सरं प्रजनयति ॥६॥ उभयतोमुखाभ्यां पात्राभ्यां गृह्णाति । कुतस्तयोरन्तो य्येऽउभयतोमुखे तस्मादयमनन्तः संवत्सरः[2] परिप्लवते तं गृहीत्वा न सादयति तस्मादयमसन्नः संवत्सरः ॥७॥ नानुवाक्यामन्वाह । ह्वयति वाऽ[3]अनुवाक्ययागतो ह्येवायमृतुर्यदि दिवा य्यदि नक्तं नानुवषट्करोति नेदृतूनपवृणजाऽइति सहैव प्रथमौ ग्रहौ गृह्णीतः सहोत्तमाविदमेवैतत्सर्व्वꣳ संवत्सरेण परिगृह्णीतस्तदिदꣳ सर्व्वं संवत्सरेण परिगृहीतम् ॥८॥ निरेवान्यतरः क्रामति । प्रान्यतरः पद्यते तस्मादिमेऽन्वञ्चो मासा य्यन्त्यथ य्यदुभौ वा सह निष्क्रामेतामुभौ वा सह प्रपद्येयातां पृथगुहैवेमे मासाऽईयुस्तस्मान्निरेवान्यतरः क्रामति प्रान्यतरः पद्यते ॥९॥ तौ वाऽऋतुनेति षट्प्रचरतः[4]।

---

१. चरति. इति ग. २. संवत्सर इति. ग. ३. वा इति. ग.

४. प्रचरतः इति. च.

तद्देवाऽअहरसृजन्तर्तुभिरिति चतुस्तद्रात्रिमसृजन्त स य्यद्धैतावदेवाभविष्यद्रात्रिर्हैवाभविष्यन्न व्यवस्यत्[1] ॥१०॥ तौ[2] वाऽऋतुनेत्युपरिष्टाद्द्विश्चरतः । तद्देवाः परस्तादहरदधुस्तस्मादिदमद्याहरथ रात्रिरथ श्वोऽहर्भविता ॥११॥ ऋतुनेति वै देवाः । मनुष्यानसृजन्तर्तुभिरिति पशून्त्स य्यत्तन्मध्ये य्येन पशूनसृजन्त तस्मादिमे पशवऽउभयतः परिगृहीता व्वशमुपेता मनुष्याणाम् ॥१२॥ तौ वाऽऋतुनेति षट्प्रचर्य । इतरथा पात्रे व्विपर्यस्येतेऽऋतुभिरिति चतुश्चरित्वेतरथा पात्रे व्विपर्यस्येतेऽअन्यतरतऽएव तद्देवाऽअहरसृजन्तान्यतरतो रात्रिमन्यतरतऽएव तद्देवा मनुष्यानसृजन्तान्यतरतः पशून् ॥१३॥ अथातो गृह्णात्येव । "उपयामगृहीतोऽसि मधवे त्वे"त्येवाध्वर्युर्गृह्णा-"त्युपयामगृहीतोऽसि माधवाय त्वे"ति प्रतिप्रस्थातैतावेव व्वासन्तिकौ स यद्वसन्तऽओषधयो जायन्ते व्वनस्पतयः पच्यन्ते तेनो हैतौ मधुश्च माधवश्च ॥१४॥ "उपयामगृहीतोऽसि । शुक्राय त्वे"त्येवाध्वर्युर्गृह्णा"त्युपयामगृहीतोऽसि शुचये त्वे"ति प्रतिप्रस्थातैतावेव ग्रैष्मौ स य्यदेतयोर्बलिष्ठं तपति तेनो हैतौ शुक्रश्च शुचिश्च ॥१५॥ "उपयामगृहीतोऽसि । नभसे त्वे"त्येवाध्वर्य्युर्गृह्णा"त्युपयामगृहीतोऽसि नभस्याय[10] त्वे"ति प्रतिप्रस्थातैतावेव व्वार्षिकावमुतो वै दिवो व्वर्षति तेनो हैतौ नभश्च नभस्यश्च ॥१६॥ "उपयामगृहीतोऽसि[11] । इषे त्वे"त्येवाध्वर्युर्गृह्णात्यु"पयामगृहीतोऽस्यूर्जे[12] त्वे"ति प्रतिप्रस्थातैतावेव शारदौ स य्यच्छरद्यूर्ग्रसऽओषधयः पच्यन्ते तेनो हैताविषश्चोर्ज्जश्च[13] ॥१७॥ "उपयामगृहीतोऽसि[14] । सहसे त्वे"त्येवाध्वर्युर्गृह्णा"त्युपयामगृहीतोऽसि सहस्याय[15] त्वे"ति प्रतिप्रस्थातैतावेव हैमन्तिकौ स य्यद्धेमन्तऽइमाः प्रजाः सहसेव स्वं व्वश-

---

१. व्यवत्स्यत् इति. च. २. तौ वा इति. ग. ३. अददुरिति. ग.
४-९. मा. सं. ७. ३०. १०. नभस्यायेति. ग. क. ११, १२. मा. सं. ७. ३०
१३. हैताविषश्चेति ग. १४, १५. मा. सं. ७. ३०

मुपनयते तेनो हैतौ सहश्च सहस्यश्च ॥१८॥ "उपयामगृहीतोऽसि । तपसे त्वे"त्येवाध्वर्युर्गृह्णात्यु"पयामगृहीतोऽसि तपस्याय त्वे"ति प्रतिप्रस्थातैतावेव शैशिरौ स य्यदेतयोर्बलिष्ठꣳ श्यायति तेनो हैतौ तपश्च तपस्यश्च ॥१९॥ "उपयामगृहीतोऽसि । अꣳहसस्पतये त्वे"ति त्रयोदशं ग्रहं गृह्णाति य्यदि त्रयोदशं गृह्णीयादथ प्रतिप्रस्थाताध्वर्य्योः पात्रे सꣳस्रवमवनयत्यध्वर्युर्वा प्रतिप्रस्थातुः पात्रे सꣳस्रवमवनयत्याहरति भक्षम्॥२०॥ अथ प्रतिप्रस्थाता भाक्षितेन पात्रेण । ऐन्द्राग्नं ग्रहं गृह्णाति तद्यदभाक्षितेन पात्रेणैन्द्राग्नं ग्रहं गृह्णाति । न वाऽऋतुग्रहाणामनुवषट्कुर्वन्त्येतेभ्यो वाऽऐन्द्राग्नं ग्रहं ग्रहीष्यन् भवति तदस्यैन्द्राग्नेनैवानुवषट्कृता भवन्ति॥२१॥ य्यद्वेवैन्द्राग्नं ग्रहं गृह्णाति । सर्व्वं वाऽइदं प्राजीजनद्यऽऋतुग्रहानग्रहीत्सऽइदꣳ सर्व्वं प्रजनय्येदमेवैतत्सर्वं प्राणोदानयोः प्रतिष्ठापयति तदिदꣳ सर्वं प्राणोदानयोः प्रतिष्ठितमिन्द्राग्नी हि प्राणोदानाविमे हि द्यावापृथिवी प्राणोदानावनयोर्हीदꣳसर्व्वं प्रतिष्ठितम्॥२२॥य्यद्वेवैन्द्राग्नं ग्रहं गृह्णाति । सर्व्वं वाऽइदं प्राजीजनद्यऽऋतुग्रहानग्रहीत्सऽइदꣳ सर्व्वं प्रजनय्यास्मिन्नेवैतत्सर्व्वस्मिन् प्राणोदानौ दधाति ताविमावस्मिन्त्सर्वस्मिन् प्राणोदानौ हि तौ ॥२३॥ अथातो गृह्णात्येव । "इन्द्राग्नीऽआगतꣳसुतं गीर्भिर्न्नभो व्वरेण्यम् । अस्य पातं धियेषिता । उपयामगृहीतोसीन्द्राग्निभ्यां त्वैष ते य्योनिरिन्द्राग्निभ्यां त्वे"ति सादयतीन्द्राग्निभ्याꣳ ह्येनं गृह्णाति ॥२४॥ अथ व्वैश्वदेवं ग्रहं गृह्णाति । सर्व्वं वाऽहदं प्राजीजनद्य ऽऋतुग्रहानग्रहीत्स य्यद्वैतावदेवाभविष्यद्यावत्यो हैवाग्रे प्रजाः सृष्टास्तावत्यो हैवाभाविष्यन्न प्राजनिष्यन्त ॥२५॥ अथ य्यद्वैश्वदेवं ग्रहं गृह्णाति । इदमेवैतत्सर्व्वमिमाः प्रजा यथायथं व्यवसृजति तस्मादिमाः प्रजाः पुनरभ्यावर्त्ते प्रजायन्ते शुक्रपात्रेण गृह्णात्येष वै शुक्रो य्यऽएष

१-३. मा. सं. ७. ३०. ४. तौ इति. च. ५. मा. सं. ७. ३१

६. नभः इति. च. ७. प्राजनिष्यन्त इति ग. ८. प्रजा इति. ग.

तपति तस्य ये रश्मयस्ते विश्वेदेवास्तस्माच्छुक्रपात्रेण गृह्णाति॥२६॥ अथातो गृह्णात्येव । "ओमासश्चर्षणीधृतो विश्वे देवासऽआगत । दाश्वाꣳसो दाशुषः सुतम्[1] । उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य ऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य"ऽइति सादयति विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति ॥२७॥ Cf. का. श. ५. ३. २; तै. ६. ५. ४; मै. सं. ४. ६. ७, ८; कठ. २८. २; कपि. ४४. २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
द्वितीयप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ३. १.)

(शस्त्रप्रतिगरः)

४. २. ६.

गृणाति ह वाऽएतद्धोता यच्छꣳसति । तस्माऽएतद्गृणते प्रत्येवाध्वर्युरागृणाति तस्मात्प्रतिगरो नाम ॥१॥ तं वै प्राञ्चमासीनमाह्वयते[3] । सर्वे वाऽअन्यऽउद्गातुः प्राञ्च ऽआर्त्विज्यं कुर्वन्ति तथो हास्यैतत्प्रागेवार्त्विज्यं कृतं भवति॥२॥ प्रजापतिर्वाऽउद्गाता । यो[4]षग्घोता सऽएतत्प्रजापतिरुद्गाता यो[4]षायामृचि होतरि रेतः सिञ्चति यत्स्तुते तद्धोता शस्त्रेण प्रजनयति तच्छ्यति यथायं पुरुषः शितस्तद्यदेनच्छयति तस्माच्छस्त्रं नाम ॥३॥ तदुपपल्ययप्रतिगृणाति । इदमेवैतद्रेतः सिक्तमुपनिमदत्यथ यत्पराङ् तिष्ठन् प्रतिगृणीयात्परागु हैवैतद्रेतः सिक्तं प्रणश्येत्तन्न[5] प्रजायेत सम्यञ्चा ऽउचैवैतद्भूत्वैतद्रेतः सिक्तं प्रजनयतः ॥४॥ यातयामानि वै देवैश्छन्दाꣳसि । छन्दोभिर्हि देवाः स्वर्गं लोकꣳसमाश्नुवत[6] मदो वै प्रतिगरो यो वाऽऋचि मदो यः सामनसो वै स तच्छन्दः स्वेवैतद्रसं दधात्ययातयामानि करोति तैरयातयामैर्यज्ञं तन्वते ॥५॥ तस्माद्यद्यर्द्धर्च्चशः शꣳसेत् । अर्द्धर्च्चेऽर्द्धर्च्चे प्रतिगृणीयाद्यदि पच्छःशꣳसेत्पदे पदे प्रतिगृणीया-

१. मा. सं. ७. ३३. २. दाशुष इति. ग. ३. मासीनमिति. ग.
४. योषग्घोता इति. क. ५. तन्न इति. च. ६. समाश्नुवत इति. ग.

यत्र वै शꣳसन्नवानिति तदसुररक्षसानि य्यज्ञमन्वचरन्ति तत्प्रतिगरेण संदधाति नाष्ट्राणाꣳरक्षसामनन्ववचाराय य्यजमानस्यौचैवैतद्भ्रातृव्यलोकं छिनत्ति ॥६॥ चतुरक्षराणि ह वाऽअग्रे छन्दाꣳस्यासुः । ततो जगती सोममच्छापतत्सा त्रीण्यक्षराणि हित्वाजगाम ततस्त्रिष्टुप्सोममच्छापतत्सैकमक्षरꣳहित्वाजगाम ततो गायत्री सोममच्छापतत्सैतानि चाक्षराणि हरन्त्यागच्छत्सोमं च ततोऽष्टाक्षरा गायत्र्यभवत्तस्मादाहुरष्टाक्षरा गायत्रीति ॥७॥ तया प्रातःसवनमतन्वत । तस्माद्गायत्रं प्रातःसवनं तयैव माध्यन्दिनꣳसवनमतन्वत ताꣳह त्रिष्टुबुवाचोप त्वाहमायानि त्रिभिरक्षरैरुप मा ह्वयस्व मा मा य्यज्ञादन्तर्गा ऽइति तथेति तामुपाह्वयत ततऽएकादशाक्षरा त्रिष्टुब्भवत्तस्मादाहुस्त्रैष्टुभं माध्यन्दिनꣳसवनमिति ॥८॥ तयैव तृतीयं सवनमतन्वत । ताꣳ ह जगत्युवाचोप त्वाहमायान्येकेनाक्षरेणोप मा ह्वयस्व मा मा य्यज्ञादन्तर्गाऽइति तथेति तामुपाह्वयत ततो द्वादशाक्षरा जगत्यभवत्तस्मादाहुर्ज्जागतं तृतीयसवनमिति ॥९॥ तदाहुः । गायत्राणि वै सर्व्वाणि सवनानि गायत्री ह्येवैतदुपसृजमानैदिति[1] तस्मात्सꣳ सिद्धं प्रातःसवनं प्रतिगृणीयात्सꣳ सिद्धा हि गायत्र्यागच्छत्सकृत्मद्वन्माध्यन्दिने सवनऽएकꣳ हि साक्षरꣳ हित्वागच्छत्तेनैवैनामेतत्समर्द्धयति कृत्स्नां करोति ॥ १०॥ य्यत्र त्रिष्टुभः शस्यन्ते । त्रिमद्वत्तृतीयसवने[2] त्रीणि हि साक्षराणि हित्वागच्छत्तैरेवैनामेतत्समर्द्धयति कृत्स्नां करोति ॥११॥ (शतम् २५००) य्यत्र द्यावापृथिव्यꣳ शस्यते । इमे ह वै द्यावापृथिवीऽइमाः प्रजाऽउपजीवन्ति तदनयोरेवैतद्द्यावापृथिव्यो रसं दधाति ते रसवत्याऽउपजीवनीयेऽइमाः प्रजाऽउपजीवन्ति स वाऽओ३मित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवा व्विदुः ॥१२॥ तद्धैके । ओथामो दैव व्वागिति प्रतिगृणन्ति व्वाक्प्रतिगरऽएतद्वाचमुपाप्नुमऽइति व्वदन्तस्तदु तथा न

---

१. मानैदिति. च. २. सवने इति. ग, तृतीयसवने इति. च.

कुर्य्याद्यथा वै कथा च प्रतिगृणात्युपाप्तैवास्य व्वाग्भवति व्वाचा हि प्रतिगृणाति तस्मादो ३मित्येव प्रतिगृणीयात्तद्धि सत्यं तद्देवा व्विदुः ॥१३॥ Cf. का. श. ५. ३. ३; तै. सं. ३. २ ९;

इति माध्यन्दिनीये शतपथब्राह्मणे चतुर्थकाण्डे
द्वितीयप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ. ३. २.)

४. २. ७.

(माध्यन्दिनसवम् , मरुत्वतीयमाहेन्द्रग्रहाः)

इहा ३ ऽ इहा ३ ऽ इत्यभिषुणोति। इन्द्रमेवैतदाच्यावयति बृहद्बृहदितीन्द्रमेवैतदाच्यावयति ॥१॥ स शुक्रामन्थिनौ प्रथमौ गृह्णाति। शुक्रवद्ध्येतत्सवनमथाग्रयणꣳ सर्व्वेषु ह्येष सवनेषु गृह्यतेऽथ मरुत्वतीयमथोक्थ्यमुक्थानि ह्यत्रापि भवन्ति ॥२॥ तद्धैके। उक्थ्यं गृहीत्वाथ मरुत्वतीयं गृह्णन्ति तदु तथा न कुर्यान्मरुत्वतीयमेव गृहीत्वाथोक्थ्यं गृह्णीयात् ॥३॥ तान्वाऽएतान्। पञ्च ग्रहान् गृह्णात्येष वै व्वज्रो य्यन्माध्यन्दिनः पवमानस्तस्मात्पञ्चदशः पञ्चसामा भवति पञ्चदशो हि व्वज्रः स ऽएतैः पञ्चभिर्ग्रहैः पञ्च वाऽइमाऽअङ्गुलयोऽङ्गुलिभिर्व्वै प्रहरति ॥४॥ इन्द्रो व्वृत्राय व्वज्रं प्रजहार[3]। स व्वृत्रं पाप्मानꣳ हत्वा व्विजितेऽभयेऽनाष्ट्रे दक्षिणां[4] निनाय तस्मादप्येतर्हि य्यदैवैतेन माध्यन्दिनेन पवमानेन स्तुवतेऽथ व्विजितेऽभयेऽनाष्ट्रे दक्षिणा नीयन्ते तथोऽएवैष ऽएतैः पञ्चभिर्ग्रहैः पाप्मने द्विषते भ्रातृव्याय व्वज्रं प्रहरति स व्वृत्रं पाप्मानꣳ हत्वा व्विजितेऽभयेऽनाष्ट्रे दक्षिणा नयति तस्माद्वाऽएतान् पञ्च ग्रहान् गृह्णाति ॥५॥ तद्यन्मरुत्वतीयान् गृह्णाति। एतद्वा[5] ऽइन्द्रस्य निष्केवल्यꣳसवनं य्यन्माध्यन्दिनꣳसवनं तेन व्वृत्रमजिघाꣳ

१. अभिषुणोति इति. च.

२. 'उक्थं गृहीत्वा मरुत्वतीयौ' इत्यापस्तम्बः (आ. प. श्रौ. १३. २. ३.)

३. प्रजहार इति. ग. ४. दक्षिणा इति ग. ५. एतद्वा इति. ग.

सत्तेन व्यजिगीषत मरुतो वाऽइत्यश्वत्थेऽपक्रम्य तस्थुः क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान् भवति तस्मादाश्वत्थेऽऋतुपात्रे स्यातां कार्ष्मर्यमये त्वेव भवतः ॥६॥ तानिन्द्रऽउपमन्त्रयांचक्रे । उप मा वर्त्तध्वं युष्माभिर्बलेन वृत्रं[1] हनानीति ते होचुः किं नस्ततः स्यादिति तेभ्यऽएतौ मरुत्वतीयौ ग्रहावगृह्णात् ॥७॥ ते होचुः । अपनिधायैनमोजऽउपावर्त्तामहाऽइति तऽएनमपनिधायैवौजऽउपाववृतुस्तद्वाऽइन्द्रोऽस्पृणुतापनिधाय वै मौजऽउपावृतन्निति ॥८॥ स होवाच । सहैव मौजसोपावर्त्तध्वमिति तेभ्यो वै नस्तृतीयं ग्रहं गृहाणेति तेभ्यऽएतं तृतीयं ग्रहमगृह्णादु"पयामगृहीतोऽसि मरुतां त्वौजस"ऽइति तऽएनꣳ सहैवौजसोपावर्त्तन्त तैर्व्यजयत तैर्वृत्रमहन्क्षत्रं वाऽइन्द्रो विशो मरुतो विशा वै क्षत्रियो बलवान् भवति तत्क्षत्रऽएवैतद्बलं दधाति तस्मान्मरुत्वतीयान् गृह्णाति ॥९॥ स वाऽइन्द्रायैव मरुत्वते गृह्णीयात् । नापि मरुद्भ्यः स यद्धापि मरुद्भ्यो गृह्णीयात्प्रत्युद्यामिनीꣳ ह क्षत्राय विशं कुर्यादथैतदिन्द्रमेवानु मरुतऽआभजति तत्क्षत्रायैवैतद्विशं कृतानुकरामनुवर्त्मानं करोति तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भ्यः ॥१०॥ अपक्रमादु हैवैषामेतद्बिभयांचकार । य्यदिमे मन्नापक्रामेयुर्यन्नान्यद्भियेरन्निति तानेवैतदनपक्रमिणोऽकुरुत तस्मादिन्द्रायैव मरुत्वते गृह्णीयान्नापि मरुद्भ्यः ॥११॥ ऋतुपात्राभ्यां गृह्णाति । ऋतवो वै संवत्सरो य्यज्ञस्तेऽदः प्रातःसवने प्रत्यक्षमवकल्प्यन्ते य्यदृतुग्रहान् गृह्णात्यथैतत्परोक्षं माध्यन्दिने सवनेऽवकल्प्यन्ते य्यदृतुपात्राभ्यां मरुत्वतीयान् गृह्णाति विशो वै मरुतोऽन्नं वै विशऽऋतवो वाऽइदꣳसर्व्वमन्नाद्यं पचन्ति तस्मादृतुपात्राभ्यां मरुत्वतीयान् गृह्णाति ॥१२॥ अथातो गृह्णात्येव । "इन्द्र मरुत्वऽइह पाहि सोमं य्यथा शार्यातेऽअपिबः सुतस्य । तव प्रणीती तव

---

१. वृत्रꣳ इति, च. २. मा. सं. ७. ३५, ३६.

शूर शर्मन्नाविवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥१३॥ मरुत्वन्तं वृषभम् । वावृधानमकवारिं दिव्यꣳ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम । उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत ऽएष ते योनिरिन्द्राय त्वा मरुत्वते । उभयामगृहीतोऽसि मरुतां त्वौजस"ऽइति तृतीयं ग्रहं गृह्णाति[1] ॥१४॥ अथ माहेन्द्रं ग्रहं गृह्णाति । पाप्मना वाऽएतदिन्द्रः सꣳसृष्टोऽभूद्यद्विशा मरुद्भिः स यथा विजयस्य कामाय विशा समाने पात्रेऽश्नीयादेवं तद्यदस्माऽएतं मरुद्भिः समानं ग्रहमगृह्णन् ॥१५॥ तं देवाः । सर्वस्मिन्विजितेऽभयेऽनाष्ट्रे यथेषीकां मुञ्चाद्विवृहेदेवꣳसर्वस्मात्पाप्मनो व्यवृहन्यन्माहेन्द्रं ग्रहमगृह्णंस्तथोऽएवैषऽएतद्यथेषीका विमुञ्चा स्यादेवꣳसर्व्वस्मात्पाप्मनो निर्मुच्यते यन्माहेन्द्रं ग्रहं गृह्णाति ॥१६॥ यद्वेव माहेन्द्रं ग्रहं गृह्णाति । इन्द्रो वाऽएष पुरा वृत्रस्य वधादथ वृत्रꣳ हत्वा यथा महाराजो विजिग्यानऽएवं महेन्द्रोऽभवत्तस्मान्माहेन्द्रं ग्रहं गृह्णाति महान्तमु चैवैनमेतत्खलु करोति वृत्रस्य वधाय तस्माद्वेव माहेन्द्रं ग्रहं गृह्णाति शुक्रपात्रेण गृह्णात्येष वै शुक्रो यऽएष तपत्येषऽउऽएव महांस्तस्माच्छुक्रपात्रेण गृह्णाति ॥१७॥ अथातो गृह्णात्येव । "महां २॥ ऽइन्द्रो नृवदा चर्षणिप्राऽउत द्विबर्हाऽअमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् । उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वे"ति सादयति महेन्द्राय ह्येनं गृह्णाति[3] ॥१८॥ अथोपाकृत्यैतां वाचं वदति । "अभिषोतारोऽभिषुणुतौलूखलानुद्वादयताग्नीदाशिरं विनय सौम्यस्य वित्ता"दिति ते वै तृतीयसवनायैवाभिषोतारोऽभिषुण्वन्ति तृतीयसवनायौलूखलानुद्वादयन्ति तृतीयसवनायाग्नीदाशिरं विनयति तृतीयसवनाय सौम्यं

१. गृह्णाति इति. ग. २. मा. सं. ७. ३९. ३. गृह्णाति इति. क.

चरुꣳ श्रपयत्येते वै शुक्रवती रसवती सवने यत्प्रातःसवनं च माध्यन्दिनं च सवनमथैतन्निर्द्धीतशुक्रं यत्तृतीयसवनं तदेवैतस्मान्माध्यन्दिनात्सवनान्निर्मिमीते तथो हास्यैतच्छुक्रवद्रसवत्तृतीयसवनं भवति तस्मादेतामत्र व्वाचं व्वदति ॥१९॥ Cf. का. श. ५. ३. ४; तै. सं. ६.५.५; मै. सं. ४.६.८; कठ. २८. २,३; कपि.४४.२,३.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे द्वितीयप्रपाठके सप्तमं ब्राह्मणम् ॥ (अ. ३. ३.)

द्वितीयः प्रपाठकस्समाप्तः ॥

(काण्डिकासंख्या १३९)

४. ३. १.

(दाक्षिणहोमो दक्षिणादानं च)

घ्नन्ति वाऽएतद्यज्ञम् । यदेनं तन्वते यन्त्वेव राजानमभिषुण्वन्ति तत्तं घ्नन्ति यत्पशुꣳ संज्ञपयन्ति व्विशासति तत्तं घ्नन्त्युलूखलमुसलाभ्यां दृषदुपलाभ्याꣳ हविर्यज्ञं घ्नन्ति ॥ १ ॥ सऽएष यज्ञो हतो न ददक्षे । तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदेवास्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्धऽएव यज्ञो भवति तस्माद्दक्षिणा ददाति[1] ॥ २ ॥ तद्वै षड्द्वादशेत्येव हविर्यज्ञे ददति । न ह त्वेवाशतदक्षिणः सौम्योऽध्वरः स्यादेष वै प्रत्यक्षं यज्ञो यत्प्रजापतिः पुरुषो वै प्रजापतेर्नेदिष्ठꣳसोऽयꣳ शतायुः शततेजाः शतवीर्यस्तꣳशतेनैव दक्षयति नाशतेन तस्मान्नाशतदक्षिणः सौम्योऽध्वरः स्यान्नो हैवाशतदक्षिणेन यजमानस्यर्त्विक्स्यान्नेदस्याक्षिभूरसानि यमिमे हनिष्यन्त्येव न दक्षयिष्यन्तीति ॥३॥ द्वेया[2] वै देवाः । अहैव देवाऽअथ ये ब्राह्मणाः शुश्रुवाꣳसोऽनूचानास्ते मनुष्यदेवास्तेषां द्वेधा[3]

१. ददाति. इति. ग. २. द्वया वै देवा देवाः इति. च. ३. द्वेधा इति. क.

विभक्तऽएव य्यज्ञ ऽआहुतयऽएव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानाँ[1] श्रुश्रुवुषामनूचानानामाहुतिभिरेव देवान् प्रीणाति दक्षिणाभिर्मनुष्यदेवान् ब्राह्मणाञ्छुश्रुवुषोऽनूचानांस्तऽएनमुभये देवाः प्रीताः स्वर्गं लोकमभिवहन्ति ॥४॥ ता वाऽएताः। ऋत्विजामेव दक्षिणा ऽअन्यं वाऽएतऽएतस्यात्मानँ[2] संस्कुर्वन्त्येतं य्यज्ञमृङ्मयं य्यजुर्मयँ सामयमाहुतिमयँ सोऽस्यामुष्मिँल्लोकऽआत्मा भवति तद्ये माजीजनन्तेति तस्माद्दत्विग्भ्यऽएव दक्षिणा दद्यान्नानृत्विग्भ्यः[3] ॥५॥ अथ प्रतिपरेत्य गार्हपत्यम्। दाक्षिणानि जुहोति स दशाहोमीये व्वासासि हिरण्यं प्रबध्यावधाय जुहोति देवलोके मे ऽप्यसदिति वै य्यजते यो य्यजते सोऽस्यैष य्यज्ञो देवलोकमेवाभिप्रैति तदनूची दक्षिणा यां ददाति सैति दक्षिणामन्वारभ्य य्यजमानः ॥६॥ चतस्रो वै दक्षिणाः। हिरण्यं गौर्व्वासोऽश्वो न वै तदवकल्पते य्यदश्वस्य पादमवदध्याद्यद्वा गोः पादमवदध्यात्तस्माद्दशाहोमीये व्वासासि हिरण्यं प्रबध्यावधाय जुहोति ॥७॥ सौरीभ्यामृग्भ्यां जुहोति[4]। तमसा वाऽअसौ लोकोऽन्तर्हितः सऽएतेन ज्योतिषा तमोऽपहत्य स्वर्गं लोकमुपसंक्रामति तस्मात्सौरीभ्यामृग्भ्यां जुहोति ॥८॥ स जुहोति[5]। "उदुत्यं जातवेदसं देवं व्वहन्ति केतवः। दृशे व्विश्वाय सूर्यँ स्वाहे"त्येतया गायत्र्या गायत्री वाऽइयं पृथिवी सेयं प्रतिष्ठा तदस्यामेवैतत्प्रतिष्ठायां प्रतितिष्ठति[7] ॥९॥ अथ द्वितीयां जुहोति। "चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य व्वरुणस्याग्नेः। आप्रा द्यावापृथिवीऽअन्तरिक्षँ सूर्यऽआत्मा जगतस्तस्थुषश्च स्वाहे"त्येतया त्रिष्टुभा लोकमेवैतयोपैप्रैति[9] ॥१०॥ अथाग्नीध्रे। [10]द्वे वैकां वा जुहोति तद्यदग्नावाग्नीध्रे द्वे वैकां

---

१. ब्राह्मणानामिति. ग. २. एतस्य इति. ग. ३. ऋत्विग्भ्य इति. च.
४. जुहोति इति. ग. ५. जुहोति इति. च. ६. मा. सं. ७. ४१.
७. प्रतितिष्ठति इति. च. ८. मा. सं. ७. ४२. ९. उपप्रैति इति.ग, च.
१०. द्वे इति. ग.

वा जुहोत्यग्निर्व्वै पशूनामीष्टे तऽएनमभितः परिणिविशन्ते तमेतयाहुत्या प्रीणाति सोऽस्मै प्रीतोऽनुमन्यते तेनानुमतां ददाति ॥११॥ स जुहोति[1]। "अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव व्वयुनानि व्विद्वान्[3]। य्युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमऽउक्तिं व्विधेमस्वाहे"त्यथ य्यद्यश्वं य्युक्तं वायुक्तं वा दास्यन्त्स्यादथ द्वितीयां जुहुयाद्यद्य न नाद्रियेत ॥१२॥ स जुहोति "अयं[4] नोऽअग्निर्व्वरिवस्कृणोत्वयं मृधः पुरऽएतु प्रभिन्दन्[5]। अयं व्वाजान् जयतु[6] व्वाजसातावयꣳ शत्रून्जयतु जर्हृषाणः स्वाहे"ति व्वाजसा ह्यश्वः[7] ॥१३॥ अथ हिरण्यमादाय शालामभ्येति। दक्षिणेन व्वेदिं दक्षिणा ऽउपतिष्ठन्ते सोऽग्रेण शालां तिष्ठन्नभिमन्त्रयते "रूपेण वो रूपमभ्यागा"मिति न ह वाऽअग्रे पशवो दानाय चक्षमिरे तेऽपनिधाय स्वानि रूपाणि शरीरैः प्रत्युपातिष्ठन्त तानेतद्देवाः स्वैरेव रूपैर्यज्ञस्यार्द्धादुपायंस्ते स्वानि रूपाणि जानाना[9] अभ्यवायंस्ते रातमनसोऽलं दानायाभवंस्तथोऽएवैनानेष एतत्स्वैरेव रूपैर्यज्ञस्यार्द्धादुपैति ते स्वानि रूपाणि जानानाऽअभ्यवयन्ति ते रातमनसोऽलं दानाय भवन्ति ॥१४॥ "तुथो[10] वो व्विश्ववेदा व्विभजत्वि"ति। ब्रह्म वै तुथस्तदेना ब्रह्मणा व्विभजति ब्रह्म वै दक्षिणीयं चादक्षिणीयं च व्वेद तथो हास्यैता दक्षिणीयायैव दत्ता[11] भवन्ति नादक्षिणीयाय ॥१५॥ "ऋतस्य[12] पथा प्रेते"ति। य्यो वै देवानां पथैति स ऽऋतस्य पथैति "चन्द्रदक्षिणा[13]"ऽइति तदेतेन ज्योतिषा यन्ति ॥१६॥ अथ सदोऽभ्येति "व्वि स्वः पश्य व्यन्तरिक्ष"मिति व्वि त्वया दक्षिणया लोकं ख्येषमित्येवैतदाह ॥१७॥ अथ सदः प्रेक्षते। "य्यतस्व सदस्यै[16]"रिति मा त्वा सदस्याऽअतिरिक्षतेत्येवै-

---

१. जुहोति इति च २. मा. सं. ७. ४३ ३. विद्वान् इति. ग.
४. मा. सं. ७. ४४. ५. प्रभिन्दन् इति ग. ६. जयतु इति. च.
७. ह्यश्व इति. च. ८,१०. मा. सं. ७. ४५. ९. जानाना इति च.
११. दत्ता भवन्ति इति. ग. १२-१५. मा. सं. ७. ४५. १६. सदस्यैरिति. च.

तदाह ॥१८॥ अथ हिरण्यमादायाग्नीध्रमभ्यैति । "ब्राह्मणमद्य विदेयं पितृमन्तं पैतृमत्य"मिति य्यो वै ज्ञातो ज्ञातकुलीनः स पितृमान् पैतृमत्यो य्या वै ज्ञातायापि कतिपयीर्दक्षिणा ददाति ताभिर्महज्जय"त्यृषिमार्षेय"मिति य्यो वै ज्ञातोऽनूचानः सऽऋषिरार्षेयः "सुधातुदक्षिणमि"ति स हि सुधातुदक्षिणः ॥१९॥ अथैवमुपसद्य । अग्नीधे हिरण्यं ददात्य "स्मद्राता देवत्रा गच्छते"ति य्यां वै रातमना ऽअविचिकित्सन्दक्षिणां ददाति तया महज्जयति देवत्रा गच्छतेति देवलोके मेऽप्यसदिति वै य्यजते य्यो य्यजते तद्देवलोकऽएवैनमेतदपित्विनं करोति "प्रदातारमाविशते"ति मामाविशतेत्येवैतदाह तथो हास्मादेताः पराच्यो न प्रणश्यन्ति तद्यदग्नीधे प्रथमाय दक्षिणां ददात्यतो हि विश्वे देवा ऽअमृतत्वमपाजयंस्तस्मादग्नीधे प्रथमाय दक्षिणां ददाति ॥२०॥ अथैवमेवोपसद्य । आत्रेयाय हिरण्यं ददाति य्यत्र वाऽअदः प्रातरनुवाकमन्वाहुस्तद्ध स्मैतत्पुरा शꣳसन्त्यत्रिर्वाऽऋषीणाꣳ होतासाथैतत्सदोऽसुरतमसमभिपुप्रुवेतऽऋषयोऽत्रिमब्रुवन्नेहि प्रत्यङ्ङिदं तमोऽपजहीति स ऽएतत्तमोऽपाहन्नयं वै ज्योतिर्यऽइदं तमोऽपावधीदिति तस्मादेतज्ज्योतिर्हिरण्यं दक्षिणामनयज्ज्योतिर्हि हिरण्यं तद्वै स तत्तेजसा व्वीर्येणर्षिस्तमोऽपजघानाथैषऽएतेनैवैतज्ज्योतिषा तमोऽपहन्ति तस्मादात्रेयाय हिरण्यं ददाति ॥२१॥ अथ ब्रह्मणे । ब्रह्मा हि य्यज्ञं दक्षिणतोऽभिगोपायत्यथोद्गात्रेऽथ होत्रेऽथाध्वर्युभ्याꣳ हविर्द्धानऽआसीनाभ्यामथ पुनरेत्य प्रस्तोत्रेऽथ मैत्रावरुणायाथ ब्राह्मणाच्छꣳसिनेऽथ पोत्रेऽथ नेष्ट्रेऽथाच्छावाकायाथोन्नेत्रेऽथ ग्रावस्तुतेऽथ सुब्रह्मण्यायै प्रतिहर्त्रेऽउत्तमाय ददाति प्रतिहर्त्ता वाऽएष सोऽस्माऽएतदन्ततः प्रतिहरति तथो हास्मादेताः पराच्यो न प्रणश्यन्ति ॥२२॥ अथाहे"न्द्राय मरुत्वते-

१-३ मा. सं. ७. ४६. ४. दक्षिणः इति. च. ५,६. मा.सं.७.४६
७. प्रणश्यन्ति इति. च.

नुब्रूहि"ति । य्यत्र वै प्रजापतिरग्रे ददौ तद्धेन्द्रऽईक्षांचक्रे सर्व्वं वाऽअयमिदं दास्यति नास्मभ्यं किं चन परिशेक्ष्यतीति सऽएतं व्वज्रमुदयच्छदिन्द्राय मरुत्वते ऽनुब्रूहीत्यदानाय ततो नाददात्सऽएषोऽप्येतर्हि तथैव व्वज्रऽउद्यम्यत 'इन्द्राय मरुत्वतेऽनुब्रूही'त्यदानाय ततो न ददाति ॥ २३ ॥ चतस्रो वै दक्षिणाः । हिरण्यमायुरेवैतेनात्मनस्त्रायतऽआयुर्हि हिरण्यं तदग्नयऽआग्नीध्रं कुर्व्वतेऽददात्तस्मादप्येतर्ह्यग्नीधे हिरण्यं दीयते ॥२४॥ अथ गौः । प्राणमेवैतयात्मनस्त्रायते प्राणो हि गौरन्नꣳ हि गौरन्नꣳ हि प्राणस्ताꣳ रुद्राय होत्रेऽददात् ॥२५॥ अथ व्वासः त्वचमेवैतेनात्मनस्त्रायते त्वग्धि व्वासस्तद्बृहस्पतयऽउद्गायतेऽददात् ॥२६॥ अथाश्वः । व्वज्रो वाऽअश्वो व्वज्रमेवैतत्पुरोगां कुरुते य्यमलोके मेऽप्यसदिति वै य्यजते य्यो य्यजते तद्यमलोकऽएवैनमेतदपित्विनं करोति तं यमाय ब्रह्मणेऽददात् ॥२७॥ स हिरण्यं प्रत्येति । "अग्नये त्वा मह्यं व्वरुणो ददा"त्वित्यग्नये ह्येतद्वरुणोऽददा"त्सोऽमृतत्वमशीयायुर्द्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्र"ऽइति ॥२८॥ अथ गां प्रत्येति । "रुद्राय त्वा मह्यं व्वरुणो ददा"त्विति रुद्राय ह्येतां व्वरुणोऽददा"त्सोऽमृतत्वमशीय प्राणो दात्रऽएधि व्वयो मह्यं प्रतिग्रहीत्र"इति ॥२९॥अथ व्वासः प्रत्येति । "बृहस्पतये त्वा मह्यं व्वरुणो ददात्वि"ति बृहस्पतये ह्येतद्वरुणोऽददा"त्सोऽमृतत्वमशीय त्वग्दात्रऽएधि मयो मह्यं प्रतिग्रहीत्र"ऽइति॥३०॥ अथाश्वं प्रत्येति । "य्यमाय त्वा मह्यं व्वरुणो ददा"त्विति य्यमाय ह्येतं व्वरुणोऽददा"त्सोऽमृतत्वमशीय हयो दात्रऽएधि व्वयो मह्यं प्रतिग्रहीत्र"ऽइति ॥३१॥ अथ यदन्यद्ददाति । कामेनैव तद्ददातीदं मेऽप्यमुत्रासदिति तत्प्रत्येति "कोऽदात्कस्माऽअदात्कामोऽत्कामायादात्। कामो दाता कामः प्रतिग्रहीता कामैतत्त"इति तद्देवतायाऽअतिदिशति ॥३२॥ तदाहुः । न देवतायाऽअतिदिशेदिदं वै य्यां देवताꣳस-

---

१-८. मा. सं. ४. ४७. ९. मा. सं. ४. ४८.

मिन्द्धे सा दीप्यमाना श्वः श्वः श्रेयसी भवतीदं वै य्यस्मिन्नग्ना-वभ्यादधति स दीप्यमानऽएव श्वः-श्वः श्रेयान् भवति श्वः श्वो ह वै श्रेयान् भवति य्य ऽएवं व्विद्वान् प्रतिगृह्णाति तद्यथा समिद्धे जुहुयादेवमेतां जुहोति य्यामधीयते ददाति तस्मादधीयन्नातिदिशेत् ॥३३॥ Cf. का. श. ५. ४. १; तै. सं. ६. ६. १; मै. सं. ४. ८. २, ३; कठ. २८. ४, ५. कपि ४४. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
तृतीयप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ३. ४.)

४. ३. २.

(तृतीयसवनम् आदित्यग्रहः)

त्रया वै देवाः । व्वसवो रुद्राऽआदित्यास्तेषां व्विभक्तानि सवनानि व्वसूनामेव प्रातः सवनꣳ रुद्राणां माध्यन्दिनꣳ सवनमादित्यानां तृतीयसवनं तद्वाऽअमिश्रमेव व्वसूनां प्रातः सवनममिश्रꣳ रुद्राणां माध्यान्दिनꣳ सवनं मिश्रमादित्यानां तृतीयसवनम् ॥१॥ ते हादित्याऽऊचुः । य्यथेदममिश्रं व्वसूनां प्रातःसवनममिश्रꣳ रुद्राणां माध्यन्दिनꣳ सवनमेवं नऽइमं पुरा मिश्राद्ग्रहं जुहुथेति तथेति देवा ऽअब्रुवंस्ते सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनादेतमजुहवुः स ऽएषोऽप्येतर्हि तथैव ग्रहो हूयते सꣳस्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनात्[1] ॥२॥ ते हादित्याऽऊचुः । नेव वाऽइतरस्मिन्त्सवने स्मो नेवेतरस्मिन्यद्वै नो रक्षाꣳसि न हिꣳस्युरिति ॥३॥ ते ह द्विदेवत्यानूचुः । रक्षोभ्यो वै बिभीमो हन्त य्युष्मान् प्रविशामेति ॥४॥ ते ह द्विदेवत्याऽऊचुः । किमस्माकं ततः स्यादित्यस्माभिरनुवषट्कृता भविष्यथेत्यु हादित्या ऽऊचुस्तथेति ते द्विदेवत्यान् प्राविशन् ॥५॥ स य्यत्र प्रातः सवने । द्विदेवत्यैः प्रचरति तत्प्रतिप्रस्थातादित्यपात्रेण द्रोणकलशात्प्रति निगृह्णीत[2]"ऽउप-

१. तृतीयसवनात्. इति च. २. मा. सं. ८. १.

याम् गृहीतोसी"त्येतावताध्वर्युरेवाश्रावयत्यध्वर्योरनुहोमं जुहोति प्रतिप्रस्थाता"दित्येभ्यस्त्वे"ति सꣳस्रवमवनयत्येतावतैवमेव सर्वेषु ॥६॥ तद्यत्प्रतिप्रस्थाता प्रतिनिगृह्णीते । द्विदेवत्यान्वै प्राविशन्नस्माभिरनुवषट्कृता भविष्यथेत्युदादित्याऽऊचुर्या वाऽअमुं द्वितीयामाहुतिं जुहोति स्विष्टकृते वै तां जुहोति स्विष्टकृतो वाऽएतेऽनुवषट्क्रियन्ते तथोहास्यैतेऽनुवषट्कृताऽइष्टस्विष्टकृतो भवन्त्युत्तरार्द्धे जुहोत्येषा ह्येतस्य देवस्य दिक्तस्मादुत्तरार्द्धे जुहोति ॥७॥ य्यद्वेव प्रतिप्रस्थाता प्रतिनिगृह्णीते । द्विदेवत्यान्वै प्राविशन्त य्यानेव प्राविशंस्तेभ्य ऽएवैतन्निर्मिमीतेऽथापिदधाति रक्षोभ्यो ह्यबिभयु"र्व्विष्णऽउरुगायैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन्नि"ति यज्ञो वै व्विष्णुस्तद्यज्ञायैवैतत्परि ददाति गुप्त्याऽअथाह सꣳ स्थितऽएव माध्यन्दिने सवने पुरा तृतीयसवनादेहि यजमानेति ॥८॥ ते सम्प्रपद्यन्ते । अध्वर्युश्च य्यजमानश्चाग्नीध्रश्च प्रतिप्रस्थाता चोन्नेताथ योऽन्यः परिचरो भवत्युभे द्वारेऽअपिदधाति रक्षोभ्यो ह्यबिभयुरथाध्वर्युरादित्यस्थालीं चादित्यपात्रं चादत्ते स ऽउपर्युपरि पूतभृतं व्विगृह्णाति नेद्व्यवश्चोतदिति ॥९॥ अथ गृह्णाति । "कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूयऽइन्नु ते दानं देवस्य पृच्यतऽआदित्येभ्यस्त्वे"ति ॥१०॥ तं वै नोपयामेन गृह्णीयात् । अग्रे ह्येवैषऽउपयामेन गृहीतो भवत्यजामितायै जामि ह कुर्याद्यदेनमत्राप्युपयामेन गृह्णीयात् ॥११॥ अथापगृह्य पुनरानयति । "कदा चन प्रयुच्छस्युभे निपासि जन्मनी । तुरीयादित्य सवनं तऽइन्द्रियमातस्थावमृतं दिव्यादित्येभ्यस्त्वे"ति ॥१२॥ अथ दधि गृह्णाति । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु पशवस्तत्पशुष्वेवैतत्पयो दधाति तदिदं पशुषु पयो हितं मध्यतऽइव गृह्णीयादित्याहुर्मध्यतऽइव हीदं पशूनां पयऽइति पश्चादिव त्वेव गृह्णीयात्पश्चादिव हीदं

१,३. मा. सं. ८. १. २. निगृह्णीते इति. ग.
४. मा. सं. ८. २. ५. मा सं. ८. ३.

पशूनां पयः ॥१३॥ य्यद्वेव दधि गृह्णाति । हुतोच्छिष्टा वाऽएते सꣳस्रवा भवन्ति नालमाहुत्यै तानेवैतत्पुनराप्याययति तथालमाहुत्यै भवन्ति तस्माद्दधि गृह्णाति ॥१४॥ स गृह्णाति । "य्यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोऽर्वाची सुमतिर्वृणीमहे दꣳ होश्चिद्या वरिवोवित्तरासदादित्येभ्यस्त्वे"ति ॥१५॥ तमुपाꣳशुसवनेन मेक्षयति । विवस्वान्वाऽएष आदित्यो निदानेन य्यदुपाꣳशुसवन आदित्यग्रहो वाऽएष भवति तदेनꣳस्वऽएव भागे प्रीणाति ॥१६॥

(काण्डस्याऽर्द्धम् ३१४)

तं न दशाभिर्न पवित्रेणोपस्पृशति । एते वै शुक्रवती रसवती सवने य्यत्प्रातःसवनं च माध्यन्दिनं च सवनमथैतान्निर्द्रीतशुक्रं य्यत्तृतीयसवनꣳ स यन्न दशाभिर्न पवित्रेणोपस्पृशति तेनो ह्यस्यैतच्छुक्रवद्रसवत्तृतीयसवनं भवति तस्मान्न दशाभिर्न्न पवित्रेणोपस्पृशति ॥१७॥ स मेक्षयति । "विवस्वन्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्वे"त्यथोन्नेत्रऽउपाꣳशुसवनं प्रयच्छत्यथाहोन्नेतारमासृज ग्राव्ण ऽइति तानाधवनीये वा सृजति चमसे वा ॥१८॥ राजानमुन्नीय । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु ग्रावाणस्तदेनान्स्वेऽएव भागे प्रीणात्यपोर्ण्णुवन्ति द्वारे ॥१९॥ अथापिधायोपानिष्क्रामति । रक्षोभ्यो ह्यबिभयुरथाहा'दित्येभ्योऽनुब्रूही'त्यत्र सम्पश्येद्यदि कामयेताश्राव्य त्वेव सम्पश्येदादित्येभ्यः प्रेष्य "प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्य"ऽइति व्वषट्कृते जुहोति नानुवषट्करोति नेत्पशूनग्नौ प्रवृणजानीति प्रयच्छति प्रतिप्रस्थात्रे सꣳस्रवौ ॥२०॥ अथ पुनः प्रपद्य । आग्रयणमादत्तऽउदीचीनदशं पवित्रं विवतन्वन्ति प्रस्कन्दयत्यध्वर्युराग्रयणस्य सम्प्रगृह्णाति प्रतिप्रस्थाता सꣳस्रवावानयत्युन्नेता चम-

---

१. मा. सं. ८. ४. २. मा. सं. ८. ५. ३. संस्रवौ इति. च.

सेन वोदञ्चनेन वा ॥२१॥ तं चतसृणां धाराणामाग्रयणं गृह्णाति । आदित्यानां वै तृतीयसवनमादित्यान्वाऽअनु गावस्तस्मादिदं गवां चतुर्द्धा विहितं पयस्तस्माच्चतसृणां धाराणामाग्रयणं गृह्णाति ॥२२॥ तद्यत्प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति । आदित्यग्रहो वाऽएष भवति न वाऽआदित्यग्रहस्यानुवषट्करोत्येतस्माद्वै सावित्रं ग्रहं ग्रहीष्यन् भवति तदस्य सावित्रेणैवानुवषट्कृतो भवति ॥२३॥ य्यद्वेव प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति । पुरा वाऽएभ्यऽएतन्मिश्राद्ग्रहमहौषुः पुरा तृतीयसवनात्तृतीयसवनाय वाऽएष ग्रहो गृह्यते तदादित्यास्तृतीयसवनमपियन्ति तथा न वहिर्द्धा यज्ञाद्भवन्ति तस्मात्प्रतिप्रस्थाता सꣳस्रवौ सम्प्रगृह्णाति ॥२४॥ Cf. का. श. ५. ४. २; तै. सं. ६. ५. ६; मै. सं. ४. ६. ९; कठ. २८. ६; कपि. ४४. ६.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
तृतीयप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ३. ५.)

(तृतीयोऽध्यायस्समाप्तः)

४. ३. ३.

(सावित्रग्रहः)

मनोऽह वाऽअस्य सविता । तस्मात्सावित्रं गृह्णाति प्राणो ह वाऽअस्य सविता तमेवास्मिन्नेतत्पुरस्तात्प्राणं दधाति य्यदुपाꣳशुं गृह्णाति तमेवास्मिन्नेतत्पश्चात्प्राणं दधाति य्यत्सावित्रं गृह्णाति ताविमाऽउभयतः प्राणौ हितौ य्यश्चायमुपरिष्टाद्यश्चाधस्तात् ॥१॥ ऋतवो वै संवत्सरो यज्ञः । तेऽदः प्रातःसवने प्रत्यक्षमवकल्प्यन्ते य्यदृतुग्रहान् गृह्णात्यथैतत्परोक्षं माध्यन्दिने सवनेऽवकल्प्यन्ते य्यदृतुपात्राभ्यां मरुत्वतीयान् गृह्णाति न वाऽअत्रर्त्तुभ्यऽइति कं चन ग्रहं गृह्णन्ति नर्तुपात्राभ्यां कश्चन ग्रहो गृह्यते ॥२॥ एष वै सविता य्य एष तपति । एष उऽएव सर्वऽऋतवस्तदृतवः संवत्सरस्तृतीयसवने प्रत्य-

क्षमवकल्प्यन्ते तस्मात्सावित्रं गृह्णाति ॥३॥ तं वाऽउपाꣳशुपात्रेण गृह्णाति । मनो ह वाऽअस्य सविता प्राणऽउपाꣳशुस्तस्मादुपाꣳशुपात्रेण गृह्णात्यन्तर्यामपात्रेण वा समानꣳह्येतद्यदुपाꣳश्वन्तर्यामौ प्राणोदानौ हि ॥४॥

(अर्द्धप्रपाठकः ६१)

आग्रयणाद्गृह्णाति । मनो ह वाऽअस्य सविताऽऽत्माग्रयणऽआत्मन्येवैतन्मनो दधाति प्राणो ह वाऽअस्य सवितात्माऽऽग्रयणऽआत्मन्येवैतत्प्राणं दधाति ॥५॥ अथातो गृह्णात्येव । "[1]व्वाममद्य सवितर्वाममु श्वो दिवे दिवे व्वाममस्मभ्यꣳसावीः । व्वामस्य हि क्षयस्य देव भूरेरया धिया व्वामभाजः स्याम । [2]उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधा ऽअसि चनो मयि धेहि । जिन्व यज्ञं जिन्व यज्ञपतिं भगाये"ति ॥६॥ तं गृहीत्वा न सादयति । मनो ह वाऽअस्य सविता तस्मादिदमसन्नं मनः प्राणो ह वाऽअस्य सविता तस्मादयमसन्नः प्राणः सञ्चरत्यथाह "देवाय सवित्रेनुब्रूही"त्याश्राव्याह देवाय सवित्रे प्रेष्येति व्वषट्कृते जुहोति नानुवषट्करोति मनो ह वाऽअस्य सविता नेन्मनोऽग्नौ प्रवृणजानीति प्राणो ह वाऽअस्य सविता नेत्प्राणमग्नौ प्रवृणजानीति ॥७॥ अथाभक्षितेन पात्रेण । व्वैश्वदेवं ग्रहं गृह्णाति तद्यदभक्षितेन पात्रेण वैश्वदेवं ग्रहं गृह्णाति न वै सावित्रस्यानुवषट्करोत्येतस्माद्वै व्वैश्वदेवं ग्रहं ग्रहीष्यन् भवति तदस्य व्वैश्वदेवेनैवानुवषट्कृतो भवति ॥८॥ य्यद्वेव व्वैश्वदेवं ग्रहं गृह्णाति । मनो ह वाऽअस्य सविता सर्वमिदं व्विश्वे देवा ऽइदमेवैतत्सर्वं मनसः कृतानुकरमनुवर्त्म करोति तददिꣳ सर्वं मनसः कृतानुकरमनुवर्त्म ॥९॥ य्यद्वेव व्वैश्वदेवं ग्रहं गृह्णाति । प्राणो ह वाऽअस्य सविता सर्वमिदं व्विश्वेदेवा अस्मिन्नेवैतत्सर्वस्मिन् प्राणोदानौ दधाति ताविमावस्मिन्त्सर्वस्मिन् [3]प्राणोदानौ हि

१. मा. सं. ८. ६. २. मा. सं. ८. ७. ३. प्राणोदानौ इति. ग.

तौ ॥१०॥ य्यद्वेव व्वैश्वदेवं ग्रहं गृह्णाति । व्वैश्वदेवं वै तृतीयसवनं तदुच्यतऽएव सामतो[1] य्यस्माद्वैश्वदेवं तृतीयसवनमुच्यतऽऋक्तोऽथै-तदेव यजुष्टः पुरश्चरणतो य्यदेतं महावैश्वदेवं ग्रहं गृह्णाति ॥११॥तं वै पूतभृतो गृह्णाति। व्वैश्वदेवो वै पूतभृद्तो हि देवेभ्य ऽउन्नयन्त्यतो मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवः पूतभृत् ॥१२॥ तं वाऽअपु-रोरुक्कं गृह्णाति । व्विश्वेभ्यो ह्येनं देवेभ्यो गृह्णाति सर्वे वै व्विश्वे देवा यदृचो यद्यजूꣳषि यत्सामानि स य्यदेवैनं व्विश्वेभ्यो देवेभ्यो गृह्णा-ति तेनो हास्यैष पुरोरुङ्ग्रान् भवति तस्मादपुरोरुक्कं गृह्णाति ॥१३॥ अथातो गृह्णात्येव । "उपयामगृहीतोऽसि सुशर्मासि सुप्रतिष्ठान"-ऽइति प्राणो वै सुशर्मा सुप्रतिष्ठानो "बृहदुक्षाय नम"ऽइति प्रजा-पतिर्व्वै बृहदुक्षः प्रजापतये नम ऽइत्येवैतदाह "व्विश्वेभ्यस्त्वा देवे-भ्य ऽएष ते य्योनिर्व्विश्वेभ्यस्त्वा देवेभ्य"ऽइति सादयति व्विश्वेभ्यो ह्येनं देवेभ्यो गृह्णात्यथेत्य प्राङुपविशति ॥१४॥ स य्यत्रैताꣳ होता शꣳसति । "एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये व्विꣳ श-ती च । तिसृभिश्च व्वहसे त्रिꣳशता च नियुद्भिर्व्वायविह ता व्विमु-ञ्चे"ति तदेतस्यां व्वायव्यायामृचि पात्राणि व्विमुच्यन्ते व्वायुप्रणे-त्रा वै पशवः प्राणो वै व्वायुः प्राणेन हि पशवश्चरन्ति ॥१५॥ सह देवेभ्यः पशुभिरपचक्राम । तं देवाः प्रातःसवनेऽन्वमन्त्रयन्त स नोपाववर्त्त तं माध्यन्दिने सवनेऽन्वमन्त्रयन्त स ह नैवोपाववर्त्त तं तृतीयसवनेऽन्वमन्त्रयन्त ॥१६॥ स होपावर्त्स्यन्नुवाच । य्यद्वऽउ-पावर्त्तेय किं मे ततः स्यादिति त्वयैवैतानि पात्राणि य्युज्येरंस्त्वया व्विमुच्येरन्निति तदेनेनैतत्पात्राणि[6] य्युज्यन्ते य्यदैन्द्रवायवाग्रान् प्रातः सवने गृह्णात्यथैनेनैतत्पात्राणि व्विमुच्यन्ते यदाह नियुद्भिर्व्वायविह ता व्विमुञ्चेति पशवो वै नियुतस्तत्पशुभिरेवैतत्पात्राणि व्विमुच्यन्ते[7]

१. सामनो इति. च. २—४. मा. सं. ८. ८. ५ मा. सं. २७. ३३.
६. पात्राणि इति. ग. ७. विमुच्यत इति ग.

॥१७॥ स य्यत्प्रातः सवनऽउपावर्त्स्यत्[1] । गायत्रं वै प्रातः सवनं ब्रह्म गायत्री ब्राह्मणेषु ह पशवोऽभविष्यन्नथ यन्माध्यदिने सवनऽउपावर्त्स्यदैन्द्रं वै माध्यन्दिनꣳ सवनं क्षत्रामिन्द्रः क्षत्रियेषु ह पशवोऽभविष्यन्नथ य्यत्तृतीयसवनऽउपावर्त्तत व्वैश्वदेवं वै तृतीयसवनꣳ सर्वमिदं व्विश्वेदेवास्तस्मादिमे सर्वत्रैव पशवः ॥१८॥ Cf. का. श. ५. ४. ३; तै. सं. ६. ५. ७; मै. सं. ४. ७. १; कठ. सं. २८. ७; कपि. ४४. ७.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
तृतीयप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ४. १.)

४. ३. ४.

(सौम्यश्चरुः, पात्नीवतग्रहश्च)

सौम्येन चरुणा प्रचरति । सोमो वै देवाना ꣳ हविरथैतत्सोमायैव हविष्क्रियते तथातः सोमोऽनन्तर्हितो भवति चरुर्भवति चरुर्व्वै देवानामन्नमोदनो हि चरुरोदनो हि प्रत्यक्षमन्नं तस्माच्चरुर्भवति ॥१॥ तेन न प्रातःसवने प्रचरति[2] । न माध्यन्दिने सवनऽएते वै देवानां निष्केवल्ये सवने य्यत्प्रातःसवनं च माध्यन्दिनं च सवनं पितृदेवत्यो वै सोमः ॥२॥ स य्यत्प्रातः सवने वा प्रचरेत् । माध्यन्दिने वा सवने समदꣳ ह कुर्याद्देवेभ्यश्च पितृभ्यश्च तेन तृतीयसवने प्रचरति व्वैश्वदेवं[3] वै तृतीयसवनं तथा हासमदं करोति नानुवाक्यामन्वाह सकृदुह्येव पराञ्चः पितरस्तस्मान्नानुवाक्यामन्वाह ॥३॥ अथ चतुर्गृहीतमाज्यं गृहीत्वा । आश्राव्याह "घृतस्य यजे"ति व्वषट्कृते जुहोति तद्या ऽअतः प्राच्य ऽआहुतयो हुता भवन्ति ताभ्य ऽएवैतदन्तर्द्दधाति तथा हासमदं करोति ॥४॥ (शतम् २६००) स ऽआज्यस्योपस्तीर्य । द्विश्चरोरवद्यत्यथोपरिष्टादाज्य-

---

१. उप त्स्यदिति च. २. प्रचरति इति ग. ३ वैश्वदेवमिति. ग.

स्याभिघारयत्याश्राव्याह "सौम्यस्य यजे"ति व्वषट्कृते जुहोति ॥५॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा । आश्राव्याह "घृतस्य यजे"ति व्वषट्कृते जुहोति तद्या ऽअत ऽऊर्ध्वा ऽआहुतीर्होष्यन् भवति ताभ्य ऽएवैतदन्तर्द्दधाति तथा हासमदं करोति स य्यदि कामयेतोभयतः परियजेय्यु कामयेतान्यतरतः परियजेत् ॥६॥ अथ प्रचरणीति स्रुग्भवति । तस्यां चतुर्गृहीतमाज्यं गृहीत्वाध्वर्युः शालाकैर्धिष्ण्यान्व्याघारयति तद्यच्छालाकैर्धिष्ण्यान्व्याघारयति य्यदेवैनानदो देवाऽ अब्रुवस्तृतीयसवने वो घृत्याहुतिः प्राप्स्यति न सौम्यापहृतो हि य्युष्मत्सोमपीथस्तेन सोमाहुतिं नार्हथेति सैनानेषा तृतीयसवनऽएव घृत्याहुतिः प्राप्नोति न सौम्या य्यच्छालाकैर्धिष्ण्यान्व्याघारयति तानेतैरेव य्यजुर्भिर्यथोपकीर्णं यथापूर्वं व्याघारयति मार्ज्जालीयऽएवोत्तमम् ॥७॥ तद्धैके । आग्नीध्रीये पुनराघारयन्त्युदग्नऽइदं कर्मानुसन्तिष्ठाताऽइति तदु तथा न कुर्यान्मार्ज्जालीयऽएवोत्तमꣳ ॥८॥ स य्यत्राध्वर्युः । शालाकैर्धिष्ण्यान्व्याघारयति तत्प्रतिप्रस्थाता पाल्नीवतं ग्रहं गृह्णाति यज्ञाद्वै प्रजाः प्रजायन्ते यज्ञात्प्रजायमाना मिथुनात्प्रजायन्ते मिथुनात्प्रजायमाना ऽअन्ततो यज्ञस्य प्रजायन्ते तदेना ऽएतदन्ततो यज्ञस्य मिथुनात्प्रजननान्प्रजनयति तस्मान्मिथुनात्प्रजननादन्ततो यज्ञस्येमाः प्रजाः प्रजायन्ते तस्मात्पात्नीवतं गृह्णाति ॥९॥ तं वाऽउपाꣳशुपात्रेण गृह्णाति । य्यदि सावित्रमुपाꣳशुपात्रेण गृह्णीयादन्तर्यामपात्रेणैतं य्यदि सावित्रमन्तर्यामपात्रेण गृह्णीयादुपाꣳशुपात्रेणैतꣳ समानꣳ ह्येतद्यदुपाꣳश्वन्तर्यामौ प्राणो हि य्यो वै प्राणः स ऽउदानो व्वृषा वै प्राणो य्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१०॥ तं वाऽअपुरोरुक्कं गृह्णाति । व्वीर्यं वै पुरोरुङ्नेत्स्त्रीषु व्वीर्यं दधानीति तस्मादपुरोरुक्कं गृह्णाति ॥११॥ अथातो गृह्णात्येव

१. सौम्यस्येति. च. २. सवने इति. ग. ३. यजुर्भिरिति. ग.
४. पाल्नीवतमिति. ग ५ गृह्णाति इति. ग.

"[1]उपयामगृहीतोऽसि बृहस्पतिसुतस्य देव सोम त"ऽइति ब्रह्म वै बृहस्पतिर्ब्रह्मप्रसूतस्य देव सोम तऽइत्येवैतदाहे"[2]न्दोरिन्द्रियावत"ऽइति व्वीर्यवत ऽइत्येवैतदाह यदाहेन्दोरिन्द्रियावत ऽइति "[3]पत्नीवतो ग्रहां२॥ऽऋध्यास"मिति न सम्प्रति पत्नीभ्यो गृह्णाति नेत्स्त्रीषु व्वीर्यं दधानीति तस्मान्न सम्प्रति पत्नीभ्यो गृह्णाति ॥१२॥ अथ य्यः प्रचरण्या[5]ँ सꣳस्रवः परिशिष्टो भवति । तेनैनꣳश्रीणाति समर्द्धयति वाऽअन्यान् ग्रहाञ्छ्रीणन्नथैतं व्यर्द्धयति व्वज्रो वाऽआज्यमेतेन वै देवा व्वज्रेणाज्येनाघ्नन्नेव पत्नीर्निराक्ष्णुवंस्ता हता निरष्टा नात्मनश्च नैशत न दायस्य च नैशत तथोऽएवैषऽएतेन व्वज्रेणाज्येन हन्त्येव पत्नीर्निरक्ष्णोति ता हता निरष्टा नात्मनश्च नेशते न दायस्य च नेशते ॥१३॥ स श्रीणाति । "[6]अहं परस्तादहमवस्ताद्यदन्तरिक्षं तदु मे पिताभूत् । अहꣳसूर्यमुभयतो ददर्शाहं देवानां परमं गुहा यदि"ति स यदहमहमिति श्रीणाति पु[7]ँस्वेवैतद्वीर्यं दधाति ॥१४॥ अथाहाग्नीत्पत्नीवतस्य यजेति । व्वृषा वाऽग्नीद्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते स जुहोत्य"ग्ना३ऽइ पत्नीवन्नि"ति व्वृषा वाऽअग्निर्य्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१५॥ "[8]संजुर्देवेन त्वष्ट्रे"ति । त्वष्टा वै सिक्तꣳरेतो व्विकरोति तदेष ऽएवैतत्सिक्तꣳरेतो व्विकरोति "सोमं पिबे स्वाहे"त्युत्तरार्द्धे जुहोति याऽइतराऽआहुतयस्ते देवाऽअथैताः पत्न्यऽएवामिव हि मिथुनं कृतमुत्तरतो हि स्त्री पुमाꣳसमुपशेतऽआहरत्यध्वर्युरग्नीधे भक्षꣳ स ऽआहा"ध्वर्यऽउप मा ह्वयस्वे"ति तं न प्रत्युपह्वयेत को हि हतस्य निरष्टस्य प्रत्युपहवस्तं वै प्रत्येवोपह्वयेत जुह्वत्यस्याग्नौ व्वषट्कुर्व्वन्ति तस्मात्प्रत्येवोप[10]ह्वयेत ॥१६॥ अथ सम्प्रेष्यति[11] । "अग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा संख्यापयोन्नेतर्होतुश्चमसमनून्नय

१-३. मा. सं. ८. ९. ४. गृह्णाति इति. च. ५. प्रचरण्यामिति. ग.
६. म. सं. ८. ९. ७-९. मा. सं. ८. १०. १०. उपह्वयेत इति. च.
११. सम्प्रेष्यति इति. ग, सम्प्रेष्यति इति. च.

सोमं मातिरीरिच"ऽइति य्यद्यग्निष्टोमः स्यात् ॥१७॥ य्यद्युक्थ्यः स्यात्। सोमं प्रभावयेति ब्रूयात्स बिभ्रदेवैतत्पात्रमग्नीन्नेष्टुरुपस्थमासदित्यग्निर्वाऽएष निदानेन यदाग्नीध्रो य्योषा नेष्टा व्वृषा वाऽअग्निर्योषा नेष्टा मिथुनमेवैतत्प्रजननं क्रियतऽउदानयति नेष्टा पत्नीं तामुद्गात्रा संख्सापयति "प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहीं"ति प्रजापतिर्व्वाऽउद्गाता य्योषा पत्नी मिथुनमेवैतत्प्रजननं क्रियते ॥१८॥ Cf. का. श. ५. ४. ४; तै. सं. ६. ५. ८; मै. सं. ४. ७. ४; कठ. २८. ८; कपि. ४४. ८

इति माध्यन्दिनीये शतपथब्राह्मणे चतुर्थकाण्डे तृतीयप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ४. २.)

४. ३. ५.

(हारियोजनग्रहः)

पशवो वै देवानां छन्दाꣳसि। तद्यथेदं पशवो य्युक्ता मनुष्येभ्यो व्वहन्त्येवं छन्दाꣳसि य्युक्तानि देवेभ्यो य्यज्ञं व्वहन्ति तद्यत्र छन्दाꣳसि देवान्त्समतर्पयन्नथ छन्दाꣳसि देवाः समतर्पयंस्तदतस्तत्प्रागभूद्यच्छन्दाꣳसि य्युक्तानि देवेभ्यो य्यज्ञमवाक्षुर्यदेनान्त्समतीतृपन् ॥१॥ अथ हारियोजनं गृह्णाति। छन्दाꣳसि वै हारियोजनश्छन्दाꣳस्येवैतत्सन्तर्पयति तस्माद्धारियोजनं गृह्णाति ॥२॥ तं वाऽअतिरिक्तं गृह्णाति। य्यदा हि शम्योराहाथैनं गृह्णातीदं वै देवाऽअथ छन्दाꣳस्यतिरिक्तान्यथ मनुष्याऽअथ पशवोऽतिरिक्तास्तस्मादतिरिक्तं गृह्णाति ॥३॥ द्रोणकलशे गृह्णाति। व्वृत्रो वै सोमऽआसीत्तं य्यत्र देवाऽअघ्नंस्तस्य मूर्द्धोद्ववर्त्त स द्रोणकलशोऽभवत्तस्मिन्यावान्वा य्यावान्वा रसः समस्रवदतिरिक्तो वै सऽआसीदतिरिक्तऽएष ग्रहस्तदतिरिक्तऽएवैतदतिरिक्तं दधाति तस्माद्द्रोणकलशे गृह्णाति ॥४॥ तं वाऽअपुरोरुक्कं गृह्णाति। छन्दोभ्यो ह्येनं

१. स्यात् इति. ग. २. मा. सं. ८. १०.

गृह्णाति स य्यदेवैनं छन्दोभ्यो गृह्णाति तेनो हास्यैष पुरोरुङ्ग्रान् भवति तस्मादपुरोरुक्कं गृह्णाति ॥५॥ अथातो गृह्णात्येव । "उपयामगृहीतोऽसि हरिरासि हारियोजनो हरिभ्यां त्वे"त्यृक्सामे वै हरी ऽऋक्सामाभ्याꣳ ह्येनं गृह्णाति ॥६॥ अथ धाना ऽआवपति । "हर्योर्धानास्थ सह सोमा ऽइन्द्राये"ति तद्यदेवात्र मितं च छन्दोऽमितं च तदेवैतत्सर्वं भक्षयति ॥७॥ तस्योन्नेताश्रावयति । अतिरिक्तो वाऽउन्नेता न ह्येषोऽन्यस्याश्रावयत्यतिरिक्त ऽएष ग्रहस्तदतिरिक्तऽएवैतदतिरिक्तं दधाति तस्मादुन्नेताश्रावयति ॥८॥ मूर्द्धन्नधिनिधायाश्रावयति । मूर्द्धा ह्यस्यैषोऽथाह "धाना सोमेभ्योऽनुब्रूही"त्याश्राव्याह "धाना सोमान् प्रस्थितान् प्रेष्ये"ति व्वषट्कृते जुहोत्यनुवषट्कृतेऽथ धाना व्विलिप्सन्ते भक्षाय ॥९॥ तद्धैके । होत्रे द्रोणकलशं प्रतिपराहरन्ति व्वषट्कर्त्तुर्भक्ष ऽइति व्वदन्तस्तदु तथा न कुर्याद्यथाचमसं वाऽअन्ये भक्षाऽअथैषोऽतिरिक्तस्तस्मादेतस्मिन्त्सर्वेषामेव भक्षस्तस्माद्धाना व्विलिप्सन्ते भक्षाय ॥१०॥ ता न दद्भिः खादेयुः । पशवो वाऽएते नेत्पशून् प्रम्रदे करवामहाऽइति प्राणैरेव भक्षयन्ति "य्यस्तेऽअश्वसनिर्भक्षो य्यो गोसनि"रिति पशवो ह्येते तस्मादाह य्यस्तेऽअश्वसनिर्भक्षो यो गोसनिरिति "तस्य तऽइष्टयजुषस्तुतस्तोमस्ये"तीष्टानि हि य्यजूꣳषि भवन्ति स्तुता स्तोमाः "शस्तोक्थस्ये"ति शस्तानि ह्युक्थानि भवन्त्यु"पहूतस्योपहूतो भक्षयामी"त्युपहूतस्य ह्येतदुपहूतो भक्षयति ॥११॥ ता नाग्नौ प्रकिरेयुः । नेदुच्छिष्टमग्नौ जुहवामेत्युत्तरवेदावेव निवपन्ति तथा न बहिर्द्धा यज्ञाद्भवन्ति ॥१२॥ अथ पूर्णपात्रान्तसमवमृशन्ति । योनेकेऽप्सुषोमाऽइत्याचक्षते यथा वै युक्तो व्वहेदेवमेते यऽआर्त्विज्यं कुर्वन्त्युत वै य्युक्तः क्षणुते वा व्वि वा लिशन्ते शान्तिरापो भेषजं तद्यदेवेति क्षण्वते वा

---

१. यदेवैनमिति. ग. २. मा. सं. ८. ११. ३. गृह्णाति इति. क, ग.
४. मा. सं. ८. ११. ५. आश्रावयति इति च. ६-९. मा. सं. ८.१२.
१०. प्रकिरेयुरिति. ग. ११. भवन्ति इति. ग.

व्वि वा लिशन्ते शान्तिरापस्तदद्भिः शान्त्या शमयन्ते तदद्भिः संदधते तस्मात्पूर्णपात्रान्त्समवमृशन्ति ॥१३॥ ते समवमृशन्ति "सं व्वर्चसा पयसा सं तनूभिरगन्महि मनसा सꣳशिवेन । त्वष्टा सुदत्रो व्विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्ट"मिति यद्विवृढं तत्संदधते ॥१४॥ अथ मुखान्युपस्पृशन्ते । द्वयं तद्यस्मान्मुखान्युपस्पृशन्तेऽमृतं वाऽआपोऽमृतेनैवैतत्सꣳ स्पृशन्तऽएतदु चैवैतत्कर्मात्मन् कुर्व्वते तस्मान्मुखान्युपस्पृशन्ते ॥१५॥ Cf. का. श. ५. ५. १; तै. सं. ६. ५. ९; मै. सं. ४. ७. ४; कठ. सं. २८. ९; कपि. ४४. ९.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
तृतीयप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ४. ३.)

४. ३. ६.

(समिष्टयजुर्होमः)

तानि वाऽएतानि । नव समिष्टहजूꣳषि जुहोति तद्यन्नव समिष्टयजूꣳषि जुहोति नव वाऽअमूर्बर्हिष्पवमाने स्तोत्रिया भवन्ति सैषोभयतो न्यूना व्विराट् प्रजननायैतस्माद्वाऽउभयतो न्यूनात्प्रजननात्प्रजापतिः प्रजाः ससृजऽइतश्चोर्ध्वा ऽइतश्चावाचीस्तथोऽएवैष ऽएतस्मादुभयत ऽएव न्यूनात्प्रजननात्प्रजाः सृजतऽइतश्चोर्ध्वाऽइतश्चावाचीः ॥१॥ हिङ्कारस्तोत्रियाणां दशमः । स्वाहाकारऽएतेषां तथो हास्यैषा न्यूना व्विराड्दशं दशिनी भवति ॥२॥ अथ य्यस्मात्समिष्टयजूꣳषि नाम । या वाऽएतेन यज्ञेन देवता ह्वयति य्याभ्य ऽएष यज्ञस्तायते सर्व्वा वै तत्ताः समिष्टा भवन्ति तद्यत्तासु सर्व्वासु समिष्टास्वथैतानि जुहोति तस्मात्समिष्टयजूꣳषि नाम ॥३॥ अथ य्यस्मात्समिष्टयजूꣳषि जुहोति । रिरिचानऽइव वाऽएतदीजानस्यात्मा भवति य्यद्ध्यस्य भवति तस्य हि ददाति तमेवातस्त्रिभिः पुनराप्याययति ॥४॥ अथ यान्युत्तराणि त्रीणि जुहोति । या वाऽएतेन

१. मा. सं. ८. १४. २. एतानि. इति. ग.

यज्ञेन देवता ह्वयति य्याभ्यऽएष यज्ञस्तायतऽउप ह वै ताऽआसते[1] य्यावन्न समिष्टयजूꣳषि जुह्वतीमानि नु नो जुह्वत्विति ताऽएवैतद्यथा-यथं व्यवसृजति य्यत्र यत्रासां चरणं तदनु[2] ॥५॥ अथ यान्युत्तमानि त्रीणि जुहोति । यज्ञं[3] वाऽएतदजीजनत य्यदेनमतत तं जनयित्वा य्यत्रास्य प्रतिष्ठा तत्प्रतिष्ठापयति तस्मात्समिष्टयजूꣳषि जुहोति ॥६॥ स जुहोति । "समिन्द्र णो मनसा नेषि गोभि"रिति मनसेति तन्मनसा रिरिचानमाप्याययति गोभिरिति तद्गोभी रिरिचानमाप्या-ययति "संꣳसूरिभिर्मघवन्त्सꣳ स्वस्त्या । सं ब्रह्मणा देवकृतं यद-स्ती"ति ब्रह्मणेति तद्ब्रह्मणा रिरिचानमाप्याययति "सं देवा-नाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥७॥ सं व्वर्च्चसा । पयसा सं तनूभि"रिति व्वर्च्चसेति तद्वर्च्चसा रिरिचानमाप्याययति पयसेति रसो वै पयस्तत्पयसा रिरिचानमाप्याययत्य"गन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो व्विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्ट" मिति यद्विवृढं तत्सन्दधाति ॥८॥ "धाता[10] रातिः । सवितेदं जुषन्तां प्रजापतिर्निधिपा देवोऽअग्निः । त्वष्टा व्विष्णुः प्रजया सꣳरराणो य्यजमानाय द्रविणं दधात स्वाहे"ति तद्वेव रिरिचानं पुनराप्या-ययति यदाह य्यजमानाय द्रविणं दधात स्वाहेति ॥९॥ "सुगा[11] वो देवाः । सदनाऽअकर्म यऽआजग्मेदꣳ सवनं जुषाणा"ऽइति सुगा-नि वो देवाः सदनान्यकर्म यऽआगन्तेदꣳ सवनं जुषाणाऽइत्येवैत-दाह "भरमाणा[12] व्वहमाना हवीꣳषी"ति तद्देवता व्यवसृजति भर-माणाऽअहते य्यन्तु ये व्वाहना व्वहमानाऽउ ते यन्तु ये व्वाहन-वन्तऽइत्येवैतदाह तस्मादाह भरमाणा व्वहमाना हवीꣳष्य"स्मे धत्त[13] व्वसवो व्वसूनि स्वाहा" ॥१०॥ "यां२॥ऽआवह[14] । उशतो देव देवांस्तान् प्रेरय स्वेऽअग्ने सधस्थ"ऽइत्यग्निं वाऽआहामून्देवानावहा-

१. आसते इति च. २. तदनु इति. क. ३. यज्ञमिति ग.
४-६. मा. सं. ८. १५. १६. ७, ८. मा. सं. ८. १६. ९. मनसा इति. च.
१०. मा. सं. ८. १६. ११-१३. मा. सं. ८. १८. १४. मा. सं. ८. १९.

मुन्देवानावहेति तमेवैतदाह यान्देवानावाक्षीस्तान् गमय यत्र यत्रैषां चरणं तदन्विति "जक्षिवाᳬसः पपिवाᳬसश्च विश्व"ऽइति जक्षिवाᳬसो हि पशुं पुरोडाशं भवन्ति पपिवाᳬसऽइति पपिवाᳬसो हि सोमᳬ राजानं भवन्ति तस्मादाह जक्षिवाᳬसः पपिवाᳬसश्च विश्वेऽ"सुं धर्मᳬस्वरातिष्ठतानु स्वाहे"ति तद्देव देवता व्यवसृजति ॥११॥ "व्वयᳬहि त्वा । प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह । ऋधगयाऽऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान्त्स्वाहे"त्याग्निमेवैतया विमुञ्चत्याग्निं व्यवसृजति ॥१२॥ "देवा गातुविद"ऽइति । गातुविदो हि देवा "गातुं वित्त्वे"ति यज्ञं वित्त्वेत्येवैतदाह "गातुमिते"ति तदेतेन यथायथं व्यवसृजति "मनसस्पतऽइमं देव यज्ञᳬ स्वाहा वाते धा"ऽइत्ययं वै यज्ञो योऽयं पवते तदिमं यज्ञᳬ सम्भृत्यैतस्मिन्यज्ञं प्रतिष्ठापयति यज्ञेन यज्ञᳬ सन्दधाति तस्मादाह स्वाहा वाते धाऽइति ॥१३॥ "यज्ञं यज्ञं गच्छ । यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहे"ति तत्प्रतिष्ठितमेवैतद्यज्ञᳬ सन्तᳬ स्वायां योनौ प्रतिष्ठापयत्ये"षं ते यज्ञो यज्ञपते सह सूक्तवाकः सर्व्ववीरस्तं जुषस्व स्वाहे"ति तत्प्रतिष्ठितमेवैतद्यज्ञᳬ सन्तᳬ सह सूक्तवाकᳬ सर्व्ववीरं यजमानेऽन्ततः प्रतिष्ठापयति ॥१४॥ Cf. ५. ५. २; तै. सं. ६. ६. २; मै. सं. ४. ८. ४; कठ. सं. २९. ३; कपि. ४५. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
तृतीयप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ.४.४.)

तृतीयः प्रपाठकस्समाप्तः ॥

(काण्डिकासंख्या १२२)

१, २. मा. सं ८. १९. ३. मा. सं. ८. २०.
४–७. मा. सं. ८. २१ ८, ९. मा. सं. ८. २२.

४. ४. १.

(अवभृथः)

स वाऽअवभृथमभ्यवैति । तद्यदवभृथमभ्यवैति यो वाऽअस्य रसोऽभूदाहुतिभ्यो वाऽस्य तमजीजनदथैतच्छरीरं तस्मिन्न रसोऽस्ति तन्न परास्यं तदपोभ्यवहरन्ति रसो वाऽआपस्तदस्मिन्नेतꣳरसं दधाति तदेनमेतेन रसेन सङ्गमयति तदेनमतो जनयति सऽएनं जातऽएव सन् जनयति तद्यदपोऽभ्यवहरन्ति तस्मादवभृथः ॥१॥ अथ समिष्टयजूꣳषि जुहोति । समिष्टयजूꣳषि ह्येवान्तो यज्ञस्य स हुत्वैव समिष्टयजूꣳषि य्यदेतमभितो भवति तेन चात्वालमुपसमायन्ति स कृष्णविषाणाश्च मेखलां च चात्वाले प्रास्यति ॥१॥ "माहिर्भूर्मा पृदाकु"रिति । असौ वाऽऋजीपस्य स्वगाकारो य्यदेनदपोऽभ्यवहरन्त्यथैषऽएवैतस्य स्वगाकारो रज्जुरिव हि सर्पाः कूपाऽइव हि सर्पाणामायतनान्यस्ति वै मनुष्याणां च सर्पाणां च व्विभ्रातृव्यमिव नेत्तदतः सम्भवदिति तस्मादाह माहिर्भूर्मा पृदाकुरिति ॥३॥ अथ व्वाचयति । "उरुꣳ हि राजा व्वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउऽ"इति य्यथायमुरुरभयोऽनाष्टः सूर्याय पन्थाऽएवं मेऽयमुरुरभयोऽनाष्टः पन्थाऽअस्त्विवत्येवैतदाह ॥४॥ "अपदे पादा प्रतिधातवेऽक"रिति । य्यदिह वाऽअप्यपाद्भवत्यलमेव प्रतिक्रमणाय भवत्यु"तापवक्ता हृदया व्विधश्चिदि"ति तदेनꣳ सर्वस्माद्धृद्यादेनसः पाप्मनः प्रमुञ्चति ॥५॥ अथाह साम गायेति । साम ब्रूहीति वा गायेति त्वेव ब्रूयाद्गायन्ति हि साम तद्यत्साम गायति नेदिदं बहिर्द्धा यज्ञाच्छरीरं नाष्ट्रा रक्षाꣳसि हिनसन्निति साम हि नाष्ट्राणाꣳ रक्षसामपहन्ता ॥६॥ आग्नेय्यां गायति । अग्निर्हि रक्षसामपहन्तातिच्छन्दसि गायत्येषा वै सर्व्वाणि छन्दाꣳसि यदतिच्छन्दास्तस्मादतिच्छन्दसि गायति ॥७॥ स गायति । "अग्निष्टपति प्रतिदहत्यहावोऽहाव"ऽइति तन्नाष्ट्राऽएवैतद्र-

---

१-४. मा. ३. ८. २३. ५. नाष्ट्रा इति. च.

क्षाꣳस्यतोऽपहन्ति ॥८॥ तऽउदञ्चो निष्क्रामन्ति[1] । जघनेन चात्वालमग्रेणाग्नीध्रꣳ स यस्यां ततो दिश्यापो भवन्ति तद्यन्ति ॥९॥ स यः स्यन्दमानानाꣳ स्थावरो ह्रदः स्यात्[2] । तमपोऽभ्यवेयादेता वाऽअपां व्वरुणगृहीता याः स्यन्दमानानां न स्यन्दन्ते व्वरुण्यो वाऽअवभृथो निर्व्वरुणतायै यद्यु ता न विन्देदपि याऽएव काश्चापोऽभ्यवेयात् ॥१०॥ तमपोऽवक्रमयन्वाचयति । "नमो व्वरुणायाभिष्टितो व्वरुणस्य पाश"ऽइति[3] तदेनꣳ सर्वस्माद्वरुणपाशात्सर्वस्माद्वरुणयात्प्रमुञ्चति ॥११॥ अथ चतुर्गृहीतमाज्यं गृहीत्वा । समिधं प्रास्याभिजुहोत्य"ग्नेर्नीकमपऽआविवेशापान्नपात्प्रतिरक्षन्न सुर्यम्[4] । दमे दमे समिधं यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्येत्स्वाहे"ति ॥१२॥ अग्नेर्ह वै देवाः । याव्वद्वा यावद्वाप्सु प्रवेशयां चक्रुर्नेदतोऽनाष्ट्रा[5] रक्षाꣳस्युपोत्तिष्ठानित्याग्निर्हि रक्षसामपहन्ता तमेतया च समिधैतया चाहुत्या समिन्द्धे समिद्धे देवेभ्यो जुहवानीति ॥१३॥ अथापरं चतुर्गृहीतमाज्यं गृहीत्वा[6] । आश्राव्याह "समिधो यजे"ति सोऽपबर्हिषश्चतुरः प्रयाजान्यजति प्रजा वै बर्हिर्व्वरुण्यो वाऽअवभृथो नेत्प्रजा व्वरुणो गृह्णादिति तस्मादपबर्हिषश्चतुरः प्रयाजान्यजति ॥१४॥ अथ व्वारुणऽएककपालः पुरोडाशो भवति । यो वाऽअस्य रसोऽभूदाहुतिभ्यो वाऽअस्य तमजीजनदथैतच्छरीरं तस्मिन्न रसोऽस्ति रसो वै पुरोडाशस्तदस्मिन्नेतꣳ रसं दधाति तदेनमेतेन रसेन सङ्गमयति तदेनमतो जनयति सऽएनं जातऽएव सञ्जनयति तस्माद्वारुणऽएककपालः पुरोडाशो भवति ॥१५॥ सऽआज्यस्योपस्तीर्य । पुरोडाशस्यावद्यन्नाह "व्वरुणायानुब्रूही"त्यत्र हैकऽऋजीषस्य द्विरवद्यन्ति तदु तथा न कुर्याच्छरीरं वाऽएतद्भवति नालमाहुत्यै द्विरवद्यति सकृदभिघारयति प्रत्यनक्त्यवदानेऽआश्राव्याह व्वरुणं यजेति व्वषट्कृते जुहोति ॥१६॥ अथाज्यस्योपस्तीर्य । पुरोडाशमवदधदा-

---

१. निष्क्रामति. इति. ग. २. स्यात् इति. ग. ३. मा. सं. ८. २३.
४. मा, सं. ८. २४. ५. नाष्ट्रा इति. ग. ६. गृहीत्वा इति. ग.

हा"ग्नीवरुणाभ्यामनुब्रूही"ति तत्स्विष्टकृते स य्यन्नाग्नेयऽइत्याह नेदग्निं व्वरुणो गृह्णादिति स य्यद्यमुत्रर्जीषस्य द्विरवद्येदथात्र सकृद्यद्यु न नाद्रियेताथोपरिष्टाद्विराज्यस्याभिघारयत्याश्राव्याहा'ग्नीवरुणौ यजे'ति व्वषट्कृते जुहोति ॥१७॥ ता वाऽएताः । षडाहुतयो भवन्ति षडवाऽऋतवः संवत्सरस्य संवत्सरो व्वरुणस्तस्मात्षडाहुतयो भवन्ति ॥१८॥ एतदादित्यानामयनम् । आदित्यानीमानि य्यजूंषीति वाऽआहुः स य्यावदस्य व्वशः स्यादेवमेव चिकीर्षेद्यद्युऽएनमितरथा य्यजमानः कर्त्तवै ब्रूयादितरथो तर्हि कुर्यादेतानेव चतुरः प्रयाजानुपबर्हिषो यजेद्वावाज्यभागौ व्वरुणमग्नीवरुणौ द्वावनुयाजावुपबर्हिषौ तद्दश दशाक्षरा वै व्विराड्विराड्वै यज्ञस्तद्विराजमेवैतद्यज्ञमभिसम्पादयति ॥१९॥ एतदङ्गिरसामयनम् । अतोऽन्यतरत्कृत्वा य्यस्मिन् कुम्भऽऋजीषं भवति तं प्रप्लावयति "समुद्रे ते हृदयमप्स्वन्त"रित्यापो वै समुद्रो रसो वाऽआपस्तस्मिन्नेतं रसं दधाति तदेनमेतेन रसेन सङ्गमयति तदेनमतो जनयति सऽएनं जातऽएव सञ्जनयति "सं त्वा व्विशन्त्वोषधीरुतापऽइति तदस्मिन्नुभयꣳ रसं दधाति यश्चौषधिषु य्यश्चाप्सु "यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके व्विधेम यत्स्वाहे"ति तद्यदेव यज्ञस्य साधु तदेवास्मिन्नेतद्दधाति ॥२०॥ अथानुसृज्योपतिष्ठते । "देवीरापऽएष वो गर्भऽ"इत्यपां ह्येष गर्भ- "स्तꣳसुप्रीतꣳ सुभृतं बिभ्रते"ति तदेनमद्भ्यः परिददाति गुप्त्यै "देव सोमैष ते लोक"ऽइत्यापो ह्येतस्य लोक"स्तस्मिंच्छं च व्वक्ष्व परि च व्वक्ष्वे"ति तस्मिन्नः शं चैधि सर्व्वाभ्यश्च नऽआर्त्तिभ्यो गोपायेत्येवैतदाह ॥२१॥ अथोपमारयति । "अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्यकृतमि"त्यव ह्येतद्देवैर्देवकृतमेनोऽयासीत्सोमेन राज्ञाऽवमर्त्यैर्मर्त्यकृतमित्यव ह्येतन्मर्त्यैर्म्मर्त्यकृतमेनोऽयासीत्पशुना पुरोडाशेन "पुरुरावणो देव रि-

१. यजूंषीत्याहुरिति. ग. २-४ मा. सं. ८. २५. ५. यज्ञपते इति. ग
६-९. मा. सं. ८. २६. १०, ११. मा. सं. ८. २७.

ष्स्पाही"ति सर्वाभ्यो मार्त्तिभ्यो गोपायेत्येवेतदाह ॥२२॥ अथाभ्यवेत्य स्नातः। अन्योन्यस्य पृष्ठे प्रधावतस्तावन्ये व्वाससी परिधायोदेतः स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यते तस्मिन्न तावच्च नैनो भवति य्यावत्कुमारेऽदति स य्येनैव निष्क्रामन्ति तेन पुनरायन्ति पुनरेत्याहवनीये समिधमभ्यादधाति "देवानाꣳ समिदसी"ति य्यजमानमेवैतया समिन्द्धे देवानाꣳ हि समिद्धिमनु य्यजमानः समिध्यते ॥ २३ ॥ cf. का. श. ५. ५. ३; तै. सं. ६. ६. ३; मै. सं. ४. ८. ५; कठ. २९, ३; कपि ४५. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
चतुर्थप्रपाठके प्रथमं ब्राह्मणम् ॥ (अ. ४. ५.)

(चतुर्थोऽध्यायस्समाप्तः)

४. ४. २.

(उदयनीयेष्टिः, आनुबन्ध्ययागश्च)

[2]आदित्येन चरुणोदयनीयेन प्रचरति। तद्यदादित्यश्चरुर्भवति य्यदेवैनामदो देवाऽअब्रुवंस्तवैव प्रायणीयस्तवोदनीय ऽइति तमेवास्याऽएतदुभयत्र भागं करोति ॥१॥ स य्यदमुत्र राजानं क्रेष्यन्नुपप्रैष्यन्यजते। तस्मात्तत्प्रायणीयं नामाथ यदत्रावभृथादुदेत्य य्यजते तस्मादेतदुदयनीयं नाम तद्वाऽएतत्समानमेव हविरदित्या ऽएव प्रायणीयमदित्याऽउदयनीयमियꣳ ह्येवादितिः ॥२॥ स वै पथ्यामेवाग्रे स्वस्तिं यजति। तद्देवा ऽअप्रज्ञायमाने व्वाचैव प्रत्यपद्यन्त व्वाचा[3] हि मुग्धं प्रज्ञायतेऽथात्र प्रज्ञाते य्यथापूर्वं करोति ॥३॥ सोऽग्निमेव प्रथमं[4] यजेति। अथ सोममथ सवितारमथ पथ्याꣳ स्वस्तिमथादितिं व्वाग्वै पथ्या स्वस्तिरियमदितिरस्यामेव तद्देवा व्वाचं प्रत्यष्ठापय-

१. मा. सं. ८. २७.
२. आदित्येन इति. ग.
३. वाचा इति. ग.
४. प्रथमं इति. ग.

न्त्सेयं व्वागस्यां प्रतिष्ठिता व्वदंति ॥४॥ अथ मैत्रावरुणीं व्वशामनूबन्ध्यामालभते । सऽएषोऽन्यऽएव यज्ञस्तायते पशुबन्धऽएव समिष्टयजूंषि ह्येवान्तो यज्ञस्य ॥५॥ तद्यन्मैत्रावरुणी व्वशा भवति । य्यद्वाऽईजानस्य स्विष्टं भवति मित्रोऽस्य तद्गृह्णाति य्यद्धस्य दुरिष्टं भवति व्वरुणोऽस्य तद्गृह्णाति ॥६॥ तदाहुः । केजानोऽभूदिति तद्यदेवास्यात्र मित्रः स्विष्टं गृह्णाति तदेवास्माऽएतया प्रीतः प्रत्यवसृजति य्यदु चास्य व्वरुणो दुरिष्टं गृह्णाति तच्चैवास्माऽएतया प्रीतः स्विष्टं करोति तदु चास्मै प्रत्यवसृजति सोऽस्यैष स्वऽएव यज्ञो भवति स्वंं सुकृतम् ॥७॥ तद्यन्मैत्रावरुणी व्वशा भवति । य्यत्र वै देवा रेतः सिक्तं प्राजनयंस्तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्याख्यायते य्यथा तद्देवा रेतः प्राजनयंस्ततोऽङ्गाराः समभवन्नङ्गारेभ्योऽङ्गिरसस्तदन्वन्ये पशवः ॥८॥ अथ यदासाः पाथ्संसवः पर्यशिष्यन्त । ततो गर्द्दभः समभवत्तस्माद्यत्र पाथ्संसुलं भवति गर्द्दभस्थानमिव बतेत्याहुरथ यदा न कश्चन रसः पर्यशिष्यत तत ऽएषा मैत्रावरुणी व्वशा समभवत्तस्मादेषा न प्रजायते रसाद्धि रेतः सम्भवति रेतसः पशवस्तद्यदन्ततः समभवत्तस्मादन्तं यज्ञस्यानुवर्त्तते तस्माद्वाऽएषात्र मैत्रावरुणी व्वशावक्लृप्ततमा भवति य्यदि व्वशां न विन्देदप्युक्षवशऽएव स्यात् ॥९॥ अथेतरं व्विश्वे देवाऽअमरीमृत्स्यन्त । ततो व्वैश्वदेवी समभवदथ बार्हस्पत्या सोऽन्तोऽन्तो हि बृहस्पतिः ॥१०॥ स यः सहस्रं वा भूयो वा दद्यात् । स एनाः सर्वाऽआलभेत सर्व्वं वै तस्याप्तं भवति सर्व्वं जितं यः सहस्रं वा भूयो वा ददाति सर्व्वमेताऽएवमेव यथापूर्वं मैत्रावरुणीमेवाग्रेऽथ व्वैश्वदेवीमथ बार्हस्पत्याम् ॥११॥ अथो य्ये दीर्घसत्रमासीरन् । संवत्सरं वा भूयो वा तऽएनाः सर्वाऽआलभेरन्त्सर्वं वै तेषामाप्तं भवति सर्व्वं जितं य्ये दीर्घसत्रमासते संवत्सरं वा भूयो वा सर्व्वमेताऽएवमेव यथापूर्वम् ॥१२॥ अथोदवसानीय-

---

१. वदति. इति. ग.
२. तदाहुरिति. ग.
३. सुकृतं इति. च.
४ ब्रार्हस्पत्यां इति. च.

येष्ट्या यजते । सऽआग्नेयं पञ्चकपालं पुरोडाशं निर्व्वपति तस्य पञ्चपदाः पङ्क्तयो[1] याज्यानुवाक्या भवन्ति यातयामेव वाऽएतदीजानस्य यज्ञो भवति सो ऽस्मात्पराङिव भवत्यग्निर्व्वै सर्व्वं यज्ञाऽअग्नौ हि सर्व्वान्यज्ञांस्तन्वते ये च पाकयज्ञा य्ये चेतरे तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१३॥ तद्यत्पञ्चकपालः पुरोडाशो भवति । पञ्चपदाः[2] पङ्क्तयो याज्यानुवाक्याः पाङ्क्तो वै यज्ञस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति ॥१७॥ तस्य हिरण्यं दक्षिणा । आग्नेयो वाऽएष यज्ञो भवत्यग्ने रेतो हिरण्यं तस्माद्धिरण्यं दक्षिणाऽनड्वान्वा स हि व्वहेनाग्नेयोऽग्निदग्धमिव ह्यस्य व्वहं भवति[3] ॥१५॥ अथो चतुर्गृहीतमेवाज्यं गृहीत्वा । व्वैष्णव्यर्च्चा जुहोत्युरु व्विष्णो व्विक्रमस्वोरु क्षयाय नस्कृधि । घृतं घृतयोने पिब प्र प्र यज्ञपतिं तिर स्वाहे"ति यज्ञो वै व्विष्णुस्तद्यज्ञमेवैतत्पुनरारभते तथास्यायातयामा यज्ञो भवति तथोऽअस्मान्न पराङ् भवति तत्रो य्यच्छक्नुयात्तद्द्यान्नादक्षिणꣳ हविः स्यादिति ह्याहुरथ य्यदेवैपोदवसानीयेष्टिः संतिष्ठतेऽथ सायमाहुतिं जुहोति कालऽएव प्रातराहुतिम् ॥१६॥ Cf[4] का. श. ५. ५. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
चतुर्थप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ. ५. १.)

४. ४. ३.

(आनुबन्ध्यः)

व्वशामालभन्ते । तामालभ्य संज्ञपयन्ति संज्ञप्याह व्वपामुत्खिदेत्युत्खिद्य व्वपामनुमर्शं गर्भमेष्टवै ब्रूयात्स य्यदि न विन्दन्ति किमाद्रियेरन्यद्यु व्विन्दन्ति तत्र प्रायश्चित्तिः क्रियते ॥१॥ न वै तदवकल्पते । यदेकां मन्यमाना ऽएकयैवैतया चरेयुर्यद्वे मन्यमाना द्वाभ्यामिव चरे-

१. पंक्तय इति. ग. २. पञ्चपदा इति. च. ३. भवति. इति. ग. ४. मा. सं. ५.३८.

युः स्थाली चैवोष्णीषं चोपकल्पयितवै ब्रूयात् ॥२॥ अथ व्वपया चरन्ति । य्यथैव तस्यै चरणं व्वपया चरित्वाऽध्वर्युश्च य्यजमानश्च पुनरेतः सऽआहाध्वर्युर्निरूहैतं गर्भमिति तꣳ हुतोदरतो निरूहेदार्त्तीया वै मृतायाऽउदरतो निरूहन्ति यदा वै गर्भः समृद्धो भवति प्रजननेन वै स तर्हि प्रत्यङ्ङेति तमपि व्विरुज्य श्रोणी प्रत्यञ्चं निरूहितवै ब्रूयात् ॥३॥ तं निरुह्यमाणमभिमन्त्रयते । "एजतु दशमास्यो गर्भो जरायुणा सहे"ति स यदाहैजत्विति प्राणमेवास्मिन्नेतद्दधाति दशमास्यऽइति यदा वै गर्भः समृद्धो भवत्यथ दशमास्यस्तमेतदप्यदशमास्यꣳ सन्तं ब्रह्मणैव य्यजुषा दशमास्यं करोति ॥४॥ जरायुणा सहेति । तद्यथा दशमास्यो जरायुणा सहेयादेवमेतदाह "य्यथायं व्वायुरेजति य्यथा समुद्रऽएजती"ति प्राणमेवास्मिन्नेतद्दधात्ये"वायं दशमास्योऽअस्रज्जरायुणा सहे"ति तद्यथा दशमास्यो जरायुणा सहस्रꣳ सेतैवमेतदाह ॥५॥ तदाहुः । कथमेतं गर्भं कुर्यादित्यङ्गादङ्गाद्धैवास्यावद्येयुर्यथैवेतरेषामवदानानामवदानं तदु तथा न कुर्यादुत ह्येषोऽविकृताङ्गो भवत्यधस्तादेव ग्रीवाऽअपिकृत्यैतस्याꣳस्थाल्यामेतं मेधꣳ श्चोतयेयुः सर्व्वेभ्यो वाऽअस्यैषोऽङ्गेभ्यो मेधश्चोतति तदस्य सर्व्वेषामेवाङ्गानामवत्तं भवत्यवद्यन्ति व्वशायाऽअवदानानि य्यथैव तेषामवदानम् ॥६॥ तानि पशुश्रपणे श्रपयन्ति । तदेवैतं मेधꣳ श्रपयन्त्युष्णीषेणावेष्ट्य गर्भं पार्श्वतः पशुश्रपणस्योपनिदधाति यदा श्रृतो भवत्यथ समुद्यावदानान्येवाभिजुहोति नैतं मेधमुद्वासयन्ति पशुं तदेवैतं मेधमुद्वासयन्ति ॥७॥ तं जघनेन चात्वालमन्तरेण य्यूपं चाग्निं च हरन्ति । दक्षिणतो निधाय प्रतिप्रस्थातावद्यत्यथ स्रुचोरुपस्तृणीतेऽथ मनोतायै हविषोऽनुवाच ऽआहावद्यन्ति व्वशाया ऽअवदानानां य्यथैव तेषामवदानम् ॥८॥ अथ प्रचरणीति स्रुग्भवति । तस्यां प्रतिप्रस्थाता मेधायोपस्तृणीते द्विरवद्यति सकृदभिघारयति

१-३. मा. सं. ८. २८. ४. पार्श्वत इति. ग. ५. हरन्ति. इति. ग.

प्रत्यनक्त्यवदानेऽअथानुवाच ऽआहाश्राव्याह प्रेष्येति व्वषट्कृतेऽध्वर्युर्जुहोत्यध्वर्योरनुहोमं जुहोति प्रतिप्रस्थाता[1] ॥९॥ "[2]यस्यै ते यज्ञियो गर्भ" ऽइति । अयज्ञिया वै गर्भास्तमेतद्ब्रह्मणैव य्यजुषा यज्ञियं करोति "[3]य्यस्यै य्योनिर्हिरण्ययी"त्यदो वाऽएतस्यै य्योनिं व्विच्छिन्दन्ति य्यददो निष्कर्षन्त्यमृतमायुर्हिरण्यं तामेवास्याऽएतदमृतां य्योनिं करो"[4]त्यङ्गान्यहुता य्यस्य तं मात्रा समजीगमꣳ स्वाहे"ति य्यदि पुमान्त्स्याद्यद्यु स्त्री स्यादङ्गान्यहुता य्यस्यै तां मात्रा समजीगमꣳ स्वाहेति य्यद्युऽअविज्ञातो गर्भो भवति पुꣳस्कृत्यैव[5] जुहुयात्पुमाꣳ सो हि गर्भाऽअङ्गान्यहुता य्यस्य तं मात्रा समजीगमꣳ स्वाहेत्यदो वाऽएतं मात्रा व्विष्वञ्चं कुर्व्वन्ति यददो निष्कर्षन्ति तमेतद्ब्रह्मणैव य्यजुषा समर्ध्य मध्यतो यज्ञस्य पुनर्मात्रा सङ्गमयति ॥१०॥ अथाध्वर्युर्व्वनस्पतिना चरति। व्वनस्पतिनाध्वर्युश्चरित्वा य्यान्युपभृत्यवदानानि भवन्ति तानि समानयमानऽआहाग्नये स्विष्टकृतेऽनुब्रूहीत्यत्याक्रमति प्रतिप्रस्थाता सऽएतꣳ सर्व्वमेव मेधं गृह्णीतेऽथोपरिष्टाद्घिराज्यस्याभिघारयत्याश्राव्याह प्रेष्येति व्वषट्कृतेऽध्वर्युर्जुहोत्यध्वर्योरनुहोमं जुहोति[6] प्रतिप्रस्थाता ॥११॥ "पुरुदस्मो व्विषुरूपऽइन्दु"रिति बहुदानऽइति हैतद्यदाह पुरुदस्म ऽइति व्विषुरूप ऽइति व्विषुरूपा ऽइव हि गर्भा "ऽइन्दुरन्तर्महिमानमानञ्ज धीर"इत्यन्तर्ह्येष मातर्यक्तो भवत्ये"[7]कपदीं द्विपदीं त्रिपदीं चतुष्पदीमष्टापदीं भुवनानुप्रथन्ताꣳ स्वाहे"ति प्रथयत्येवैनामेतत्सुभूयो ह जयत्यष्टापद्येष्ट्वा य्यदु चानष्टापद्या ॥१२॥ तदाहुः । कैतं गर्भं कुर्यादिति व्वृक्षऽएवैनमुद्ध्युरन्तरिक्षायतना वै गर्भा ऽअन्तरिक्षमिवैतद्यद्वृक्षस्तदेनꣳ स्वऽएवायतने प्रतिष्ठापयति तदु वा ऽआहुर्य ऽएनं तत्रानुव्याहरेद्वृक्ष ऽएनं मृतमुद्धास्यन्तीति तथा हैव स्यात् ॥१३॥ अप ऽएवैनमभ्यवहरेयुः ।

---

१. प्रतिप्रस्थाता. इति. ग. २–४. मा. सं. ८. २९. ५. पुंस्कृत्यैव इति.च.
६. जुहोति इति. ग. ७–९. मा. सं. ८. ३०.

आपो वाऽ अस्य सर्व्वस्य प्रतिष्ठा तदेनमप्स्वेव प्रतिष्ठापयति तदु वा ऽआहुर्यऽएनं तत्रानुव्याहरेदप्स्वेव मरिष्यतीति तथा हैव स्यात् ॥१४॥ आखूत्कर ऽएवैनमुपाकिरेयुः । इयं वा ऽअस्य सर्व्वस्य प्रतिष्ठा तदेनमस्यामेव प्रतिष्ठापयति तदु वा ऽआहुर्य ऽएनं तत्रानुव्याहरेत्क्षिप्रे ऽस्मै मृताय श्मशानं करिष्यन्तीति तथा हैव स्यात् ॥१५॥ पशुश्रपणऽएवैनं मरुद्भ्यो जुहुयात् । अहुतादो वै देवानां मरुतो व्विड्हुतमिवैतद्यदश्रृतो गर्भ ऽआहवनीयाद्वा ऽएष ऽआहृतो भवति पशुश्रपणस्तथाह न बहिर्द्धा यज्ञाद्भवति न प्रत्यक्षमिवाहवनीये देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ॥१६॥ स हुत्वैव समिष्टयजूंषि । प्रथमावशान्तेष्वङ्गारेष्वेतꣳसोष्णीषं गर्भमादत्ते तं प्राङ् तिष्ठञ्जुहोति मारुत्यर्चा "मरुतो व्यस्य हि क्षये पाथा दिवो व्विमहसः । स सुगोपातमो जन" ऽइति न स्वाहाकरोत्यहुतादो वै देवानां मरुतो व्विड्हुतमिवैतद्यदस्वाहाकृतं देवानां वै मरुतस्तदेनं मरुत्स्वेव प्रतिष्ठापयति ॥१७॥ अथाङ्गारैरभिसमूहति । "महीं द्यौः पृथिवीं च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभि"रिति ॥१८॥ (शतम् २७००) Cf. का. श. ५. ६. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
चतुर्थप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ.५.२.)

४. ४. ४.

(षोडशिग्रहः)

इन्द्रो ह वै षोडशी । तं नु सकृदिन्द्रं भूतान्यत्यरिच्यन्त प्रजा वै भूतानि ता हैनेन सदृग्भवमिवासुः ॥१॥ इन्द्रो ह वाऽईक्षांचक्रे । कथं न्वहमिदꣳ सर्व्वमतितिष्ठेयमर्व्वागेव मदिदꣳ सर्व्वꣳ स्यादिति सऽएतं ग्रहमपश्चत्तमगृह्णीत सऽइदꣳ सर्वमेवात्यतिष्ठदर्वागेवास्मादिदꣳ सर्व्वमभवत्सर्व्वꣳ ह वाऽइदमतितिष्ठत्यर्व्वागेवा-

१. मा. सं. ८. ३१. २. मा. सं. ८. ३२. ३. षोडशी इति च.

स्मादिदꣳसर्व्वं भवति य्यस्यैवं व्विदुष एतं[1] ग्रहं गृह्णन्ति ॥२॥ तस्मादेतदृषिणाभ्यनूक्तम् । "न ते महित्वमनुभूदध द्यौर्यदन्यया स्फिग्या क्षामवस्था"ऽइति न ह वाऽअस्यासौ द्यौरन्यतरां चन स्फिगीमनुबभूव तथेदꣳसर्व्वमेवात्यातिष्ठदर्व्वागेवास्मादिदꣳ सर्वमभवत्सर्व्वꣳ ह वाऽइदमतितिष्ठत्यर्व्वागेवास्मादिदꣳ सर्व्वं भवति य्यस्यैवं व्विदुष ऽएतं ग्रहं गृह्णन्ति ॥३॥ तं वै हरिवत्यर्च्चा गृह्णाति[2] । हरिवतीषु स्तुवते हरिवतीरनुशꣳसति व्वीर्यं वै हरऽइन्द्रोऽसुराणाꣳ सपत्नानाꣳ समवृङ्क्त तथोऽएवैषऽएतद्वीर्यꣳ हरः सपत्नानाꣳ संवृङ्क्ते तस्माद्धरिवत्यर्च्चा गृह्णाति हरिवतीषु स्तुवते हरिवतीरनुशꣳसति ॥४॥ तं वाऽअनुष्टुभा गृह्णाति । गायत्रं वै प्रातःसवनं त्रैष्टुभं माध्यन्दिनꣳ सवनं जागतं तृतीयसवनमथातिरिक्तानुष्टुबत्येवैनमेतद्रेचयति तस्मादनुष्टुभा गृह्णाति[3] ॥५॥ तं वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयो वाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिः स्रक्तिभिराप्नोत्यत्येवैनं चतुर्थ्या स्रक्त्या रेचयति तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥ ६ ॥

(अर्द्धप्रपाठकः ६३)

तं वै प्रातःसवने गृह्णीयात् । आग्रयणं गृहीत्वा स प्रातःसवने गृहीतऽएतस्मात्कालादुपशेते तदेनꣳ सर्व्वाणि सवनान्यतिरेचयति ॥७॥ माध्यन्दिने वैनꣳ सवने गृह्णीयात् । आग्रयणं गृहीत्वा सोऽएषा मीमाꣳसैव प्रातःसवनऽएवैनं गृह्णीयादाग्रयणं गृहीत्वा[4] स प्रातःसवने ग्रहीतऽएतस्मात्कालादुपशेते ॥८॥ अथातो गृह्णात्येव । "आतिष्ठ व्वृत्रहन्नथं युक्ता ते ब्रह्मणा हरी । अर्व्वाचीनꣳसु ते मनो ग्रावा कृणोतु व्वग्नुना । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते य्योनिरिन्द्राय त्वा षोडशिन"ऽ

१. एतं इति. ग २. गृह्णाति. इति. ग ३. गृह्णाति इति. ग.
४. गृहीत्वा इति. च. ५. मा. सं. ८. ३३.

इति ॥९॥ अनया वा । "युक्ष्वा हि केशिना हरी व्वृषणा कक्ष्यप्रा[2] । अथा नऽइन्द्र सोमपा गिरामुपश्रुतिं चर । उपयामगृहीतोऽसीन्द्राय त्वा षोडशिनऽएष ते य्योनिरिन्द्राय त्वा षोडशिन"ऽइति ॥१०॥ अथेत्य स्तोत्रमुपाकरोति । 'सोमोऽत्यरेत्युपावर्त्तध्व'मित्यत्येवैनमेतद्रेचयति तं वै पुरास्तमयादुपाकरोत्यस्तमितेऽनुशꣳसति तदेनेनाहोरात्रे सन्दधाति तस्मात्पुरास्तमयादुपाकरोत्यस्तमितेऽनुशꣳसति ॥११॥ Cf. का. श. ५.६.१; तं.सै.६.६.११; मै.सं. ४.७.६.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
चतुर्थप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ५. ३.)

४. ४. ५.

(अतिग्राह्याः ग्रहाः)

सर्वे ह वै देवाः[3] । अग्रे सदृशाऽआसुः सर्व्वे पुण्यास्तेषाꣳ सर्व्वेषाꣳ सदृशानाꣳ सर्व्वेषां पुण्यानां त्रयोऽकामयन्तातिष्ठावानः स्यामेत्यग्निरिन्द्रः सूर्यः ॥१॥ तेऽर्च्चन्तः श्राम्यन्तश्चेरुः[4] । तऽएतानतिग्राह्यान्ददृशुस्तानत्यगृह्णत तद्यदेनानत्यगृह्णत तस्मादतिग्राह्या नाम तेऽतिष्ठावानोऽभवन्यथैतऽएतदतिष्ठेवातिष्ठेव ह वै भवति य्यस्यैवं व्विदुषऽएतान् ग्रहान् गृह्णन्ति ॥२॥ नो ह वाऽइदमग्रेऽग्नौ व्वर्च्चऽ आस । य्यदिदमस्मिन्वर्च्चः सोऽकामयतेदं मयि व्वर्च्चः स्यादिति सऽएतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्वर्च्चऽआस ॥३॥ नो ह वाऽइदमग्रऽइन्द्रऽओजऽआस । य्यदिदमस्मिन्नोजः सोऽकामयतेदं मय्योजः स्यादिति सऽएतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतदोजऽआस ॥४॥ नो ह वाऽइदमग्रे सूर्ये भ्राजऽआस । य्यदिदमस्मिन् भ्राजः सोऽकामयतेदं मयि भ्राजः स्यादिति सऽएतं ग्रहमपश्यत्तमगृह्णीत ततोऽस्मिन्नेतद्भ्राजऽआसैतानि ह वै तेजाꣳस्येता-

१. मा. सं. ८. ३४. २. कक्ष्यप्रा इति ग.
३. देवा इति. च. ४. चेरुः इति. ग.

नि व्वीर्याण्यात्मन् धत्ते य्यस्यैवं व्विदुषऽएतान् ग्रहान् गृह्णन्ति ॥५॥ तान्वै प्रातःसवने गृह्णीयात् । आग्रयणं गृहीत्वाऽऽत्मा वाऽआग्रयणो बहु वाऽइदमात्मनऽएकैकमतिरिक्तं क्लोमहृदयं त्वद्यत्त्वत् ॥६॥ माध्यन्दिने वैनान्त्सवने गृह्णीयात् । उक्थ्यं गृहीत्वोपाकरिष्यन्वा पूतभृतोऽयꣳ ह वाऽअस्यैषोऽनिरुक्तऽआत्मा य्यदुक्थ्यः सोऽएषा मीमाꣳ सैव प्रातः सवनऽएवैनान् गृह्णीयादाग्रयणं गृहीत्वा[1] ॥७॥ ते माहेन्द्रस्यैवानु होमꣳ हूयन्ते[2] । एष वा ऽइन्द्रस्य निष्केवल्यो ग्रहो य्यन्माहेन्द्रोऽप्यस्यैतन्निष्केवल्यमेव स्तोत्रं निष्केवल्यꣳ शस्त्रमिन्द्रो वै य्यजमानो य्यजमानस्य वाऽएते कामाय गृह्यन्ते तस्मान्माहेन्द्रस्यैवानु होमꣳहूयन्ते ॥८॥ अथातो गृह्णात्येव । "अग्ने पवस्व[3] स्वपाऽअस्मे व्वर्च्चः सुवीर्य्यम् । दधद्रयिं मयि पोषम् । उपयामगृहीतोऽस्यग्नये त्वा व्वर्च्चसऽएष ते योनिरग्नये त्वा व्वर्च्चसे" ॥९॥ "उत्तिष्ठन्नोजसा[4] । सह पीत्वा शिप्रेऽअवेपयः । सोममिन्द्रं चमू सुतम् । उपयामगृहीतोऽसीन्द्राय त्वौजसऽएष ते य्योनिरिन्द्राय त्वौजसे" ॥१०॥ "अदृश्रमस्य केतवः । व्विरश्मयो जनां २॥ऽअनु । भ्राजन्तोऽअग्नयो यथाऽउपयामगृहीतोसि सूर्य्याय त्वा भ्राजायैष ते य्योनिः सूर्य्याय त्वा भ्राजाये"ति ॥११॥ तेषां भक्षः । "अग्ने व्वर्च्चस्विन्वर्च्चस्वांस्त्वं देवेष्वसि व्वर्च्चस्वानहं मनुष्येषु भूयासमिन्द्रौजिष्ठौजिष्ठस्त्वं देवेष्वस्योजिष्ठोऽहं मनुष्येषु भूयासꣳसूर्य भ्राजिष्ठ भ्राजिष्ठस्त्वं देवेष्वसि भ्राजिष्ठो ऽहं मनुष्येषु भूयास"मित्येतानि ह वै भ्राजाꣳस्येतानि व्वीर्याण्यात्मन्धत्ते य्यस्यैवं व्विदुष ऽएतान् ग्रहान् गृह्णन्ति ॥१२॥ तान्वै पृष्ठ्ये षडहे गृह्णीयात् । पूर्व्वे त्र्यहऽआग्नेयमेव प्रथमेऽहन्नैन्द्रं द्वितीये सौर्यं तृतीय ऽएवमेवान्वहम्[7] ॥१३॥ तानु हैकऽउत्तरे त्र्यहे गृह्णन्ति । तदु तथा न कुर्यात्पूर्व्वे

---

१. गृहीत्वा इति. ग. २. हूयन्ते इति. ग. ३. मा. सं. ८. ३८.
४. मा. सं. ८. ३९. ५. मा. सं. ८. ४०. ६. मा. सं. ८. ३८—४०
७. अन्वहं इति. ग.

ऽएवैनांस्त्र्यहे गृह्णीयाद्यद्युत्तरे त्र्यहे ग्रहीष्यन्त्स्यात्पूर्व ऽएवेनांस्त्र्यहे गृहीत्वाथोत्तरे त्र्यहे गृह्णीयादेवमेव यथापूर्वं विश्वजिति सर्वपृष्ठ ऽएकाह[1]ऽएव गृह्यन्ते ॥१४॥ Cf का. श.५. ६. २; तै. सं. ६. ८; मै. सं. ४. ७. ३; कपिष्ठ. ४६. २, ३.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे चतुर्थप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ५. ४.)

४. ४. ६.

एष वै प्रजापतिः । यऽएष यज्ञस्तायते यस्मादिमाः प्रजाः[2] प्रजाताऽएतमेवाप्येतर्ह्यनु प्रजायन्ते ॥१॥ उपाꣳशुपात्रमेवान्वजाः प्रजायन्ते । तद्वैतत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्त्ते प्रजायन्ते[3] ॥२॥ अन्तर्यामपात्रमेवान्ववयः प्रजायन्ते[4] । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्त्ते प्रजायन्ते॥३॥ अथ यदेतयोरुभयोः । सह सतोरुपाꣳशुं पूर्वं जुहोति तस्मादु सह सतो ऽजाविकस्योभयस्यैवाजाः पूर्वा यन्त्यनूच्यो ऽवयः ॥४॥ अथ यदुपाꣳशुꣳ हुत्वा । ऊर्ध्वमुन्मार्ष्टि तस्मादिमा ऽअजा ऽअराडीतरा ऽआक्रममाणाऽइव यन्ति ॥५॥ अथ यदन्तर्यामꣳ हुत्वा । अवाञ्चमवमार्ष्टि तस्मादिमा ऽअवयो ऽवाचीनशीर्ष्ण्यः खनन्त्यऽइव यन्त्येता वै प्रजापतेः प्रत्यक्षतमां यदजावयस्तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीनिति जनयन्ति ॥६॥ शुक्रपात्रमेवानु मनुष्याः प्रजायन्ते । तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्त्ते प्रजायन्ते ऽएष वै शुक्रो य एष तपत्येष ऽउ ऽएवेन्द्रः पुरुषो वै पशूनामैन्द्रस्तस्मात्पशूनामीष्टे ॥७॥ ऋतुपात्रमेवान्वेकशफं प्रजायते ।

---

१. एकाह इति. ग. २. प्रजा इति. च.
३. प्रजायन्ते इति. च. ४. प्रजायन्ते इति. च.

तद्वै तत्पुनर्यज्ञे प्रयुज्यते तस्मादिमाः प्रजाः पुनरभ्यावर्तं प्रजायन्त ऽइतीव वाऽऋतुपात्रमितीवैकशफस्य शिर ऽआग्रयणपात्रमुक्थ्यपात्रमादित्यपात्रमेतान्येवानु गावः प्रजायन्ते तानि वै तानि पुनर्यज्ञे प्रयुज्यन्ते तस्मादिमाः प्रजाः पुनरभ्यावर्त्तं प्रजायन्ते[1] ॥८॥ अथ य्यदजाः । कनिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेतास्त्रिः संवत्सरस्य व्विजायमाना द्वौ त्रीनिति जनयन्त्यः कनिष्ठाः कनिष्ठानि हि पात्राण्यनु प्रजायन्ते[2] ॥९॥ अथ यद्गावः । भूयिष्ठानि पात्राण्यनु प्रजायन्ते तस्मादेताः सकृत्संवत्सरस्य व्विजायमाना ऽएकैकं जनयन्त्यो भूयिष्ठा भूयिष्ठानि हि पात्राण्यनु प्रजायन्ते[3] ॥१०॥ अथ द्रोणकलशे। अन्ततो हारियोजनं ग्रहं गृह्णाति प्रजापतिर्वै द्रोणकलशः स ऽइमाः प्रजा ऽउपावर्त्तते ता ऽअवति ता ऽअभिजिघ्रत्येतद्वा ऽएना अवति य्यदेनाः प्रजनयति ॥११॥ पञ्च ह त्वेव तानि पात्राणि । यानीमाः प्रजा ऽअनु प्रजायन्ते समानमुपाꣳश्वन्तर्यामयोः शुक्रपात्रमृतुपात्रमाग्रयणपात्रमुक्थ्यपात्रं पञ्च वा ऽऋतवः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिर्यज्ञो य्यद्य षडेवर्त्तवः संवत्सरस्येत्यादित्यपात्रमेवैतेषाꣳ षष्ठम् ॥१२॥ एकꣳह त्वेव तत्पात्रम् । यदिमाः प्रजा ऽअनु प्रजायन्तऽउपाꣳशुपात्रमेव प्राणो ह्युपाꣳशुः प्राणो हि प्रजापतिः प्रजापतिꣳह्येवेदꣳ सर्वमनु ॥१३॥ Cf. का. श. ५. ६. ६; तै. सं. ६.५.११.

इति माध्यन्दिनीये शतपथब्राह्मणे चतुर्थकाण्डे चतुर्थप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ. ५. ५.)

४. ४. ७.

(ग्रहावेक्षणम्)

एष वै प्रजापतिः। यऽएष यज्ञस्तायते य्यस्मादिमाः प्रजाः प्रजाता ऽएतम्वेवाप्येतर्ह्यनु प्रजायन्ते स ऽआश्विनं ग्रहं गृहीत्वावकाशा-

---

१-३. प्रजायन्ते इति च.

नवकाशयति ॥१॥ स ऽउपाꣳशुमेव प्रथममवकाशयति । "प्राणाय[1] मे वर्चोदा वर्चसे पवस्वे"त्यथोपाꣳशुसवनं "व्यानाय मे वर्चोदा वर्चसे पवस्वे"त्यथान्तर्यामं "मुदानाय मे वर्चोदा वर्चसे पवस्वे"त्यथैन्द्रवायवं "वाचे मे वर्चोदा वर्चसे पवस्वे"त्यथ मैत्रावरुणं "क्रतूदक्षाभ्यां मे वर्चोदा वर्चसे पवस्वे"त्यथाश्विनꣳ "श्रोत्राय मे वर्चोदा वर्चसे पवस्वे"त्यथ शुक्रामन्थिनौ "चक्षुर्भ्यां मे वर्चोदसौ वर्चसे पवेथा"मिति ॥२॥ अथाग्रयणम् । "आत्मने मे वर्चोदा वर्चसे पवस्वे"त्यथोक्थ्य "मोजसे मे वर्चोदा वर्चसे पवस्वे"त्यथ ध्रुवमा "युषे मे वर्चोदा वर्चसे पवस्वे"त्यथाम्भृणौ "विश्वाभ्यो मे प्रजाभ्यो वर्चोदसौ वर्चसे पवेथा"मिति वैश्वदेवौ वाऽअम्भृणावतो हि देवेभ्य ऽउन्नयन्त्यतो मनुष्येभ्योऽतः पितृभ्यस्तस्माद्वैश्वदेवावम्भृणौ ॥३॥ अथ द्रोणकलशम् । "कोऽसि कतमोऽसी"ति प्रजापतिर्वै कः "कस्यासि को नामासी"ति प्रजापतिर्वै को नाम "य्यस्य ते नामामन्महे"ति मनुते ह्यस्य नाम "यं त्वा सोमेनातीतृपामे"ति तर्पयति ह्येनꣳसोमेन स ऽआश्विनं ग्रहं गृहीत्वान्वङ्गमाशिषमाशास्ते "सुप्रजाः प्रजाभिः स्या"मिति तत्प्रजामाशास्ते "सुवीरो वीरै"रिति तद्वीरानाशास्ते "सुपोषः पोषै"रिति तत्पुष्टिमाशास्ते ॥४॥ तान्वै न सर्वमिवावकाशयेत् । यो न्वेव ज्ञातस्तमवकाशयेद्यो वास्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनान् प्राप्नुयात्स ऽआश्विनं ग्रहं गृहीत्वा कृत्स्नं यज्ञं जनयति तं कृत्स्नं यज्ञं जनयित्वा तमात्मन्धत्ते तमात्मन् कुरुते ॥५॥ Cf. का. श. ५. ६. ३.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
चतुर्थप्रपाठके सप्तमं ब्राह्मणम् ॥ (अ. ५. ६.)

---

१. "प्राणाय म" इत्यारभ्य "सुपोषः पोषैः" इत्यन्ता ग्रहावेक्षणमन्त्राः मा. संहितायां (२७–२९.) कण्डिकास्वाम्नाताः । तत्र द्रष्टव्याः । तैत्तिरीयसंहितायामिमे मन्त्रा एतेषां विधयश्च तृतीयकाण्डे द्वितीयप्रपाठके तृतीयेऽनुवाके आम्नाताः ।

४. ४. ८.

(सोमप्रायश्चित्तानि)

ता वाऽएताः । चतुस्त्रिꣳशद्व्याहृतयो भवन्ति प्रायश्चित्तयो नामैष वै प्रजापतिर्यऽएष यज्ञस्तायते यस्मादिमाः प्रजाः प्रजाताऽएतम्वेवाप्येतर्ह्यनु प्रजायन्ते ॥१॥ अष्टौ वसवः । एकदश रुद्रा द्वादशादित्या इमेऽएव द्यावापृथिवी त्रयस्त्रिꣳशौ त्रयस्त्रिꣳशद्वै देवाः प्रजापतिश्चतुस्त्रिꣳशस्तदेनं प्रजापतिं करोत्येतद्वा ऽअस्त्येतद्व्यमृतं यद्व्यमृतं तद्व्यस्त्येतदु तद्यन्मर्त्यꣳ स एष प्रजापतिः सर्वं वै प्रजापतिस्तदेनं प्रजापतिं करोति तस्मादेताश्चतुस्त्रिꣳशद्व्याहृतयो भवन्ति प्रायश्चित्तयो नाम ॥२॥ ता ह्येके । यज्ञं तन्वऽइत्याचक्षते यज्ञस्य ह त्वेवैतानि सर्वाणि सऽएष यज्ञस्तायमानऽएताऽएव देवता भवन्नेति ॥३॥ सा यदि घर्मदुघा ह्वलेत् । अन्यामुपसंक्रामेयुः स यस्यामेवैनां वेलायां पुरा पिन्वयन्ति तद्वैवैनामुदीचीꣳ स्थापयेदग्रेण वा शालां प्राचीम् ॥४॥ तद्येऽएते ऽअभितः । पुच्छकाण्डꣳशिखण्डास्थेऽउच्छ्रयाते तयोर्यद्दक्षिणं तस्मिन्नेताश्चतुस्त्रिꣳशतमाज्याहुतीर्जुहोत्येतावान्वै सर्वो यज्ञो यावत्यऽएताश्चतुस्त्रिꣳशद्व्याहृतयो भवन्ति तदस्यां कृत्स्नमेव सर्वं यज्ञं दधात्येषा ह्यतो घर्मं पिन्वतऽएषो तत्र प्रायश्चित्तिः क्रियते ॥५॥ अथ यद्यज्ञस्य ह्वलेत् । तत्समन्वीक्ष्य जुहुयाद्दीक्षोपसत्स्वाहवनीये प्रसुतऽआग्नीध्रे विवाऽएतद्यज्ञस्य पर्व स्रꣳसते यद्ध्वलति सा यैव तर्हि तत्र देवता भवति तयैवैतद्भिषज्यति तया संदधाति ॥६॥ अथ यदि स्कन्देत् । तदद्भिरुपनिनयेदद्भिर्वाऽइदꣳसर्वमाप्तꣳ सर्वस्यैवाप्त्यै वैष्णव वारुण्यर्चा यद्वाऽइदं किं चार्च्छति वरुणऽएवेदꣳ सर्वमार्पयति यथोरोचसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा । या पत्येतेऽअप्रतीता सहोभिर्विष्णूऽअगन्वरुणा पूर्वहूताविति यज्ञो वै विष्णुस्तस्यैतदार्च्छ-

ति व्वरुणो वाऽआर्पयिता तद्यस्याश्चैवैतद्देवतायाऽआर्च्छति यो च देवतापर्यति ताभ्यामेवैतदुभाभ्यां भिषज्यत्युभाभ्याᳬ संन्दधाति ॥७॥ अथोऽअभ्येव मृशेत् । "देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रविणमष्टु पितॄन् पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यं कं च लोकमगन्यज्ञस्ततो मे भद्रमभूदि"त्येवैतदाह ॥८॥ तद्धस्मै तदारुणिराह । किᳬ स यजेत यो यज्ञस्य व्यृद्धया पापीयान्मन्येत यज्ञस्य वाऽअहं व्यृद्ध्या श्रेयान् भवामीत्येतद्ध स्म स तदभ्याह यदेताऽआशिषऽउपगच्छति ॥९॥ Cf. का. श. ५. ७. ४

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे

चतुर्थप्रपाठकेऽष्टमं ब्राह्मणम् ॥ (अ. ५. ७.)

४. ४. ९.

(सहस्रदक्षिणा)

तद्यत्रैतत्त्रिरात्रे सहस्रं ददाति । तदेषा साहस्रीक्रियते स प्रथमेऽहंस्त्रीणि च शतानि नयति त्रयस्त्रिᳬशतं चैवमेव द्वितीयेऽहंस्त्रीणि चैव शतानि नयति त्रयस्त्रिᳬशतं चैवमेव तृतीयेऽहंस्त्रीणि चैव शतानि नयति त्रयस्त्रिᳬशतं चाथैषा साहस्र्यतिरिच्यते ॥१॥ सा वै त्रिरूपा स्यादित्याहुः एतद्ध्यस्यै रूपतममिवेति रोहिणी ह त्वेवोपध्वस्ता स्यादेतद्धैवास्यै रूपतममिव ॥२॥ सा स्यादप्रवीता । व्वाग्वाऽएषा निदानेन यत्साहस्र्ययातयाम्नी व्वाऽइयं व्वागयातयाम्न्यप्रवीता तस्मादप्रवीता स्यात् ॥३॥ तां प्रथमेऽहन्नयेत् । व्वाग्वाऽएषा निदानेन यत्साहस्री तस्याऽएतत्सहस्रं व्वाचः प्रजातं पूर्वाह्णेषेति पश्चादेनां प्रजातमन्वेत्युत्तमेवैनामहन्नयेत्पूर्वमहास्यै प्रजातमेति पश्चादेषान्वेति सोऽएषा मीमाᳬसैवोत्तमऽएवैनामहन्नयेत्पूर्वमहास्यै प्रजातमेति पश्चादेषान्वेति ॥४॥ तामुत्तरेण हविर्द्धाने ।

१. मा. सं. ८. ६०. २. चैवमेव. इति. ग.

दक्षिणेनाग्नीध्रं द्रोणकलशमवघ्रापयति यज्ञो वै द्रोणकलशो यज्ञमेवैनामेतद्दर्शयति[1] ॥५॥ "आजिघ्रकलशम्[2]। मह्या त्वा ध्विशान्त्विन्दव" ऽइति रिरिचानऽ इव वाऽएष भवति यः सहस्रं ददाति तमेवैतद्रिरिचानं पुनराप्याययति यदाहाजिघ्रकलशं मह्या त्वा ध्विशान्त्विन्दव ऽइति ॥६॥ "पुनरूर्जा निवर्त्तस्वे"ति[3]। तद्वेव रिरिचानं पुनराप्याययति यदाह पुनरूर्ज्जा निवर्त्तस्वेति ॥७॥ "सा नः[4] सहस्रं धुक्ष्वे"ति तत्सहस्रेण रिरिचानं पुनराप्याययति यदाह सा नः सहस्रं धुक्ष्वेति ॥८॥ "उरुधारा[5] पयस्वती पुनर्माविशताद्रयि"रिति। तद्वेव रिरिचानं पुनराप्याययति यदाह पुनर्माविशतादिरयिरिति ॥९॥ अथ दक्षिणे कर्णऽआजपति। "इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेऽदिति सरस्वति महि ध्विश्रुति। एता तेऽअघ्न्ये नामानि देवेभ्यो मा सुकृतं ब्रूता" दिति ध्वोचेरिति वैतानि हवाऽअस्यै देवत्रा नामानि सा यानि ते देवत्रा नामानि तैर्मा देवेभ्यः सुकृतं ब्रूतादित्येवैतदाह ॥१०॥ तामवार्ज्जन्ति। सा यद्यपुरुषाभिवीता प्राचीयात्तत्र ध्विद्यादरात्सीदयं य्यजमानः कल्याणं लोकमजैषीदिति यद्युदीचीयाच्छ्रेयानस्मिल्लोके य्यजमानो भविष्यतीति ध्विद्याद्यदि प्रतीचीयादिभ्यतिल्विलऽइव धान्यतिल्विलो भविष्यतीति ध्विद्याद्यदि दक्षिणेयात्क्षिप्रेऽस्माल्लोकाद्यजमानः प्रैष्यतीति ध्विद्यादेतानि ध्विज्ञानानि ॥११॥ तद्या ऽएतास्तिस्रस्तिस्रस्त्रिꣳशत्यधि भवन्ति। तास्वेतामुपसमाकुर्वन्ति ध्वि वाऽएतां ध्विराजं व्वृहन्ति यां व्याकुर्वन्ति विच्छिन्नोऽएषा ध्विराड्या ध्विवृढा दशाक्षरा वै ध्विराट्तत्कृत्स्नां ध्विराजꣳसन्दधाति ताꣳ होत्रे दद्याद्धोता हि साहस्रस्तस्मात्ताꣳ होत्रे दद्यात् ॥१२॥ द्वौ वोन्नेतारौ कुर्वीत। तयोर्यतरो नाश्रावयेत्तस्माऽएनां दद्याद्वयृद्धो वाऽएष ऽउन्नेता य ऽऋत्विक्सन्नाश्रावयति व्यृद्धोऽएषा ध्विराड्या ध्विवृढो तद्वयृद्ध ऽएवैतद्वयृद्धं दधाति ॥१३॥ तदाहुः[6]। न सहस्रेऽ-

१. दर्शयति इति. ग. २–५. मा. सं. ८. ४२.
६. मा. सं. ८. ४३. ७. तदाहुरिति. च.

धि किंचन दद्यात्सहस्रेण ह्येव सर्वान् कामानाप्नोतीति तदु होवाचासुरिः काममेव दद्यात्सहस्रेणाह सर्वान् कामानाप्नोति कामेनोऽऽस्येतद्दत्तं भवतीति[1] ॥१४॥ अथ यदि रथं वा युक्तं दास्यन्त्स्यात्। यद्वा वशायै वा वपायाꣳ हुतायां दद्यादुदवसानीयायां वेष्टौ ॥१५॥ स वै दक्षिणा नयन्। अन्यूना दशतो नयेद्यस्माऽएकां दास्यन्त्स्याद्दशभ्यस्तेभ्यो दशतमुपावर्त्तयेद्यस्मै द्वे दास्यन्त्स्यात्पञ्चभ्यस्तेभ्यो दशतमुपावर्त्तयेद्यस्मै तिस्रो दास्यन्त्स्यात्तिसृभ्यस्तेभ्यो दशतमुपावर्त्तयेद्यस्मै पञ्च दास्यन्त्स्याद्द्वाभ्यां ताभ्यां दशतमुपावर्त्तयेदेवमा शतात्तथो हास्यैषां यूना ध्विराडमुष्मिँल्लोके कामदुघा भवति ॥१६॥ Cf. का. श. ५. ६. ५; तै. सं. ७. १. ५–७.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
चतुर्थप्रपाठके नवमं ब्राह्मणम् ॥ (अ. ५. ८.)

चतुर्थः प्रपाठकस्समाप्तः ॥

(कण्डिकासंख्या १२५ ॥)

४. ५. १.

(व्यूढद्वादशाहधर्माः)

तद्यत्रैतद्द्वादशाहेन व्यूढच्छन्दसा यजते। तद्ग्रहान्व्यूहति व्यूहतऽउद्गाता च होता च छन्दाꣳसि सऽएष प्रज्ञातऽएव पूर्वस्त्र्यहो भवति समूढच्छन्दास्तदैन्द्रवायवाग्रान् गृह्णाति[2] ॥१॥ अथ चतुर्थेऽहन् व्यूहति। ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान् गृह्णाति प्राजापत्यं वाऽएतच्चतुर्थमहर्भवत्यात्मा वाऽआग्रयणऽआत्मा वै प्रजापतिस्तस्मादाग्रयणाग्रान् गृह्णाति[4] ॥२॥ तं गृहीत्वा न सादयति। प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्तऽएवोपासते-

१. भवतीति इति. च. २. गृह्णाति. इति. ग.
३. आग्रयाण इति. ग. ४. गृह्णाति. इति. ग.

ऽथ ग्रहान् गृह्णात्यथ यदा ग्रहान् गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ हिंकृत्य सादयत्यथैतत्प्रज्ञातमेव पञ्चममहर्भवति तदैन्द्रवायवाग्रान् गृह्णाति ॥३॥ अथ षष्ठेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तच्छुक्राग्रान् गृह्णात्यैन्द्रं वाऽएतत्षष्ठमहर्भवत्येष वै शुक्रो य्य ऽएष तपत्येष ऽउऽएवैन्द्रस्तस्माच्छुक्राग्रान् गृह्णाति ॥४॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान् मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्त ऽएवोपासतेऽथ ग्रहान् गृह्णात्यथ यदा ग्रहान् गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयति ॥५॥ अथ सप्तमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तच्छुक्राग्रान् गृह्णाति बार्हतं वाऽएतत्सप्तममहर्भवत्येष वै शुक्रो य्यऽएष तपत्येष ऽउऽएव बृहंस्तस्माच्छुक्राग्रान् गृह्णाति॥६॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्त ऽएवोपासतेऽथ ग्रहान् गृह्णात्यथ यदा ग्रहान् गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳ सादयत्यथैतत्प्रज्ञातमेवाष्टममहर्भवति तदैन्द्रवायवाग्रान् गृह्णाति ॥७॥ अथ नवमेऽहन्व्यूहति । ग्रहान्व्यूहन्ति छन्दाꣳसि तदाग्रयणाग्रान् गृह्णाति जागतं वाऽएतन्नवममहर्भवत्यात्मा वाऽआग्रयणः सर्वं वाऽइदमात्मा जगत्तस्मादाग्रयणाग्रान् गृह्णाति ॥८॥ तं गृहीत्वा न सादयति । प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यत्सादयेत्तं धारयन्त ऽएवोपासतेऽथ ग्रहान् गृह्णात्यथ यदा ग्रहान् गृह्णात्यथ यत्रैवैतस्य कालस्तदेनꣳहिंकृत्य सादयति ॥९॥ तदाहुः । न व्यूहेद्ग्रहान् प्राणा वै ग्रहा नेत्प्राणान्मोहयानीति मोहयेद्ध प्राणान्यद्व्यूहेत्तस्मान्न व्यूहेत् ॥१०॥ तदु व्यूहेदेव अङ्गानि वै ग्रहाः कामं वाऽइमान्यङ्गानि व्यत्यासꣳशेते तस्मादु व्यूहेदेव ॥११॥ तदु नैव व्यूहेत् । प्राणा वै ग्रहा नेत्प्राणान् मोहयानीति मोहयेद्ध प्राणान्यद्व्यूहेत्तस्मान्न व्यूहेत् ॥१२॥ किं नु तत्राध्वर्योः । य्यदुद्गाता च होता च छन्दाꣳसि व्यूहत ऽएतद्वाऽअध्वर्युर्व्यूहति ग्रहा-

---

१. सादयति इति. ग.

न्यदैन्द्रवायवाग्रान् प्रातःसवने गृह्णाति शुक्राग्रान्माध्यन्दिने सवनऽ-आग्रयणाग्रांस्तृतीयसवने ॥१३॥ Cf. का. श. ५. ६. ६.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके प्रथमं ब्राह्मणम् । (अ. ५. ९.)

४. ५. २.

(सोमापहरणादौ विधिः)

यदि सोममपहरेयुः । विधावतेच्छतेति ब्रूयात्स यदि विन्दन्ति किमाद्रियेरन्यद्यु न विन्दति तत्र प्रायश्चित्तिः क्रियते ॥१॥ द्वयानि वै फाल्गुनानि । लोहितपुष्पाणि चारुणपुष्पाणि च स यान्यरुणपुष्पाणि फाल्गुनानि तान्यभिषुणुयादेष वै सोमस्य न्यङ्गो यदरुणपुष्पाणि फाल्गुनानि तस्मादरुणपुष्पाण्यभिषुणुयात् ॥२॥ यद्यरुणपुष्पाणि न विन्देयुः । श्येनहृतमभिषुणुयाद्यत्र वै गायत्री सोममच्छापतत्तस्याऽआहरन्त्यै सोमस्याछ्छुरपतत्तच्छ्येनहृतमभवत्तस्माच्छ्येनहृतमभिषुणुयात् ॥३॥ यदि श्येनहृतं न विन्देयुः । आदारानभिषुणयाद्यत्र वै यज्ञस्य शिरोऽच्छिद्यत तस्य यो रसो व्यप्रुष्यत्ततऽआदाराः समभवंस्तस्मादादारानभिषुणुयात् ॥४॥ यद्यादारान्न विन्देयुः । अरुणदूर्वाऽअभिषुणुयादेष वै सोमस्य न्यङ्गो यदरुणदूर्वास्तस्मादरुणदूर्वाऽअभिषुणुयात् ॥५॥ यद्यरुणदूर्वा न विन्देयुः । अपि यानेव कांश्च हरितान् कुशानभिषुणुयात्तत्राप्येकामेव गां दद्यादथावभृथादेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो ह्येव तत्र प्रायश्चित्तिरिति नु सोमापहृतानाम् ॥६॥ अथ कलशादिराम् । यदि कलशो दीर्येतानुलिप्सध्वमिति ब्रूयात्स यद्यनुलभेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा तदन्यैरेकधनैरभ्युन्नीय यथाप्रभावं प्रचरेयुर्यद्यु नानु-

१. गृह्णाति इति. ग. २. सवने इति. ग. ३ विन्दति इति. ग.
४. फाल्गुनानि इति. ग. ५. वै इति. ग. ६,७. अभिषुणुयादिति. च.
८. दद्यादथ इति. ग.

लभेरन्नाग्रयणस्यैव प्रस्कन्द्यान्यैरेकधनैरभ्युन्नीय[1] यथाप्रभावं प्रचरेयुः स यद्यनीतासु दक्षिणासु कलशो दीर्येत तत्राप्येकामेव गां दद्यादथावभृथोदेवोदेत्य पुनर्दीक्षेत पुनर्यज्ञो ह्येव तत्र प्रायश्चित्तिरिति नु कलशादिराम् ॥७॥ अथ सोमातिरिक्तानाम् । यद्यग्निष्टोममतिरिच्येत पूतभृतऽएवोक्थ्यं गृह्णीयाद्यद्युक्थ्यमतिरिच्येत षोडशिनमुपेयुर्यदि षोडशिनमतिरिच्येत रात्रिमुपेयुर्यदि रात्रिमतिरिच्येताहरुपेयुर्नेत्त्वेवातीरेकोऽस्ति ॥८॥

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके द्वितीयं ब्राह्मणम् ॥ (अ.५.१०.)

(पञ्चमोऽध्यायस्समाप्तः)

४. ५. ३.

(अंशुग्रहः)

प्रजापतिर्वाऽएष यदंशुः सोऽस्यैषऽआत्मैवात्मा ह्ययं प्रजापतिस्तदस्यैतमात्मानं कुर्वन्ति यत्रैतं गृह्णन्ति[2] तस्मिन्नेतान् प्राणान्दधाति यथा यथैते प्राणा ग्रहा व्याख्यायन्ते स ह सर्वतनूरेव यजमानोऽमुष्मिंल्लोके सम्भवति ॥१॥ तदारम्भणवत् । यत्रैतं गृह्णन्त्यथैतदनारम्भणमिव यत्रैतं न गृह्णन्ति तस्माद्वाऽअंशुं गृह्णाति ॥२॥ तं वाऽऔदुम्बरेण पात्रेण गृह्णाति । प्रजापतिर्वाऽएष प्राजापत्यऽउदुम्बरस्तस्मादौदुम्बरेण पात्रेण गृह्णाति ॥३॥ तं वै चतुःस्रक्तिना पात्रेण गृह्णाति । त्रयोऽवाऽइमे लोकास्तदिमानेव लोकांस्तिसृभिराप्नोति प्रजापतिर्वाऽअतीमांल्लोकांश्चतुर्थस्तत्प्रजापतिमेव चतुर्थ्याप्नोति[3] तस्माच्चतुःस्रक्तिना पात्रेण गृह्णाति ॥४॥ स वै तूष्णीमेव ग्रावाणमादत्ते । तूष्णीमंशून्निवपति तूष्णीमपऽउपसृजति तूष्णीमुद्यत्य सकृदभिषुणोति तूष्णीमेनमनवानञ्जुहोति तदेनं प्रजा-

---

१. अभ्युन्नीय इति. च. २. गृह्णन्ति. इति. ग. ३. चतुर्थ्या. इति. च.

पतिं करोति ॥५॥ अथास्याꣳहिरण्यं बद्धं भवति । तदुपजिघ्रति स य्यदेवात्र क्षणुते वा व्वि वा लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरात्मन्धत्ते ॥६॥ तदु होवाच रामऽऔपतस्विनिः । काममेव प्राण्यात्काममुदन्याद्यद्वै तूष्णीं जुहोति तदेवैनं प्रजापतिं करोतीति ॥७॥ अथास्याꣳ हिरण्यं बद्धं भवति । तदुपजिघ्रति स य्यदेवात्र क्षणुते वा व्वि वा लिशतेऽमृतमायुर्हिरण्यं तदमृतमायुरान्मन्धत्ते ॥८॥ तदु होवाच बुडिलऽआश्वतराश्विः । उद्यत्यैव गृह्णीयान्नाभिषुणुयादभिषुण्वन्ति वाऽअन्याभ्यो देवताभ्यस्तदन्यथा ततः करोति यथोचान्याभ्यो देवताभ्योऽथ य्यदुद्यच्छति तदेवास्याभिषुतं भवतीति ॥९॥ तदु होवाच य्याज्ञवल्क्यः[1] । अभ्येव षुणुयान्न ऽसोम ऽइन्द्रमसुतो ममाद नाब्रह्माणो मघवानꣳ सुतास ऽइत्यृषिणाभ्यनूक्तं न वाऽअन्यस्यै कस्यै चन देवतायै सकृदभिषुणोति तदन्यथा ततः करोति य्यथो चान्याभ्यो देवताभ्यस्तस्मादभ्येव षुणुयादिति ॥१०॥ तस्य द्वादश प्रथमगर्भाः । षष्ठौह्यो दक्षिणा द्वादश वै मासाः संवत्सरस्य संवत्सरः प्रजापतिः प्रजापतिरꣳशुस्तदेनं प्रजापतिं करोति ॥११॥ (शतम् २८००) तासां द्वादश गर्भाः । ताश्चतुर्व्विꣳशतिश्चतुर्व्विꣳशतिर्व्वै संवत्सरस्यार्द्धमासाः संवत्सरः प्रजापतिरꣳशुस्तदेनं प्रजापतिं करोति ॥१२॥ तदु ह कौकूस्तः । चतुर्व्विꣳशतिमेवैताः प्रथमगर्भाः षष्ठौहीर्दक्षिणा ददावृषभं पञ्चविꣳशꣳ हिरण्यमेतदु ह स ददौ ॥१३॥ स वाऽएष न सर्व्वस्येव ग्रहीतव्यः । आत्मा ह्यस्यैष य्यो न्वेव ज्ञातस्तस्य ग्रहीतव्यो य्यो वास्य प्रियः स्याद्यो वानूचानोऽनूक्तेनैनं प्राप्नुयात् ॥१४॥ सहस्रे ग्रहीतव्यः । सर्व्वं वै सहस्रꣳसर्वमेष सर्ववेदसे ग्रहीतव्यः सर्वं वै सर्ववेदसꣳ सर्व्वमेष व्विश्वजिति सर्वपृष्ठे ग्रहीतव्यः[2] सर्वं वै व्विश्वजित्सर्वपृष्ठः सर्व्वमेष व्वाजपेये राजसूये ग्रहीतव्यः सर्वꣳहि तत्सत्रे ग्रही-

१. याज्ञवल्क्य इति. ग. २. ग्रहीतव्य इति. ग.

तव्यः सर्व्वं वै सत्रꣳ सर्वमेष ऽएतानि ग्रहणानि ॥१५॥ Cf. का. श. ५. ८. १.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके तृतीयं ब्राह्मणम् ॥ (अ. ६ १.)

४. ५. ४.

एतं वाऽएते गच्छन्ति । षड्भिर्मासैर्यऽएष तपति य्ये संवत्सरमासते तदुच्यतऽएव सामतो य्यथैतस्य रूपं क्रियतऽउच्यतऽऋक्तोऽथैतदेव यजुष्टः पुरश्चरणतो य्यदेतं गृह्णन्त्येतेनोऽएवैनं गच्छन्ति ॥१॥ अथातो गृह्णात्येव[1] । "उदु त्यं जातवेदसं देवं व्वहन्ति केतवः । दृशे व्विश्वाय सूर्यम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजायैष ते य्योनिः सूर्याय त्वा भ्राजाये"ति ॥२॥ Cf. का. श. ५. ७. ३.

इति माध्यन्दिनशाखीये शतदथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके चतुर्थं ब्राह्मणम् ॥ (अ. ६. २.)

४. ५. ५.

(पश्वयनस्तोमायने)

अथातः पश्वयनस्यैव । पश्वेकादशिन्यैवेयात्सऽआग्नेयं प्रथमं पशुमालभतेऽथ व्वारुणमथ पुनराग्नेयमेवमेवैतया पश्वेकादशिन्येयात् ॥१॥ अथोऽअप्येन्द्राग्नमेवाहरहः पशुमालभेत । अग्निर्व्वै सर्व्वा देवताऽअग्नौ हि सर्व्वाभ्यो देवताभ्यो जुह्वतीन्द्रो वै यज्ञस्य देवता तत्सर्वाश्चैवैतद्देवता नापराध्नोति यो च यज्ञस्य देवता तां नापराध्नोति ॥२॥ अथातस्स्तोमायनस्यैव । आग्नेयमग्निष्टोमऽआलभेत तद्धि सलोम य्यदाग्नेयमग्निष्टोमऽआलभेत य्यद्युक्थ्यः स्यादैन्द्रा-

१. गृह्णात्येव इति. ग. २. मा. सं. ८. ४१. ३ जुह्वति इति. ग.

ग्नं द्वितीयमालभेतैन्द्राग्नानि ह्युक्थानि य्यदि षोडशी स्यादैन्द्रं तृतीयमालभेतेन्द्रो हि षोडशी य्यद्यतिरात्रः स्यात्सारस्वतं चतुर्थमालभेत व्वाग्वै सरस्वती य्योषा व्वै व्वाग्योषा रात्रिस्तद्यथायथं यज्ञक्रतून्व्यावर्त्तयत्येतानि त्रीण्ययनानि तेषां यतमत्कामयेत तेनेयाद्द्वाऽउपालम्भ्यौ पशू सौर्यं द्वितीयं पशुमालभते व्वैष्णवतेऽहन् प्राजापत्यं महाव्रते ॥३॥ Cf. का. श. ५. ७. २.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
पञ्चमप्रपाठके पञ्चमं ब्राह्मणम् ॥ (अ. ६. ३.)

४. ५. ६.

(महाव्रतीयः)

अथो महाव्रतीयस्यैव । प्रजापतेर्ह वै प्रजाः ससृजानस्य पर्वाणि व्विसस्रꣳ सुः स व्विस्रस्तैः पर्व्वभिर्न शशाक सꣳहीतुं ततो देवाऽअर्च्चन्तः श्राम्यन्तश्चेरुस्तऽएतं महाव्रतीयं ददृशुस्तमस्माऽअगृह्णंस्तेनास्य पर्व्वाणि समदधुः ॥१॥ स सꣳहितैः पर्व्वभिः । इदमन्नाद्यमभ्युत्तस्थौ य्यदिदं प्रजापतेरन्नाद्यं यद्वै मनुष्याणामशनं तद्देवानां व्वतं महद्वाऽइदं व्वतमभूद्येनायꣳसमहास्तेति तस्मान्महाव्रतीयो नाम ॥२॥ एवं वाऽएते भवन्ति । य्ये संवत्सरमासते य्यथैव तत्प्रजापतिः प्रजाः ससृजान ऽआसीत्स य्यथैव तत्प्रजापतिः संवत्सरेऽन्नाद्यमभ्युदतिष्ठदेवमेवैतऽएतत्संवत्सरेऽन्नाद्यमभ्युत्तिष्ठन्ति य्येषामेवं व्विदुषामेतं ग्रहं गृह्णन्ति ॥३॥ तं वाऽइन्द्रायैव व्विमृधे गृह्णीयात् । सर्व्वा वै तेषां मृधो हता भवन्ति सर्व्वं जितं य्ये संवत्सरमासते तस्माद्विमृधे "व्वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । य्योऽअस्मां २॥ऽअभिदासत्यधरं गमया तमः । उपयामगृहीतोऽसीन्द्राय त्वा व्विमृधऽएष ते य्योनि-

१. मा. सं. ८. ४४. २. पृतन्यतः इति. ग.

रिन्द्राय त्वा व्विमृध''ऽइति ॥४॥ अथो व्विश्वकर्म्मणे । व्विश्वं वै तेषां कर्म्म कृतꣳसर्व्वं जितं भवति य्ये संवत्सरमासते तस्माद्विश्वकर्म्मणे ''व्वाचस्पतिं व्विश्वकर्माणमूतये मनोजुवं व्वाजेऽअद्या हुवेम। स नो व्विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्म्मा । उपयामगृहीतोऽसीन्द्राय त्वा व्विश्वकर्म्मणऽएष ते य्योनिरिन्द्राय त्वा व्विश्वकर्मण''ऽइति ॥५॥ य्यद्युऽएन्द्रीं व्वैश्वकर्मणीं व्विद्यात् । तयैव गृह्णीया''द्विश्वकर्मन् हविषा व्वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् । तस्मै व्विशः समनमन्त पूर्वीरयमुग्रो व्विहव्यो यथासत् । उपयामगृहीतोऽसीन्द्राय त्वा व्विश्वकर्मणऽएष ते य्योनिरिन्द्राय त्वा व्विश्वकर्मण ऽइति ॥६॥ Cf. का. श. ५. ७. ४.

इति माध्यन्दिनीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके षष्ठं ब्राह्मणम् ॥ (अ. ६. ४.)

४. ५. ७.

एष वै ग्रहः । य्यऽएष तपति य्येनेमाः सर्व्वाः प्रजा गृहीतास्तस्मादाहुर्ग्रहान्गृह्णीम ऽइति चरन्ति ग्रहगृहीताः सन्तऽइति ॥१॥ व्वोगव ग्रहः । व्वाचा हीदꣳ सर्व्वं गृहीतं किमु तद्यद्वाग्ग्रहः ॥२॥ नामैव ग्रहः । नाम्ना हीदꣳसर्व्वं गृहीतं किमु तद्यन्नाम ग्रहो बहूनां वै नामानि व्विद्माथ नस्तेन ते न गृहीता भवन्ति ॥३॥ अन्नमेव ग्रहः[3] । अन्नेन[4] हीदꣳसर्वं गृहीतं तस्माद्यावन्तो नोऽशनमश्नन्ति ते नः सर्वे गृहीता भवन्त्येषैव स्थितिः ॥४॥ स य्यऽएष सोमग्रहः । अन्नं वाऽएष स य्यस्यै देवतायाऽएतं ग्रहं गृह्णाति सास्मै देवतैतेन ग्रहेण गृहीता तं कामꣳ समर्द्धयति यत्काम्या गृह्णाति सऽउद्यन्तं वादित्यमुपतिष्ठतेऽस्तं य्यन्तं वा ग्रहोऽस्यमुमनयात्र्या गृहाणासावदोमा

१. मा. सं. ८. ४५.
२. मा. सं. ८. ४. ६.
३. ग्रहः इति. ग.
४. अन्नेन इति. च.

यापदिति यं द्विष्यादसावस्मै कामो मा समर्द्धीति वा न हैवास्मै स कामः समृध्यते यस्माऽएवमुपतिष्ठते ॥५॥ Cf. का. श. ५. ७. १.

इति माध्यदिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके सप्तमं ब्राह्मणम् ॥ (अ.६.५.)

४. ५. ८

देवाः ह वै यज्ञं तन्वानाः[1] । तेऽसुररक्षसेभ्य ऽआसङ्गाद्बिभयांचक्रुस्ते होचुः को नो दक्षिणत ऽआसिष्यतेऽथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम ऽइति ॥१॥ ते होचुः। य ऽएव नो व्वीर्यवत्तमः स दक्षिणत ऽआस्तामथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम ऽइति॥२॥ ते होचुः। इन्द्रो वै नो व्वीर्यवत्तम ऽइन्द्रो दक्षिणत ऽआस्तामथाभयेनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम ऽइति ॥३॥ ते हेन्द्रमूचुः। त्वं वै नो व्वीर्यवत्तमोऽसि त्वं दक्षिणत ऽआस्वाथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरिष्याम ऽइति ॥४॥ स होवाच । किं मे ततः स्यादिति ब्राह्मणाच्छꣳस्याते ब्रह्मसाम तऽइति तस्माद्ब्राह्मणाच्छꣳसिनं प्रवृणीत ऽइन्द्रो ब्रह्मा ब्राह्मणादितीन्द्रस्य ह्येषा स ऽइन्द्रो दक्षिणत ऽआस्ताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपाचरंस्तस्माद्य ऽएव व्वीर्यवत्तमः स्यात्स दक्षिणत ऽआसीताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरेयुर्यो वै ब्राह्मणानामनूचानतमः सऽएषां व्वीर्यवत्तमोऽथ यदिदं यय एव कश्च ब्रह्मा भवति कुवित्तूष्णीमास्तऽइति तस्माद्यऽएव व्वीर्यवत्तमः स्यात्स दक्षिणत ऽआसीताथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरेयुस्तस्माद्ब्राह्मणा दक्षिणत ऽआसतेऽथाभयेऽनाष्ट्रऽउत्तरतो यज्ञमुपचरन्ति ॥५॥ स यत्राह । ब्रह्मन्त्स्तोष्यामः प्रशास्तरिति तद्ब्रह्मा जप"त्येतं ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे । तेन यज्ञमेव तेन यज्ञपतिं तेन मामव। स्तुत सवितुः प्रसव"ऽइति सोऽसावेव बन्धुरेतेन न्वे-

---

१. तन्वानाः इति. ग.

व भूयिष्ठाऽइवोपचरन्ति ॥६॥ अनेन त्वेवोपचरेत् । "देव सवितरेतद्-बृहस्पते प्रे"ति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता बृहस्पते प्रेति बृहस्पतिर्वै देवानां ब्रह्मा तद्य ऽएव देवानां ब्रह्मा तस्माऽएवैतत्प्राह तस्मादाह बृहस्पते प्रेति ॥७॥ अथ मैत्रावरुणो जपति "प्रसूतं देवेन सवित्रा जुष्टं मित्रावरुणाभ्यामि"ति तत्सवितारं प्रसवायोपधावति स हि देवानां प्रसविता "जुष्टं मित्रावरुणाभ्यामि"ति मित्रावरुणौ वै मैत्रावरुणस्य[1] देवते तद्येऽएव मैत्रावरुणस्य देवते ताभ्यामेवैतत्प्राह तस्मादाह जुष्टं मित्रावरुणाभ्यामिति ॥८॥ Cf. का. श. ५. ७. ६.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठकेऽष्टमं ब्राह्मणम् ॥ (अ. ६. ६.)

४. ५. ९.

त्रयी वै विद्या । ऋचो यजूꣳषि सामानीयमेवर्च्चोऽस्याꣳ[2] ह्यर्चति योऽर्चति स वागेवर्च्चो वाचा ह्यर्चति योऽर्चति सोऽन्तरिक्षमेव यजूꣳषि द्यौः सामानि सैषा त्रयी विद्या सौम्येऽध्वरे प्रयुज्यते ॥१॥ इममेव लोकमृचा जयति । अन्तरिक्षं यजुषा दिवमेव साम्ना तस्माद्यस्यैका विद्यानूक्ता स्यादन्वेवापीतरयोर्निर्मितं विवक्षेतेममेव लोकमृचा जयत्यन्तरिक्षं यजुषा दिवमेव साम्ना ॥२॥ तद्वा ऽएतत् । सहस्रं वाचः प्रजातं द्वेऽइन्द्रस्तृतीये तृतीयं विष्णुर्ऋचश्च सामानि चेन्द्रो यजूꣳषि विष्णुस्तस्मात्सदस्यृक्सामाभ्यां कुर्वन्त्यैन्द्रꣳ हि सदः[3] ॥ ३ ॥

(अर्द्धप्रपाठकः ६३)

अथैतं विष्णुं यज्ञम् । एतैर्यजुर्भिः पुर ऽइवैव बिभ्रति

१. मैत्रावरुणस्य इति. ग.

२. इयमेव इति. ग.

३. सदः इति. क, संदः इति. ग.

तस्मात्पुरश्चरणं नाम ॥ ४ ॥ व्वागेवर्च्चश्च सामानि च । मनऽएव य्यजूꣳषि सा य्यत्रेयं व्वागासीत्सर्वमेव तत्राक्रियत सर्वं प्राज्ञायताथ य्यत्र मन ऽआसीन्नैव तत्र किंचनाक्रियत न प्राज्ञायत नो हि मनसा ध्यायतः कश्चनाजानाति ॥५॥ ते देवा व्वाचमब्रुवन् । "प्राची प्रेहीदं प्रज्ञपये"ति सा होवाच किं मे ततः स्यादिति यत्किंचावपट्कृतꣳ स्वाहाकारेण यज्ञे हूयते तत्तऽइति तस्माद्यत्किंचावपट्कृतꣳस्वाहाकारेण यज्ञे हूयते तद्वाचः सा प्राची प्रैत्सैतत्प्राज्ञपयदितीदं कुरुतेतीदं कुरुतेति ॥६॥ तस्मादु कुर्वन्त्येवर्च्चा हविर्द्धाने । प्रातरनुवाकमन्वाह सामिधेनीरन्वाह ग्राव्णोऽभिष्टौत्येवꣳ हि सयुजावभवताम् ॥७॥ तस्मादु कुर्वन्त्येव सदसि । य्यजुषौदुम्बरीमुच्छ्रयन्ति सदः सम्मिन्वन्ति धिष्ण्यानुपक्रिरन्त्येवꣳ हि सयुजावभवताम् ॥८॥ तद्वाऽएतत्सदः परिश्रयन्ति । एतस्मै मिथुनाय तिर ऽइवेदं मिथुनं चर्याताऽइति व्यृद्धं वाऽएतन्मिथुनं य्यदन्यः पश्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत ऽआग ऽएव कुर्वाते तस्मादद्वारेण सदः प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा ऽइति य्यथा ह मिथुनं चर्यमाणं पश्येदेवं तत्कामं द्वारेण देवकृतꣳहि द्वारम् ॥९॥ एवमेवैतद्धविर्द्धानं परिश्रयन्ति । एतस्मै मिथुनाय तिरऽइवेदं मिथुनं चर्याताऽइति व्यृद्धं वाऽएतन्मिथुनं य्यदन्यः पश्यति तस्माद्यद्यपि जायापती मिथुनं चरन्तौ पश्यन्ति व्येव द्रवत ऽआग एव कुर्वाते तस्माद्द्वारेण हविर्द्धानं प्रेक्षमाणं ब्रूयान्मा प्रेक्षथा ऽइति य्यथा ह मिथुनं चर्यमाणं पश्येदेवं तत्कामं द्वारेण देवकृतꣳहि द्वारम् ॥१०॥ तद्वाऽएतद्वृषा साम । य्योषामृचꣳ सदस्यध्येति तस्मान्मिथुनादिन्द्रो जातस्तेजसो वै तत्तेजो जातं य्यदृचश्च साम्नश्चेन्द्र ऽइन्द्र ऽइति ह्येतमाचक्षते य ऽएष तपति॥११॥अथैतद्वृ-

---

१ तद्वा इति. ग. २. तत्काम इति. ग.

३. देवकृतꣳइति. ग. ४. द्वारम् इति. ग.

षा सोमः । य्योषा ऽअपो हविर्द्धानेऽध्येति तस्मान्मिथुनाच्चन्द्रमा जातोऽन्नाद्वै तदन्नं जातं य्यदद्भ्यश्च सोमाच्च चन्द्रमाश्चन्द्रमा[1] ह्येतस्यान्नं य्य ऽएष तपति तद्यजमानं चैवैतज्जनयत्यन्नाद्यं चास्मै जनयत्यृचश्च साम्नश्च य्यजमानं जनयत्यद्भ्यश्च सोमाच्चास्माऽअन्नाद्यम्॥ ॥१२॥ य्यजुषा ह वै देवाः[2] । अग्रे यज्ञं तेनिरेऽथर्च्चाथ साम्ना तदिदमप्येतर्हि य्यजुषैवाग्रे यज्ञं तन्वतेऽथर्च्चाथ साम्ना य्यजो ह वै नामैतद्यद्यजुरिति[3] ॥१३॥ य्यत्र वै देवाः । इमा व्विद्याः कामान्दुदुहे तद्ध यजुर्विद्यैव भूयिष्ठान् कामान्दुदुहे सा निर्द्धीततमेवास सा नेतरे व्विद्ये प्रत्यास नान्तरिक्षलोक ऽइतरौ लोकौ प्रत्यास ॥१४॥ ते देवा ऽअकामयन्त । कथं न्वियं व्विद्येतरे व्विद्ये प्रतिस्यात्कथमन्तरिक्षलोकऽइतरौ लोकौ प्रतिस्यादिति ॥१५॥ ते होचुः । उपाꣳश्वेव य्यजुर्भिश्चराम तत ऽएषा व्विद्येतरे व्विद्ये प्रतिभविष्यति ततोऽन्तरिक्षलोका ऽइतरौ लोकौ प्रतिभविष्यतीति ॥१६॥ तैरुपाꣳश्वचरन् । आप्याययन्नेवैनानि तत्तत ऽएषा व्विद्येतरे व्विद्ये प्रत्यासीत्ततोऽन्तरिक्षलोक ऽइतरौ लोकौ प्रत्यासीत्तस्माद्यजूꣳषि निरुक्तानि सन्त्यनिरुक्तानि तस्मादयमन्तरिक्षलोको निरुक्तः सन्ननिरुक्तः ॥१७॥ स य्य ऽउपाꣳशु य्यजुर्भिश्चरति[4] । आप्याययत्येवैनानि स तान्येनमापीनान्याप्याययन्त्यथ य्य ऽउच्चैश्चरति रूक्षयत्येवैनानि स तान्येनꣳरूक्षाणि रूक्षयन्ति[5] ॥१८॥ व्वागेवर्च्चश्च सामानि च । मन ऽएव य्यजूꣳषि स य्यऽऋचा च साम्ना च चरन्ति व्वाक्ते भवन्त्यथ ये य्यजुषा चरन्ति मनस्ते भवन्ति तस्मान्नानाभिप्रेषितमध्वर्युणा किञ्चन क्रियते य्यदैवाध्वर्य्युराहानुब्रूहि यजेत्यथैव ते कुर्व्वन्ति य्यऽऋचा कुर्वन्ति य्यदैवाध्वर्य्युराह "सोमः पवतऽउपावर्त्तध्व"मित्यथैव ते कुर्व्वन्ति ये साम्ना कुर्वन्ति[6] नो ह्यनभिगतं मनसा व्वाग्वदति ॥१९॥ तद्धाऽएतन्मनोऽध्व-

१. चन्द्रमाश्चन्द्र इति. ग. २. देवाः इति. ग. ३. यजुरिति इति. च.
४. चरति इति. च. ५. रूक्षयन्ति इति. ग. ६. कुर्वन्ति इति. क.

र्य्युः । पुरऽइवैव चरति तस्मात्पुरश्चरणं नाम पुरऽइव ह वै श्रिया य्यशसा भवति य्य ऽएवमेतद्वेद ॥२०॥ तद्वाऽएतदेव पुरश्चरणम् । य्यऽ एष तपति सऽएतस्यैवावृता चेरद्ग्रहं गृहीत्वैतस्यैवावृतमन्वावर्त्तेत प्रतिगीर्यैतस्यैवावृतमान्वावर्त्तेत ग्रहꣳहुत्वैतस्यैवावृतमन्वावर्त्तेत सहैष भर्त्ता स य्यो हैवं विद्वानेतस्यावृता शक्नोति चरितुꣳ शक्नोति हैव भार्य्याम्भर्तुम् ।२१॥ Cf. का. श. ५. ८. ४.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे
पञ्चमप्रपाठके नवमं ब्राह्मणम् ॥ (अ. ६. ७.)

४. ५. १०

(सत्रायणम्)

या वै दीक्षा सा निषत् । तत्सत्रं तस्मादेनानासतऽइत्याहुरथ यत्ततो यज्ञं तन्वते तद्यन्ति तन्नयति य्यो नेता भवति स तस्मादेनान्यन्तीत्याहुः ॥१॥ य्या ह दीक्षा सा निषत् । तत्सत्रं तदयनं तत्सत्रायणमथ यत्ततो यज्ञस्योदृचं गत्वोत्तिष्ठन्ति तदुत्थानं तस्मादेनानुदस्थुरित्याहुरिति नु पुरस्ताद्वदनम्[1] ॥२॥ अथ दीक्षिष्यमाणाः समवस्यन्ति । ते य्यद्याग्निं चेष्यमाणा भवन्त्यरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति य्यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं य्यजन्तऽएतेन प्राजापत्येन पशुना ॥३॥ तस्य[2] शिरो निदधति । तेषां य्यदि तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं विपरेत्य जुह्वति ॥४॥ अथ यदहरेषां दीक्षा समैति । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति य्यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्थते मध्यं प्रति शालाया अथेतरेषामर्द्धा दक्षिणत ऽउपविशन्त्यर्द्धाऽउत्तरतो मथित्वोपसमाधायैकैकमेवोल्मुकमादायोपसमायन्ति गृहपतेर्गार्हपत्यं गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समान ऽआहवनीयो भवति नाना गार्हपत्या

१. वदनम् इति. ग. २. यद्यज्ञमिति. क. १६. तस्येति. ग.

दीक्षोपसत्सु ॥५॥ अथ यदहरेषां क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य ऽउपवसथे[1] धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पत्न्य ऽउपसमायन्ति प्रजहत्येतानपरानग्नीन्हुत ऽएव व्वैसर्जिने[2] ॥६॥ राजानं प्रणयति[3] । उद्यत ऽएवैष ऽआग्नीध्रीयोऽग्निर्भवत्यथैत ऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं व्विपरायन्ति तैरेव तेषामुल्मुकैः प्रघ्नन्तीति ह स्माह याज्ञवल्क्यो ये तथा कुर्वन्तीत्येतन्वेकमयनम् ॥७॥ अथेदं द्वितीयम् । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं यजन्त ऽएतेन प्राजापत्येन पशुना ॥८॥ तस्य शिरो निदधाति । तेषां यदि तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं व्विपरेत्य जुह्वति[4] ॥९॥ अथ यदहरेषां दीक्षा समैति[5] । अरणिष्वेवाग्नीन्त्समारोह्योपसमायन्ति यत्र दीक्षिष्यमाणा भवन्ति गृहपतिरेव प्रथमो मन्थतेऽथेतरे पर्युपविश्य मन्थन्ते तं जातं जातमेवानुप्रहरन्ति गृहपतेर्गार्हपत्ये गृहपतेरेव गार्हपत्यादुद्धृत्याहवनीयं दीक्षन्ते तेषाꣳ समानऽआहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१०॥ अथ यदहरेषां क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्य ऽउपवसथे धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पत्न्य ऽउपसमायन्ति प्रजहत्येतमपरमग्निꣳ हुत ऽएव व्वैसर्जिने[6] ॥११॥ राजानं प्रणयति[7] । उद्यत ऽएवैष ऽआग्नीध्रीयोऽग्निर्भवत्यथैत ऽएकैकमेवोल्मुकमादाय यथाधिष्ण्यं व्विपरायन्ति समदमु हैव ते कुर्वन्ति समद्धैनान्विन्दत्यर्त्तुका ह भवन्त्यपि ह तमर्द्धꣳसमद्विन्दति यस्मिन्नर्द्धे यजन्ते ये तथा कुर्वन्त्येतद्वितीयमयनम् ॥१२॥ अथेदं तृतीयम् । गृहपतेरेवारण्योः संवदन्ते य ऽइतोऽग्निर्जनिष्यते स नः सह यदनेन यज्ञेन जेष्यामोऽनेन पशुबन्धेन तन्नः सह सह नः साधु-

---

१. उपवसथे इति ग. २. वैसर्जने इति. ग. ३-७. प्रणयति इति. च.
४. जुह्वति इति. क. ५. उपसत्सु इति. क. ६. वैसर्जिने इति. ग.

कृत्या य्यऽएव पापं करवत्तस्यैव तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति य्यत्र प्राजापत्येन पशुना यक्ष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं य्यजन्तऽएतेन प्राजापत्येन पशुना ॥१३॥ तस्य शिरो निदधति। तेषां य्यदि तदहर्दीक्षा न समैत्यरणिष्वेवाग्नीन्त्समारोह्य यथायथं व्विपरेत्य जुह्वति ॥१४॥ अथ यदहरेषां दीक्षा समैति । गृहपतेरेवारण्योः संवदन्ते य्यऽइतोऽग्निर्जनिष्यते स नः सह य्यदनेन यज्ञेन जेष्यामोऽनेन सत्रेण तन्नः सह सह नः साधुकृत्या य्यऽएव पापं करवत्तस्यैव तदित्येवमुक्त्वा गृहपतिरेव प्रथमः समारोहयतेऽथेतरेभ्यः समारोहयति स्वयं वैव समारोहयन्ते तऽआयन्ति य्यत्र दीक्षिष्यमाणा भवन्ति मथित्वोपसमाधायोद्धृत्याहवनीयं दीक्षन्ते तेषाꣳसमानऽआहवनीयो भवति समानो गार्हपत्यो दीक्षोपसत्सु ॥१५॥ अथ यदहरेषां क्रयो भवति । तदहर्गार्हपत्यां चितिमुपदधात्यथेतरेभ्यऽउपवसथे धिष्ण्यान्वैसर्जिनानां काले प्राच्यः पत्न्यऽउपसमायन्ति प्रजहत्येतमपरमग्निꣳ हुतऽएव व्वैसर्जिने ॥१६॥ राजानं प्रणयति । उद्यतऽएवैषऽआग्नीध्रीयोऽग्निर्भवत्यथैतऽएकैकमेवोलमुकमादाय यथाधिष्ण्यं व्विपरायन्ति तत्तत्कृतं नाकृतं यन्नानाधिष्ण्या भवन्ति व्वरीयानाकाशोऽसत्परिचरणायेत्यथ यन्नानापुरोडाशा भूयो हविरुच्छिष्टमसत्समाप्त्याऽइति ॥१७॥ अथ य्येन सत्रेण देवाः । क्षिप्रऽएव पाप्मानमपाघ्नतेमां जितिमजयन्यैषामियं जितिस्तदत ऽउद्यतऽएकगृहपतिका वै देवाऽएकपुरोडाशाऽएकधिष्ण्याः क्षिप्रऽएव पाप्मानमपाघ्नत क्षिप्रे प्राजायन्त तथोऽएवैतऽएकगृहपतिकाऽएकपुरोडाशा एकधिष्ण्याः क्षिप्रऽएव पाप्मानमपघ्नते क्षिप्रे प्रजायन्ते ॥१८॥ अथादः पूर्वस्मिन्नुदीचीनवꣳशा शाला भवति ।

१. शिरो निदधति इति. च. २. जुह्वति इति.क. ३. प्रणयति. इति. च.
४. उद्यत इति ग. ५. प्रजायन्ते इति. च.

तन्मानुषꣳ समानऽआहवनीयो भवति नाना गार्हपत्यास्तद्विकृष्टं गृहपतेरेव गार्हपत्ये जाघन्या पत्नीः संयाजयन्त्याज्येनेतरे प्रतियजन्तऽआसते तद्विकृष्टम् ॥१९॥ अथात्र प्राचीनवꣳशा शाला भवति । तद्देवत्रा समानऽआहवनीयो भवति समानो गार्हपत्यः समानऽआग्नीध्रीयस्तदेतत्सत्रꣳ समृद्धं यथैकाहः समृद्धऽएवं तस्य न ह्वलास्ति तस्यैषैव समान्याव्वृद्यदन्यद्विष्ण्येभ्यः ॥२०॥

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके दशमं ब्राह्मणम् ॥ (अ. ६. ८.)

४. ५. ११.

(सत्रधर्माः)

देवा ह वै सत्रमासत। श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य ऽएतदन्नाद्यमभिजितमपाचिक्रामिषत्पशवो वाऽअन्नं पशवो ह्वैवैभ्यस्तदपाचिक्रामिषन्यद्वै न ऽइमे श्रान्ता न हिꣳस्युः कथमिव स्विन्नः स्रक्ष्यन्तऽइति ॥१॥ तऽएते गार्हपत्ये द्वेऽआहुतीऽअजुहवुः । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेनान् गृहेष्वेव न्ययच्छंस्तथैभ्य ऽएतदन्नाद्यमभिजितं नापाक्रामत् ॥२॥ तथोऽएवेमे सत्रमासते । ये सत्रमासते श्रियं गच्छेम यशः स्यामान्नादाः स्यामेति तेभ्य ऽएतदन्नाद्यमभिजितमपचिक्रमिषति पशवो वाऽअन्नं पशवो ह्वैवैभ्यस्तदपचिक्रमिषन्ति यद्वै नऽइमे श्रान्ता न हिꣳस्युः कथमिव स्विन्नः स्रक्ष्यन्तऽइति ॥३॥ तऽएते गार्हपत्ये द्वेऽआहुती जुह्वति । गृहा वै गार्हपत्यो गृहा वै प्रतिष्ठा तदेनान् गृहेष्वेव नियच्छन्ति तथैभ्य ऽएतदन्नाद्यमभिजितं नापक्रामति ॥४॥ तथोऽएवैतस्मात् । एतदन्नाद्यमुपाहृतमपचिक्रमिषति यद्वै मायं न हिꣳस्यात्कथमिव स्विन्मा स्रक्ष्यतऽइति ॥५॥ तस्य परस्तादेवाग्रेऽल्पश ऽइव प्राश्नाति । तदेनदुपनिमदति तद्वेद[1] न वै तथा भूयथा मꣳसि न वै मा हिꣳसी-

---

१. तद्वेद इति. ग.

दिति तदेनमुपावश्रयते स ह प्रिय ऽएवान्नस्यान्नादो भवति य ऽएवं विद्वानेतस्य व्रतꣳ शक्नोति चरितुम् ॥६॥ तद्वा ऽएतत् । दशमेहन्त्सत्रोत्थानं क्रियते तेषामेकैक ऽएव वाचंयम ऽआस्ते वाचमाप्यायंस्तयापीनयायातयाम्न्योत्तरमहस्तन्वतेऽथेतरे विसृज्यन्ते समिद्धारा वा स्वाध्यायं वा तत्राप्यश्नन्ति[1] ॥७॥ तेऽपराह्णऽउपसमेत्य । अपऽउपस्पृश्य पत्नीशालꣳ सम्प्रपद्यन्ते तेषु समन्वारब्धेष्वेतेऽआहुती जुहोती[4]"हे रन्तिरिह रमध्वमिह धृतिरिह स्वधृतिः स्वाहे"ति पशूनेवैतदाह पशूनेवैतदात्मन्नियच्छन्ते[3] ॥८॥ अथ द्वितीयां जुहोति । "उपसृजन्धरुणं मात्र"ऽइत्यग्निमेवैतत्पृथिव्याऽउपसृजन्नाह "धरुणो मातरं धयन्नि"त्यग्निमेवैतत्पृथिवीं धयन्तमाह "रायस्पोषमस्मासु दीधरत्स्वाहे"ति पशवो वै रायस्पोषः पशूनेवैतदात्मन्नियच्छन्ते ॥९॥ ते प्राञ्च ऽउपनिष्क्रामन्ति । ते पश्चात्प्राञ्चो हविर्द्धाने सम्प्रपद्यन्ते पुरस्ताद्वै प्रत्यञ्चस्तꣳस्यमानाऽ अथैवꣳसत्रोत्थाने ॥१०॥ तऽउत्तरस्य हविर्द्धानस्य । जघन्यायां कूबर्याꣳ सामाभिगायन्ति "सर्त्रस्यऽऋद्धि"रिति राद्धिमेवैतदभ्युत्तिष्ठन्त्युत्तरवेदेर्वोत्तरायाꣳश्रोणावितरं तु कृततरम् ॥११॥ यदुत्तरस्य हविर्द्धानस्य । जघन्यायां कूबर्याम्-"गन्म ज्योतिरमृता अभूमे"ति ज्योतिर्वा ऽएते भवन्त्यमृता भवन्ति य्ये सत्रमासते "दिवं पृथिव्या ऽअध्यारुहामे"ति दिवं वा ऽएते पृथिव्या ऽअध्यारोहन्ति य्ये सत्रमासतेऽ"विदाम देवानि"ति विन्दन्ति हि देवा"न्त्स्वर्ज्योति"रिति त्रिर्निधनमुपावयन्ति स्वर्ह्येते ज्योतिर्ह्येते भवन्ति तद्यदेवैतस्य साम्नो रूपं तदेवैते भवन्ति य्ये सत्रमासते ॥१२॥ ते दक्षिणस्य हविर्द्धानस्य । अधोधोक्षꣳसर्पन्ति स यथाहिस्त्वचो निर्मुच्येतैवꣳ सर्वस्मात्पाप्मनो निर्मुच्यन्तेऽतिच्छन्दसा सर्पन्त्येषाव्वै सर्व्वाणि छन्दाꣳसि यदतिच्छन्दास्तथैनान् पाप्मा नान्वत्येति त-

---

१. अश्नन्ति इति. ग. २. मा. सं. ८. ५१. ३. नियच्छन्ते इति. च.
४. जुहोति इति. च. ५-७. मा. सं. ८. ५१. ८-१२. मा. सं. ८. ५२.

स्मादतिछन्दसा सर्पन्ति ॥१३॥ ते सर्पन्ति । "[1]य्युवं तमिन्द्रापर्वता पुरोयुधा य्यो नः पृतन्यादप तं तमिद्धतं व्वज्रेण तं तमिद्धतम् । दूरे चत्ताय छन्त्सद्गहनं यदिनक्षत् । अस्माकꣳशत्रून् परि शूर व्विश्वतो दर्मा दर्षीष्ट व्विश्वत"ऽइति ॥१४॥ ते प्राञ्चऽउपनिष्क्रामन्ति । ते पुरस्तात्प्रत्यञ्चः सदः सम्प्रपद्यन्ते पश्चाद्वै प्राञ्चस्तꣳस्यमाना ऽअथै वꣳ सत्रोत्थाने ॥१५॥ ते यथाधिष्ण्यमेवोपविशन्ति । देवेभ्यो ह वै व्वाचो रसोऽभिजितोऽपचिक्रमिषां चकार स ऽइमामेव पराङ्त्यसिसृप्सदियं वै व्वाक्तस्याऽएष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाऽऽप्नुवन्त्स ऽएनानाप्तोऽभ्यावर्त्तत तस्मादस्यामूर्ध्वा ऽओषधयो जायन्तऽऊर्ध्वा व्वनस्पतयस्तथोऽएवैतेभ्य ऽएतद्वाचो रसोऽभिजितोऽपचिक्रमिषति स ऽइमामेव पराङतिसिसृप्सतीयं वै व्वाक्तस्याऽएष रसो यदोषधयो यद्वनस्पतयस्तमेतेन साम्नाऽऽप्नुवन्ति स ऽएनानाप्तोऽभ्यावर्त्तते तस्मादस्यामूर्ध्वाऽओषधयो जायन्त ऽऊर्ध्वा व्वनस्पतयः ॥१६॥ सर्पराज्ञ्या ऽऋक्षु स्तुवते । इयं वै पृथिवी सर्पराज्ञी तदनयैवेतत्सर्वमाप्नुवन्ति स्वयम्प्रस्तुतमनुपगीतं यथा नान्य ऽउपश्रृणुयादति ह रेचयेद्यदन्यः प्रस्तुयादतिरेचयेद्यदन्य ऽउपगायेदति रेचयेद्यदन्य ऽउपश्रृणुयात्तस्मात्स्वयम्प्रस्तुतमनुपगीतम्॥१७॥ चतुर्होतॄन् होता व्याचष्टे। एतदेवैतत्स्तुतमनुशꣳसति य्यदि होता न व्विद्याद्गृहपतिर्व्याचक्षीत होतुस्त्वेव व्याख्यानम्॥१८॥अथाध्वर्योः प्रतिगरः।'अरात्सुरिमे य्यजमाना भद्रमेभ्यो य्यजमानेभ्योऽभू'दिति कल्याणमेवैतन्मानुष्यै व्वाचो व्वदति ॥१९॥ अथ वाकोवाक्ये ब्रह्मोद्यं व्वदन्ति । सर्व्वं वै तेषामाप्तं भवति सर्वं जितं य्ये सत्रमासतेऽचारिषुर्यजुर्भिस्तत्तान्यापंस्तदवारुत्सताशꣳसिषुर्ऋचस्तत्ता आपंस्तदवारुत्सतास्तोषत सामाभिस्तान्यापंस्तत्तदवारुत्सतायैषामेतदेवानाप्तमनवरुद्धं भवति य्यद्वाको वाक्यं ब्राह्मणं तदेवैतेनाप्नुवन्ति तदवरुन्धते ॥२०॥ औदुम्बरीमुपसꣳसृप्य व्वाचं यच्छन्ति । व्विदुहन्ति व्वाऽएते यज्ञं निर्द्धयन्ति य्ये व्वाचा यज्ञं तन्वते व्वाग्धि यज्ञस्तामेषां पुरैकैक ऽएव

१. मा. सं. ८. ५३.

व्वाचंयमऽआस्ते व्वाचमाप्यायंस्तयापीनयायातयाम्न्योत्तरमहस्तन्वतेऽथात्र सर्वैव व्वागाप्ता भवत्यपवृक्ता ताᳬसर्वऽएव व्वाचंयमा व्वाचमाप्याययन्ति तयापीनयायातयाम्न्यातिरात्रं तन्वते ॥२१॥ औदुम्बरीमन्वारभ्यासते । अन्नं वाऽऊर्गुदुम्बर ऊर्जैवैतद्वाचमाप्याययन्ति ॥२२॥ तेऽस्तमिते प्राञ्चऽउपनिष्क्रामन्ति । ते जघनेनाहवनीयमासतेऽग्रेण हविर्द्धाने तान्वाचंयमानेव व्वाचंयमः प्रतिप्रस्थाता व्वसतीवरीभिरभिपरिहरति ते य्यत्कामाऽआसीरंस्तेन व्वाचं व्विसृजेरन् कामैर्ह स्म वै पुरर्षयः सत्रमासते ऽसौ नः कामः स नः समृध्यतामिति य्यद्युऽअनेककामाः स्युर्लोककामा वा प्रजाकामा वा पशुकामा वा ॥२३॥ अनेनैव व्वाचं व्विसृजेरन् । "भूर्भुवः स्वरि"ति तत्सत्येनैवैतद्वाचᳬसमर्द्धयन्ति तया समृद्धयाशिष ऽआशासते "सुप्रजाः प्रजाभिः स्यामे"ति तत्प्रजामाशासते "सुवीरा व्वीरै"रिति तद्वीरानाशासते "सुपोषाः पोषैरि"ति तत्पुष्टिमाशासते ॥ २४ ॥ अथ गृहपतिः सुब्रह्मण्यामाह्वयति । य्यं वा गृहपतिर्ब्रूयात्पृथगु हैवैके सुब्रह्मण्यामाह्वयन्ति गृहपतिस्त्वेव सुब्रह्मण्यामाह्वयेद्यं वा गृहपतिर्ब्रूयात्तस्मिन्त्समुपहवमिष्ट्वा समिधोऽभ्यादधति ॥२५॥ Cf का. श. ५. ८. ३.

इति माध्यन्दिनशाखीये शतपथब्राह्मणे चतुर्थकाण्डे पञ्चमप्रपाठके एकादशं ब्राह्मणम् ॥ (अ. ६. ९.)

पञ्चमः प्रपाठकस्समाप्तः ॥

कण्डिकासंख्या १२६ 125 119

(इति षष्ठोऽध्यायः)

इति ग्रहाख्यं चतुर्थं काण्डं समाप्तम् ॥ ४ ॥

(अस्मिन् काण्डे कण्डिकासंख्या ६४८)

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
Lal Bahadur Shastri National Academy of Administration Library
मसूरी
MUSSOORIE

अवाप्ति सं०
Acc. No.....

कृपया इस पुस्तक को निम्न लिखित दिनांक या उससे पहले वापस कर दें।

Please return this book on or before the date last stamped below.

दिनांक Date	उधारकर्ता की संख्या Borrower's No.	दिनांक Date	उधारकर्ता की संख्या Borrower's No.

GL SANS 294.59214
SHA V.1
125119
LBSNAA

Sans
294.5 214

अवाप्ति सं०
ACC. No.....

वर्ग सं.
Class No.....

पुस्तक सं.
Book No.....

लेखक
Author.....

Sans
294.59214

LIBRARY

शतप

LAL BAHADUR SHASTRI
National Academy of Administration
MUSSOORIE

भाग 1

Accession No. 125119

1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.

Help to keep this book fresh, clean & moving